श्रीबलभद्रत्रिपाठिविरचितः

॥ काशिकावृत्तिसारः

पूर्वार्द्ध भागः

श्रीबलभद्रत्रिपाठिविरचितः

काशिकावृत्तिसारः

❋

समीक्षात्मकदृशा सुसंपाद्य 'सुधा'ख्यटीकया सनाथितः

त्रिपाठ्युपाह्वेन श्रीचन्द्रभानुना

॥ पूर्वार्द्ध भागः ॥

श्रीगङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

प्रयागः

१९९२ ई०

Rashtriya Sanskrit Sansthan
(Under the auspices of the Ministry of Human Resources Development, Govt. of India)
New Delhi

●

Ganganatha Jha
Kendriya Sanskrit Vidyapitha
TEXT SERIES

●

General Editor
Dr. G. C. Tripathi

●

No. 31

KĀŚIKĀVṚTTISĀRA

(PART I)

by

Pt. Balabhadra Prasāda Tripāṭhī

Critically edited and embellished with a Sanskrit Commentary called 'Sudhā'

by

Dr. Chandrabhānu Tripāṭhī

ALLAHABAD
1992

राष्ट्रियसंस्कृतसंस्थानम्
(केन्द्रीयशिक्षामन्त्रालयस्याङ्गभूतम्)
देहली

—•—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला
प्रधानसम्पादकः
डॉ० गयाचरण त्रिपाठी

—•—

एकत्रिंशं प्रसूनम्

श्रीबलभद्रत्रिपाठिविरचितः

काशिकावृत्तिसारः

सुधाख्यटीकासंवलितः

(पूर्वार्द्धभागः)

—•—

सम्पादकःसुधाटीकाकारश्च
डॉ० चन्द्रभानु त्रिपाठी

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आज़ाद पार्क
प्रयागः
१९९२ ई०

प्रकाशकः
डॉ० गयाचरण त्रिपाठी
प्राचार्यः
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आज़ाद पार्क
इलाहाबाद-२

●

पुनर्मुद्रणादिकाः सर्वेऽधिकाराः राष्ट्रियसंस्कृतसंस्थानेन स्वायत्तीकृताः

●

मूल्यम्

●

मुद्रकः
शाकुन्तल मुद्रणालयः
३४, बलरामपुर हाउस
इलाहाबाद-२

FOREWORD

Kāśikāsāra is a brief gloss on the sūtras of Pāṇini in the order of Aṣṭādhyāyī. It tries basically to give the substance of the *Kāśikā-vṛtti* of Jayāditya & Vāmana (7th c.), leaving aside what is not very relevant for a young learner who is making his first acquaintance with Pāṇini. Since the work is intended to be used by the one who is being introduced to Pāṇini, the commentator omits a number of illustrations which are no more in common use and also quite a few *Vārttikas* which seek to explain the formation of words of infrequent occurences The work. thus, is an attempt of Pt. Balabhadra Tripathi to 'simplify' the Sanskrit grammar for its students by giving the most succint of information which is needed to understand the purpose and the purpurt of Pāṇinian sūtras and by avoiding discussions and disputations on controversial issues.

Pt. Balabhadra Tripathi was an ihabitant of the village Ekaḍalā situated near Kṛṣṇapur (Kishanpur) in Fatehpur Dist. of U. P. He ran a sanskrit academy in his village and trained students mainly in the Śāstras of Vyākaraṇa and Sāhitya. Since the *Kaśikāsāra* was composed around 1717 A. D., the period of his literary activity may very roughly be fixed as 1700 to 1730 A. D. Besides the present work, he is credited to have composed one more work on Sanskrit grammar commonly known in the Fatehpur region as *Balabhadrīya Sārasvata* which is again a simplified version of the Sārasvata-vyākaraṇa of Anubhūtisvarūpācārya, a work which has been by far more popular in this region than the Aṣṭādhyāyī or the Sidhāntakaumudī. This second work, manuscripts of which are still available, also deserves to be brought out.

The present edition of the Kāśikāsāra is embellished with a nice and lucid commentary called *Sudhā* by Dr. Chandrabhānu Tripathi who has also competently edited the text. The gloss *Kaśikāsāra* is so brief that it would not have been properly intelligible without this commentary. Dr. C. B. Tripathi, who has been the Head of the Dept. of Sanskrit at the Allahabad Degree College and a Research Professor in our Vidyapeetha under the *Śāstracūḍāmaṇi* scheme, felt himself to be specially called upon to undertake the present work since he not only hails from the village Ekaḍalā but is also a direct descendent of Pt. Balabhadra Tripathi. There is an unbroken tradition of the study of Pāṇinian grammar in his family for the last many generations. The mansucript of *Kāśikāsāra* which formed the basis of this edition, has also been inherited by him from his forefathers. There could, therefore, not have been a person more suitable to undertake this job than he himself and he has accomplished this task to my entire satisfaction, I must say.

One often tends to think that the study of Sanskrit grammar through the *Aṣṭādhyāyī-paddhati* or the so called 'old' system' suffered a heavy setback after the emergence of the *Siddhāntakaumudī* in the 17th century. But the present work dispells this misconception.

I hope, the publication of this easy introduction to Pāṇini shall be welcomed by both the students and the scholars of Sanskrit grammar since the *Kāśikāsāra* with *Sudhā* has something to offer to both.

Allahabad
15.3.1992

Gaya C. Tripathi
Principal

काशिकावृत्तिसारः

॥ श्रीः ॥

प्रकरण-प्रतिष्ठा

मुकुलितकञ्जकुड्मलैरभिव्यक्तः कोणेनाङ्गुलिभिरिव ।
मूर्त्त इव साममन्त्रो वाणीवीणारवो जयति ॥१॥

अन्तर्गतं यत्त्वरितं विधत्ते
जडं शयानं सुधियं प्रबुद्धम् ।
विमानितुं मान्द्यममन्ददम्भं
सारस्वतं तन्मह आश्रयामि ॥२॥

वेदविद्याषडङ्गेषु प्रकृष्टं यत् प्रकल्पितम् ।
अनादिनिधनं यत्तद् व्याकरणं विराजताम् ॥३॥

दाक्षीपुत्रसमारम्भां काशिकाकारमध्यमाम् ।
वन्देऽहं बलभद्रान्तामाचार्याणां परम्पराम् ॥४॥

अधीतिबोधाचरणप्रचारणपरायणान् ।
पितॄन् दुर्गाप्रसादाद्यान् नमस्कुर्वे गुरूँस्तथा ॥५॥

शब्दविद्यावरुणालयाः कलितकरुणालयाः पाणिनीयप्रतिज्ञाविज्ञाः, कात्यायनकृतिकृतविद्याः महाभाष्यार्णवपारीणाः शब्दब्रह्मविद्या–विद्योतितान्तःकरणाः विद्वत्तल्लजाः, त्रिमुनिमतप्रचारणपरा आचार्यवर्याः, व्याकरणशास्त्रज्ञानार्थिनश्च ।

विदितमेव सर्वेषाम्–महाभाष्योक्तदिशा 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।' प्रधानं च षडङ्गेषु व्याकरणम् । प्रधाने कृतो यत्नः फलवान् भवति । व्याकरणेष्वपि पाणिनीयसूत्राष्टकम् (अष्टाध्यायी) प्राचीनेभ्यः प्रशस्यतरम्, अर्वाचीनेभ्यश्च महत्तरं विद्यते । अत एवास्याध्ययनपरम्पराऽनवच्छिन्ना वर्तते । गच्छता कालेनैतदध्ययनपद्धतिः द्विविधा सञ्जाता । प्रथमा प्राचीना सूत्रमुखेन, द्वितीया नवीना प्रयोगमुखेन । नवीनायाः प्रचारः श्रीमतो भट्टोजिदीक्षितस्य सिद्धान्तकौमुदीग्रन्थरचनानन्तरं वृद्धिं गतः । अस्यामेव कौमुद्यां मनोरमा-शब्दरत्न-शब्देन्दुशेखरादयो व्याख्यानग्रन्थाः रचिताः ।

काशिकावृत्तिः

सत्यामपि नवीनपद्धतौ प्राचीनाया अष्टाध्यायी-महाभाष्यपरम्पराया लोपो नैवाभूत् । प्राचीनव्याकरणनाम्ना एषा पद्धतिः सम्प्रत्यपि समादृताऽस्ति । अस्यां पद्धतौ वामनजयादित्यरचिता काशिकावृत्तिः पाणिनिसूत्राष्टकमुपजीव्य तस्य व्याख्यानभूता विलसतितराम् । विद्वत्सम्प्रदायानुसारम् अस्य ग्रन्थस्य रचनां विक्रमस्य सप्तमशताब्द्यां वामन-जयादित्यनामानौ विद्वद्वरावकुरुताम् । इमौ पृथक् पृथक् समवेतौ वेमं ग्रन्थं रचितवन्ताविति सन्दिग्धो विषयः । साम्प्रतं महाभाष्यस्य गूढाशयं विवृण्वानानां कुणि-श्वोभूति-देवनन्दि-दुर्विनीतप्रभृतीनां वृत्तिग्रन्थेषु नाममात्रावशेषेषु इयमेव काशिकावृत्तिः दुर्बोधविषयप्रतिपादनपूर्वकम् उदाहरण–प्रत्युदाहरणदानेन शङ्कासमाधानं कुर्वाणा उभयोरध्यापकाध्येतृवर्गयोः भृशमुपकरोति । काश्यां निर्माणेनास्या वृत्तेः काशिका इति नाम देशतः प्रसिद्धम् ।

वृत्तिः = शास्त्रप्रवृत्तिः इति महाभाष्यकारः । पाणिनिसूत्राणां विवरणम् इति चूलिभट्टिप्रभृतयः (साम्प्रतमनुपलब्धरचनाः) आचार्याः । सूत्रार्थप्रधानो ग्रन्थो वृत्तिः इति कुणिप्रभृतयो वृत्तिकाराः । काशिकावृत्तिकारस्येदं लक्षणमस्ति—

इष्टयुपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ॥

एवं वृत्तेः चत्वारि वैशिष्ट्यानि सन्ति—

(१) **इष्ट्युपसंख्यानम्** = सूत्रेणासङ्गृहीतस्य लक्ष्यस्य सङ्ग्रहः।

(२) **शुद्धगणत्वम्**—गणपाठे प्रक्षिप्तमंशं दूरीकृत्य प्रामाणिकशब्द-निवेशः।

(३) **विवृतगूढसूत्रार्थत्वम्** = सूत्रार्थस्य प्रधानतया विवेचनम्। इदमेव वृत्तिलक्षणं मनसि निधाय विद्वांसः मन्यन्ते—

सूत्रार्थाभिधानं वृत्तिः।

(४) **व्युत्पन्नरूपसिद्धिः**—प्रयुज्यमानरूप-सिद्धिप्रक्रिया।

ग्रन्थे वस्तुनिर्देशात्मकं मङ्गलाचरणं विद्यते—

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः॥

इदं प्रतिभाति—यथा महर्षिः पाणिनिः पूर्वाचार्याणां शब्दशास्त्र-विषयकानि मतानि संगृह्य स्वबुद्धिबलेनोपज्ञाय च माहेश्वर-सूत्रसाहाय्येन **अल्पाक्षरम्, असन्दिग्धम्, सारवत्, विश्वतोमुखम्, अस्तोभम्, अनवद्यञ्च सूत्राष्टकं** विरच्य व्याकरणविद्यार्थिनां भृशमुपकृतवान्। सूत्रविरचन-कालादेवास्य सूत्राष्टकस्य विवरणात्मक-वृत्ति ग्रन्थानां निर्माणं प्रारब्धम्। पश्चादाचार्यकात्यायनप्रणीतानां वार्तिकानामाक्षेपसमाधानपरं विवरणं **महाभाष्यं** महर्षिपतञ्जलिना निरमायि। तदनन्तरम् **धातु-प्रक्रियाग्रन्थाः, नाम = प्रातिपदिकम्, तस्य सङ्ग्रहग्रन्थाः गणपाठरूपाः।** आदयः = **शिक्षा-उणादि-फिट्सूत्रप्रभृतयो** रचिताः। तेषु ग्रन्थेषु एवं सम्पूर्णं **तन्त्रम्** = व्याकरणम्, (तन्त्र्यन्ते = व्युत्पाद्यन्ते शब्दा अनेन) व्याकरणस्य प्रधानं सिद्धान्तवचनं वा (तन्त्रं प्रधाने सिद्धान्ते तन्तुवाये परिच्छदे इति निघण्टुः) **विप्रकीर्णम्** = **अनेकत्र** विक्षिप्तम्। तस्य यः सारः = उत्कृष्टोंऽशस्तस्य सङ्ग्रहः = एकत्र व्यवस्था क्रियते। अथवा सारम्—निर्दुष्टम् सङ्ग्रहः—सम्यक्तया लक्ष्य-लक्षणयोर्ज्ञानम् (सम्यग् गृह्यते लक्ष्यं लक्षणञ्चानेनेति सङ्ग्रहः सारञ्चासौ सङ्ग्रहश्चेति कर्मधारयसमासः।) अथवा सारः परिपूर्णः सङ्ग्रहः संक्षेपः व्याकरणस्य सिद्धान्ततत्त्वानामेकत्र व्यवस्थितिस्तेषां सुखावबोधायेति भावः।

एवं लक्षणज्ञानपूर्वकलक्ष्यावबोधार्थिनामीप्सितं साधयन्तीऽयं काशिका-वृत्तिः अध्ययनाध्यापनयोः समाश्रीयमाणाऽपि कालक्रमेण सामान्यबुद्धि-मतां दुर्बोधा जातेति विचार्य **न्यास-पदमञ्जरीकारौ** विद्वद्वरौ **जिनेन्द्र-हरदत्तौ**

गूढार्थप्रकाशनेन तां सुग्राह्यां व्यधत्ताम् । क्रमशः शास्त्रार्थवर्जं शब्दव्युत्पत्तिमात्रं जिज्ञासूनां कृते वादग्रन्थांशः नात्यादृतः सञ्जातः, इति शब्दसिद्धये त्वरमाणानां छात्राणां कृते सारसङ्ग्रहरूपाया अप्यस्याः वृत्तेः सारं कर्तुं कश्यपगोत्रीयरामकृष्णतनूजः सिद्धसारस्वतमन्त्रप्रभावादाविर्भूतशब्दब्रह्मप्रकाशो **बलभद्रः** प्रादुर्भूतः । अस्य जन्मस्थान-स्थितिकालविषयकं यथाश्रुतं ज्ञानमत्र निबध्यते । महीयसि जन्ममहीरजसि शक्तिरनल्पाऽन्तर्लीना काले विलसति—

एकडला

भारतवर्षस्योत्तरप्रदेशनामके राज्ये प्रयागतः पश्चिमे दिग्विभागे त्रिंशत्क्रोशेषु (१०० कि० मी०) फतेहपुर-जनपदे यमुनाया उत्तरे कूले स्थिता **एकडलानगरी** (सम्प्रति ग्रामः) त्रिचतुरशताब्दीभ्यः प्राक् आढ्यतमा नगरी आसीत् । तदानीन्तनैर्विद्वद्भिः अस्या नगर्याः नाम्नो व्युत्पत्तिचतुष्टयी इत्थं कृता—

(१) **एकोऽद्वितीयो डलः** = शिवो गह्वरेशाख्यः प्रधानदेवो यस्यां सा नगरी ।

(२) **एका–अद्वितीया** = श्रेष्ठा **डला–महती** = महद्गुणयुक्ता या पुरी सा ।

(३) **एका** = प्रधाना **डरा** = **शाखा** यस्मिन् यस्य वा स **वटः प्रधानो** यस्मिन् **तीर्थे** = **जलावतारे** तस्मिन् **स्थाने** या पुरी **वासिता सा** ।

(४) **एकम् डरम्** = भयं यस्यां कालान्नान्यत् सा पुरी । अस्य विग्रहचतुष्टयस्य समर्थकानि श्लोकवाक्यानि तैरेवोद्धृतान्येतानि सन्ति—

डलः शिवो डलं लोष्ठं डला च महती पुरी ।
डरा शाखा च विज्ञेया डरं भयमिति स्मृतम् ।।

रलयोर्डलयोरभेदप्रसिद्धिः । तथा—

निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ । निपानम् = जलावतारः । आगमः = शास्त्रम् । ऋषिजुष्टजलं तीर्थाख्यम् ।

वैयाकरणशिरोमणिः आचार्यबलभद्रः

अस्मिन् शिवालयवलयिते दुर्गामन्दिरमण्डिते मारुतनन्दननन्दिते राम-कृष्णभक्तिभाविते तरणितनूजा-पवनपाविते सरोवर-कूप-वापीपरिक्षालिते वन्योपवनवाटिकाविराजिते उर्वराराजिते कविगुरुसुधीसेविते राजन्वति श्रीलसनाथे श्रुतशुभ्रे श्रेष्ठिस्थविष्ठे शिल्पिप्रतिख्याते चारणचर्चिते नगरे (साम्प्रतिकग्रामे) प्रतिष्ठितपण्डितमण्डलमुकुटमणिभूता विद्वत्त्रयी स्वरचित-ग्रन्थात्मना सम्प्रत्यपि विद्वत्समवाये विराराजतितराम् । अस्यां सन्ति विद्वत्तल्लजाः रामकीर्तिकुमुदमालाकारः कविवरस्त्रिविक्रमः, वैयाकरणशिरो-मणिः बलभद्रः, विद्यादीधितिदीपितो महापण्डितो दुर्गाप्रसादश्च ।

अस्मिन् विद्वत्त्रये महाकवेस्त्रिविक्रमस्य रामकीर्तिकुमुदमाला काव्यं १९७९ ख्रीष्ट वर्षे प्राकाश्यं नीतम् । इदं संस्कृतसाहित्ये चारणकाव्य-परम्परां प्रतिष्ठापयति । अस्मिन् काव्ये महापण्डितेन दुर्गाप्रसादेन महत्त्वपूर्णा टिप्पणी कृताऽसीत् । तस्या एव बलेनायं काव्यग्रन्थः बोद्धुं शक्योऽभवत् ।

महापण्डितो दुर्गाप्रसादः सामवेदिब्राह्मणकुले जन्मालभत । अनेन व्याकरण-साहित्य-ज्यौतिषकर्मकाण्डविषयेषु ग्रन्थाः लिखिताः टीकाश्च विहिताः । अस्य जातशेखरः ज्यौतिषग्रन्थः १९८३ ख्रीष्टवर्षे प्रकाशितः । अयम् अध्ययनपरायणोऽध्यापकवर्यो ग्रन्थसङ्ग्राहकः कुलपतिश्चासीत् । काशिकावृत्तिसार ग्रन्थः अस्यैव पुस्तकागारे सुरक्षित आसीत् । अनेन महापण्डितेन रचिताः कर्मकाण्डविषयका अनेके ग्रन्थाः प्रकाशन-मपेक्षन्ते ।

पण्डितपरम्परात एवमनुश्रूयते यदयं बलभद्रः महाकवेस्त्रिविक्रमस्य भागिनेय आसीत् । शैशवे नाभ्यस्तविद्यं विद्वत्समवाये विमानितं पुत्रं दृष्ट्वा अस्य माता स्वभ्रातरं त्रिविक्रमं प्रार्थितवती तस्य विद्या-प्राप्तये । भागिनेयं विद्वांसं विदधातुकामः कविः तम् एकस्मिन् कक्षे निरुद्ध्य तं च पिहितद्वारं विधाय 'भगिनि ! अहं सारस्वतं मन्त्रमनुष्ठातुं यमुनाकूलं गच्छामि । अयं बलभद्रः कक्षाभ्यन्तरे भयाक्रान्तः सन् भवतीमाकारयिष्यति परं नैव कक्ष उद्घाटनीयः । अहमेव परावृत्य विद्वांसमेनं कक्षान्निर्ग-मयिष्यामि ।' इत्युक्त्वा तथान्वतिष्ठत् । गते तस्मिन् प्रवृत्ते रात्रिमुखे बालो बलभद्रः 'रक्ष मां व्याघ्रात्' इत्यसकृत् सपरिदेवनं रोदितुं प्रारभत । तेन दयामयी तस्य माता कक्षद्वारमुद्घाटितवती । परं नैव दृष्टस्तत्र व्याघ्रादिः । तदानीमेव मन्त्रानुष्ठानं समाप्य समागतस्त्रिविक्रमः कविः ।

कक्षान्निर्गतं तं दृष्ट्वाऽवोचत्—'भगिनि । विद्वद्वरेण्यस्ते पुत्रो गेहेशूरो भविष्यति ।'

अयं बलभद्रः कश्यपगोत्रजस्य सामवेदिनो कृष्णभक्तस्य श्रीरामकृष्णस्य पुत्र आसीदिति काशिकावृत्तिसारस्यान्ते लिखितेन श्लोकेन ज्ञायते—

श्रीमत्कश्यपवंशपद्मसरसो हंसः प्रशंसाकरः
कंसारातिपरायणो विजयते श्रीरामकृष्णः कृती ।
तत्पुत्रो रघुधीरवीरचरणाम्भोजातसेवी बलः
सारं प्रोद्धृतवान् सुखाय पठतां यः काशिकान्तर्गतम् ।

काशिकासारग्रन्थस्य रचनाकालः संवत् १७७४ अस्ति । यथाऽयं श्लोकः ग्रन्थान्ते लेखकेन तस्य शिष्येण रचित उल्लिखितोऽस्ति ।

वेदर्षिराजर्षियुतेऽब्दे चैत्र्यां गुरुवासरे ।
श्रीरामप्रस्तधीश्चेमं बलभद्रोऽलिखत् स्वयम् ॥

महाकवेस्त्रिविक्रमस्य रामकीर्तिमाला-निर्माणसमयः संवत् १७३१ अस्ति । शब्दविद्यापारंगतः अयं सुधीवरः अष्टादशतमशताब्द्यामासीदिति ज्ञायते ।

कविवरस्य त्रिविक्रमस्य विद्यागुरुः श्रीमान् धरणीधर आसीत् । यथोक्तम् रामकीर्तिकुमुदमालायां टिप्पणीकारेण महापण्डितदुर्गाप्रसादेन-इति श्रीगुरुधरणीधरचरणाराधन...................... । शब्दविद्याविशारदो बलभद्रोऽपि धरणीधरस्य स्तुतिं कृत्वा सुखं प्रार्थयत-

देवाचार्य इवार्यकार्यकुशलो धैर्यैकधुर्योऽर्यमा,
भ्रान्तध्वान्तविनाशनाय जगतामर्यस्य चर्यापरः ।
कार्याकार्यविचार्यवैदिकविधिर्दद्यात्स आर्यः सुखम्
धीरः श्रीधरणीधरो विजयते सत्सूरिवर्यो भुवि ॥

व्याकरणविद्यापारङ्गतोऽयं साहित्यशास्त्रस्यापि तत्त्ववेत्ता आसीत् । कृष्णभक्तस्य पितुरयं पुत्रो रामभक्तो बभूवेति काशिकावृत्तिसारस्यान्तेऽनेन विरचितेन काव्यगुणगरिममण्डितेन श्लोकद्वयेन सुस्पष्टं भवति—

प्राणायामपरम्पराजितमरुत्सम्मार्जनीमार्जिते,
निर्धौते सकलेन्द्रियाहृतिभुवा श्रद्धासुधाधारया ।
सन्तः स्वच्छतरेऽन्तरे कथमहो द्रक्ष्यन्ति शुक्लं तत,
श्रीकृष्णो जयति स्वभावसुभगां बिभ्रत्तनुं राघवः ॥१॥

बालक्रीडापूतगोपालवंशः शाम्यत्साधुस्वान्तकासारहंसः।
मञ्चोदञ्चत्केशनिर्धूतकंसः कृष्णो जीव्याद्वृष्णिवंशावतंसः ॥२॥

पूर्वस्मिन् श्लोके भगवतो रामस्यापरस्मिन् भगवतः कृष्णस्य महिमा वर्णितोऽस्ति।

अस्य विद्वन्मूर्धन्यस्य प्रतिष्ठा एकडलानगरं परितः प्रसृताऽऽसीत्। कृष्णपुरस्थस्याग्निहोत्रिणो हरदत्तस्य ग्रन्थालये चचींडाग्रामवासिना विदुषा जगन्नाथेन रचितः श्लोकोऽस्य वैदुष्यं वंशादि च प्रमाणयति—

शुद्धव्याकरणादिशास्त्रविपिनासच्छास्त्रदन्तावल
प्रत्यर्थी बलभद्रशब्दविदितश्रीमन्नृसिंहोऽपरः।
पाणिन्यादिसरस्वतीविहितसत्सूत्रव्रजग्रन्थकृद्।
विप्रत्वप्रवरत्रिपाठिकुलभृच्छ्रीरामकृष्णोद्भवः॥

इदमपि प्रथितमस्ति विद्वत्कुले यदयं वयसोऽन्तिमे भागे काशीमधिवसन् तत्र श्रीराममन्त्रजपपरायणः शिवसायुज्यमवाप। श्री बलदेवोपाध्यायकृते काशी की पाण्डित्यपरम्परा नामके ग्रन्थे सप्ताशीतितमे पृष्ठे एकोनविंशतितमे क्रमे बलभद्रनामा विद्वान् उल्लिखितो वर्तते।

महापण्डितदुर्गाप्रसादीयग्रन्थागारे अनेन सुधीवरेण निर्मितौ द्वौ ग्रन्थौ साम्प्रतम् उपलब्धौ स्तः। **सारस्वतम्** (बलभद्रीयसारस्वताख्यया प्रसिद्धम्)। अस्मिन् ग्रन्थे सरलतमैः सूत्रैः शब्दज्ञानं कारितम्। अत्रत्याश्छात्राः पाणिनीय-व्याकरणे प्रवेशाय पूर्वमिममेव व्याकरणग्रन्थमध्यैयत।

काशिकावृत्तिसारः

अयं ग्रन्थः शब्दसिद्धिमात्रजिज्ञासूनां शब्दविद्यार्थिनां कृते रचितः प्रतीयते। लक्षणमुखेन शब्दज्ञानायास्योपयोगिता सन्देहरहिताऽस्ति। अयं काशिकावृत्तिसारो यथार्थनामा काशिकावृत्तेः सारः = उत्कृष्टोंऽशो वर्तते। यतो हि जिज्ञासोरीप्सिततमा शब्दसिद्धिरेव। यद्यपि काशिकाग्रन्थोऽपि सारसङ्ग्रह एव। परन्तु तत्र सार शब्दो निर्दोषतोद्भावकः। शास्त्रस्य सारस्य = परिपूर्णग्रन्थसन्दर्भस्य सङ्ग्रहः कृतः (शब्दव्युत्पत्त्यर्थं यावान् ग्रन्थसन्दर्भोऽपेक्षितः स सारः) स एवोत्कर्षः। तस्याप्ययं सारः उत्कृष्टतमः अंशः चन्दनसारवत्। तदाह—सारशब्दः उत्कर्षे पुंल्लिङ्गो न्यायादनपेते नपुंसकम्। ग्रन्थान्ते लिखितपद्यानुसारम् आचार्यो बलभद्रः काशिकावृत्तिसारस्योद्धरणं कृतवान् = उत्कृष्टमंशं

समचिनोत् इत्यर्थः । उत्कर्षश्चात्र गूढार्थायाः काशिकावृत्तेरध्ययनात्परा-जितान् छात्रान् सुखेन शब्दज्ञानं कारयितुं तेषां पाणिनीयसूत्राष्टकाध्ययने प्रवृत्तिरेव । श्रीमद्भागवतेऽस्मिन्नेवार्थे सारस्य प्रोद्धरणमुक्तम्–

भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः।
अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया । ब्रूहि नः (भाग० १/१/११)

काशिकाया व्याख्याता हरदत्तोऽपि उज्जहार पदमञ्जरीमसौ शब्दशास्त्रसहकारपादपात् । तदर्थम् आचार्यवरेण निर्मितेऽस्मिन् ग्रन्थे निम्न-लिखितानि वैशिष्ट्यानि सन्ति–

(१) ग्रन्थे वादांशः पूर्णरूपेणोपेक्षितः । तेनाभीष्टशब्दव्युत्पत्तिसाधक एव वाक्यराशिरध्येतव्यो भवति शब्दविद्यार्थिभिः ।

(२) बहून्यप्रयुज्यमानान्युदाहरणानि परिहृतानि ।

(३) ग्रन्थकलेवरवृद्धिभयादप्रयुक्तशब्दसाधकानि वार्तिकान्यपि न समावेशितानि ।

(४) छात्राणां सुखबोधाय सिद्धप्रयोगा एवोपात्ताः । सूत्राणामुप-योगः शब्दसिद्धयर्थमेव कृतः न तु तेषां भाष्यार्थम् । अत एव प्रत्युदाहरणा-न्यपि प्रायः नोल्लिखितानि ।

(५) अयं ग्रन्थश्छात्राणामुपदेशाय गुरोश्च ज्ञानवितरणाय माध्यम-रूपो विरचितः । तेन मौखिकज्ञानप्रक्रियायाः स्थिराधारेऽस्मिन् शिष्याणां कृते गुरोर्वाचनस्याप्यवकाशो वर्तते ।

(६) सूत्राष्टकनिर्मात्रे महर्षये पाणिनये नमस्काररूपेण शिक्षाकार-कृतेन श्लोकद्वयेनैव मङ्गलाचरणं विहितम् ।

सुगमसरण्या लक्षणज्ञानपूर्वकलक्ष्यसिद्धिकरणाय निर्मितस्य काशिका-वृत्तिसारग्रन्थस्य पर्णसंख्या एकनवतिः (९१) अस्ति । प्रतिपृष्ठं मध्य-भागे स्थूलाक्षरैः सूत्राणि परितश्च लघ्वक्षरैर्वृत्तिर्लिखिताऽस्ति । सूत्रसंख्या-निर्धारणाय प्रत्यध्यायं प्रतिपादं प्रतिविंशतिसूत्रानन्तरं १, २.........प्रभृतयः संख्याः अन्ते च सूत्रसंख्या निर्दिष्टा वर्तते यथा प्रथमाध्यायस्य प्रथमपादस्य समाप्तौ सूत्रसंकलनमेवमस्ति—

वृद्धिराद्यन्तवदव्ययीभावः प्रत्ययस्य लुक् पञ्चदश (७५)—

वृद्धिरादैच, आद्यन्तवदेकस्मिन्, अव्ययीभावः इत्येतेभ्य आरभ्य विंशतिः सूत्राणि प्रत्ययस्य लुक्श्लुलुपः इत्यत आरभ्य पञ्चदश इति संकलनेन (२०×३+१५) ७५ सूत्राणि सन्ति । अध्यायान्ते च सम्पूर्णाध्यायस्य संकलिता सूत्र-संख्या चोल्लिखिता वर्तते ।

पर्णेषु क्वचिद् रिक्ते स्थले प्रारम्भे, अन्ते वा भगवते रामाय कृष्णाय वा नमस्कारार्थकानि श्रीकृष्णो जयति, श्रीरघुवंशचूडामण्डनाय दाशरथये रामाय नमः इत्यादीनि लिखितानि वाक्यानि शब्दशास्त्राचार्यस्य बलभद्रस्य भक्तिभावं द्रढयन्ति ।

सुधा टीका

काशिकावृत्तिसारस्याध्ययने क्रियमाणे, छात्राणाञ्चेदानीं व्याकरणे मनोऽभिनिवेशे समीक्ष्यमाणे लक्षणैकचक्षुष्कानां विद्यार्थिनां कृते सुगमरीत्याऽपि निर्मित एष काशिकावृत्तिसारोऽल्पसारतां गतः प्रतीतः, लक्ष्यैकचक्षुष्कास्तु पूर्वमेव लक्षणज्ञाने मन्दादराः सन्ति । एवं सारमप्येनं सुग्राह्यं विधातुं सुधासेचनमत्रानिवार्यं जातम् । अपि च गुरु-शिष्यमध्ये उपनिषद्रूपोऽयं सारग्रन्थः सम्प्रति तयोर्दविष्ठतया प्रश्नोत्तरैर्ग्रन्थस्यात्मसात्कर्तुमशक्यत्वात् वृत्तिवाक्यानामर्थनिर्देशोऽप्यावश्यकः सञ्जातः । अनया सुधा-टीकया काशिकावृत्तिसारग्रन्थस्य ग्राह्यता विविधा कृताऽस्ति । यथा—

(१) यस्य सूत्रस्य वृत्तिर्न लिखिता पूर्वसूत्राश्रितैव सम्मता । तत्र स्पष्टार्थं सा योजिता (दीधीवेवीटाम् १।१।६) ।

(२) दुर्बोधपदानां वाक्यानाञ्च स्पष्टतरोऽर्थः कृतः । (अणुदित्सवर्णस्य चाप्रत्ययः १।१।६९) ।

(३) वृत्तौ नोल्लिखितान्युदाहरणानि पूरितानि । (रुदविदमुषग्रहिस्वपिप्रच्छः संश्च २।१।८) ।

(४) वृत्तौ नोपात्तानि वार्तिकानि प्रयोगार्हशब्दसाधकानि मत्वा परिवृंहितानि ।

(५) वैदिकेषूदाहरणेषु स्वरैरङ्कनं विधाय सूत्र-वृत्त्योः सार्थकता प्रक्लृप्ता ।

(६) ग्रन्थस्याञ्चलभागाः कुत्रचिदस्पष्टलेखाः सन्ति । प्रकाशितकाशिकावृत्तिग्रन्थसाहाय्येन ते ऊहिता व्याख्याताश्च ।

ग्रन्थकलेवरवृद्धिभिया लेखन्याः परिधौ नायातो भावशब्दराशिः

गुरुकृपायां निहितस्तत एव विनीतैर्विद्यार्थिभिः गुरुसेवया प्राप्यः । अनया क्रियानुपकारो भविताऽध्यापकाध्यायिनामित्यत्र त एव प्रमाणम् ।

सम्पादन-पदवी

काशिकावृत्तिसार ग्रन्थः प्राचीनपरिपाट्यां लिपिबद्धः कृतः । महापण्डितदुर्गाप्रसादग्रन्थागारात् अस्यैक एव पाण्डुलेखो ग्रन्थरूप उपलब्धः । सोऽपि क्वचित् अञ्चलेषु अस्पष्टाक्षरोऽस्ति । अस्मिन् ग्रन्थे द्विविधे लिपी दृष्टिगोचरे भवतः, तयोरन्यतरस्यां क्वचित् च्युतिरपि लक्ष्यते । अस्पष्टानां विस्पष्टतायै च्युतानाञ्च शुद्धतायै द्वौ काशिकावृत्तिग्रन्थौ समाश्रितौ—

(१) न्यास-पदमञ्जरी व्याख्यासहिता काशिकावृत्तिः (सम्पादकौ स्वामी द्वारिकादासः शास्त्री, पण्डितकालिकाप्रसादः शुक्लः । प्राच्य भारतीय प्रकाशन वाराणसी १९६५) ।

(२) काशिका (सम्पादकः डा० आर्येन्द्र शर्मा संस्कृत–अकादमी उस्मानिया विश्वविद्यालयः हैदराबाद प्रकाशन वर्षः १९६९ ख्रीस्ताब्दः) ।

सम्पादने, सुधाटीकाकरणे, परिशिष्टयोजने च मया विद्यावृद्धस्य बन्धुमूर्धन्यस्य गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठप्राचार्यवर्यस्य डॉ० गयाचरणत्रिपाठिनः प्रदर्शितदिशां पुरस्कृत्य स्वान्तःकरणवृत्तिः प्रमाणं कृतं । विषयस्यगाम्भीर्यं मम चामन्दं मान्द्यं विचार्य सुधीजनस्य गुणावगुणसमीक्षणेक्षणाभ्यामस्य दर्शनाय सौकर्याय च कतिचिद् वैशिष्ट्यानि स्फोटयन्ते—

(१) ग्रन्थे सूत्र-वृत्ति-सुधाक्रमो विद्यते । तेनाध्ययनार्थमेकत्रैव विषयवस्तु प्राप्तुं शक्यते ।

(२) सूत्र-वृत्ति-सुधार्थं भिन्नानि मुद्रणाक्षराणि योजितानि । व्याख्येयोंऽशोऽपि पृथक् कृष्णाक्षरैर्मुद्रितः ।

(३) पाण्डुलेखः प्रायो विरामादिरहित एव । यथास्थानं विरामार्धविराम-प्रश्नचिह्न-उद्धरणचिह्नादीनां निवेशः कृतः ।

(४) 'सन्धयो विवक्षाधीनाः' इति रीत्या क्वचिदेव संहितानि पदानि । प्रायः सुखावगमार्थं सन्धिरहिता एव प्रयोगाः सन्ति ।

(५) वैदिकेषूदाहरणेषु प्रक्रियाबोधाय स्वरज्ञानाय च स्वरैरंकनं विहितम् ।

(६) प्रारम्भे विषयसूची निबद्धा येनाध्येतव्यविषयविशेषज्ञानाय तस्याधिगमः सुगमः स्यात् ।

(७) अन्ते अष्टाध्यायी, अकारादिक्रमेण सिद्धान्तकौमुदीसूत्राङ्क-सहिता सूत्रानुक्रमणिका, गणपाठः इति परिशिष्टं योजितम् ।

मनोयोगेन सम्पादिते सुधा-व्याख्यासनाथे काशिकावृत्तिसाराख्येऽस्मिन् ग्रन्थे त्रुटिराहित्यं तु नाकलयामि । मतेर्मान्द्यात्, मनसोऽनवहितत्वात्, शरीरस्थितेः सदा नैकरूपत्वात्, शब्दविद्याया ब्रह्मविद्यावदतिगूढत्वात्, अध्ययनाध्यवसाययोरनैरन्तर्यत्वात्, पदसाधुत्वलक्षणस्य पाणिनीयमहा-शास्त्राम्भोदेर्दुरवगाहत्वात्, मुद्रणादावपि साधु समीक्षणाशक्यत्वात् वैयाकरण-खसूचेर्ममास्मिन् सुधाख्ये निबन्धे त्रुटयः सम्भाव्याः सन्ति । विहङ्गम-दृष्टया पुनरीक्षणे ज्ञातानां तासामन्ते शुद्धरूपाणि दत्तानि ।

मन्ये, गुणेष्वेव दत्तादरा अध्येतारः स्वयमेव दोषानविगणय्य मनीषितं प्राप्तुं प्रयतमाना भविष्यन्ति । यथोक्तं भट्टपादैः—

तद्विद्वांसोऽनुगृह्णन्तु चित्तश्रोत्रैः प्रसादिभिः ।
सन्तः प्रणयिवाक्यानि गृह्णन्ति ह्यनसूयवः ।

विश्वसिमि, यदेषा काशिकावृत्तिसारग्रन्थस्य सुधा टीका अनया संवर्धितस्यास्य च पूर्वार्ध-भागः अध्येतॄणाम्, गवेषयितॄणाम्, अध्यापकानाम्, आचार्याणाञ्च मुदे भविष्यति । यथा कथितम् श्रीमद्भागवते—

गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् ।
मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ॥

उपचार-चर्या

विद्याबलस्य बलभद्रस्य काशिकावृत्तिसारग्रन्थे सुधां टीकामारभ-माणस्य दुर्धियो मम साध्य-सिद्धौ दर्शन-भेदेन समवायि-निमित्तान्यतर-कारणपदवाच्यः शब्दात्मा परमात्मा अन्यथासिद्धिशून्यत्वे सति कार्योत्पत्ति क्षणावच्छेदेन नियमेन विद्यमानवृत्तित्वात् सर्वकारण-कारणत्वाच्च सर्वतो-भावेन वन्दनीयः ।

मान्द्यध्वान्तविनष्टदृशां मादृशां पाणिनीय-प्रविविक्षूणामग्रे येषां ग्रन्थमणयः प्रकाशपुञ्जप्रसारकाः सन्ति ते षडङ्गमुख्ये विशिष्टवैखरीमुखाः शब्दशास्त्राचार्याः पूर्वसूरयः सर्वथाऽभ्यर्हणीयाः ।

अस्मिन् प्रस्तावे काशिकावृत्तिकर्तारावाचार्यौ वामनजयादित्यौ टीकाकारौ जिनेन्द्रहरदत्तौ, काशिकावृत्तिसम्पादकाः विद्वद्वर्याः काशिकावृत्तिसाररक्षापुण्यभाजो महापण्डितदुर्गाप्रसादाद्यास्तद्वंश्याश्च ससम्मानं संस्मरणीयाः ।

केन्द्रीयमानवसंसाधनविकासमन्त्रालयस्याङ्गभूतेन नवदिल्लीस्थ–राष्ट्रिय-संस्कृतसंस्थानेन 'शास्त्रचूडामणि-आचार्य' पदेन विभूषितः सन्नहं १९८६ ख्रीष्टाब्दस्य फेब्रुअरी मासस्य प्रथमतिथितः १९८९ ख्रीष्टाब्दस्य जनुअरी मासस्यान्तिमतिथिं यावत् त्रीणि वर्षाणि प्रयागस्थे श्रीगङ्गानाथझा-केन्द्रीयसंस्कृतविद्यापीठे लम्भितपद-सत्क्रियोऽभूवम् । तत्र व्याकरण-साहित्य-विषये बुभुत्सुवर्गं यथामति यथाश्रुतं विदितं विदधानो विद्यापीठस्य प्रध्याप्राचार्येण पाण्डुलिपिप्रतिष्ठितस्याप्राप्तप्रसारस्य काशिकावृत्तिसारस्य टीकापूर्वके सम्पादने विनियोगेनापि सम्मानितो जातः । वर्षत्रयेणैव च सुधा-संवलितस्यास्य ग्रन्थस्य समुद्धरणं निर्व्यूढम् । कालक्रमेण चानेन संस्थानेन ग्रन्थस्य प्रकाशनार्हतां निश्चित्य मम श्रमः साफल्यं नीतः । ग्रन्थस्य पूर्वार्धं प्रकाशितं पश्यता, उत्तरार्धं च प्रकाशितं द्रक्ष्यता मया संस्थानस्य सम्मान्य-निदेशकाद्यानामधिकारिणामुपकारभारः सादरमुररीकरणीयः ।

ग्रन्थमिममक्षराक्षय्यं विधातुं समीहमानमनसः सम्पादनप्रकाशन-पुरोधसः अनवद्यविद्यावदाताः शीलेन लक्षिताः श्रिया संयुताः गङ्गानाथझा-केन्द्रीयविद्यापीठप्राचार्याः डॉ० गयाचरणत्रिपाठिमहाभागाः सप्रश्रयं साधु सभाजनीयाः ।

ग्रन्थस्य स्वरूप-सौन्दर्यविकासाय सततं प्रयतमानचेताः शाकुन्तल-मुद्रणालयस्याधिपतिः स्वसहयोगिसमेतः श्रिया सनाथः उपेन्द्रनाथः स्वाशीर्व-चनैर्वर्धनीयः ।

अन्ते च रचितोपचारेण मया विधीयमानोपहारविसर्गा व्याप्यमानशब्द-सर्गा वितीर्यमाणत्रिवर्गा भगवती दुर्गा समाश्रयणीया ।

महाशिवरात्रिः संवत् २०४८

विदुषां वशंवदः

चन्द्रभानुः



स्व० आचार्य पं० बालकराम त्रिपाठी
(गुरु-पूर्णिमा सन् १६०० —आश्विन-शुक्ल ४ सन् १६६१)

स्वधा स्वादीयसी सुधा

यस्याः प्रेयःपयो मे मुखपतितमभूज्जीवनाधारहेतुः
यस्या आसीत् सुगूढो मयि विगुणसुते प्रीतिभावातिरेकः ।
स्वर्गस्था या सुशीला सुपथमनुगता संस्मृतेर्दिव्यदेहा
तस्यै मात्रे *शिवायै* लसतु शुभसुधा काशिकावृत्तिसारे ॥१॥

●

येनाहं जातमात्रोऽतनुसुलभकृपादृष्टिपात्रं कृतोऽस्मि
यस्मात्काव्यं सकोषं निपुणमधिगतं शैशवारम्भ एव ।
स्वर्यातस्यापि यस्यावकलितकरुणा विद्यते मय्यजस्रा
तस्मै *पित्रे* प्रतिष्ठेत् स्वदनसुखसुधा काशिकावृत्तिसारे ॥२॥

●

मात्रा सह *शिवादेव्या* स्वर्गीयाय कृतात्मने ।
पित्रे *बालकरामाय* स्वधा स्वादीयसी *सुधा* ॥३॥

काशिकावृत्तिसारः

विषयानुक्रमणिका

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥१॥

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥२॥

विषयवस्तु-विवरणम् पृष्ठानि

प्रथमाध्यायस्य प्रथमः पादः १—२४

मङ्गलाचरणम्, चतुर्दश माहेश्वरसूत्राणि, शास्त्रप्रयोजनम्, प्रत्याहाराः, वृद्धिसञ्ज्ञा, गुणसञ्ज्ञा, गुण-वृद्धिस्थानिनियमः, गुण-वृद्धिप्रतिषेधः, संयोग सञ्ज्ञा, सावर्ण्यनिषेधः, अनुनासिक सञ्ज्ञा, सवर्ण सञ्ज्ञा, प्रगृह्य सञ्ज्ञा, घु सञ्ज्ञा, आद्यन्तवद्भावः, घ सञ्ज्ञा, सङ्ख्या सञ्ज्ञा, निष्ठा सञ्ज्ञा, सर्वनाम सञ्ज्ञा, अव्यय सञ्ज्ञा, सर्वनामस्थान सञ्ज्ञा, विभाषा सञ्ज्ञा, संप्रसारण सञ्ज्ञा, आगमादेश स्थाननिर्देशः, स्थानिवद्भावः, लोप सञ्ज्ञा, प्रत्ययलक्षणम्, टि सञ्ज्ञा, उपधा सञ्ज्ञा, सप्तमीनिर्दिष्टकार्यम्, पञ्चमीनिर्दिष्टकार्यम्, शब्दस्वरूपग्रहणम्, वर्णग्रहणनियमः, तपरकरणम्, वृद्ध सञ्ज्ञा ।

विषयवस्तु-विवरणम् पृष्ठानि

प्रथमाध्यायस्य द्वितीयः पादः २५—४६

ङित्वातिदेशः, कित्वातिदेशः, ह्रस्व-दीर्घ-प्लुतसंज्ञाः, उदात्त-अनुदात्त-स्वरितसंज्ञाः, अपृक्त सञ्ज्ञा, कर्मधारय सञ्ज्ञा, उपसर्जन सञ्ज्ञा, प्रातिपदिक सञ्ज्ञा, ह्रस्वविधिः, प्रातिपदिकान्तविधिः, अशिष्यत्वम्, वचनविधिः, एकशेषविधिः, एकशेषसमासः।

प्रथमाध्यायस्य तृतीयः पादः ४७—७०

धातु सञ्ज्ञा, इत् संज्ञा, सङ्ख्यातानुदेशः, अधिकार-स्वरूपनिर्देशः, आत्मनेपदम्, परस्मैपदम्।

प्रथमाध्यायस्य चतुर्थः पादः ७१—१००

एकसञ्ज्ञाधिकारः, विप्रतिषेधकार्यम्, नदी संज्ञा, घि सञ्ज्ञा, लघु सञ्ज्ञा, गुरु सञ्ज्ञा, अङ्ग सञ्ज्ञा, पद-सञ्ज्ञा, भ सञ्ज्ञा, वचनविनियोगनियमः, कारकाधिकारः, अपादान सञ्ज्ञा, संप्रदान सञ्ज्ञा, करण सञ्ज्ञा, अधिकरण-सञ्ज्ञा, कर्म सञ्ज्ञा, कर्तृ सञ्ज्ञा, निपात सञ्ज्ञा, उपसर्ग सञ्ज्ञा, गति सञ्ज्ञा, गत्युपसर्गाणां स्थाननिर्देशः, कर्मप्रवचनीय सञ्ज्ञा, परस्मैद सञ्ज्ञा, आत्मनेपद सञ्ज्ञा, प्रथम-मध्यम-उत्तमपुरुष सञ्ज्ञाः, एकवचन-द्विवचन-बहुवचन सञ्ज्ञाः, विभक्ति-सञ्ज्ञा, पुरुष सञ्ज्ञा, संहिता सञ्ज्ञा, अवसान सञ्ज्ञा।

द्वितीयाध्यायस्य प्रथमः पादः १०१—१२४

समर्थपरिभाषा, पराङ्गवद्भावातिदेशः, समासाधिकारः, सुप् सुपा समासः, अव्ययीभावः, तत्पुरुषः।

द्वितीयाध्यायस्य द्वितीयः पादः १२५—१३४

तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः, पूर्वनिपातनियमाः।

विषयवस्तु-विवरणम् पृष्ठानि

द्वितीयाध्यायस्य तृतीयः पादः १३५—१५२

विभक्ति विधानम्, द्वितीया विभक्तिः, विविधा विभक्तयः, चतुर्थी विभक्तिः, तृतीया विभक्तिः, पञ्चमी विभक्तिः, सप्तमी विभक्ति, प्रथमा विभक्तिः, आमन्त्रित सञ्ज्ञा, सम्बुद्धि सञ्ज्ञा, षष्ठी विभक्तिः, विभक्तिनियमाः।

द्वितीयाध्यायस्य चतुर्थः पादः १५३—१७६

द्विगौ द्वन्द्वे च एकवद्भावः, समासलिङ्गम्, अन्वादेशः, आर्धधातुके धात्वादेशः, लुक्प्रकरणम्, (नामधातुभ्यां परस्य विभक्तेः विकरणस्य च लुक्)। अम्भावः, प्रथम-पुरुषस्य लुटः आदेशाः।

तृतीयाध्यायस्य प्रथमः पादः १७७—२१४

प्रत्ययाधिकारः, प्रत्ययस्थाननिर्देशः, प्रत्ययस्वरनिर्देशः, सन्, क्यच्, काम्यच्, क्यङ्, क्यष्, क्यच्, णिङ्, णिच्, यङ्, यक्, आयः, ईयङ्, णिङ्, धातु सञ्ज्ञा, विकरण-प्रत्ययाः, कर्मवद्भावः, धात्वधिकारः, उपपद सञ्ज्ञा, कृत् सञ्ज्ञा, कृत्यप्रत्ययाः, कृत्याधिकारः, तव्यत्तव्यानीयरः, यत्, क्यप्, ण्यत्, ण्वुल्-तृचौ, ल्यु-णिन्यचः, कः, शः, णः, ष्वुन्, थकन्, ण्युट्, वुन्।

तृतीयाध्यायस्य द्वितीय पादः २१५—२६४

अण्, कः, टक्, अच्, टः, इन्, खश्, खच्, डः, णिनिः, ख्युन्, खिष्णुच्-खुकञौ, क्विन्, क्विप्, ण्विः, ञ्युट्, विट्, कप्, ण्विन्, विच्, मनिन्-क्वनिप्-वनिपः, भूताधिकारः, भूते णिनिः, खः, क्विप्, इनिः, क्वनिप्, डः, निष्ठा, ङ्वनिप्, अतृन्, लिट्, लुङ्, लङ्, लृट्, लिट्, लट्, शतृ-शानच् प्रत्ययौ, सत् सञ्ज्ञा, शानन्, चानश्, शतृ, तच्छीलाद्यधिकारः, तृन्, इष्णुच्, ग्स्नुः, क्नुः, घिनुण्, वुञ्, युच्, उकञ्, षाकन्, इनिः आलुच्, रुः,

विषयवस्तु-विवरणम् पृष्ठानि

नजिङ्, आरुः, क्रुक्लुकनौ, वरच्, क्विप्, डुः, ष्ट्रन्, इत्रः, क्तः ।

तृतीयाध्यायस्य तृतीयः पादः २६५—३०८

उणादयः, भविष्यत्प्रत्ययाधिकारः, लट्, तुमुन्-ण्वुलौ, अण्, लृट्, लुट्, घञ्, णच्, इनुण्, अच्, अप्, क्त्रिः, अथुच्, नङ्, नन्, किः, क्तिन्, क्यप्, शः, अः, अङ्, युच्, ण्वल्, ण्वुच्, अनिः, कृत्यल्युटोर्बहुलत्वम्, क्तः, ल्युट्, घः, खल्, वर्तमानवत्प्रत्ययः, लृट्, लिङ्, अनद्यतनवत्प्रत्यय-प्रतिषेधः, लिङ्निमित्तः लृङ्, लट्, लिङ्-लृटौ, लिङ्-लोटौ, तुमुन्, लोट्, कृत्य-तृचः, णिनिः, कृत्याः, क्तिच्-क्तौ, लुङ्, लङ् ।

तृतीयाध्यायस्य चतुर्थः पादः ३०६—३४२

धातुसम्बन्धाधिकारः, लोट्, लुङ्-लङ्-लिटः, लेट्, छन्दसि तुमर्थे प्रत्ययाः, छन्दसि कृत्यार्थे प्रत्ययाः, क्त्वा, खमुञ्, णमुल्, क्त्वा-णमुलौ, तुमुन्, कृत्प्रत्ययार्थः, लादेशाः (तिबादयस्तदादेशाश्च) ।

चतुर्थाध्यायस्य प्रथमः पादः ३४३—४००

ङ्याप्प्रातिपदिकाधिकारः, सुपः, स्त्रीप्रत्ययाधिकारः, टाप्, ङीप्, ष्फः, ङीष्, ऊङ्, ङीन्, चाप्, तद्धिताधिकारः, तिः, ष्यङ्, समर्थानां प्रथमाद्वा, अण्, अञ्, तद्धितलुक्, अपत्याधिकारः, इञ्, च्फञ्, फक्, यञ्, फञ्, ढक्, ऐरक्, ढ्रक्, आरक्, छण्, ढञ्, यत्, घः, खः, यत्-ढकञौ, अञ् खञौ, छः, ण्यन्, ठक्, ण-फिञौ, ण्यः, फिञ्, फिन्, अञ्-यतौ, गोत्र सञ्ज्ञा, युव सञ्ज्ञा, ञ्यङ्, तद्राज सञ्ज्ञा, तद्राजस्य लुक्, तस्य निषेधश्च ।

चतुर्थाध्यायस्य द्वितीयः पादः ४०१—४४०

रक्ताधिकारः, ठक्, अण्, लुप्, छः, ढक्, ड्वतुप्-ड्वचौ, इनिः, अञ्, यत्, ढञ्, घन्, घः, टचण्, भववत्प्रत्ययाः, ठञ्, पितृव्यादयः, यथाविहिताः प्रत्ययाः, वुञ्, यन्, तल्, धर्मवत् प्रत्ययाः, घञ्-छौ, यः, इनित्र-कटचचः, निर्दिष्टे विषये यथाविहितप्रत्ययाः, विधल्-भक्तलौ, प्रगाथेषु यथाविहित-

विषयवस्तु-विवरणम् पृष्ठानि

प्रत्ययाः, सङ्ग्रामे यथाविहितप्रत्ययाः, णः, ञः, तदधीते तद्वेद, इत्यार्थे यथाविहितप्रत्ययाः, वन्, प्रत्ययलुक्, यथाविहित-प्रत्ययाः, वुन्, प्रत्ययलुक्, यथाविहितप्रत्ययाः, वुञादयः, चतुर्थिकस्य लुप्, ठक-छौ, मतुप्, इमतुप्, इवलच्, वलच्, तद्धिते शैषिकप्रत्ययाः, शेषाधिकारः, घ-खौ, य-खञौ, ढकञ्, ढक्, त्यक्, ष्फक्, वुक्, त्यप्, अञ् ञौ, छः, ठक्, छ-छसौ, ठञ्-ञिठौ, कन्, वुञ्, क।

चतुर्थाध्यायस्य तृतीयः पादः ४४१—४८६

छ-खञौ, खञ्-अणौ, यत्, यत्-ठञौ, अञ्-ठञौ, मः, अः, ञञ्, ठञ्, अण्, एण्यः, ठक्, टच्-टचुलौ, जाताधिकारः, ठप्, वुञ्, वुन्, अः, कन्, अण्-अञौ, जातार्थप्रत्ययलुक्, कृतादिषु यथाविहितप्रत्ययाः, संभूतार्थे यथाविहितप्रत्ययाः, ढञ्, साध्वादिषु यथाविहितप्रत्ययाः, देयार्थे यथाविहितप्रत्ययाः, यथाविहितभवार्थेप्रत्ययाः, ञ्यः, छः, यत्-खौ, व्याख्याने यथाविहितप्रत्ययाः, ष्ठन, यत् अणौ, तत आगतार्थे यथा-विहितप्रत्ययः, अङ्कवत् प्रत्ययाः, रूप्यः, मयट्, प्रभवत्यर्थे यथाविहितप्रत्ययाः, ञ्यः, यथाविहितप्रत्ययाः, अण्-अञौ, ढक् आदयः, कृते ग्रन्थे यथाविहितप्रत्ययाः, जनपदवत् प्रत्ययः, तेन प्रोक्तार्थे यथाविहितप्रत्ययाः, छण्, णिनिः, प्रत्ययलुक्, ढिनुक्, इनिः, एकदिगर्थे यथाविहितप्रत्ययाः, तसिः, उप-ज्ञाताद्यर्थे यथाविहितप्रत्ययाः, अञ्, तस्येदंविषये यथाविहित-प्रत्ययाः, विकारे अवयवे च यथाविहितप्रत्ययाः, अञ्, ष्लञ्, मयट्, क्रीतवत् प्रत्ययः, वयः, फले प्रत्ययलुक्, अण्, लुप्, यञञौ, लुक् च।

चतुर्थाध्यायस्य चतुर्थः पादः ४८७ –५२२

ठगधिकारः, ठक्, अण्, ठञ्, ठन्, ष्ठन्-ठञौ, ठन्-छौ, मप्, कक्-कनौ, इनिः, ठको लुक्, ष्ठन्-ष्ठचौ, ण्यः, अञ्, ईकक्, णः, ठच्, टिठन्, ष्ठल्, यत्, खः, ञ्यः, खञ्, ढञ्, यः, ढः, ड्यण्, ड्यत्-ड्यौ, यन्, घन्, यत्, घच्, घन्, छः, घः, मतुप्, ञ-यत्, यत्-ख, यल्, इन्, य ख तातिल्।

卐 ॐ 卐

॥ श्रीगणेशाय नमः ॥

॥ अथ काशिकावृत्तिसारः ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥१॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥२॥

॥ काशिकावृत्तिसारसुधा ॥

दुर्गां देवीं नमस्कृत्य पितरौ स्वौ तथा गुरून् ।
पाणिनीयाष्टकं कामं समधीत्याऽच्युतात्मना ॥१॥
शब्दविद्याविनीतेन चन्द्रभानुत्रिपाठिना ।
काशिकावृत्तिसारस्य सुधा व्याख्या वितन्यते ॥२॥

महर्षेः पाणिनेरल्पाक्षराणि विश्वतोमुखान्यष्टाध्यायीसूत्राणि मन्दधियां कृते दुर्बोधानि बुद्ध्वा महर्षिः पतञ्जलिस्तेषु महाभाष्यं कृतवान् । गच्छति काले महाभाष्यमपि सुकुमारमतीनां कृते न सुबोधमभूत्, तेनाचार्यौ वामनजयादित्यौ सूत्रभाष्यव्याख्यानसारसङ्ग्रहरूपां काशिकावृत्तिं विरचितवन्तौ । तस्या अपि कालक्रमतः कलेवरमहत्त्वमाकलय्याचार्यो बलभद्रस्तस्या अन्तर्गतं सारं समुद्धर्तुकामः प्रारिप्सितकाशिकावृत्तिसारग्रन्थस्य निर्विघ्नपरिसमाप्तये पूर्वैः शिक्षाकारैः कृतेन श्लोकद्वयेन पाणिनीयानामादिमुनये पाणिनये नमस्काररूपं मङ्गलमाचरन् शिष्यशिक्षायै तन्निबध्नाति—

येन महर्षिणा महेश्वरात् **अक्षरसमाम्नायम्** परम्परागतमक्षरसमूहम् **अधिगम्य कृत्स्नं** सम्पूर्णं **व्याकरणं प्रोक्तम्** प्रकर्षेणोक्तम् (अर्थव्याख्यानेन प्रकाशितम्) । तथा **येन विमलैः** प्रकृतिप्रत्ययादिविभागद्वारा संस्कृतैः **शब्दवारिभिः पुंसां गिरः धौताः** अपभ्रंशादिदोषप्रक्षालनेन परिमार्जिताः, तेषाम् **अज्ञानजं तमः** मान्द्यं **च भिन्नम्** नाशितम् **तस्मै पाणिनये** महर्षये **नमः** । स महर्षिः पाणिनिर्मयि सानुग्रहो भूत्वा माम् आविर्भूतशब्दब्रह्मप्रकाशं कुर्यादिति

मदीया प्रार्थनेति शेषः । काशिकाऽपि सारसंग्रहरूपा । तत्र सारश्चासौ संग्रहश्चेति विग्रहः । सारं न्यायादनपेतं निर्दोषमिति । अयं समुद्धृतः सारग्रन्थो वृत्तिग्रन्थस्योत्कृष्टांशरूपः, सारस्य उत्कृष्टांशस्य सङ्ग्रहः । 'सारशब्द उत्कर्षे पुंल्लिङ्गो न्यायादनपेते नपुंसकः ।'

अथ शब्दानुशासनम् । केषां शब्दानाम् ? लौकिकानां वैदिकानाञ्च । कथमनुशासनम् ? प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन ।

अथ शब्दोऽधिकारार्थः । शब्दानाम् **अनुशासनम्** संस्कारकं शास्त्रम् प्रस्तूयते इति भावः । **लौकिकाः** लोके विदिताः गौरश्वः पुरुषो हस्तीत्यादयः, **वैदिकाः** वेदोक्ताः मन्त्रादिरूपाः 'शन्नो देवीरभिष्टये' इत्यादयः । लौकिकानामानुपूर्वी न नियता, वैदिकानाञ्च नियतेत्युभयोरुपादानम् । **प्रकृतिः** आदिर्येषान्ते प्रकृत्यादयः । आदिशब्देन प्रत्ययविकारागमादीनां ग्रहणम् । तेषां **विभागः** पृथग्ज्ञानम् तस्य कल्पना तया (हेतौ तृतीया) । अनेन 'कल्पनामात्रं प्रकृत्यादिविभागो न पारमार्थिकः' इति वैयाकरणसिद्धान्तो दर्शितः । सामान्यं च विशेषश्चेति सामान्यविशेषौ तौ स्तो यस्मिन् लक्षणे तद्वता (करणे तृतीया) तदा चायमर्थः पर्यवस्यति—सामान्यलक्षणेन, विशेषलक्षणेन करणभूतेन या प्रकृतिप्रत्ययविभागकल्पना तया हेतुभूतया शब्दानाम् अनुशासनं व्याकरणम् ।

अ इ उ ण् ।१। ऋ ऌ क् ।२। ए ओ ङ् ।३। ऐ औ च् ।४। ह य व र ट् ।५। ल ण् ।६। ञ म ङ ण न म् ।७। झ भ ञ् ।८। घ ढ ध ष् ।९। ज ब ग ड द श् ।१०। ख फ छ ठ थ च ट त व् ।११। क प य् ।१२। श ष स र् ।१३। ह ल् ।।१४।।

अथ किमर्थो वर्णानामुपदेशः ? प्रत्याहारार्थः । प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः । 'अ इ उ' इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति । एवमन्येष्वपि ज्ञेयम् । तेषाम् प्रयोजनं तु तेषु तेषु सूत्रेषु ज्ञेयम् ।

उपदेशः आद्यमुच्चारणम् । प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा यत्र स **प्रत्याहारः** अण्, अच् इत्यादिसंज्ञकः । यस्मिन् नियतानुपूर्वीकावाद्यशब्दान्तिमानुबन्धौ च भवतः । **लाघवम्** अल्पप्रयासः । यथा 'इको यणचि' इत्यत्र इक्, यण्, अच् इति त्रयः प्रत्याहाराः सन्ति । 'आदिरन्त्येन सहेता' इति सूत्रस्य प्रवृत्त्या इक् शब्देन 'इ उ ऋ ऌ' इत्येषाम्, यण् शब्देन 'य व र ल्' वर्णानाम्, अच् शब्देन च 'अ इ उ ऋ ऌ ए ओ ऐ औ' इति स्वराणां ग्रहणं भवति; इति लाघवेन सूत्राणां प्रवृत्तिर्भवति । 'अण्' आदयः प्रत्याहारा एकचत्वारिंशत् सन्ति ।

अथ प्रथमाध्याये प्रथमः पादः

वृद्धिरादैच् ॥१॥

तपरकरणमैजर्थम् । तादपि परस्तपरः, खट्वैडकादिषु त्रिमात्रादिनिवृत्तये । औपगवीयः, शालीयः ।

मङ्गलार्थं वृद्धिशब्दस्यादौ प्रयोगः । आत्, ऐच् इत्युभौ वृद्धिसंज्ञौ भवतः । 'तपरस्तत्कालस्य' इत्यत्र 'तपर' इति शब्दे तः परो यस्मात्, तात्परो वा इति समासद्वयसम्भवेऽत्र तत्पुरुषः, अतः एचो ग्रहणे द्विमात्रस्यैव ग्रहणम् । तेन खट्वा + एडका इत्यत्र दीर्घसन्धिप्रयोगे द्विमात्र एवैकारो भवति न चतुर्मात्रः । अन्यथा अन्तरतमश्चतुर्मात्र एवादेशः स्यात् । **ऐजर्थम्**—ऐचोः अर्थः प्रयोजनं यस्य तत् । 'आत्' इत्यत्र तु स्पष्टार्थम् । 'औपगवीयः' इत्यत्रौकारस्य 'शालीयः' इत्यत्राकारस्य वृद्धिसंज्ञया वृद्धत्वाच्छः ।

अदेङ्गुणः ॥२॥

तपरकरणं त्विह सर्वार्थम् । तरिता, चेता, स्तोता ।

सर्वार्थम्—सर्वस्मिन्नर्थः प्रयोजनं यस्य तत्, अकारार्थम् एजर्थञ्च । 'तरिता' इत्यत्र√तॄ + तृच् अत्र ऋकारस्य 'अर्' गुणो भवति । 'चेता' इत्यत्र √चि + तृच् इकारस्य एकारः, 'स्तोता' इत्यत्र च √स्तु + तृच् उकारस्य गुणो भवति ।

इको गुणवृद्धी ॥३॥

परिभाषेयं स्थानिनियमार्था । वृद्धिगुणौ स्वसंज्ञया शिष्यमाणौ इक एव स्थाने वेदितव्यौ । वक्ष्यति-'सार्वधातुकार्धधातुकयो'रित्यादि । गुणवृद्धिग्रहणं स्वसंज्ञया विधाने नियमार्थम् । इह मा भूत् —द्यौः, पन्थाः ।

अनियमे नियमकारिणी परिभाषा। **स्थानिनियमार्था**—स्थानिनि नियमः स एवार्थः प्रयोजनं यस्याः सा। **स्वसंज्ञया शिष्यमाणौ**—गुणो भवति, वृद्धिर्भवतीति नाम्ना विधीयमानौ। 'द्यौः' इत्यत्र 'दिव औत्' इत्यौत्त्वं भवति, नात्र वृद्धिशब्दस्य निर्देशः एवं 'पन्थाः' इत्यत्रापि 'पथिमथि ···' इत्यादिना आत्त्वं भवति इति नास्याः परिभाषायाः प्रसक्तिः । एवं 'सः' इत्यत्रापि 'त्यदादीनामः' इत्यनेन अकारो विधीयते न गुणः।

न धातुलोप आर्धधातुके ॥४॥

धात्वंशलोपनिमित्ते आर्धधातुके परे गुणवृद्धी न स्तः। पोपुवः।

सूत्रे धातुशब्दो धात्वंशपरः तस्य लोपो यस्मिन्। 'आर्धधातुक' इति लोपविशेषणं तेनोक्ताऽर्थो लभ्यते। **पोपुवः**—√पू + यङ् द्वित्वे पोपूय + अच् यङ्लुकि, गुणस्य निषेधे उवङादेशे रूपसिद्धिः। वृद्धेरुदाहरणम्—**मरीमृजः**।

क्ङिति च ॥५॥

कित्, ङित्, गित् निमित्ते गुणवृद्धी न स्तः। चितवान्, चिनुतः, जिष्णुः।

कित् इत्यादि—(ग्) क्, ङ् इत् यस्मिन्। अत्र गकारस्यापि प्रश्लेषात् 'गित्' इत्यर्थो लभ्यते। गकारस्य चर्त्वलोपौ भवतः इति न तस्य श्रुतिः। ते 'कित्' आदयो निमित्तानि ययोस्ते। 'क्ङिति' इत्यत्र निमित्तार्था सप्तमी। **चितवान्**—√चि + क्तवतु (कित्) **चिनुतः**—√चि + लट्→तस् (ङित्) 'सर्वधातुकमपित्' इति तस्य ङित्त्वम्। **जिष्णुः**—√जि + ग्स्नु (गित्)। अत्र प्राप्तो गुणो निषिध्यते। वृद्धेरुदाहरणम्—**मृष्टः**।

दीधीवेवीटाम् ॥६॥

आदीध्यनम्, कणिता।

'√दीधीङ्, √वेवीङ्' इति धातुद्वयस्य, इटश्च गुणवृद्धी न स्तः। '√वेवीङ्' इत्यस्योदाहरणम् **आवेव्यनम्**। √दीधीङ् इटश्चोक्ते। वृद्धेरुदाहरणम्—**आदीध्यकः**।

हलोऽनन्तराः संयोगः ॥७॥

समुदायः संज्ञी। जातौ बहुवचनं तेन द्वयोर्बहूनां च संयोग-संज्ञा सिद्धा। अग्निः, इन्द्रः, तिलान्स्त्र्यावपति। 'हलः' इति किम्? तितउच्छत्रम्।

अत्रान्तरशब्दश्छिद्रवाचकः । न विद्यते अन्तरं छिद्रं येषां ते अनन्तरा अर्थात् भिन्नजातीयैः स्वरैरव्यवहिताः हलः संयोगसंज्ञाः भवन्ति । **हलः**—हल्त्वजातिविशिष्टाः । 'अग्निः' इत्यत्र गकारनकारयोर्द्वयोर्हलोः, 'इन्द्रः' इत्यत्र नदराणाम्, 'तिलान्स्त्र्या'…इत्यत्र न् स् त् र् य् पञ्चानां हलां संयोगसंज्ञा ।

मुखनासिकावचनोऽनुनासिकः ॥८॥

अभ्र आँ अपः ।

मुखसहिता नासिका मुखनासिका तस्याः वचनः वर्णः अनुनासिको भवति । 'आँ' इत्यत्र 'आङोऽनुनासिकश्छन्दसि' इत्यनुनासिकत्वम् ।

तुल्यास्यप्रयत्नं सवर्णम् ॥९॥

तुल्यशब्दः शदृशपर्यायः, आस्ये भवमास्यं ताल्वादिस्थानम् । प्रयत्नः स्पृष्टतादिर्वर्णगुणः । तुल्य आस्ये प्रयत्नो यस्य वर्णस्य येन वर्णेन स समानजातीयम् प्रति सवर्णसंज्ञः ।

तुल्यास्यप्रयत्नपदे व्यधिकरणबहुव्रीहिः । **ताल्वादि**—आदिशब्देन कण्ठः, मूर्धा, दन्ताः, ओष्ठौ, नासिका चेति गृह्यन्ते । स्पृष्टतादि–स्पृष्टम्, ईषत्स्पृष्टम्, विवृतं, संवृतं च ।

नाज्झलौ ॥१०॥

तुल्यास्यप्रयत्नावप्यज्झलौ सवर्णौ न । अवर्णहकारौ, दण्डहस्तः ।

दण्डहस्त : अत्र हकारोत्तरवर्तिनोऽकारस्य हकारस्य चोभयोः कण्ठ-स्थानविवृतप्रयत्नैक्यादपि न सवर्णत्वमिति न दीर्घः

ईदूदेद्द्विवचनं प्रगृह्यम् ॥११॥

ईदूदेद्-इत्येवमन्तं द्विवचनं शब्दरूपं प्रगृह्यसंज्ञं भवति । अग्नी इति, वायू इति, खट्वे इति ।

अत्र ईदादि विशेषणं, द्विवचनं विशेष्यम् । 'अग्नी इति' इत्यादिषु प्रगृह्यसंज्ञाया विधानात् प्रकृतिभावस्तेन क्रमशः दीर्घः, यण्, अयादेशश्च न भवति । क्रियाद्विवचनस्योदाहरणम्—पचेते इति इत्यादि ।

अदसो मात् ॥१२॥

ईदूदेदित्यनुवर्तते । अदसः सम्बन्धिनो मकारात् परे ते प्रगृह्या भवन्ति । अमी अत्र ।

'अमी' पदं बहुवचनान्तं तेन पूर्वसूत्रस्य न प्रवृत्तिः । अत्र यण्सन्धिर्न ।

शे ॥१३॥

छन्दसि 'शे' इति यः सुपामादेशः, स प्रगृह्यसंज्ञः । अस्मे इन्द्राबृहस्पती, युष्मे इति ।

'अस्मे' इत्यत्र 'सुपां सुलुक्.........' इत्यादिना अस्मद् शब्दात् चतुर्थीबहुवचनस्य 'युष्मे' इत्यत्र षष्ठी बहुवचनस्य 'शे' आदेशः । उभयत्रापि प्रकृतिभावे एकारस्य 'अय्' आदेशो न भवति ।

निपात एकाजनाङ् ॥१४॥

एकाच् आङ्वर्जः निपातः प्रगृह्यसंज्ञः । अ अपेहि । अनाङ् किम् ! ओदकम् ।

एकाच्—एकश्चासौ अच् इति एकाच् (कर्मधारयः) नात्र बहुव्रीहिस्तत्र प्रमाणम् 'व्याहरति....', 'व्यवहृपणोः....' इति सूत्रयोः सन्धिकार्यम् । अन्यथा 'वि' इत्यपि एकाच् भवति, तेनात्रापि प्रगृह्यसंज्ञा स्यात् ।, **अ अपेहि,**—प्रगृह्यत्वाद् दीर्घाभावः । **ओदकम्**—आ + उदकम् नात्र 'आ' अपितु 'आङ्' तेनात्र गुण-सन्धिः । कुत्र 'आङ्', (ङिद्विशिष्टः) कुत्र च 'आ' (ङिद्रहितः) इति निर्दिष्टमस्मिन् श्लोके—

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥

ओत् ॥१५॥

ओ न्तो निपातः प्रगृह्यः स्यात् । आहो इति ।

ओकारान्तो यो निपातसंज्ञकः चादिगणे पठितः शब्दस्तस्य निपातसंज्ञा भवति । तेन अगौः गौरभवत् इति 'गोऽभवत्' अत्र न । **आहो इति—अत्र** ओकारस्य 'अव्' आदेशो न भवति ।

सम्बुद्धौ शाकल्यस्येतावनार्षे ॥१६॥

ओदिति वर्तते । अवैदिके इति शब्दे परतः सम्बुद्धिनिमित्तो य ओकारः, स वा प्रगृह्यः ।

वायो इति, वायविति । अनार्षे किम् ? एता गा ब्रह्मबन्धवित्यब्रवीत् ।

अनार्षम्—ऋषिणा प्रोक्तम् आर्षं तद्भिन्नम्, अवैदिकमित्यर्थः । शाकल्यस्य मते प्रगृह्यत्वम्, अन्येषां मते नेति विकल्पार्थको वा शब्दः । **वायविति**—प्रगृह्यसंज्ञाया अभावे ओकारस्यावादेशः ।

उञः ॥१७॥

'शाकल्यस्येतौ' इति वर्तते । इतौ परे उञो वा प्रगृह्यसंज्ञा । उ इति, विति ।

प्रगृह्यसंज्ञाया अभावे यण्सन्धिः ।

ऊँ ॥१८॥

'उञः ऊँ' इत्ययमादेशो वा । स च दीर्घोऽनुनासिकः प्रगृह्यश्च । उ इति, ऊँ इति, विति ।

'उञः ऊँ' आदेशः प्रगृह्यसंज्ञेत्युभयं विकल्पेन भवति । तेन रूपत्रयं सिद्ध्यति ।

ईदूतौ च सप्तम्यर्थे ॥१९॥

ईदितमूदितं च रूपं सप्तम्यर्थे वर्तमानं प्रगृह्यसंज्ञम् । अध्यस्यां मामकी तनू । मामक्यां तन्वामिति प्राप्ते मामकी इति, तनू इति ।

ईदितमूदितम्—ईदन्तमूदन्तमिति । मामक्याम् इत्यर्थे 'सुपां सुलुक् ....' इति सप्तम्याः लुक् । एवं तन्वाम् इत्यत्रापि । प्रतिपदप्रयोगे 'मामकी इति, तनू इति' प्रकृतसूत्रोदाहरणे भवतः । 'सोमो गौरी अधिश्रितः' इति संहिताया उदाहरणम् । त्रिष्वपि पूर्वोक्तोदाहरणेषु प्रगृह्यत्वाद् यण् न भवति ।

दाधा घ्वदाप् ॥२०॥

दारूपाश्चत्वारो धारूपौ च द्वौ एते घुसंज्ञा भवन्ति । दाप्-दैपौ विना । प्रणिददाति इत्यादि । प्रणिदधाति ।

चत्वारः— √डुदाञ् दाने, √दाण् दाने, √दो अवखण्डने, √देङ् रक्षणे; एषामेकशेषेण 'दा' इति । द्वौ—√डुधाञ् धारणपोषणयोः, √धेट् पाने; तयोरेकशेषेण 'धा' इति । तयोर्द्वन्द्वः । 'घु' संज्ञया 'नेर्गदनद…' इति णत्वम् । **प्रणिदाता** (√दाण), प्रणिद्यति (√दो) **प्रणिदयते** (√देङ्) **प्रणिधयति** (√धेट्) इत्युदाहरणान्तराणि ।

आद्यन्तवदेकस्मिन् ॥२१॥

असहायस्याद्यन्तोपदिष्टानि कार्याणि न सिद्ध्यन्तीत्ययमतिदेश आरभ्यते । सप्तम्यर्थे वतिः । आदाविव, अन्त इवैकस्मिन्नपि कार्यं भवति । यथा वृक्षाभ्यामित्यत्राङ्गान्ते दीर्घत्वमेवमाभ्यामित्यत्रापि यथा स्यात् ।

आद्यन्यशब्दौ सहायमपेक्षेते । यत्र च द्वितीयः स्वरो हल्वर्णो वा नास्ति तत्रापि कार्यार्थमिदं सूत्रम् । **एकस्मिन्** इति विशेष्यमपेक्ष्य सप्तम्यर्थे वतिः । **आभ्याम्**—'अन्ते इव' इत्यस्योदाहरणमिदम् । केवलस्याप्यकारस्याङ्गसंज्ञा, दीर्घत्वञ्च भवति । 'आदाविव, इत्यस्योदाहरणम्—**औपगवम्** इति । यथा 'कर्तव्यम्' इत्यादिषु 'आद्युदात्तश्च' इत्यनेन प्रत्ययस्यादिरुदात्तो भवति तथा 'अण्' इत्यस्याकारमात्रस्यापि ।

तरप्तमपौ घः ॥२२॥

एतौ घसंज्ञौ स्तः । कुमारितरा । ब्राह्मणितमा । 'घरूप……-ङ्योनेकाचो ह्रस्वः' इत्यादयो घप्रदेशाः ।

एतौ—तरप्-तमप्प्रत्ययौ । 'घरूप…………' इत्यादिना कुमारी-ब्राह्मणीशब्दयोः ह्रस्वत्वं भवति ।

बहुगणवतुडति संख्या ॥२३॥

एते संख्यासंज्ञाः । बहुकृत्वः । गणधा । तावत्कः । कतिशः । प्रदेशाः 'संख्या वंश्येन' इत्येवमादयः ।

बहु-गण शब्दौ प्रातिपदिकौ, तयोः; वतुडती च प्रत्ययौ, तदन्तयोश्च संख्या संज्ञा भवति। बहुकृत्वः इत्यादिषु क्रमशः कृत्वसुच्, धा, कन्, शस् प्रत्ययाः भवन्ति।

ष्णान्ताः षट् ॥२४॥

षकारान्ता नकारान्ता च संख्या षट्-संज्ञा भवति। षट् तिष्ठन्ति, पञ्चेत्यादयः।

संख्येत्यनुवर्तते। षट्, पञ्च-'षड्भ्यो लुक्' इत्यनेन विभक्तेर्लुग्भवति।

डति च ॥२५॥

डत्यन्ता या संख्या सा षट्-संज्ञा। कति तिष्ठन्ति।

संख्येत्यनुवर्तते। कति-इहापि विभक्तेर्लुक्।

क्तक्तवतू निष्ठा ॥२६॥

क्तक्तवतू प्रत्ययौ निष्ठासंज्ञौ। कृतः, कृतवान्। प्रदेशाः 'श्वीदितो निष्ठायामे'वमादयः।

क्तश्च क्तवतुश्चेति द्वन्द्वः। अत्र भाविनी संज्ञा विधीयते॥ निष्ठा-नाम्नापि यौ भूतकाले भवतस्तयोरेतयोर्निष्ठा संज्ञा भवति। क्तस्योदाहरणं कृतः, क्तवतोश्च कृतवान् इति। उच्छूनः-अत्र 'श्वीदितो निष्ठायाम्' इति निषेधेनेट् न भवति।

सर्वादीनि सर्वनामानि ॥२७॥

सर्वशब्द आदिर्येषां तानि सर्वनामाख्यानि। सर्वे इत्यादि। प्रदेशाः 'सर्वनाम्नः स्मै' इत्येवमादयः।

अत्र तद्गुणसंविज्ञानो बहुव्रीहिस्तेन सर्वादिषु सर्वशब्दस्यापि ग्रहणं सिद्ध्यति। सर्वे-अत्र सर्वनामसंज्ञया 'जसः शी' भवति। एवं सर्वस्मै, सर्वस्मात्, सर्वस्मिन्, सर्वकः इत्यादि।

विभाषा दिक्समासे बहुव्रीहौ ॥२८॥

'न बहुव्रीहौ' इति प्रतिषेधं वक्ष्यति, तस्मिन् प्राप्ते विभाषाऽऽरभ्यते। उत्तरपूर्वस्यै/उत्तरपूर्वायै।

दिगुपदिष्टः समासः इति दिक्समासः (मध्यमपदलोपी तत्०) तेन 'दिङ्नामान्यन्तराले' इति सूत्रेण यः समासस्तस्येदं ग्रहणम् । **उत्तरपूर्वस्यै**–सर्वनामसंज्ञायां स्याट्, तदभावे याट्, **उत्तरपूर्वायै** इति रूपद्वयं सिद्धयति ।

न बहुव्रीहौ ॥२९॥

सर्वनामसंज्ञायां तदन्तविधेरभ्युपगमात् बहुव्रीहेरपि सर्वाद्यन्तस्य संज्ञा स्यादिति प्रतिषेध आरभ्यते । बहुव्रीहौ समासे एतानि न सर्वनामाख्यानि । प्रियसर्वाय ।

'न बहुव्रीहौ' इति निषेधसूत्रारम्भसामर्थ्यात् सर्वाद्यन्तस्यापि सर्वनामसंज्ञा भवति । यत्र नास्ति बहुव्रीहिस्तत्र **परमसर्वस्मै** इत्यादिषु सर्वनामसंज्ञा भवत्येव । **प्रियसर्वाय**–अत्र 'ङे' विभक्तेः 'स्मै' आदेशो न भवति । तथा '**त्वत्कपितृकः**' (त्वम् पिता यस्य सः) इत्यत्र कप्रत्ययो भवति नाकच् ।

तृतीया समासे ॥३०॥

सर्वादीनि न सर्वनामाख्यानि । मासपूर्वाय । समासे वर्तमाने पुनर्ग्रहणं वाक्येऽपि प्रतिषेधो यथा स्यात्—मासेन पूर्वाय । 'पूर्वसदृशसम……' इति वक्ष्यति, तस्येदं ग्रहणं, न यस्य कस्यचित्तृतीयासमासस्य । नेह—त्वयका कृतम् । अत्र 'कर्तृकरणे कृता बहुलम्' इति समासः ।

अनुवृत्तं समासपदं समाससंज्ञापरम् । अत्रत्यं तु समासार्थवाक्यार्थकम् । तेनोभयत्र प्रतिषेधो भवति । 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषाबलेन 'पूर्वसदृश…'सूत्रकृतसमासस्य ग्रहणम् । **त्वयका कृतम्**–समासवाक्यमिदम् । अत्र सर्वनामत्वात् 'अकच्' भवति न कप्रत्ययः ।

द्वन्द्वे च ॥३१॥

न सर्वनामाख्यानि । पूर्वापराधराणाम् ।

पूर्वे चापरे चाधरे चेति इतरेतरयोगद्वन्द्वः । सर्वनामत्वाभावान्न सुडागमः ।

विभाषा जसि ॥३२॥

पूर्वेण नित्ये प्रतिषेधे प्राप्ते जसि विभाषाऽऽरभ्यते ।

कतरकतमे/कतरकतमाः । जसः कार्यं प्रति विभाषा । अकज्जसि न भवति—कतरकतमाः ।

कतरकतमे–सर्वनामसंज्ञापक्षे 'जसः शी' भवति । **जसः कार्यम् प्रति**–सूत्रे 'जसि' इति पदे कार्ये सप्तमी । अतो यत्र जसः कार्यं शीभावस्तत्र विभाषा, नाकचि कर्तव्ये । तत्र तु नित्य एव निषेधस्तेन **कतरकतमकाः** इत्यत्र क प्रत्ययो भवति ।

प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ॥३३॥

विभाषा जसीति वर्तते । तयः प्रत्ययः, शिष्टानि प्रातिपदिकानि । उभयशब्दस्य तयप्प्रत्ययान्तस्य गणे पाठान्नित्या सर्वनामसंज्ञा । इहापि जसः कार्यं प्रति विभाषा ।

उभयशब्दस्तयपोऽयजादेशेऽपि स्थानिवद्भावेन तयप्प्रत्ययान्तो भवति । तस्य नेमशब्दस्य च सर्वादिगणे पाठान्नित्या सर्वनामसंज्ञा प्राप्ता, अन्येषाञ्चाप्राप्ता; जसि विकल्पेन भवति । **प्रथमे/प्रथमाः** इत्याद्युदाहरणानि ।

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥३४॥

एतानि जसि वा सर्वनामाख्यानि व्यवस्थायाम् असंज्ञायाम् ।

एतानि–पूर्व-पर-अवर-दक्षिण-उत्तर-अपर-अधर इति सर्वादिगणे पठितानि । नित्या प्राप्ता सर्वनामसंज्ञा जसि विभाषा भवति । **व्यवस्था**–स्वाभिधेयापेक्षावधिनियमः । यथा पूर्वस्य योऽभिधेयः पूर्वत्वरूपः, स कञ्चनावधिनियममपेक्ष्य भवति, यथा प्रयागतः पूर्वं पाटलिपुत्रम् । एवं परादीनामपि बोध्यम् । तेन दक्षिणाः (कुशलाः) गायकाः, अत्र न सर्वनामत्वम् । उत्तराः कुरवः–अत्रोत्तरपदं संज्ञार्थकमिति न सर्वनामता ।

स्वमज्ञातिधनाख्यायाम् ॥३५॥

ज्ञातिधनान्यवाचिनः स्वशब्दस्य जसि वा सर्वनामाख्या । स्वाः पुत्राः । स्वे गावः । आत्मीया इत्यर्थः ।

ज्ञातिधनभिन्ने (आत्म-आत्मीय–) अर्थे स्वशब्दस्य जसि वा सर्वनामसंज्ञा । पक्षे **स्वे पुत्राः**, **स्वाः गावः** इत्यपि रूपे भवतः । ज्ञातिधनवाचिनस्तु **स्वाः** (ज्ञातयः), प्रभूताः स्वाः (धनानि) इत्येव रूपं भवति ।

अन्तरं बहिर्योगोपसंव्यानयोः ॥३६॥

अन्तरे गृहाः, अन्तराः वा । नगरबाह्याश्चाण्डालगृहाः उच्यन्ते इत्यादि ।

बहिर्योगः–अनावृतदेशः । **उपसंव्यानम्**–परिधानीयम् । एतयोरर्थयोर्गम्यमानयोरन्तरशब्दस्य जसि वा सर्वनामता । परिधानीयार्थे–**अन्तरे/अन्तरा** वा शाटकाः । परिधानीया इत्यर्थः ।

स्वरादिनिपातमव्ययम् ॥३७॥

स्वरादीनि शब्दरूपाणि, निपाताश्चाव्ययसंज्ञाः । के पुनः स्वरादयः ? स्वर्, अन्तर् एवमादयः । निपाताश्च प्राग्रीश्वरात् च-वादयः ।

स्वरादयश्चादयश्चाकृतिगणाः । तेषामुभयेषाम् अव्ययसंज्ञा भवति । अव्ययसंज्ञायाः फलं विभक्तिलोपादयः । अव्ययप्रदेशाः 'अव्ययादाप्सुपः' इत्येवमादयः ।

तद्धितश्चासर्वविभक्तिः ॥३८॥

योऽसर्वविभक्तिस्तद्धितान्तः शब्दः सोऽव्ययसंज्ञः । ततः इत्यादि ।

सर्वा विभक्तिर्यस्य सम्बन्धिनी न भवति **सोऽसर्वविभक्तिः । ततः, तत्र, तदा** प्रभृतीनि विभक्त्यर्थप्रधानान्यव्ययपदानि । तेभ्यः प्रथमैकवचनमेव, तस्य 'अव्ययादाप्सुपः' इति लुक् ।

कृन्मेजन्तः ॥३९॥

कृद्यो मान्त एजन्तश्च सोऽव्ययसंज्ञः । स्वादुङ्कारम् । वक्षे रायः ।

स्वादुङ्कारम्–स्वादुम् √कृ + णमुल् (अम्) वृद्धिः । मान्तस्योदाहरणमिदम् । एजन्तस्य **वक्षे**–√ब्रू + तुमर्थे (तुमुन्प्रत्ययस्यार्थे) से । 'ब्रुवो वचिः' । अव्ययत्वाद् विभक्तेर्लुक् ।

क्त्वातोसुन्कसुनः ॥४०॥

क्त्वा-तोसुन्-कसुन् इत्येवमन्तमव्ययम् । कृत्वा । उदेतोः । विसृपः ।

क्रमशः उदाहरणानि । √कृ + क्त्वा, उत् √इ + तोसुन्, वि√सृप् + कसुन् । अव्ययत्वाद् विभक्तेर्लुक् ।

अव्ययीभावश्च ॥४१॥

अव्ययसंज्ञः । किं प्रयोजनम् ? लुङ्मुखस्वरोपचाराः । लुक्—उपाग्नि । मुखस्वरः—उपाग्निमुखः । उपचारः—उपपयःकारः ।

उपाग्नि–'अव्ययादाप्सुपः' इत्यनेन लुक् विधीयते । **उपाग्निमुखः**–'मुखं स्वाङ्गम्' इत्युत्तरपदान्तोदात्तत्वस्य 'नाव्ययदिक्शब्द....' इत्यनेन प्रतिषेधः । **उपपयःकारः**–अत्र 'अतः कृकमि....अनव्ययस्य' इत्यनव्ययपर्युदासेन सत्त्वनिषेधे जिह्वामूलीयः, पक्षे विसर्गो भवति । विसर्जनीयस्थानिकस्य सकारस्य 'उपचार' इति संज्ञा । अत्र लुको विधिः मुखस्वरोपचारयोश्च निषेधः प्रयोजनतया बोध्यः ।

शि सर्वनामस्थानम् ॥४२॥

जश्शसोः शिः । तस्य सर्वनामस्थानसंज्ञा । कुण्डानि ।

'जसः शीः', 'नपुंसकाच्च' इत्याभ्यां विहितस्य 'शी' इत्यस्य, नपुंसके ह्रस्वत्वमापन्नस्य तु न ग्रहणं लाक्षणिकत्वात्तयोः **कुण्डानि**–'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घः ।

सुडनपुंसकस्य ॥४३॥

'सुट्' इति पञ्च वचनानि सर्वनामस्थानानि नपुंसकादन्यत्र । राजा ।

सुट् इति प्रत्याहारः सु–औ–जस्–अम्–औट् इति पञ्च विभक्तीनां संज्ञा । **राजा**–अत्र 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घः । एवं **राजानौ, राजानः** इत्यादि । नपुंसके न विधिर्न प्रतिषेधस्तेन 'कुण्डानि' इत्यत्र दीर्घत्वं भवत्येव ।

नवेति विभाषा ॥४४॥

नेति प्रतिषेधो वेति विकल्पः, तयोर्विभाषा संज्ञा । विभाषाप्रदेशेषु प्रतिषेधविकल्पयोरुपस्थानम् भवति । पूर्वम् प्रतिषेधः पश्चाद् विकल्पः । शुशाव/शिश्वाय ।

शुशाव–'विभाषा श्वेः' इति सम्प्रसारणम्, तदभावे **शिश्वाय** । अत्र विधिमुखेन विभाषा प्रवर्त्तते । **शुशुवतुः/शिश्वियतुः**–इत्यत्र तु 'वचिस्वपीति' नित्ये प्राप्ते विभाषा ।

इग्यणः सम्प्रसारणम् ॥४५॥

'इक्' यो 'यणः' स्थाने भूतो भावी, तस्य सम्प्रसारणमित्येषा संज्ञा । √यज्–इष्टम् । केचिदुभयथा सूत्रमिदं व्याचक्षते–वाक्यार्थः संज्ञी वर्णश्चेति. 'इग्यणः' इति यो वाक्यार्थः स सम्प्रसारणसंज्ञः । यणस्थानिक इग्वर्णः स सम्प्रसारणसंज्ञो भवति । तत्र विधौ वाक्यार्थ उपतिष्ठते–'वसोः सम्प्रसारणम्', 'ष्यङः सम्प्रसारणम्' । अनुवादे वर्णः 'सम्प्रसारणाच्च' ।

यणः इति स्थाने षष्ठी, 'षष्ठी स्थाने योगा' इत्यधिकारात् । **भूतः**–'सम्प्रसारणाच्च' इत्यादिषु कार्यान्तरार्थमनूदितः । **भावी**–'वसोः सम्प्रसारणम्' इत्यादिभिर्विधीयमानः । उदाहरणम्, **इष्टम्**–अत्र पूर्वं 'वचिस्वपि····' इत्यादिना यकारस्येकारः सम्प्रसारणम्, तदनन्तरं 'सम्प्रसारणाच्च' इति पूर्वरूपम्भवति । अत्र भाविनो भूतस्योभयोः सम्प्रसारणसंज्ञा । **वाक्यार्थः**–'यणः स्थाने इक् भवति । अयं भावी इक् । अस्य प्रदेशेषु 'सम्प्रसारणम्' इति प्रथमान्तं पदं निर्दिष्टम् । वर्णः–यत्र भूतः **इक्**–इकारादिवर्णरूपः । अयं भूत **इक्** । अस्य प्रदेशेषु पञ्चमी, षष्ठी वा भवति ।

आद्यन्तौ टकितौ ॥४६॥

एतावागमौ षष्ठीनिर्दिष्टस्याद्यन्तावयवौ स्तः । क्रमेण–लविता । भीषयते ।

'षष्ठी स्थाने योगा' इत्यस्यापवादरूपं परिभाषासूत्रम् । तत एव 'षष्ठी' पदं सिंहावलोकनन्यायेनोपस्थितं भवति । 'टित्' आगमः आद्यवयवः यथा **लविता** । 'ता' इत्यस्य 'इता' इति । 'कित्' आगमः अन्तावयवः **भीषयते**–√भी इत्यस्य 'भीष्' इति भवति । **टकितौ**–टश्च कश्च टकौ तावितौ यस्य तौ टकितौ ।

मिदचोऽन्त्यात्परः ॥४७॥

'अचः' निर्धारणे षष्ठी, जातावेकवचनम् । अचां सन्निविष्टानामन्त्यादचः परो मिद् भवति, रुणद्धि ।

※ (वा०) मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थम् । मग्नः ।

अचां मध्ये योऽन्त्योऽच् तस्मादित्यर्थः । निर्धारणप्रतीतिरपि सजातीयस्यैवेति अन्त्योऽप्यच् एव भवति । **रुणद्धि**–नुम् रुकारोकारात्परो भवति । **मग्नः**–√मस्ज्+क्त / नुम् जकारात्पूर्वं भवति, तेन म स् न् ज् त इति जाते सकारस्य, उपधाभूतनकारस्य च लोपे जकारस्य कुत्वे तकारस्य च नत्वे 'मग्नः' इति रूपम् भवति । **अनुषङ्गः**–नकारस्योपधायाः पूर्वाचार्यकृता संज्ञा ।

एच इग्घ्रस्वादेशे ॥४८॥

ह्रस्वादेशे कर्त्तव्ये एचः इगेव । अतिरि ।

इदं परिभाषा सूत्रम् । ह्रस्वविधायकेषु सूत्रेषु 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यादिषूपतिष्ठते । एचः ह्रस्वादेशे 'ओ–औ' इत्यनयोः स्थाने कदाचित् अकारोऽपि स्यात्, तन्निवृत्त्यर्थमिदमारभ्यते । **अतिरि**–रायम् अतिक्रान्तम् 'अतिरै' अत्रैकारस्य ह्रस्व इकारो भवति । एवम् **अतिनु**, **उपगु** इत्यादि बोध्यम् ।

षष्ठी स्थानेयोगा ॥४९॥

परिभाषेयं योगनियमार्था । शास्त्रे अनियतयोगा या षष्ठी श्रूयते, सा स्थाने योगैव भवति, नान्ययोगा । स्थाने योगस्य निमित्तभूते सति । स्थानं प्रसङ्गः । दर्भाणां स्थाने शरैः प्रस्तारितव्यमिति प्रसङ्गो गम्यते, एवमत्रापि । अस्तेः स्थाने—प्रसंगे भूर्भवति । भविता ।

योगे सम्बन्धे नियमः, सोऽर्थः प्रयोजनं यस्याः सा । 'स्थाने' इत्यत्र निमित्तसप्तमी, योगः सम्बन्धः । **स्थानेयोगैव**–यथा 'अस्तेर्भूः' तत्र अस्तेः स्थाने 'भू' भवति, पूर्वं वा परं वा तत्र नियमः क्रियते; स्थाने एव । स्थाने योगोऽस्याः इति व्यधिकरणबहुव्रीहिः । निपातनात् सप्तम्या अलुक् अत्र स्थानशब्दः प्रसङ्गवाची नापकर्षनिवृत्तिवाचकः । 'अस्तेर्भूः' 'ब्रुवो वचिः' इत्यत्र **स्थाने**–प्रसङ्गे–सम्बन्धस्य निमित्तभूते । 'अस्तेः' 'ब्रुवः' इत्यत्र षष्ठी ।

स्थानेऽन्तरतमः ॥५०॥

कुतश्च शब्दस्यान्तर्यम् ? स्थानार्थगुणप्रमाणतः । स्थानतः– 'अकः सवर्णे दीर्घः'—दण्डाग्रम्, द्वयोरकारयोः कण्ठ्य एव दीर्घः ।

अर्थतः वतण्डी चासौ युवतिः वातण्ड्ययुवतिः । गुणतः—पाकः । 'चजोः कुः' इत्यल्पप्राणस्याघोषस्य चकारस्य तादृश एव ककारः । प्रमाणतः—अमुष्मै, अमूभ्याम् 'अदसो से'रिति ह्रस्वस्य ह्रस्वः दीर्घस्य दीर्घः । पुनः स्थानग्रहणं यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीय इति ज्ञापयति । चेता । प्रमाणतोऽकारः प्राप्तस्तत्र स्थानत एकार एव भवति ।

इदं परिभाषासूत्रम् अन्तरतमादेशनियमार्थम् । **अन्तरतमः**—सदृशतमः । **वातण्ड्ययुवतिः**—वतण्डीशब्दस्य पुंवद्भावेन तत्समानार्थको वातण्ड्यो भवति । **गुणतः**—गुणशब्देनात्राभ्यन्तरप्रयत्नो गृह्यते । **पुनः स्थानग्रहणम्**—'षष्ठी स्थाने' इत्यतः 'स्थाने' पदानुवृत्तिसम्भवेऽपीतिशेषः । अनुवृत्तस्थान-शब्दः प्रसंगवाची, अयञ्च ताल्वादिस्थानवाची । अतः प्रसङ्गे सति ताल्वादिस्थानेन निमित्तेन योऽन्तरतमः स एव भवति । अतः **चेता**—इत्यत्र ह्रस्वेकारस्य स्थाने तालुस्थानीय एकार एव गुणो भवति, न तु प्रमाणतो-ऽन्तरतमोऽकारः । **अन्तरतम** इत्यत्र तमब्ग्रहणादयमर्थः—**स्थाने** प्रसंगे प्राप्यमाणानामन्तरतम आदेशो भवति, **स्थाने**—ताल्वादिस्थाने च भवति । यत्र च स्थानकृतान्तर्येण नाभीष्टसिद्धिर्नच निर्णयस्तत्राभ्यन्तर-बाह्यप्रयत्न-कृतसाम्यमाश्रीयते । तादृशाः प्रयोगाः **उत्थानम्, वाग्घरिः** इत्यादयः ।

उरण् रपरः ॥५१॥

उः स्थानेऽण् प्रसज्यमान एव रपरो वेदितव्यः । कर्त्ता ।

उः—ऋकारस्य स्थाने ('षष्ठी स्थाने योगा' सूत्रादनुवर्तते ।) **प्रसज्यमानः** ('स्थानेऽन्तरतमः' सूत्रात्प्रसङ्गार्थकः 'स्थाने' पदमनुवर्तते ।) विधानकाल एव । **रपरः**—रः परो यस्मात् सः । **कर्ता**—√कृ+तृच्, ऋकारस्य स्थाने अकारो रपरः '**अर्**' इति भवति । तत 'अचो रहाभ्यां द्वे' इति तकारस्य द्वित्वम् । ऋलृवर्णयोः सावर्ण्यात् अत्र लृकारस्य स्थाने प्रसज्यमानोऽण् लपरो भवतीत्यपि ज्ञेयम् । उदाहरणम्—**तवल्कारः** इति ।

अलोऽन्त्यस्य ॥५२॥

षष्ठीनिर्दिष्टस्य य उच्यते आदेशः सोऽन्त्यस्यालः स्थाने प्रत्येतव्यः । पञ्चगोणिः ।

अलः इति पदं षष्ठ्येकवचनान्तम् । **अन्त्यस्य** इति पदस्य विशेष्यम् । **षष्ठीनिर्दिष्टस्य**—'षष्ठी स्थाने योगा' इत्यधिकाराल्लब्धः । **पञ्चगोणिः**—

'इद्गोण्याः' इत्यनेन गोण्याः 'इत्' आदेशः। षष्ठीनिर्दिष्टत्वात् अन्त्यस्याल ईकारस्य भवति।

ङिच्च ॥५३॥

ङित् च य आदेशः सोऽनेकालपि अन्त्यस्याचो भवति। होता।

ङित्–ङकार इत् यस्य सः। अनेकाल्त्वात्सर्वस्य प्राप्तः, इत्यनेनान्त्यस्याचो भवति। **होता**–होतृ + सु 'ऋदुशनस्...' इत्यादिना अन्त्यस्याल ऋकारस्यैव अनङ् भवति।

आदेः परस्य ॥५४॥

पञ्चमीनिर्देशेन कार्यं परस्यादेरलो ज्ञेयम्। 'द्व्यन्त....ईत्' द्वीपम्।

यत्र पञ्चमीनिर्देशस्तत्र 'तस्मादित्युत्तरस्य' इत्यनेन परस्य कार्यं भवति। परस्य च यत्कार्यं तत् तस्यादेरलो बोध्यम्, इत्यनेन नियम्यते। **द्वीपम्**–'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इत्यनेन द्वि + अप् इत्यवस्थायाम् अपः ईत्त्वम् आदेरकारस्य भवति। अः समासान्तः।

अनेकाल्शित् सर्वस्य ॥५५॥

अनेकाल्–'अस्तेर्भूः' भविता। शित्–'जश्शसोः शिः' वनानि।

अनेकाल्–अनेके अलः = वर्णाः यस्मिन् सः। **शित्**–शकार इत्संज्ञको यस्य स आदेशः सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवति। **भविता**–'भू' आदेशः अनेकाल् (भ् + ऊ) **वनानि**–'शि' आदेशः शित्।

स्थानिवदादेशोऽनल्विधौ ॥५६॥

स्थान्याश्रयं कार्यमादेशे न प्राप्नोत्यस्यारम्भः। अलाश्रयविधिं विना। स च धात्वादीनां प्रसिद्धः 'अस्तेर्भूः' इत्यादि।

स्थानिना तुल्यं वर्तते, इति स्थानिवत्। स्थान्याश्रये कार्ये कर्त्तव्ये आदेशः स्थानिवद् भवति। **अलविधिः**–अलाश्रयविधिः। स न भवतीत्यनल्विधिस्तस्मिन्। 'अस्तेर्भूः' **भविता** इत्यत्र अस्धातोर्भूरादेशे स्थानिवत्त्वात् भुवो धातुसंज्ञया 'इट्' भवति। **प्रकृत्य** इत्यत्र क्त्वाप्रत्ययस्य ल्यबादेशे तं कृत्प्रत्ययं मत्वा 'तुक्' भवति। अलाश्रयविधौ तु 'द्यौः' 'पन्थाः' इत्यादिषु स्थानिवद्भावाभावेन 'हल्ङ्याभ्यः' इति न सुलोपः।

अचः परस्मिन् पूर्वविधौ ॥५७॥

'अचः' इति स्थानिनिर्देशः। 'परस्मिन्' इति निमित्ते सप्तमी, पूर्वविधाविति विषये। अजादेशः परनिमित्तकः पूर्वस्य विधौ कर्त्तव्ये स्थानिवद् भवति। पटयति। णिचि टिलोपे कृते स्थानिवत्त्वादुपधा-वृद्धिर्न।

'अचः' इति पदे स्थाने षष्ठी, 'स्थानिवत्' इत्यनुवर्तते। **पटयति**–पटुम् आचष्टे इति नामधातु-प्रयोगे पटु+णिच्+लट्→ति। टेः उकारस्य लोपे√पट् इ ति। लोपस्य स्थानिवत्त्वात् उपधाया असत्त्वात् वृद्धिर्न।

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घ–जश्चर्विधिषु ॥५८॥

प्रसक्तोऽप्येतेषु विधिषु न स्थानिवद्भावः। पदान्ते–कानि सन्ति, इत्यादि।

प्रसक्तः–पूर्वसूत्रेणेति शेषः। **कानि सन्ति**–अत्र 'श्नसोरल्लोपः' इति अस् धातोरलोपस्य स्थानिवद्भावेन 'कानि' पदान्तेकारस्य यणि प्राप्ते स्थानिवत्त्वनिषेधः। द्विर्वचनम्–**दद्ध्यत्र**–यणादेशस्य स्थानिवद्भावनिषेधेन 'अनचि च' इति द्वित्वं भवति। वरे–निपातनात् सप्तम्याः अलुक्, **यायावरः**–√या+यङ्+वर अतो लोपस्य स्थानिवत्त्वात् 'आतो लोपः' इत्यनेन आकार-लोपो न भवति। यलोप–**कण्डूतिः** कण्डूय+क्तिन् अतो लोपस्य स्थानिवद्-भावनिषेधात् यलोपो भवति। स्वरः–**चिकीर्षकः**–अत्र अतो लोपः प्रत्ययात्पूर्व-स्योदात्ते कर्त्तव्ये न स्थानिवत्। सवर्णानुस्वारविधौ–**शिण्ढि**–'श्नम्' इत्यस्या-कारलोपः परसवर्णविधौ एवं **शिंषन्ति** इत्यत्राप्यनुस्वारविधिं प्रति न स्था-निवत्। दीर्घजश्चर्विधयः–**प्रतिदीव्ना** इत्यत्र 'अल्लोपोऽनः' इत्यकारलोपः दीर्घं प्रति, **सग्धिश्च** मे–अत्रोपधालोपो जश्विधिं प्रति, **जक्षतुः**–अत्र चोपधालोपश्चर्विधिं प्रति न स्थानिवत् इति बोध्यम्।

द्विर्वचनेऽचि ॥५९॥

रूपातिदेशोऽयम्। कृते द्वित्वे पुनरादेशरूप एवावतिष्ठते। आल्लोपोपधालोपणिलोपयणयवायावादेशाः प्रयोजनम्। आल्लोपः–पपतुः इत्यादि।

द्विर्वचने कर्त्तव्ये द्वित्वनिमित्तेऽचि अजादेशः स्थानिवद् भवति। द्विर्वचन-पदे एकशेषस्तेनोक्तार्थलाभः । **रूपातिदेश**–रूपमेवातिदिश्यते, द्वित्वानन्तरमादेशरूपमेव तिष्ठति, न तु स्थानिरूपम् । **पपतुः**–√पा + लिट्→ अतुस् आतो लोपस्य स्थानिवद्भावात् 'एकाचः''' इत्यनेन 'पा' इत्यस्य द्वित्वं भवति। उपधालोपः–**जघ्नतुः** । णिलोपः–**आटिटत्** । यण्–**चक्रतुः** । यणादेशे कृतेऽपि द्वित्वं भवति । अय्–अव्–आय्–आव् आदेशाः–उदाहरणानि क्रमशः **निनय, लुलव, निनाय, लुलाव** । लिटि उत्तमपुरुषैकवचनेऽयादीनां स्थानिवत्त्वात् ने - नै - लो - लौ इत्येषां द्वित्वं भवति ।

अदर्शनं लोपः ॥६०॥

अदर्शनमश्रवणमनुच्चारणमनुपलब्धिरभावो वर्णविनाशः इत्यनर्थान्तरम् । अर्थस्येयं संज्ञा न शब्दस्य, तस्यासत्त्वादसम्भवात् ।

अनर्थान्तरम्–समानार्था एते शब्दाः । **अर्थस्य**—यस्य लोपो भवति तस्य लोपसंज्ञा न लोपशब्दस्येत्यर्थः ।

प्रत्ययस्य लुक्श्लुलुपः ॥६१॥

एतैः कृतं प्रत्ययादर्शनम् क्रमादेतत्संज्ञम् । अत्ति । जुहोति । वरणाः ।

एतैः–लुक्–श्लु–लुप्नामभिः । **लुक्**–अत्ति, 'अदिप्रभृतिभ्यः शपः' इति शपो लुक् । **श्लु** –जुहोति, 'जुहोत्यादिभ्यः श्लुः' । **लुप्**–वरणाः वरणानाम् (वृक्षाणाम्) अदूरभवो ग्रामः इत्यर्थे अणः 'वरणादिभ्यश्च' इति लुप् ।

प्रत्ययलोपे प्रत्ययलक्षणम् ॥६२॥

असति प्रत्यये कथं कार्यं तन्निमित्तमित्यारम्भः । अग्निचित् । सुपो लोपेऽपि पदसंज्ञा ।

प्रत्ययस्य लोपः–अदर्शनम् । प्रत्ययो **लक्षणं** निमित्तं यस्येति कार्येऽन्यपदार्थे बहुव्रीहिः । **अग्निचित्**–अग्नि √चि + क्विप् तस्य लोपेऽपि तदाश्रयस्तुक् । ततः सुबन्तमाश्रित्य पदत्वम् । **अधोक** इत्यत्र च तिङ्लोपेऽपि तिङन्तमाश्रित्य पदसंज्ञा बोध्या ।

न लुमताङ्गस्य ॥६३॥

विशेषे प्रतिषेधार्थमारम्भः । गर्गाः । मृष्टः । जुहुत ।

'लु' शब्दोऽस्ति यस्मिन् स लुमान् **लुक—श्लु—लुप** च, तेन लुप्ते प्रत्यये तन्निमित्तम् अङ्गकार्यं न भवति । **गर्गाः**—अत्र यञ् प्रत्ययस्य 'यञञोश्च' इति लुक्, तन्निमित्तिका वृद्धिर्न । **मृष्टः**—'अदिप्रभृतिभ्यः शपः' इति शपो लुक्, तन्निमित्ता मृजेर्वृद्धिर्न । **जुहुत**—अत्र शपः श्लुः, सार्वधातुकलक्षणो गुणो न । लुपः उदाहरणं—**उष्ट्रग्रीव**—अत्र कन् प्रत्ययस्य 'देवपथादिभ्यश्च' इति लुप्, तेन तन्निमित्तम् आद्युदात्तं न भवति ।

अचोऽन्त्यादि टि ॥६४॥

'अचः' इति निर्धारणे षष्ठी जातौ । अचां सन्निविष्टानां योऽन्त्योऽच् तदादि शब्दरूपं टिसंज्ञम् । अग्निचित्— 'इत्' शब्दः ।

निर्धारणं सजातीयेषु सजातीयस्य भवतीत्यचां मध्ये योऽन्त्यः स आदिर्यस्येति । तेन अग्निचितम् आचष्टे इति **अग्निचयति** 'णाविष्ठवत्' इति टिसंज्ञकस्य 'इत्' इत्यस्य लोपः ।

अलोऽन्त्यात्पूर्व उपधा ॥६५॥

√पच्—अकारः ।

'अलः' इति पञ्चमी । अन्त्यात् अलः पूर्वो वर्ण उपधासंज्ञो भवति । उदाहरणम्—√पच् इत्यत्र 'अकारः' । अयम् अन्त्यात् चकारात् पूर्ववर्णोऽस्तीत्यतः उपधासंज्ञकः, तेन **पाचकः** इत्यत्र 'अत उपधाया' इत्यकारस्य वृद्धिः ।

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥६६॥

तस्मिन्निति सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं नोत्तरस्य । 'इको यणचि'—दध्यत्र । निर्दिष्टग्रहणमानन्तर्यार्थम् । व्यवहितस्य मा भूत्—अग्निचित् अत्र ।

तस्मिन्निति पदं निर्दिष्टस्यार्थग्रहणं सम्पादयति । **दध्यत्र**—अत्र 'अचि' इति सप्तमीनिर्दिष्टं कार्यम्—इको यण् पूर्वस्येकारस्य भवति । **निर्दिष्टम्**—निरन्तरम्—निरन्तरोच्चारितं दिष्टम् अतः अव्यवहितार्थो गम्यते । **अग्निचित्**—अस्मिन् प्रयोगे तकारस्य व्यवधानात् इकारस्य यण् न भवति ।

तस्मादित्युत्तरस्य ॥६७॥

'ङः सि धुट्'—षट्त्सन्तः ।

निर्दिष्टग्रहणमनुवर्तते। 'तस्मादिति' अर्थनिर्देशार्थम्, निर्दिष्टमानन्तर्यार्थम्। तेन पञ्चमीनिर्देशेन विधीयमानं कार्यमव्यवहितस्योत्तरस्य भवतीत्यर्थः। षट्सन्तः-डात् अव्यवहितोत्तरस्य सकारस्य धुट् (ध् → त्) भवति।

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥६८॥

शास्त्रे स्वमेव रूपं शब्दस्य ग्राह्यं न बाह्योऽर्थः, शब्दस्य संज्ञां विना। 'अग्नेर्ढक'—आग्नेयं न वह्न्यादीनां ग्रहणम्। अशब्दसंज्ञेति—किम्? 'दाधाघ्वदाप्' अत्र संज्ञिनां ग्रहणं न तु 'घु' इत्येतच्छब्दस्य।

शास्त्रे नियमार्थमिदं परिभाषा-सूत्रम्। ग्राह्यम्-णिजन्त√ग्रह धातोः (ग्राहि) + यत्। शास्त्रे शब्दः स्वमेव रूपं ग्राहयति-बोधयतीत्यर्थः। शब्दस्येति कर्तरि षष्ठी। आग्नेयम्—'अ ग् न् इ' इत्यानुपूर्वीविशिष्टात् एवाग्निशब्दात् ढक् प्रत्ययः सूत्रकारेणाभीष्टः। वह्निशब्दे न सा आनुपूर्वी। संज्ञिनाम्—दा-दो-दे-धा इत्येतेषाम्।

अणुदित्सवर्णस्य चाप्रत्ययः ॥६९॥

अत्र 'अण्' परेण णकारेण। अण् गृह्यमाण उदिच्च सवर्णस्य ग्राहको भवति, स्वस्य च रूपस्य; प्रत्ययं वर्जयित्वा। 'आद्गुणः' 'अस्य च्वौ' इत्यादौ, 'चुटू' इत्यादौ च।

नियमार्थं संज्ञासूत्रमिदम्। अण्प्रत्याहारः अकारमारभ्य लण्सूत्रस्थणकारपर्यन्तम्। गृह्यमाणः=उपदिश्यमानः, अक्षरसमाम्नाये उच्चारितः इत्यर्थः। सवर्णस्य—सवर्णसंज्ञा तुल्यास्येतिसूत्रविहिता। स्वस्य च-स्वं रूपमित्यनुवर्तते। अप्रत्ययः-प्रतीयते = विधीयते इति प्रत्ययः स न भवतीत्यप्रत्ययः 'आद्गुणः'—अकारो ह्रस्वस्य दीर्घस्य च ग्राहकस्तेन देव + इन्द्रः, खट्वा + इन्द्रः उभयत्र गुणो भवति। 'अस्य च्वौ'—शुक्ली भवति, माली भवति ह्रस्वदीर्घयोरप्यकारयोः ईत्वम्। 'चुटू'—चुः चवर्गस्य, टुः टवर्गस्य बोधकः। प्रत्यये न सवर्णता तेन 'सनांशसभिक्ष उः, ह्रस्व एवोकारो भवति।

तपरस्तत्कालस्य ॥७०॥

पञ्चमी बहुव्रीहिः, पञ्चमीतत्पुरुषश्च तपर इत्यत्र। 'अतो भिस् ऐस्', 'वृद्धिरादैच्' इत्यादौ।

तः परो यस्मात्, तात्परश्चेति विग्रहद्वयम्, तेन सूत्रे यस्मात्परः तः, यश्च तात्परः तावुभौ तत्कालस्य बोधकौ स्तः । 'अतो भिस् ऐस्'—अतः-ह्रस्वाकारात् परस्य भिसः 'ऐस्' न तु दीर्घाकारात्परस्य, तेन रामैः इत्यत्र भवति रमाभिः इत्यत्र न । बहुव्रीहिसमासोऽत्र 'अत्' पदे । द्वितीयस्योदाहरणं 'वृद्धिरादैच् – खट्वा + एडका = खट्वैडका इत्यत्र चतुर्मात्रस्यैचो व्यावृत्तिः । तात्परः 'ऐच्' द्विमात्र एव गृह्यते ।

सूत्रे तत्कालस्य इति पदस्यायमर्थः—तपरो वर्णः (त परो यस्मात्, तात्परश्चेत्युभयार्थकः) तत्कालस्य = आत्मना तुल्यकालस्य गुणान्तर - युक्तस्य = येन गुणेनोदात्तादिना विशिष्ट उच्चारितः ततोऽन्यैर्गुणैः संयुक्तस्य ग्राहको भवति । अयम्भावः-तत्काल पदे उत्तरपदलोपी समासः-स कालो यस्य इति तत्कालः । तत्काल इव कालो यस्य सोऽपि तत्कालः । अर्थात् या क्रिया तपरवर्णस्योच्चारणे भवति तादृगेवोच्चारणक्रिया यस्य स तपरः ।

आदिरन्त्येन सहेता ॥७१॥

अच्, हल् । अन्त्येन किम् ? सुडिति तृतीयैकवचनेन'टा' इत्यनेन ग्रहणं मा भूत् ।

इदं संज्ञासूत्रम् । आद्यन्तौ मध्यवर्णमपेक्षेते, स्वं रूपमित्यनुवर्तते । आदिवर्णः अन्त्येन इता वर्णेन सह उच्यमानः (प्रत्याहार इत्यर्थः) मध्य-वर्णानां स्वस्य च संज्ञा भवति । अच्-इ-उ-ऋ-लृ-ए-ओ-ऐ-औ इति मध्यवर्णानां स्वस्य च संज्ञा । एवं हल् इत्यपि 'हल्' वर्णानां संज्ञा । 'औट्' इत्यत्र टकारः प्रत्याहारार्थः स एवान्त्यः ! 'टा' इत्यत्र तु तृतोयाविभक्ते-र्विशेषणार्थ इति भावः ।

अत्र 'अन्त्येन' इति पदे सह इत्यस्य योगे न तृतोया, अपि तु इत्थ-म्भूतलक्षणे सा । सह-योगे तृतीयायां सत्यां आदिरेव अन्त्येनेत्संज्ञकेन उपलक्षितः सन् वर्णानां संज्ञा स्यात् । अकः, इकः, अचि इति आद्यन्तयोः समुदायस्य निरर्थकत्वेन प्रातिपदिकसंज्ञाया असत्त्वात् विभक्तेरागमो नैवो-पपद्येत । सहग्रहणात्तु सहभूता संज्ञा इति समुदायस्य संज्ञात्वेनार्थवत्त्वा-त्प्रातिपदिकत्वे सति विभक्तयो भवन्ति ।

येन विधिस्तदन्तस्य ॥७२॥

येन विशेषणेन विधिर्विधीयते स तदन्तस्य—आत्मान्तस्य समु—

दायस्य ग्राहकः। 'एरच्' इवर्णान्तादच् प्रत्ययो भवति। चयः। 'ओरावश्यके'—उवर्णान्तात् ण्यद् भवति। अवश्यलाव्यम्।

इदं संज्ञासूत्रम्। येन–करणे तृतीया, स्वं रूपम् इत्यनुवर्तते तदन्त–स्य=सोऽन्ते यस्य स तस्य। आत्मान्तस्य–स्वस्येत्यर्थः। अन्तशब्दोऽवयववाची समुदायस्य स्वस्य च भवति तदन्तस्योदाहरणम्–चयः, अवश्यलाव्यम्–'एः' इति पदम् इवर्णान्तस्य 'ओः' इति पदम् उवर्णान्तस्य बोधकं तेन चिधातोरच्, लूधातोर्ण्यत् भवति। आत्मान्तस्योदाहरणम्—अयः, अरिता इति√इ+अच्, √ऋ+तृच् धातोर्गुणो भवति।

*(वा०) समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वाच्यः। समासे–'द्वितीया श्रितातीत………' इत्यनेन द्वितीयान्तस्य 'श्रित' इत्यादिना सह समासो भवति कष्टं श्रितः कष्टश्रितः। तदन्तविधेः प्रतिषेधादत्र न प्रवर्त्तते–कष्टं परमश्रितः इति। प्रत्ययविधौ–नडस्य अपत्यं नाडायनः 'नडादिभ्यः फक्'। इह न भवति सूत्रनडस्य अपत्यं सौत्रनाडिः। अत्र 'अत इञ्' इत्यनेन 'इञ्' एव।

*(वा०) उगिद्वर्णग्रहणवर्जमिति वाच्यम्। 'उगितश्च' इत्यनेन 'ङीप्' प्रत्ययः उगिदन्तात्, तदन्तान्ताच्च भवति भवती, अतिभवती।

*(वा०) यस्मिन् विधिस्तदादावल्ग्रहणे। अल्ग्रहणेषु यस्मिन् विधि-स्तदादाविति वक्तव्यम्। 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' अजादौ प्रत्यये ईकारस्य 'इयङ्', ऊकारस्य 'उवङ्', भवतः। श्रियः, भ्रुवः। अत्र 'अचि' इत्यस्य 'अजादौ' इत्यर्थो गृह्यते।

वृद्धिर्यस्याचामादिस्तद्वृद्धम् ॥७३॥

शालीयः, औपगवीयः।

यस्य–समुदायस्य। अचाम्–निर्धारणे षष्ठी बहुवचनं जातौ। वृद्धिः–वृद्धिसंज्ञकः। वृद्धम्–वृद्धसंज्ञकम्। शालीयः, औपगवीयः–आद्याकारस्य आद्यौकारस्य च वृद्धितया वृद्धसंज्ञया 'वृद्धाच्छः' इत्यनेन 'छ' प्रत्ययो भवति।

त्यदादीनि च ॥७४॥

एतानि वृद्धसंज्ञानि। त्यदीयम्। तदीयम्।

त्यदादीनि–सर्वनामगणे पठितानि। त्यदीयम्–अत्रापि वृद्धाच्छो भवति।

एङ् प्राचां देशे ॥७५॥

एङ् यस्याचामादिस्तत् प्राग्देशाभिधाने वृद्धसंज्ञम् । एणीपचनीयो देशः ।

यस्याचामादिरित्यनुवर्तते । **प्राचां दे शे**–प्राचि–पूर्वस्मिन् देशे ये वसन्ति ते प्राचस्तेषां देशस्य संज्ञायाम् । व्याकरणशास्त्रे इरावतीनद्याः पूर्वेण व्यवस्थितो देशः पूर्वदेशो मतः । **एणीपचनीयः**–वृद्धत्वात् छः ।

वृद्धिराद्यन्तवदव्ययीभावः प्रत्ययस्य लुक् पञ्चदश ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
प्रथमाध्यायस्य प्रथमः पादः ।

अस्मिन् काशिकासारे प्रतिविंशतिसूत्रं संख्यानिर्देशः–वृद्धिरादैच्, आद्यन्तवदेकस्मिन्, अव्ययीभावः, इत्येतेभ्य आरम्भ विंशतिः सूत्राणि तथा प्रत्ययस्य लुक्श्लुलुपः इत्यत आरम्भ पञ्चदश सूत्राणीति संकलनेन पंचसप्ततिः (७५) सूत्राण्यस्मिन् प्रथमाध्यायस्य प्रथमपादे सन्ति । एवं व्यवस्था सर्वत्र ज्ञेया ।

इति काशिकावृत्तिसार-सुधायां
प्रथमाध्यायस्य प्रथमः पादः ।

अथ प्रथमाध्याये द्वितीयः पादः

गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥१॥

गाङ् इति इङादेशो न √गाङ् गतौ । √कुट कौटिल्ये इत्यादेश्च परेऽञ्णितः प्रत्ययाः ङित्त्वेनातिदिश्यन्ते । √गाङ्—अध्यगीष्ट । √कुट—कुटिता । वृद्धिगुणाभावः ।

इङादेशः—'इङश्च' 'गाङ् लिटि' 'विभाषा लुङ्लृङोः' इत्येतैर्विहितः । अत्र प्रमाणम् इङादेशे ङकारकरणम् । **कुटादयः**—√कुट कौटिल्ये इत्यारभ्य √कुङ् शब्दे इति यावत् । **अञ्णितः**—ये ञितो णितो वा न सन्ति ते । **ङित्त्वेनातिदिश्यन्ते**—ङिद्वद्भवन्तीत्यर्थः । **अध्यगीष्ट**—√इङ् इत्यस्य लुङि रूपम् । **कुटिता**—√कुट+तृच् । ङिद्वत्त्वस्य प्रयोजनम् वृद्धिगुणाभावः ।

विज इट् ॥२॥

√ओविजी भयचलनयोः, अस्मात्पर इडादिः प्रत्ययो ङिद्वत् । उद्विजिता ।

'सृजि विजि' इति पठितस्तु न गृह्यते, अनिट्त्वात् । **इडादिः**—इट् आदिर्यस्य स 'तृच्' । 'वृद्धिर्यस्याचामादि'रित्यतः आदिग्रहणमनुवर्तते, तेनायमर्थो लब्धः । **उद्विजिता**—अत्र गुणो न भवति ।

विभाषोर्णोः ॥३॥

'इट्' इति वर्तते । √उर्णुञ् अस्मात्पर इडादिः प्रत्ययो वा ङिद्वत् । प्रोर्णुविता/प्रोर्णविता ।

प्रोर्णुविता—ङित्त्वात् गुणस्य प्रतिषेधे 'अचिश्नु.....' इत्यादिना 'उवङ्' आदेशः ।

सार्वधातुकमपित् ॥४॥

सार्वधातुकं यदपित्, तद् ङिद्वत् । कुरुतः ।

अपित्–तिप्, सिप्, मिप् इत्यादयः पितः ('प्' इत् येषु ते) पित् न भवति सोऽपित् **कुरुतः**–ङित्त्वे सति उकारस्य न गुणः ।

असंयोगाल्लिट् कित् ॥५॥

बिभिदतुः ।

'अपित्' इति वर्तते । असंयोगान्ताद् धातोः परो लिट् प्रत्ययोऽपित् किद् भवति । 'लिट्' सामर्थ्यादाक्षिप्तो धातुः असंयोगग्रहणेन विशिष्यते । **बिभिदतुः**–कित्त्वाद् गुणाभावः । संयोगान्त √स्रन्स् इत्यस्य 'सस्रंसे' इति भवति । अत्र कित्त्वाभावात् 'अनिदिताम्…' इत्यनुनासिकलोपो न भवति ।

इन्धिभवतिभ्यां च ॥६॥

पुत्र ईधे अथर्वणः । बभूव । इन्धेः संयोगार्थं, भवतेः पिदर्थं ग्रहणम् ।

√इन्ध्, √भू इत्येताभ्यां परो लिट् प्रत्ययः कित् । **ईधे**–√इन्ध्+लिट्→त→एश् कित्त्वात् 'अनिदिताम्…' इत्यनुनासिकलोपः । **बभूव**–√भू+लिट्—तिप्→णल् कित्त्वात् वृद्धिर्न भवति । 'असंयोगात्' 'अपित्' इति कथनात् पूर्वसूत्राभ्यां न सिद्ध्यति ।

मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥७॥

एभ्यः परः सेट् क्त्वा कित् । मृडित्वा इत्यादि । 'न क्त्वा सेट्' इति प्रतिषेधं वक्ष्यति, तस्यायं पुरस्तादपकर्षः । गुधादित्रयाणां 'रलो व्युपधात्' इति विकल्पे नित्यार्थम् ।

एभ्यः–√मृड-- √मृद--√गुध-- √कुष-- √क्लिश–√वद--√वस धातुभ्यः । **मृडित्वा**–कित्त्वाद् गुणाभावः । **मृदित्वा, गुधित्वा, कुषित्वा, क्लिशित्वा, उदित्वा, उषित्वा** इत्युदाहरणान्तराणि । **उदित्वा, उषित्वा**–अत्र कित्वाद् गुणाभावः 'वच्यादि' सूत्रेण सम्प्रसारणञ्च । **अपकर्षः**–अपवादः ।

रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥८॥

एभ्यः सन्, क्त्वा च कितौ । रुदादित्रयस्य 'रलो…' इति विकल्पे प्राप्ते नित्यार्थम्, ग्रहेर्विध्यर्थम्, स्वपिप्रच्छ्योश्च सन्नर्थं ग्रहणम् । किदेव हि क्त्वा । रुदित्वा । रुरुदिषति ।

एवं **विदित्वा, विविदिषति । मुषित्वा, मुमुषिषति । गृहीत्वा, जिघृक्षति । सुप्त्वा, सुषुप्सति । पृष्ट्वा, पिपृच्छिषति** । सर्वत्र गुणाभावः, √ग्रहि-√स्वपि-√प्रच्छधातूनां सम्प्रसारणञ्च कित्त्वस्य प्रयोजने ।

इको झल् ॥९॥

'सन्' इत्यनुवर्त्तते, क्त्वेति निवृत्तम् । इगन्तात्परो झलादिः सन् कित् । चिचीषति । गुणं बाधित्वा दीर्घस्यावकाशं दद्यात्तदर्थं कित्त्वारम्भः ।

कित्त्वारम्भः-अयम्भावः-**चिचीषति** इत्यादौ 'अज्झनगमां सनि' इति दीर्घत्वं गुणस्य बाधकं भविष्यति तेन न गुणाभावाय सूत्रारम्भः । परन्तु यथाऽनवकाशं दीर्घत्वं गुणं बाधते तथा णिलोपमपि बाधेत तेन **ज्ञीप्सति** इति न सिद्ध्येत । कित्त्वविधाने तु **चिचीषति** इत्यादौ कित्त्वेन गुणस्य बाधः, दीर्घत्वञ्च भवति । अत्र दीर्घत्वं सावकाशम् । णिलोपस्यावकाशः पाचयतेः पाक्तिः । 'ज्ञीप्सति' इत्यत्रोभयप्राप्तौ दीर्घं बाधित्वा परत्वात् णिलोप एव भवति ।

हलन्ताच्च ॥१०॥

इक् समीपाद्धलः परो झलादिः सन् किद् भवति । बिभित्सति ।

इकः, सन्, झल्, कित् इत्यनुवर्तन्ते । सूत्रेऽन्तशब्दः समीपार्थकः, अन्यथा हला सहेकः सम्बन्धो न स्यात् तदाह-**इक् समीपाद् हलः** इत्यादि । हल-हल्जातेरित्यर्थः । तेन √दम्भ+सनि = **धिप्सति** इत्यत्रापि कित्त्वं सिद्ध्यति । **बिभित्सति**-कित्त्वाद् गुणाभावः, **धिप्सति/धीप्सति** इत्यत्रोपधालोपश्च ।

लिङ्सिचावात्मनेपदेषु ॥११॥

इक् समीपाद्धलः परौ झलादी लिङ्सिचावात्मनेपदेषु कितौ । भित्सीष्ट । अभित्त ।

'हलन्तात् झल् कित्' इत्यनुवर्तते । **भित्सीष्ट**-√भिद्धातोराशीलिङि रूपम् । **अभित्त**-लुङि कित्त्वाद् गुणाभावः 'झलो झलि' इति सिचो लोपश्च ।

उश्च ॥१२॥

ऋवर्णान्तात्परौ झलादी लिङ्सिचावात्मनेपदेषु कितौ । कृषीष्ट । अकृत ।

कृषीष्ट, अकृत– √कृ इत्यस्य क्रमशः आशीर्लिङि, लुङि च रूपम् । कित्त्वाद् गुणाभावः । **अकृत**–'ह्रस्वादङ्गात्' इति सिचो लोपः ।

वा गमः ॥१३॥

गमेर्धातोः परावेतौ तादृशावेव वा कितौ । संगसीष्ट/संगंसीष्ट । कित्त्वपक्षेऽनुनासिकलोपः ।

एतौ–लिङ्सिचौ **तादृशौ**–आत्मनेपदेषु झलादी । लिङ उदाहरणमुक्तम् । सिचः **समगत**/समगंस्त । **अनुनासिकलोपः**–'अनुदात्तोपदेशवनतितनोत्यादीनाम्' इति सूत्रेण । 'ह्रस्वादङ्गात्' इति सिचो लोपः ।

हनः सिच् ॥१४॥

हन्तेः परः सिच् कित् । आहत ।

'आत्मने पदे' इत्यनुवर्तते । सिज्ग्रहणं लिङ्निवृत्त्यर्थम् । **आहत**–'आङो यमहनः' इत्यात्मनेपदम् । सिचः कित्त्वादनुनासिकलोपः, ततः सिचो लोपः ।

यमो गन्धने ॥१५॥

सूचने वर्तमानाद् यमः परः सिच् कित् । उदायत । सूचितवान् इत्यर्थः ।

गन्धनम्–सूचनम् । परेण प्रच्छाद्यमानस्य दोषस्याविष्करणमिति । धातोरनेकार्थत्वादत्र √यम् गन्धनार्थकः । 'समुदाङ्भ्यो यमोऽग्रन्थे' इत्यात्मनेपदम् । **सूचितवान्**–परावद्यं स्वयं प्रकाशितवान् । **उदायत**–अनुनासिकसिचोर्लोपः ।

विभाषोपयमने ॥१६॥

उपयमनम् विवाहः, पाणिग्रहणमित्यर्थस्तत्र वर्तमानाद् यमः परः सिच् प्रत्ययो विभाषा कित् । उपायत कन्याम्/उपायंस्त वा ।

यमः, सिच्, आत्मनेपदेषु इत्यनुवर्तते । उपपूर्वको √यम् विवाहार्थकः । 'उपाद्यमः स्वकरणे' इत्यात्मनेपदम् । **उपायत**–कित्त्वादनुनासिक लोपः सिचो लोपश्च ।

स्थाघ्वोरिच्च ॥१७॥

तिष्ठतेर्घोश्च इकारश्चान्तादेशः, सिच्च कित् आत्मनेपदेषु । उपास्थित । अदित । अधित ।

सिच्, आत्मनेपदेषु इत्यनुवर्तते । तिष्ठते –√स्थाधातोः । **घोः**– घुसंज्ञकस्य, √दा-√धा धात्वार्घुसंज्ञाऽस्ति । **उपास्थित**–**स्थाधातोर्लुङि** रूपम् । 'उपान्मन्त्रकरणे' 'अकर्मकाच्च' इत्यात्मनेपदम्, 'ह्रस्वादङ्गात्' इति सिचो लोपः । **अदित, अधित–क्रमशः** √दा,√धा इत्यनयोर्लुङि रूपम् । पूर्ववत् सिचो लोपः ।

न क्त्वा सेट् ॥१८॥

क्त्वा सेट् न कित् । देवित्वा ।

कित्त्वप्रतिबद्धं यत्कार्यं तस्य प्रतिषेधो भवतीत्यर्थः; **न कित्–न** कित्कार्यं करोति, तेन **देवित्वा** इत्यत्र गुणो भवति ।

निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः ॥१९॥

एभ्यः परो निष्ठाप्रत्ययः सेट् न कित् । शयितः, **शयितवान्** इत्यादि ।

'न सेट् इत्यनुवर्तते । **एभ्यः**–√शीङ् (स्वप्ने)–√ञिस्विदा, √ञिमिदा ञिक्ष्विदा-(स्नेहमोचनयोः) ञिधृषा (प्रागल्भ्ये) धातुभ्यः **शयितः, शयितवान्**– क्तक्तवतोः रूपे । कित्त्वप्रतिषेधाद् गुणः । एवं **प्रस्वेदितः, प्रमेदितः, प्रक्ष्वेदितः, प्रधर्षितः, प्रस्वेदितवान** इत्यादि । स्विदादीनाम् विकल्पेनेड्भावात् पक्षे **स्विन्नः** इत्यादिषु न कित्त्वप्रतिषेधस्तेन गुणाभावः ।

मृषस्तितिक्षायाम् ॥२०॥

मृषेर्धातोस्तितिक्षायां निष्ठा सेट् न कित् । मर्षितः, मर्षितवान् । तितिक्षायामिति किम् ? अपमृषितं वाक्यमाह ।

तितिक्षा–क्षमा । **अपमृषितम्**–अविस्पष्टम् । अत्र कित्त्वाद् गुणाभावः ।

उदुपधाद् भावादिकर्मणोरन्यतरस्याम् ॥२१॥

उदुपधात्परो भावे, आदिकर्मणि च यो निष्ठा प्रत्ययः सेट् स वा न कित् । द्युतितम्/द्योतितम्; द्युतितः/द्योतितः ।

आदिकर्मणि–आदिभूतक्रियाक्षणे कर्म आदिकर्म । तस्मिन् भूतत्वेन विवक्षिते यो निष्ठा स आदिकर्मणि वर्तते । **भुक्तः**–'आदिकर्मणि क्तः कर्तरि च' इति अकर्मकत्वात् कर्तर्यव्युत्पन्नः क्तः आदिकर्मणि भवति ।

पूङः क्त्वा च ॥२२॥

पूङः परः क्त्वा निष्ठा च सेट् न कित् । पवितः, पवितवान् । क्त्वाप्रत्ययस्य 'न क्त्वे'ति सिद्धः प्रतिषेधः, तस्य ग्रहणमुत्तरार्थम् ।

न सेट् इत्यनुवर्तते । **पवितः**–'पूङश्च' इत्यनेन इट् । क्त्वाप्रत्ययस्योदाहरणम् **पवित्वा** ।

नोपधात् थफान्ताद्वा ॥२३॥

'निष्ठा' इति निवृत्तम् । नोपधात् थान्तात् फान्ताच्च क्त्वा सेड् वा न किद् भवति । ग्रथित्वा/ग्रन्थित्वा । श्रथित्वा/श्रन्थित्वा । गुफित्वा/गुम्फित्वा ।

ग्रथित्वा–कित्त्वपक्षे 'अनिदिताम्····' इत्यनुनासिकलोपः । **गुफित्वा**–√गुन्फ इति मूलपाठस्तेनायमपि नोपधः ।

वञ्चिलुञ्च्यृतश्च ॥२४॥

एभ्यः परः क्त्वा सेट् वा न कित् । वचित्वा/वञ्चित्वा इत्यादि ।

वचित्वा–कित्त्वपक्षे 'अनिदिताम्·····' इति न लोपः । **लुचित्वा/लुञ्चित्वा** । **ऋतित्वा/अर्तित्वा** इत्युदाहरणान्तराणि । **ऋतित्वा** इत्यत्र कित्त्वपक्षे गुणाभावः ।

तृषिमृषिकृशेः काश्यपस्य ॥२५॥

न क्त्वेति नित्ये प्रतिषेधे प्राप्ते विकल्पः । एभ्यः परः क्त्वा सेट् वा न कित् । तृषित्वा/तर्षित्वा इत्यादि ।

विकल्पः–काश्यपस्याचार्यस्य मते । वा इत्यनुवृत्तेरेव सिद्धे काश्यपग्रहणम् सम्मानार्थम् । **मृषित्वा/मर्षित्वा** । **कृशित्वा/कर्शित्वा** इत्युदाहरणान्तराणि । कित्त्वपक्षे गुणाभावः ।

रलो व्युपधाद्धलादेः संश्च ॥२६॥

उकारोपधात् इकारोपधात् रलन्तात् हलादेः धातोः परः संश्च क्त्वा च सेटौ वा कितौ । द्युतित्वा/द्योतित्वा । दिद्युतिषते/दिद्योतिषते ।

'वा' इति 'सेट्' इति चानुवर्तेते । **व्युपधात्**–उश्च इश्च वी, वी उपधे यस्य स व्युपधः तस्मात् । रल् इति हल् इति च प्रत्याहारौ । **द्युतित्वा**–कित्त्वपक्षे गुणाभावः । **लिखित्वा/लेखित्वा** । **लिलिखिषति/लिलेखिषति** इत्युदाहरणान्तराणि ।

ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥२७॥

उ-ऊ-ऊ३ इत्येवं कालोऽच् यथाक्रमं ह्रस्व-दीर्घ-प्लुतसंज्ञो भवति । उकालो ह्रस्वः—दधि, मधु । ऊकालो दीर्घः—कुमारी, गौरी । ऊ३ कालः प्लुतः—आगच्छ कृष्ण३ ।

ऊकालः–उश्च-ऊश्च-ऊ३श्च वः । त्रयोऽप्युकारा अत्र प्रश्लिष्टाः । वां काल इव कालो यस्येति बहुव्रीहिः । **ह्रस्वदीर्घप्लुतः**–द्वन्द्वः, एकवद्भावः, पुंल्लिगनिर्देशश्च । कालग्रहणे त्रयो बहुव्रीहिसमासाः लभ्यन्ते । **उकालः**, (उः कालो यस्य सः) एवं **ऊकालः, ऊ३कालश्चेति** । त्रिष्वपि एकमात्रिको द्विमात्रिकस्त्रिमात्रिकोऽच् अन्यपदार्थः ।

अचश्च ॥२८॥

एते ह्रस्वदीर्घप्लुताः स्वसंज्ञया शिष्यमाणा अच एव स्थाने वेदितव्याः । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' अतिरि । **अच इति** किम् ? सुवाक् कुलम् ।

परिभाषेयं स्थानिनियमार्था । 'ह्रस्वो नपुंसके.....', 'अकृत्सार्वधातुकयोर्दीर्घः' 'वाक्यस्य टेः प्लुत उदात्तः' इत्यादिषूपतिष्ठते । तेषु षष्ठयन्तं पदं 'प्रातिपदिकस्य' 'अङ्गस्य', अचा विशिष्यते तेनाजन्तस्य प्रादिपदिकस्य स्थाने इत्याद्यर्थो भवति । **अतिरि**–**रायम्** अतिक्रान्तम् इति 'रै' इत्यस्य ह्रस्वः 'रि' भवति । दीर्घस्योदाहरणम्–**चीयते** प्लुतस्य च–**देवदत्ता३** इति बोध्यम् । टिशब्देन चाच् विशिष्यते तेन टेः मध्यवर्तिनोप्यचः प्लुतो भवति **अग्निचीे३त्** । **सुवाक्**–अन्त्यस्य ह्रस्वो भवति तेन मध्यवर्तिन आकारस्य न ।

उच्चैरुदात्तः ॥२९॥

स्थानकृतमुच्चैस्त्वम् न श्रुतिप्रकर्षः । ताल्वाद्यूर्ध्वभागनिष्पन्नो-अच् उदात्तः । ये । ते । के ।

'अच्' इत्यनुवर्तते । लोके वेदे चोदात्तादयो वर्णानां धर्मविशेषे (स्वरे) प्रसिद्धाः । इह व्याकरणशास्त्रे ते तद्गुणेऽचि परिभाष्यन्ते । तेन विधिसूत्रेषु उदात्तादिशब्देन तद्गुणवान् अच् गृह्यते । उच्चैरुपलभ्यमानोऽच् उदात्त-संज्ञो भवति । **स्थानकृतम्**–उच्चता नाम प्रमाणविशेषः ऊर्ध्वतापर्यायः । तत्र ताल्वादिसम्बन्धो वर्णानामन्तरङ्गः इति स्थानसम्बन्धि उच्चत्वम् । अयम्भावः—वर्णानाम् उच्चारणस्थानानि ताल्वादीनि तत्रोर्ध्वाधरभागाः व्यवस्थिताः ऊर्ध्वभागनिष्पन्नोऽच् उदात्तः । **श्रुतिप्रकर्षः**–श्रवणकृतमुच्चैस्त्वम् यथोच्चैर्भाषते । उदात्तस्याचो निश्चयो गात्राणां निग्रहेण, स्वरस्य रूक्षतया कण्ठस्य च संकोचेन भवति । उदात्तस्वरोच्चारणे वायुः शनैः निष्क्राम्यन् कण्ठविवरं शोषयति, तेन स्वरस्य रूक्षता कण्ठविवरस्य च संवृतता भवति, **ये, ते, के**–क्रमशः यत्तत्–किम् शब्दानां जसि रूपाणि । प्रकृतिः उदात्तः, प्रत्ययोऽनुदात्तः । एकादेशे कृते 'एकादेश उदात्तेनोदात्तः' इत्यत्र एकारः उदात्तः ।

नीचैरनुदात्तः ॥३०॥

त्व-सम-सिम-नेमाः ।

ताल्वादिस्थाने नीचभागे निष्पन्नोऽच् अनुदात्तः । यस्मिन्नुच्चार्यमाणे गात्राणां शैथिल्यं, स्वरस्य स्निग्धता शीघ्रं वायुनिष्क्रमणात् कण्ठविवरस्य महत्ता च भवति सोऽनुदात्तः । **त्व-समादि**–अनुदात्ताः इमे शब्दाः सर्वादिगणे पठिताः । **उदाहरणान्तरमाह–नमस्ते रुद्र नीलकण्ठ सहस्राक्षः** । अत्र 'ते' शब्दः 'अनुदात्तं सर्वमपादादौ' इत्यधिकारात् अनुदात्तः । रुद्रादयश्च 'आमन्त्रितस्य च' इत्यनेनानुदात्ताः । संहितायामेकश्रुतिः ।

समाहारः स्वरितः ॥३१॥

शिक्यम् । कन्या । क्व ।

लोकवेदयोः प्रसिद्धौ उदात्तानुदात्तौ वर्णधर्मौ समाह्रियेते–सहितावुपलभ्येते यस्मिन्नचि, स स्वरितसंज्ञो भवति । सूत्रे समाहारशब्दोऽधिकरण-साधनः । अथवा समाहारोऽस्ति अस्मिन्निति 'अर्श आद्यच्' । उदाहरणानि **शिक्यादीनि–शिक्य-कन्या** शब्दयोः 'शिल्पशिक्य''''कन्या'''' इत्यादि फिट्सूत्रेण स्वरितत्वम् । **क्व** शब्दे अत् प्रत्ययात् तित्स्वरितम् ।

तस्यादित उदात्तमर्धह्रस्वम् ॥३२॥

उदात्तानुदात्तस्वरसमाहारः स्वरितः, इत्युक्तम् । तत्र कियानुदात्तः, कियाननुदात्तः ? तत्राह—आदावर्धह्रस्वमुदात्तम्, शिष्टमनुदात्तम् । ह्रस्वग्रहणमतन्त्रम् । त्रयाणामेष स्वरविभागः ।

अर्धह्रस्वम्–अर्धमात्रोपलक्ष्यते ह्रस्वस्यार्धम् इति । अतन्त्रम्–अप्रधानम् । त्रयाणाम्–ह्रस्वदीर्घप्लुतानाम् । उदाहरणानि क्रमशः शिक्य॑म्–पूर्वा अर्धमात्रोदात्ता, अपराऽर्धमात्राऽनुदात्ता । क॒न्या॑–अकारस्य पूर्वाऽर्धमात्रोदात्ता, अपराऽध्यर्धमात्राऽनुदात्ता । माणवक॑३–पूर्वाऽर्धमात्रोदात्ता, अवशिष्टाऽर्धतृतीयमात्राऽनुदात्ता ज्ञेया ।

एकश्रुति दूरात्सम्बुद्धौ ॥३३॥

पदानां त्रैस्वर्ये प्राप्ते दूरात्संबुद्धा वैकश्रुत्यं विधीयते । स्वराणां भेदतिरोधानमेकश्रुतिः । आगच्छ भो माणवक देवदत्त३ । दूरादिति किम् ? आग॑च्छ॒ भो मा॑णवक देवदत्त ।

एकश्रुति–एका श्रुतिर्यस्य तत् एकश्रुति वाक्यम् । दूरात्सम्बुद्धौ अत्र सम्बुद्धिरित्यन्वर्थग्रहणम् दूरात्सम्बोधयति येन वाक्येन तत्सम्बोधनं सम्बुद्धिः । भेदतिरोधानम्—उदात्तादिस्वरविशेषानुपलब्धिः । अर्थात् अकारादिवर्णमात्रावबोधः स्वरूपाख्यानमिति यावत् । देवदत्त३—वाक्यस्य टेः प्लुतः उदात्तः शेषमेकश्रुति । आग॑च्छ॒ ···देवदत्त—'आगच्छ' आङ् आद्युदात्तः,'गच्छ' तिङ् अनुदात्तः, भो आद्युदात्तः शेषयोरामन्त्रितनिघातः ।

यज्ञकर्मण्यजपन्यूङ्खसामसु ॥३४॥

त्रैस्वर्येण वेदे मन्त्राः पठ्यन्ते । तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुतिर्विधीयते जपन्यूंखसामानि विना । अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वतो३म् । यज्ञकर्मणि किम् ? सम्पाठे मा भूत् । अजपेति किम् ? ममा॑ग्ने॒ वर्चो॑ विह॒वेष्वस्तु । जपः=उपांशुप्रयोगः । अन्यूंखेति किम् ? न्यूङ्खा ओकाराः षोडश (तेषु केचिदुदात्ताः केचिदनुदात्ताः) असामसु किम् ? ए३ विश्व॒ सम॒त्रिणं दहा३ । सामानि वाक्यविशेषस्था गीतय उच्यन्ते, तत्रैकश्रुतिर्न भवति ।

जिन्वतो३म्–सम्बोधनपदस्य 'जिन्वति' इत्यस्य टेः 'प्रणवष्टेः' इत्यनेन 'ओम्' इत्यादेशः, स च प्लुतः उदात्तश्च । सम्पाठः–स्वाध्यायकालः । उपांशुप्रयोगः–यथा जले निमग्नस्य पाठः । ओकाराः–क्वचित् षड् ओङ्काराः इति पाठः । ए३–गीतिपूरणः । गीतिवशादनेकमात्रो निपात इत्यन्ये । दहा ३–प्लुतान्तोऽयं पाठः । दह इत्यन्ये । वाक्यविशेषस्था गीतयः–'गीतिषु सामाख्या' इति जैमिनिः ।

उच्चैस्तरां वा वषट्कारः ॥३५॥

यज्ञकर्मणि वौषट्कार उच्चैस्तरां वा, एकश्रुतिर्वा । वौषड्ग्रहणमेव कुतो न कृतम् ? विचित्रा हि सूत्रस्य कृतिः पाणिनेः । सोमस्याग्ने वीही३ वौ३षट् । पक्षे वौषट् ।

वौषट्कारः–सूत्रस्थवषट् शब्देन वौषट् शब्दो लक्ष्यते समानार्थत्वात् । द्वावपि देवानां दानवाचिनौ । उच्चैस्तराम्–उदात्ततरः । वौ३षट् इत्यत्र 'ब्रूहि प्रेष्य.....' इति सूत्रेणौकारः प्लुतः, उदात्तश्च विहितः । अनेनान्त्योऽच् उदात्ततरो विधीयते । अन्ये वर्णयन्ति–द्वावप्यचौ उदात्ततरौ भवतः यज्ञकर्मणि । विचित्रा....पाणिनेः–आचार्यो वौषट्-स्थाने वषट् प्रयुक्तवान्, तेन ज्ञायते–क्वचित् अक्षरलाघवमाश्रीयते क्वचित्प्रतिपत्तिलाघवमिति वैचित्र्यम् । वौषट् शब्दे एव स्वरविधानं दृष्टमिति हेतोः स लक्ष्यते ।

विभाषा छन्दसि ॥३६॥

एकश्रुतिर्भवति, पक्षे त्रैस्वर्यम् । छन्दसि पुनर्विभाषाग्रहणादयज्ञकालेऽपि । इषे त्वोर्जे त्वा/इषे त्वोर्जे त्वा । अग्न आयाहि वीतये/अग्न आयाहि वीतये ।

अयज्ञकालेऽपि–'यज्ञकर्मणि' इति निवृत्तमित्यर्थः । तेन स्वाध्यायकालेऽपि पाक्षिकमैकश्रुत्यम् । व्यवस्थितविभाषेयम् ब्राह्मणभागे एकश्रुतिः मन्त्रभागे त्रैस्वर्यम् । क्रमशः उदाहरणे । त्रैस्वर्यपक्षे 'इषे' 'ऊर्जे' उदात्तौ 'त्वा' अनुदात्तः । 'अग्ने' आद्युदात्तः, 'आ' उदात्तः, 'याहि' अनुदात्तः, 'वीतये' 'वीति'अन्तोदात्तः । 'अच्छन्दसि' इति पदच्छेदात् भाषायामपि विकल्पेनैकश्रुतिर्भवतीति केचिदाहुः ।

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ॥३७॥

सुब्रह्मण्या नाम निगदः । तत्र पूर्वस्मात्प्राप्तानि न भवन्ति ।

लक्षणप्राप्तः स्वरितस्य उदात्तस्तु भवति। सुब्रह्मण्यो३म्।इन्द्रागच्छ····
इत्यादि।

निगदः-अपादबन्धनं गद्यरूपं यजुरात्मकं मन्त्रवाक्यम्। सुब्रह्मण्योपलक्षितत्वात् तस्य सुब्रह्मण्या नाम। पूर्वस्मात्प्राप्तानि-पूर्वसूत्रविहितानि एकश्रुत्यादीनि। लक्षणप्राप्तः-प्रस्तुतसूत्रकृतः। सुब्रह्मण्यो३म्-अत्र ओकारः तित्स्वरेण, तेन सहैकादेशेन च स्वरितस्तस्योदात्तो विधीयते। इन्द्रागच्छ-इन्द्रशब्दः आद्युदात्तः द्वितीयः स्वरोऽनुदात्तः सोऽपि उदात्तादनुदात्तस्य स्वरितस्तस्याप्यनेनोदात्तत्वं विधीयते। तथैव आगच्छ इत्यत्रापि पूर्वौ द्वौ उदात्तौ एवञ्चास्मिन् वाक्ये चत्वार उदात्ताः अन्तिमोऽनुदात्तः।

देवब्रह्मणोरनुदात्तः ॥३८॥

सुब्रह्मण्यायामेव 'देवा ब्रह्माणः' इति पठ्यते, तत्र पूर्वेण स्वरितस्योदात्ते प्राप्तेऽनेनानुदात्तो विधीयते। देवब्रह्मणोः स्वरितस्यानुदात्त आदेशो भवति। दे॒वा ब्र॒ह्माण आ॒गच्छ॒त॒।

देवाः, ब्रह्माणः-द्वयोरपि पदयोः पृथक् आमन्त्रितत्वेनाद्युदात्तो भवति। शेषस्य निघाते उदात्तादनुदात्तस्य स्वरिते तस्यानेन पुनरप्यनुदात्ता विधीयते।

स्वरितात्संहितायामनुदात्तानाम् ॥३९॥

स्वरितात् परेषामनुदात्तानामेकश्रुतिर्भवति संहितायाम्। इ॒मं मे॑ गंगे यमुने सरस्वति शुतुद्रि!

'इमम्' इति पदमन्तोदात्तम् 'मे' इति अनुदात्तम् तत्पुनः उदात्तादनुदात्तस्य स्वरितम् भवति। 'गंगे' इत्यादि पदानि आमन्त्रितत्वेनानुदात्तानि तेषामेकश्रुतिर्भवति।

उदात्तस्वरितपरस्य सन्नतरः ॥४०॥

उदात्तः परो यस्मात्स उदात्तपरः तस्य, स्वरितः परो यस्मात्स स्वरितपरः तस्य चानुदात्तस्य सन्नतरः भवतिः। देवा मरुतः पृश्निमातरो॒ऽपः। मातर इत्यनुदात्तः, अपः इत्यन्तोदात्तः। तत्रानुदात्तयोरेकादेश ओकारोऽनुदात्तः तस्यानुदात्ततर आदेशो भवति।

सन्नतरः-सन्नशब्दो नीचैरर्थक उच्यते तेनानुदात्तत्वं लक्ष्यते। तेनानु-

दात्ततर आदेशो भवतीत्यर्थो लभ्यते। स्थान्यनुदात्तापेक्षः प्रकर्षो भवतीति-तात्पर्यम्। अपः इत्यन्तोदात्तः—तेनादिरनुदात्त इति स्पष्टम्।

अपृक्त एकाल्प्रत्ययः ॥४१॥

एकाल्—असहायो वर्णः प्रत्ययः अपृक्तसंज्ञः। 'स्पृशोऽनुदके क्विन्'—घृतस्पृक्।

एकाल्–एकः अल् यस्मिन् सः। अत्रैकशब्दोऽसहायवाची। घृतस्पृक्–अत्र 'वेरपृक्तस्य' इत्यनेन क्विन् प्रत्ययावशिष्टस्य वकारस्य लोपो भवति।

तत्पुरुषः समानाधिकरणः कर्मधारयः ॥४२॥

समानाभिधेये यस्तत्पुरुषाख्यः समासविशेषः स कर्मधारयाख्यो भवति। परमराज्यम्।

तत्पुरुषः समासविशेषस्य संज्ञेति वक्ष्यति। अधिकरणशब्दोऽभिधेयवाची। आख्या–संज्ञा। परमराज्यम्–'अकर्मधारये राज्यम्' इत्यत्राकर्मधारये इति निषेधात् उत्तरपदस्याद्युदात्तत्वाभावे समासान्तोदात्तमेव भवति। एवं 'पाचकवृन्दारिका' इत्यत्र 'पुंवद्कर्मधारय' इत्यनेन पुंवद्भावः।

प्रथमानिर्दिष्टं समास उपसर्जनम् ॥४३॥

यत् समाससूत्रे प्रथमया विभक्त्या निर्दिश्यते तदुपसर्जनसंज्ञम्। 'द्वितीया श्रितेत्यादि' समाससूत्रे द्वितीयेत्येतत्प्रथमानिर्दिष्टम्। कष्टश्रितः।

समासे–समासविधायकसूत्रे। कष्टश्रितः–कष्टं श्रित इति विग्रहवाक्यम्। द्वितीयासमासे द्वितीयायाः प्रथमानिर्दिष्टत्वात्तस्योपसर्जनसंज्ञा। तस्यैव (कष्ट शब्दस्य) 'उपसर्जनं पूर्वम्' इति पूर्वनिपातः। एवं तृतीयादिसमासेषु तृतीयादिपदानि प्रथमानिर्दिष्टानि बोधयन्ति।

एकविभक्ति चापूर्वनिपाते ॥४४॥

एका विभक्तिर्यस्य तदेकविभक्ति, नियतविभक्तिकमित्यर्थः। द्वितीये सम्बन्धिनि बहुभिर्विभक्तिभिर्युज्यमानेऽप्येकयैव विभक्त्या यद् युज्यते तदुपसर्जनसंज्ञं भवति। न तु तस्य पूर्वनिपातः।

'निरादयः.........' निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः । निष्क्रान्त-शब्दे सर्वा विभक्तयः न तु कौशाम्बीशब्दे ।

उपसर्जनमित्यनुवर्तते । अप्रथमानिर्दिष्टार्थमिदं सूत्रम् । एकविभक्ति–एकस्मिन् प्रयोगे सर्वमेकविभक्तिकमिति विशेषणोपादानसामर्थ्यात् प्रयोगभेदे-नापि यस्य विभक्तिर्नियता तत् । एतदेव स्पष्टयति 'द्वितीये सम्बन्धिनि' इत्यादिना । निष्कौशाम्बिः–अत्र निष्क्रान्तशब्दः कर्तृविशेषणीभूतः स च कर्मादीनामपि विशेषणं भवितुमर्हति, परन्तु कौशाम्बीशब्दोऽपादानशक्ति-योगात्पञ्चम्यन्त एवेति स नियतविभक्तिकः । उपसर्जनसंज्ञाफलम् 'गोस्त्रि-योरुपसर्जनस्य' इति ह्रस्वत्वम् ।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥४५॥

अर्थवच्छब्दरूपम् प्रातिपदिकसंज्ञम्, धातुप्रत्ययौ वर्जयित्वा । डित्थः । अर्थवदिति किम् ? वनं धनमिति नान्तस्यावधेर्मा भूत् । न लोपो हि स्यात् ।

अत्र अर्थशब्दोऽभिधेयवचनः नतु प्रयोजनादिवचनः । अभावोऽप्य-भिधेयो भवति तेन बहिःसत्ताविहीनानां शशशृङ्गादिपदानां प्रातिपदि-कत्वम् । डित्थः–अव्युत्पन्नमिदमुदाहरणम् । व्युत्पत्तिपक्षे तु कृत्तद्धितेति वक्ष्य-माणसूत्रेण प्रातिपदिकत्वं सिद्धयति । नलोपः–'प्रातिपदिकान्तस्य' इत्यनेनेति-शेषः । नान्तौ वनधनशब्दौ नार्थवन्तौ । प्रातिपदिकेति महासंज्ञा श्रुत्यनुरोधेन तथा चाथर्वणे को धातुः, किं प्रातिपदिकम्, कः प्रत्ययः ।

कृत्तद्धितसमासाश्च ॥४६॥

कृतः, तद्धिताः समासाश्च प्रातिपदिकाख्याः । समासग्रहणस्य नियमार्थत्वाद् वाक्यस्यार्थवतो न संज्ञा । कर्ता । औपगवः राजपुरुषः ।

पूर्वसूत्रे 'अप्रत्ययः' इति पर्युदासात् कृदन्तस्य, तद्धितान्तस्य चानेन प्रातिपदिकसंज्ञा विधीयते । नियमार्थत्वात्–अर्थवत्समुदायमध्ये समासस्यैवार्थ-वतः प्रातिपदिकसंज्ञा नार्थवतो वाक्यस्य । क्रमशः उदाहरणानि कर्ता इत्या-दीनि । संज्ञायाः फलम् सुबादिप्रत्ययागमनम् ।

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥४७॥

अन्त्यस्याचः । अतिरि ।

नपुंसकलिङ्गे यत्प्रातिपदिकम् तस्यान्त्यस्याचो ह्रस्वः । अतिरि-रायमतिक्रान्तम् इति अतिरै इत्यस्य ह्रस्वः ।

गोस्त्रियोरुपसर्जनस्य ॥४८॥

गोऽन्तस्त्रीप्रत्ययान्तयोरुपसर्जनयोर्ह्रस्वः । चित्रगुः । अतिखट्वः ।

सूत्रे 'गो' इति स्वरूपग्रहणम्, 'स्त्री' इति प्रत्ययग्रहणम् । उपसर्जनपदं तयोर्विशेषणम् । तेनोपसर्जनगोशब्दान्तः, उपसर्जनस्त्रीप्रत्ययान्तः यः प्रातिपदिकस्तस्य ह्रस्वो भवतीत्यर्थः । चित्रगुः, अतिखट्वः—पूर्वत्र बहुव्रीहिरिति 'प्रथमा निर्दिष्टम्……'इति गोशब्दस्य; उत्तरत्र 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति 'एकविभक्ति…' इत्यनेन खट्वाशब्दस्योपर्जनत्वम् ।

लुक् तद्धितलुकि ॥४९॥

पूर्वेण ह्रस्वे प्राप्ते लुग्विधिः । तद्धितलुकि स्त्रीप्रत्ययस्योप-सर्जनस्य लुक् । पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः ।

'स्त्री' उपसर्जनस्येत्यनुवर्तते । लुकि—'यस्य च भावेने'ति सप्तमी । अत्र लौकिकमुपसर्जनं (विशेषणम्) गृह्यते न शास्त्रीयम् । पञ्चेन्द्रः—देवतावाचकस्याणो लुक् । स्त्रीप्रत्ययस्य ङीषो लुकि तत्सन्नियोगशिष्टस्यानुकोऽपि निवृत्तिः ।

इद्गोण्याः ॥५०॥

पूर्वेण लुकि प्राप्ते इकारो विधीयते । गोण्यास्तद्धितलुकि इकार आदेशः । पञ्चभिः गोणीभिः क्रीतः पञ्चगोणिः ।

पञ्चगोणिः—आर्हीयस्य ठको लुक् । 'इत्' इति योगविभागात् पञ्चसूचिः ।

लुपि युक्तवद् व्यक्तिवचने ॥५१॥

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालाः ।

सूत्रे युक्तवत्—युनक्ति प्रत्ययार्थम् आत्मना इति विग्रहेण प्रकृतिरर्थः । (युक्तवत्' शब्दः क्तवतुप्रत्ययान्तः ।) युक्तवतो लिङ्गवचने इति षष्ठी समासः अथवा युक्तः प्रकृत्यर्थः प्रत्ययार्थेन सम्बद्धः तस्मिन्निवेत्यर्थे वतिप्रत्ययः ।

व्यक्तिः-लिङ्गम् वचनम्-संख्या तयोर्द्वन्द्वः । पञ्चालाः-पञ्चालाः क्षत्रियाः तेषां निवासो जनपदः 'जनपदे लुप्' इत्यनेन निवासार्थकस्याणो लुप्, तदनन्तरं क्षत्रियगतपुंलिङ्गत्वबहुवचनत्वे भवतः ।

विशेषणानां चाजातेः ॥५२॥

लुबर्थस्य विशेषणानामपि तथैव लिङ्गवचने भवतः जाति वर्जयित्वा । पञ्चालाः रम्याः । अजातेः किम् ? पञ्चालाः जनपदो रम्यः ।

'लुपि' इति वर्तते । प्रकृत्यर्थगतयोर्लिङ्गसंख्ययोर्लुबर्थेऽतिदेशः । विशेषणानां सिद्धे युक्तवद्भावे सूत्रं जातिप्रतिषेधार्थम् । पञ्चालाः जनपदः-जनपदशब्दो जात्यर्थकः ।

तदशिष्यं संज्ञाप्रमाणत्वात् ॥५३॥

तदिति प्रकृतं युक्तवद्भावलक्षणं निर्दिश्यते । तदशिष्यम्—न वक्तव्यम् । कस्मात् ? संज्ञाप्रमाणत्वात् । संज्ञाशब्दा हि नानालिङ्गसंख्याः प्रमाणम् । पञ्चाला इत्यादयो न योगशब्दाः यथा आपः, दाराः, गृहाः, सिकतादयः ।

अयमाशयः-यथा आपः (स्त्रीलिङ्गो बहुवचनान्तोऽप्शब्दः) एकस्मिन्नपि जलकणे प्रयुज्यते । दाराः (पुंलिङ्गो बहुवचनान्तो दारशब्दः) एकस्यामपि नार्यां प्रयुज्यते । एवं गृहाः एकस्मिन्नपि गृहे । सिकताः एकस्यामपि बालुकायाम् । तथैव पञ्चालाः इत्यादयः क्षत्रियादिसम्बन्धेन न जनपदे वर्तन्तेऽपि तु जनपदादीनां संज्ञा एताः । अप्शब्दादिवत् पञ्चालादीनामपि स्वाभाविके लिङ्गवचने । नास्ति तदर्थं सूत्रम्, अपि तु प्रतिषेधविषयोपदर्शनार्थं तस्यारम्भः । नह्यनिर्दिष्टविषयस्य प्रतिषेधः कर्तुं शक्यते ।

लुब्योगाप्रत्याख्यानात् ॥५४॥

योऽयं लुबुच्यते, अयं न वक्तव्यः । कुतः ? योगाप्रत्याख्यानात् । नहि पञ्चाला इति योगः प्रख्यायते । नैतदुपलभामहे—वृक्षयोगान्नगरे वरणा इति । किं तर्हि ? संज्ञा एताः । तस्मादत्र 'तस्य निवासः' 'अदूरभवश्च' इति तद्धितो नोत्पद्यते किं लुपो विधानेन ।

योगः-(जनपदादेः क्षत्रियादिभिः सह) सम्बन्धः तस्य अप्रत्याख्यानात्-अनुपलब्धेः। प्रख्यानम्-कथनम्। पञ्चालाः,, वरणाः इति यथा क्षत्रिय-वाचकाः वृक्षवाचकाः तथैव जनपदवाचकाः, नगरवाचकाः अपि अतस्तदर्थं तद्धितप्रत्ययस्य तस्य च लोपविधानस्यावश्यकतैव नास्ति।

योगप्रमाणे च तदभावेऽदर्शनं स्यात् ॥५५॥

पञ्चालादिशब्दाः न योगनिमित्ताः, इत्युक्तम्। योगप्रमाणे हि तदभावेऽदर्शनं स्यात् यदि पञ्चालादिशब्दो योगस्य प्रमाणम्=वाचकः स्यात्ततस्तदभावेऽदर्शनम्—अप्रयोगः स्यात्, दृश्यते च सम्प्रति विनैव क्षत्रियसम्बन्धेन जनपदेषु पञ्चालादिशब्दः, ततोऽवसीयते—नायं योगनिमित्तकः किं तर्हि ? रूढिरूपेणैव तत्र प्रवृत्त इति।

योगप्रमाणे-योगस्य प्रमाणम् प्रत्यायकः (वाचकः) तस्मिन्। अवसीयते-ज्ञायते। रूढिरूपेणैव-संज्ञाशब्दो भूत्वा (पञ्चालशब्दोऽनेकार्थः, क्षत्रियवाचको जनपदवाचकश्चेत्युभयत्रार्थे प्रयुज्यते।)

प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ॥५६॥

'अशिष्यम्' इति वर्तते। प्रधानं समासे किञ्चित् पदं प्रत्ययश्च ताभ्यामर्थवचनम्—अर्थाभिधानम् अशिष्यम्—न वक्तव्यम् अर्थस्य अन्यप्रमाणत्वात् अन्यः शास्त्रापेक्षया लोकः। शब्दैरर्थाभिधानं स्वाभाविकं न शास्त्रकृतम्।

अयम्भावः-आचार्यपाणिनेः पूर्वैराचार्यैरुक्तम् 'प्रधानोपसर्जने प्रधानार्थं सह ब्रूतः' तथा 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः'। आचार्यः पाणिनिस्तयोः प्रत्याख्यानं कुर्वाणो ब्रूते 'प्रधान....' इत्यादि सूत्रम्। 'राजपुरुषः इत्यत्र राजपदमुपसर्जनं पुरुषपदञ्च प्रधानम् इति न शास्त्रमनुशास्ति। ते उभेऽपि राजविशिष्टपुरुषमर्थं कथयतः। एवं दशरथः प्रकृतिः इञ् प्रत्ययः दाशरथि-शब्दः दशरथस्यापत्यार्थं ब्रूते। परन्तु यैर्व्याकरणं नाधीतम् 'तेऽपि' राजपुरुष-पदेन राज्ञः पुरुषमेवावगच्छन्ति न राजानम् नापि पुरुषम्। एवम् दाशरथि-पदस्य दशरथस्यापत्यमेवार्थं जानते। अतः लोकत एवार्थस्यावगतिर्भवति किं तत्र शास्त्रयत्नेन।

कालोपसर्जने च तुल्यम् ॥५७॥

'अशिष्यम्' इति वर्तते । कालोपसर्जने च तुल्यमशिष्ये भवतः । पूर्वैराचार्यैः कालस्योपसर्जनस्य च परिभाषा कृता आन्याय्यादुत्थानादान्याय्याच्च संवेशनात् एषोऽद्यतनः कालः तथा अप्रधानमुपसर्जनम् । आचार्यः पाणिनिस्तत्प्रत्याचष्टे यैर्व्याकरणं न श्रुतं तेऽपि कालम् उपसर्जनञ्च जानन्ति ।

तुल्यम्–प्रत्याख्यानक्रियाविशेषणमेतत्, पूर्वप्रत्याख्यानेन तुल्यमेतत्प्रत्याख्यानम् । अन्यप्रमाणरूपो हेतुरप्यनेनानुकृष्यते । रात्रेः पश्चिमे यामे उत्थानं न्याय्यम् तथैव प्रथमे यामे संवेशनमपि न्याय्यम् । संवेशनम्–शयनम् । उत्थानात् शयनं यावत् अद्यतनः कालः । लोकतोऽपि कालज्ञानं भवति तथैवोपसर्जनज्ञानमपि ।

जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् ॥५८॥

जातिर्नामायमेकोऽर्थस्तत्रैकवचनमेव प्राप्तम् तत इदमुच्यते । जात्याख्यायामेकस्मिन्नर्थे बहुवचनमन्यतरस्यां भवति । जात्यर्थो बहुवद्भवतीति यावत् । तेन तद्विशेषणानामजात्याख्यानामपि सम्पन्नादीनां बहुवचनमुपपद्यते । सम्पन्नो यवः, सम्पन्ना यवाः ।

*(वा०) संख्याप्रयोगे प्रतिषेधो वाच्यः । एको व्रीहिः सम्पन्नः सुभिक्षं करोति ।

एकोऽर्थः—दिष्टिप्रस्थसुवर्णादि मूर्त्तभेदाय कल्पते ।
क्रियाभेदाय कालस्तु 'संख्या सर्वस्य भेदिका ॥

इत्युक्तेः भेदगणनारूपा संख्या जातावपि विद्यते एव । जातेः आख्या–आख्यानं = प्रत्यायनम् । बहुवत्–न चैकस्मिन्नर्थे बहूनां कथनं सम्भवति, अतः सामर्थ्याद्वत्यर्थो गम्यते ।

अस्मदो द्वयोश्च ॥५९॥

अस्मद एकत्वे द्वित्वे बहुवचनं वा । अहं ब्रवीमि / वयं ब्रूमः । आवां ब्रूवः/वयं ब्रूमः ।

❀ (वा०) सविशेषणस्य प्रतिषेधः । अहं देवदत्तो ब्रवीमि ।
❀ (वा०) युष्मदि गुरावेकेषाम् । त्वं मे गुरुः, यूयं मे गुरवः ।

अस्मदः– अभिधेयसम्बन्धे षष्ठी । अस्मदो योऽर्थस्तस्यैकत्वे । एकत्व-मस्मदोऽव्यभिचरितम् द्वित्वन्तु परत्रोपचारात्, अयं मे द्वितीय आत्मा । कृतेऽपि बहुवचने प्रकरणात् एकार्थद्वयर्थविषये वृत्तिरवसीयते ।

फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥६०॥

फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च द्वयोर्बहुवचनं विकल्पेन भवति । कदा पूर्वे फल्गुन्यौ/कदा पूर्वाः फल्गुन्यः । एवं पूर्वे प्रोष्ठपदे/पूर्वाः प्रोष्ठपदाः वा ।

सूत्रे प्रोष्ठपदानामिति सप्तम्यर्थे षष्ठी, नक्षत्रे इति वा षष्ठयर्थे सप्तमी । अन्यतरस्यामित्यनुवर्तते । ज्योतिषां नक्षत्रता चन्द्रयोगे एव भवति, अन्यथा ज्योतिष्ट्वमेव । फल्गुन्यौ, प्रोष्ठपदे च द्वे एव नक्षत्रे । एवं च समुदित-योरेव तयोश्चन्द्रयोगात् बहुवचनं सिद्धम् । तथा च सूत्रस्थं नक्षत्रपदं ज्योतिष उपलक्षणम्, ज्योतिष्ट्वमेकस्याप्यस्ति । फल्गुन्यौ–फल्गुनीभ्यां, फल्गुनीभिर्वा युक्तः कालः । 'नक्षत्रेण युक्तः कालः' इत्यण्, तस्य लुक् ।

छन्दसि पुनर्वस्वोरेकवचनम् ॥६१॥

द्वयोर्द्विवचने प्राप्ते पुनर्वस्वोश्छन्दसि विषये एकवचनं वा । पुन॑र्व॑सु नक्ष॑त्र॒मदि॑तिर्दे॒वता,/पुनर्वसू नक्षत्रम् ।

अन्यतरस्यामित्यनुवर्तते । पुनर्वसू द्वे नक्षत्रे भवतः । नक्षत्रे एव । नेह भवति–पुनर्वसू माणवकौ ।

विशाखयोश्च ॥६२॥

एकवचनं वा । विशा॑खा॒ नक्ष॑त्र॒मिन्द्रा॒ग्नी॑ दे॒वता॑,/विशाखे नक्षत्रमिन्द्राग्नी देवता ।

'छन्दसि' इति वर्तते, अन्यतरस्याञ्च । विशाखेऽपि द्वे नक्षत्रे स्तः ।

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥६३॥

'छन्दसि' इति निवृत्तम् । तिष्य एकः, पुनर्वसू द्वौ; तेषां द्वन्द्वो

बह्वर्थः । तत्र बहुवचने प्राप्ते द्विवचनं विधीयते । तिष्यपुनर्वस्वोर्नक्षत्रविषये द्वन्द्वे बहुवचनप्रसङ्गे नित्यं द्विवचनम् । उदितौ तिष्यपुनर्वसू दृश्येते ।

तिष्यः– पुष्यः । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् । बहुवचनग्रहणं 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इति परिभाषायाः ज्ञापकम् । नक्षत्र–विषये द्वन्द्वे सत्येवेदं प्रवर्तते नेह–तिष्ये जातः तिष्यः माणवकः, पुनर्वस्वोर्जातौ पुनर्वसू माणवकौ, तेषां द्वन्द्वे तिष्यपुनर्वसवो माणवकाः । प्रकृतेऽपि नक्षत्रे पुनरपि नक्षत्रपदोल्लेखात्पर्यायाणामपि द्विवचनमिदं सिद्धयति । सिद्धयपुनर्वसू ।

सरूपाणामेकशेष एकविभक्तौ ॥६४॥

समानरूपाणां शब्दानामेकविभक्तौ परतः एकः शिष्यते, इतरे निवर्तन्ते । वृक्षश्च वृक्षश्च वृक्षौ । एकविभक्ताविति किम् ? पयः पयो जरयति ।

समानं रूपं येषां ते सरूपास्तेषाम् (बहु०) 'ज्योतिर्जनपद·····' इत्यनेन समानस्य सकारः । एकविभक्तौ–समानविभक्तौ एकशब्दः समानार्थकः एकशेषः–एकशब्दः संख्यार्थकः । वृक्षश्च, वृक्षश्च वृक्षश्चेति वृक्षाः इति बहुवचनोदाहरणम् । 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति नियमेन शिष्टो वृक्षशब्दः क्रमशः द्विवचनार्थं बहुवचनार्थं चाभिधत्ते । पयः पयो जरयति– प्रथमं पयः प्रथमान्तं द्वितीयश्च द्वितीयान्तम् । सरूपाणाम् इति किम् ? प्लक्षन्यग्रोधाः । रूपग्रहणं किम् ? भिन्नेऽप्यर्थे यथा स्यात्–अक्षाः । अक्षशब्दः इन्द्रियार्थकः, शकटाङ्गाख्यश्चास्ति अत्र भवत्येकशेषः । एवं पादाः । माषाः ।

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥६५॥

वृद्धशब्दः पूर्वाचार्यसंज्ञा गोत्रस्य । अपत्यमन्तर्हितं वृद्धमिति । वृद्धयूनोः सहवचने वृद्धः शिष्यते, युवा निवर्तते; वृद्धयुवलक्षणश्चेद्विशेषः । लक्षणम्=निमित्तम् । चेच्छब्दो यद्यर्थे, एवकारोऽवधारणे, विशेषो वैरूप्यम्, वृद्धयुवनिमित्तकमेव यदि वैरूप्यम् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ ।

'शेषः, इति वर्तते । वृद्धशब्दोऽत्रापत्यार्थकः युवशब्दसाहचर्यात् । यथाऽपत्यार्थकोयुवशब्दस्तथैव वृद्धशब्दोऽपीति पूर्वाचार्यैरपत्यस्य वृद्धसंज्ञा कृता । तदिहापि गृह्यते । यूना–सहार्थे तृतीया । सहवचने–सह विवक्षायाम् । क्वचित्

'यूना सह' इत्यधिकोऽपि पाठः । गार्ग्यस्य गार्ग्यायणस्य प्रवृत्तिनिमित्तं गर्गापत्यत्वं न भिन्नम् । यञ्-फक्प्रत्ययकृतमेवात्र वैरूप्यम् । गार्ग्यौ-प्रकरणादिना युवार्थो गम्यते ।

स्त्री पुंवच्च ॥६६॥

स्त्री वृद्धा यूना सहवचने शिष्यते पुंवच्च । गार्गी च गार्ग्यायणश्च गार्ग्यौ ।

पुंवत्-पुंस इव स्त्रियाः कार्यम् भवति । स्त्र्यर्थः पुमर्थवद् भवति । 'स्त्री' इत्युक्तेऽर्थस्यैव प्रतीत्या स्त्रीशब्देनात्र स्त्र्यर्थग्रहणम् । तेन स्त्र्यर्थे पुमर्थातिदेशात् तत्प्रतिबद्धानां कार्याणां सिद्धिः । गार्गी-गार्ग्य + ङीप् । पुंवद्भावे कृते गार्ग्यशब्दोऽवशिष्यते, ततः एकशेषे गार्ग्यौ इति ।

पुमान् स्त्रिया ॥६७॥

स्त्रिया सह वचने पुमान् शिष्यते । ब्राह्मणी च ब्राह्मणश्चेति ब्राह्मणौ ।

'वृद्धो यूना' इति निवृत्तम्, 'तल्लक्षणश्चेदेव विशेषः' इत्यनुवर्तते । समानायामेव प्रकृतौ भवति । तेन हंसश्च वरटा चेत्यत्र नेदं प्रवर्त्तते । पुमान् इति किम् ? प्राक् च प्राची च प्राक्प्राच्यौ । अत्र 'प्राक् इत्यव्ययम् अलिङ्गम् ।

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥६८॥

यथासंख्यं ज्ञेयम् । भ्राता च स्वसा च भ्रातरौ, पुत्रश्च दुहिता च पुत्रौ ।

यथासंख्यम्-स्वस्रा सह वचने भ्राता, दुहित्रा सहवचने पुत्रः शिष्यते ।

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥६९॥

नपुंसक'नपुंसकमात्रकृते विशेषेऽनपुंसकेन सहवचने नपुंसकं शिष्यते, एकवच्चास्य कार्यं वा । शुक्लश्च कंबलः, शुक्ला च द्विपटी, शुक्लं च बस्त्रं तदिदं शुक्लम्/तानीमानि शुक्लानि ।

'तल्लक्षणश्चेदेव विशेषः, इति वर्तते । अन्यतरस्यामित्येकवद्भावेनैव

सम्बध्यते । तेनात्रैकशेषो नित्यः, एकवद्भाव एव विकल्पेन भवति । 'अनपुंसकेन' इति किम् ? शुक्लं च शुक्लं च शुक्लं चेति शुक्लानि । अत्र 'एकवत्' इति न, बहुवचनमेव भवति ।

पिता मात्रा ॥७०॥

वाऽनुवृत्तिः । पितरौ/मातापितरौ ।

एकवत् इति निवृत्तम् । मात्रा सहवचने पितृशब्दः शिष्यते वा । मातापितरौ-एकशेषाभावे द्वन्द्वे अभ्यर्हितत्वात् मातृशब्दस्य पूर्वप्रयोगः ।

श्वशुरः श्वश्र्वा ॥७१॥

वाऽनुवृत्तिः । श्वशुरौ/श्वश्रूश्वशुरौ ।

श्वश्रूशब्दस्यापि मातृवत्पूर्वनिपातः । श्वश्रूः पूर्वजपत्नी च मातृतुल्या प्रकीर्तिता । श्वशुरौ-श्वशुरश्च श्वश्रूश्च इति विग्रहः । श्वश्रूश्वशुरौ-अभ्यर्हितत्वात् 'श्वश्रूः' इत्यस्य पूर्वनिपातः ।

त्यदादीनि सर्वैर्नित्यम् ॥७२॥

एतानि सर्वैः त्यदादिभिरन्यैश्च सहवचने शिष्यन्ते । (वा०) त्यदादीनां मिथो यद्यत्परं तत्तच्छिष्यते ।' स च चैत्रश्च तौ । स च यश्च यौ ।

सर्वशब्दः साकल्यार्थकः । यद्यत्परम्-त्यदादिगणे परविप्रतिषेधाश्रयणं भवतीति भावः ।

ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री ॥७३॥

एतेषु सहविवक्षायां स्त्री शिष्यते । 'पुमान् स्त्रिया' इत्यस्यापवादः । गावः इमाः । अतरुणेषु किम् ? वर्करा इमे ।

गाङ्कुटाद्युदुपधादपृक्तछन्दसि पुनर्वस्वोस्त्रयोदश

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे

प्रथमाध्यायस्य द्वितीयः पादः

ग्रामे भवाः ग्राम्याः ये पशवः तेषां संघास्तेषु। अतरुणाः ये पशवः सामर्थ्यात्। गावः–गोसंघः।'इमाः' इति स्त्रीत्वद्योतनार्थः-प्रयोगः। वर्करा इमेः–अत्र 'इमे' इति पुंस्त्वाभिव्यक्तये।

(वा०) 'अनेकशफेष्विति वक्तव्यम्। इह न–अश्वा इमे।

प्रथमाध्यायस्यास्मिन् द्वितीय पादे गाङ्कुटादिभ्योऽञ्णिन्ङित्, उदुपधाद्भावादिकर्मणोरन्यतरस्याम्, अपृक्त एकाल्प्रत्ययः इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा छन्दसि पुनर्वस्वोरेकवचनम् इत्यत आरभ्य त्रयोदश सूत्राणीति संकलनेन त्रिसप्ततिः (७३) सूत्राणि सन्ति।

इति काशिकावृत्ति सार-सुधायां

प्रथमाध्यायस्य द्वितीयः पादः।

प्रथमाध्याये तृतीयः पादः

भूवादयो धातवः ॥१॥

'भू' इत्येवमादयः शब्दाः क्रियावचना धातुसंज्ञाः । √भू—भवति। √एध्—एधते । वकारो मङ्गलार्थः । यद्वा भूः क्रिया, वदन्ति वादयः ततः षष्ठीतत्पुरुषः । यद्वा वा आदिर्येषान्ते तथा । वश्च आदयः, वादयश्च वादयश्चेति एकशेषः । भ्वर्थाः=क्रियार्थाः ये वादयः समासद्वयेनार्थात् सर्वे आगताः । ते भूवादयः । तथा च श्लोकवार्तिकम्—

भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते ।
भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः ॥

अयम्भावः—'भूवादयः' इत्यत्र भूः आदिर्येषामिति बहुव्रीहौ सन्धौ कृतायां भ्वादयः, असन्धौ तु भूआदयः इत्येव भवति; भूवादयः इति निर्देशोऽनुपपन्नः । अयं वकारः कुतः ? तस्य प्रथमं समाधानमाह-वकारो मङ्गलार्थः । मङ्गल-शब्दो धर्मपर्यायः, धर्मार्थ इति । यथा 'त्रियम्बकं यजामहे' इत्यत्र यकारः । द्वितीयं समाधानम्-भवनं भूः-क्रियासामान्यम् तद्वदन्ति इति√वद्+इञ् औणादिकः वादयः (वादि शब्दस्य प्रथमाबहुवचने रूपम्)-वाचकाः ततः भुवो वादय इति षष्ठीसमासः । तृतीयं समाधानम्— भू+वा+आदयः इतिच्छेदः, । आदिशब्दः प्रकारवाची वा आदिर्येषां ते वादयः वाप्रकाराः (वासदृशाः) √वा गतिगन्धनयोः इत्यारभ्य चुरादि पर्यन्ताः । भवनं भूः सोऽर्थो येषां ते भ्वर्थाः । वादयश्च वादयश्चेति वादयः । भुवो वादयः इति वाच्यवाचकलक्षणः शेषषष्ठीसमासः । एकमिदमपि व्याख्यानं भवितुमर्हति भ्वादयश्च √वा गतिगन्धनयोः इत्यतः प्राक् वादयश्च √वा इत्यारभ्य चुरादिपर्यन्ताः इति भूवादयः । √भू इति परस्मैपदिनः √एध इत्यात्मने-पदिनः । धातुसंज्ञा पूर्वाचार्यकृता । क्रियावचनाः—पूर्वाचार्यैः क्रियावाचिनामेव 'धातु' संज्ञा विहिता इति तदर्थका एवात्र गृह्यन्ते । तेन या-वा-दिव् इत्यादि धातुसमानशब्दानामक्रियावचनानां न धातुत्वम् ।

उपदेशेऽजनुनासिक इत् ॥२॥

उपदिश्यतेऽनेनेत्युपदेशः—शास्त्रवाक्यानि = सूत्रपाठः, खिलपाठश्च । तत्र योऽनुनासिकः स इत्संज्ञः । एध । प्रतिज्ञानुनासिक्याः पाणिनीयाः ।

उपदेशः–करणे घञ् । खिलपाठः–धातुपाठः, चकारेण प्रातिपदिकपाठश्च प्रतिज्ञा……–प्रतिज्ञया आनुनासिक्यं येषां ते । अत्रानुनासिक्यम् आचार्यस्य पाणिनेः स्मरणेन विज्ञायते स्वरितत्वानुदात्तत्ववत् । सूत्रकारेण सर्वत्र विवक्षिता अनुनासिकाः स्वराः पठिताः, लेखकैः संकीर्णाः कृताः । स्मृतिपरम्परया निर्णेतव्यम् । √एध–अस्य धातोः अकारोऽनुनासिकः, स इद् भवति ।

हलन्त्यम् ॥३॥

'उपदेशे' इत्यनुवर्तते । अ इ उ ण्–णकारः ।

अन्ते = समाप्तौ भवम् अन्त्यम् । अन्तशब्दोऽयं समाप्त्यर्थकः । येन च समाप्यते समुदायः सोऽन्तः । उपदेशे धात्वादेः समुदायस्य यत् अन्त्यं हल् तदित्संज्ञं भवति । णकारः–इत् भवतीति शेषः ।

न विभक्तौ तुस्माः ॥४॥

पूर्वेण प्राप्ता इत्संज्ञा विभक्तौ वर्तमानानां तवर्गसकारमकाराणां प्रतिषिध्यते । वृक्षात् । बालकाः । वृक्षम् आदि ।

तुस्माः–तुः = तवर्गः, सः, मः एते तवर्गसकारमकाराः । क्रमशः उदाहरणानि बोध्यानि । एवं भूयात्, पचतः, अपचताम् इत्यादि ।

आदिर्ञिटुडवः ॥५॥

आदिशब्दः प्रत्येकमभिसम्बध्यते । उपदेशे ञि-टु-डु, इत्येतेषां समुदायानाम् आदितो वर्तमानानामित्संज्ञा भवति । √ञिमिदा—मिन्नः । √टुवेपृ–वेपथुः । √डुकृञ्–कृत्रिमम् ।

प्रत्येकम्-ञिना, टुना, डुना च पृथक् पृथक् । तेनैकवचनमुपपद्यते । मिन्नः–ञेरित्त्वात् 'ञीतः क्तः' । वेपथुः–टोरित्त्वात् 'ट्वितोऽथुच्' । कृत्रिमम्–डोरित्त्वात् 'ड्वितः क्त्रिः' 'क्त्रेर्मम् नित्यम्' ।

षः प्रत्ययस्य ॥६॥

प्रत्ययादिः षः इत्संज्ञः । ष्वुन्-नर्तकी ।

ष्वुन्-'शिल्पिनि ष्वुन्' इत्यनेन । नर्तकी-√नृत्+ष्वुन् षकारः, अन्त्यो नकारश्च इत्, वुकारस्य 'अक' आदेशः । षित्त्वात् स्त्रीत्वविवक्षाया 'षिद्गौरादिभ्यश्च' इति ङीष् ।

चुटू ॥७॥

प्रत्ययस्यादी चवर्गटवर्गौ इत्संज्ञौ भवतः । च्फञ्—कौञ्जायन्यः । टः—कुरुचरी ।

चुः-चवर्गः, टुः-टवर्गः । कौञ्जायन्यः-'गोत्रे कुञ्जादिभ्यश्च्फञ्' इत्यनेन कुञ्जस्य गोत्रापत्यम् इत्यर्थे कुञ्जशब्दात् च्फञ् । चकारः, अन्त्यो ञकारश्च इत्, फकारस्य 'आयन' आदेशः; ततः 'व्रातच्फञोरस्त्रियाम्' इति स्वार्थे ञ्यः । टवर्गस्येतः उदाहरणम् 'चरेष्टः' कुरुचरी-टित्त्वात् ङीप् । 'सप्तम्यां जनेर्डः' सरसिजम् ।

छकारस्य ईय आदेशः, ठकारस्य इक आदेशः, ढकारस्य एय आदेशः विधीयते तेन तेषामित्संज्ञा न भवति । 'चुटुषाः प्रत्ययस्य' इत्येकमेव सूत्रं करणीयम् । पृथक् करणात् अस्य विधेरनित्यत्वं ज्ञाप्यते तेन 'तेन वित्तश्चुञ्चुप्चणपौ, चकारस्य नेत्त्वम् केशचुञ्चुः । केशचणः ।

लशक्वतद्धिते ॥८॥

तद्धितवर्जितस्य प्रत्ययस्यादित एते इतः । 'ल्युट् च' चयनम् इत्यादि ।

एते-लकारशकारकवर्गाः । लकारस्येदम् उदाहरणम् चयनम् । शकारस्य 'कर्तरि शप्' पचति । कवर्गस्य 'क्तक्तवतू निष्ठा' भुक्तम्, भुक्तवान् । एव खश्-वशंवदः । ग्स्नुः-जिष्णुः । घुरच्-भङ्गुरम् । ङसि-ङस्-ङि-वृक्षात्, जगतः, जगति इति बोध्यानि ।

तस्य लोपः ॥९॥

तस्येतो लोपः । तस्य ग्रहणं सर्वलोपार्थम्, अलोऽन्त्यस्य मा भूत्-'आदिर्ञिटुडवः' इति ।

तस्य-अन्यथा ञिप्रभृतीनाम् अन्त्यस्यैव लोपः स्यात्, 'तस्य' वचनसामर्थ्यात् सम्पूर्णस्येतो लोपो भवति ।

यथासंख्यमनुदेशः समानाम् ॥१०॥

संख्याशब्देन क्रमः । अनुदिश्यते–पश्चादुच्चार्यते इत्यनुदेशः । समानाम् तुल्यानाम् उद्देशिनामनुदेशिनाञ्च । यथाक्रममुद्देशिभिरनुदेशिनः सम्बध्यन्ते । 'इष्टिकेषीकामालानां चिततूलभारिषु' इष्टकचितम् । इषीकतूलम् । मालभारी ।

संख्यामनतिक्रम्य यथासंख्यम् । तुल्यानाम्–समं परिपठितानामित्यर्थः । सम्बध्यन्ते–प्रथमेन प्रथमः, द्वितीयेन द्वितीयः, चरमेण चरमः इति क्रमेण सम्बन्धो भवति । इष्टिकेत्यादि–अत्र त्रयः उद्देशिनः इष्टिका, इषीका, माला च । तेषां क्रमशः चितेन, तूलेन, भारिणा च सम्बन्धो भवति; तथा चिते परतः इष्टिकाशब्दस्य ह्रस्वो भवति । एवं अन्ययोरपि बोध्यः ।

स्वरितेनाधिकारः ॥११॥

इत्थम्भूतलक्षणे तृतीया । इत ऊर्ध्वं स्वरितेन चिह्नेनाधिकारो वेदितव्यः । प्रतिज्ञास्वरिताः पाणिनीयाः । अधिकारो विनियोगः । स्वरितगुणयुक्तं शब्दरूपमेतदधिकृतत्वादुत्तरत्रोपतिष्ठते । प्रत्ययः, धातोः, ङ्याप्प्रातिपदिकात्, अङ्गस्य, भस्य, पदस्य ।

तृतीया–अत्र स्वरितचिह्नेनाधिकारः लक्ष्यते । अत्र पारिभाषिकस्य स्वरितस्य न ग्रहणम् तस्याज्धर्मत्वात् । अपि तु स्वरितो नाम स्वरविशेषो वर्णधर्मः । स तु सर्वेषां वर्णानाम् अचां हलाञ्च गुणः । उपतिष्ठते–यथा पुरुषो राज्ञा यत्राधिकृतो नगरे वा ग्रामे तत्रैवोपतिष्ठते । तथैव सूत्रकारेण नियुक्तं स्वरितगुणयुक्तं शब्दरूपं तत्र तत्रोपतिष्ठते । प्रतिज्ञास्वरिताः–यत्रैव पाणिनीया आचार्याः स्वरितत्वं प्रतिजानते तत्रैवास्य सद्भावो नान्यत्र । प्रतिज्ञा च यत्राचार्याः स्मरन्ति तत्रैव । प्रत्यय इत्यादि–प्रत्ययः–आपञ्चमाध्यायसमाप्तेरधिकारः । एवं 'ङ्याप्प्रातिपदिकात्' इत्यपि । धातोः–आतृतीयाध्यायसमाप्तेरधिकारः ।

अनुदात्तङित आत्मनेपदम् ॥१२॥

अनुदात्तेतो ये धातवो ङितश्च तेभ्य एवात्मनेपदं भवति । √आस–आस्ते । √शीङ्–शेते ।

नियमार्थं सूत्रम् । प्रधानतया प्रत्ययस्य नियमः । √आस् अनुदात्तेद्, √शीङ् च ङित् ।

भावकर्मणोः ॥१३॥

भावे कर्मणि च विहितस्य लस्यात्मनेपदं भवति । ग्लायते । क्रियते कटः ।

'लः कर्मणि.....' इति वक्ष्यमाणसूत्रेण सामान्यतया लस्य तिबादयः आदेशाः भवन्ति । तत्रायं नियमः–भावकर्मणोरेवात्मनेपदम् भवति । भावे ग्लायते, कर्मणि च क्रियते इति ।

कर्तरि कर्मव्यतिहारे ॥१४॥

क्रियाया विनिमये कर्तर्यात्मनेपदम् । व्यतिलुनते ।

कर्मणः–क्रियायाः व्यतिहारः–विनिमयः । यत्रान्यसम्बन्धिनीं क्रियामन्यः करोति स कर्मव्यतिहारः । व्यतिलुनते–अशिक्षितानां योग्यं लवनं शिक्षिताः कुर्वन्तीत्यर्थः । परस्परकरणमपि कर्मव्यतिहारः–सम्प्रहरन्ते राजानः । परस्परं प्रहरन्तीत्यर्थः ।

न गतिहिंसार्थेभ्यः ॥१५॥

गत्यर्थेभ्यो हिंसार्थेभ्यश्च कर्मव्यतिहारे आत्मनेपदं न । व्यतिगच्छन्ति । व्यतिघ्नन्ति ।

अर्थशब्दः प्रत्येकमभिसम्बध्यते । अन्यस्य योग्यं गमनं, हननं वा अन्ये कुर्वन्तीत्यर्थः ।

इतरेतरान्योऽन्योपपदाच्च ॥१६॥

इत्येवमुपपदाद्धातोः कर्मव्यतिहारेऽप्यात्मनेपदं न । इतरेतरस्य, अन्योन्यस्य वा व्यतिलुनन्ति ।

*(वा०) परस्पराच्चेष्टिः–परस्परस्य व्यतिलुनन्ति ।

इतरेतरश्चान्योऽन्यश्चैतौ शब्दावुपपदौ यस्य तस्मात् ।

नेर्विशः ॥१७॥

नेः परस्माद् विश आत्मनेपदम् भवति । निविशते ।

*(परिभाषा) यदागमास्तद्ग्रहणेन गृह्यन्ते । तेनाटा नास्ति व्यवधानम् । न्यविशत ।

√विश् परस्मैपदी । निपूर्वात्तस्मात् आत्मनेपदं विधीयते ।

* (परिभाषा) अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् । तेनेह न—मधुनि विशन्ति भ्रमराः ।

परिव्यवेभ्यः क्रियः ॥१८॥

अकर्त्रभिप्रायार्थं आरम्भः । परि-वि-अव-उपसर्गेभ्यः उत्तरस्मात् क्रीणातेरात्मनेपदम् । परिक्रीणीते इत्यादि । उपसर्ग-ग्रहणान्नेह—बहुवि क्रीणाति वनम् ।

आरम्भः– √डुक्रीञ् करणे क्र्यादिः । ञित्वात्कर्त्रभिप्राये सिद्धमात्मने-पदम् इति भावः । बहुवि–बहवो वयः = पक्षिणः अस्मिन्निति (बहु०) वनस्य विशेषणम् ।

विपराभ्यां जेः ॥१६॥

वि-परा-पूर्वात् जयतेरात्मनेपदम् । विजयते । पराजयते ।

अत्रापि वि-पराशब्दावुपसर्गौ गृह्येते ।

आङो दोऽनास्यविहरणे ॥२०॥

आङ्पूर्वाद्ददातेरात्मनेपदम् । विद्याम् आदत्ते ।

आस्यविहरणे तु न, आस्यं व्याददाति । आस्यविहरणम्–मुखव्या-दानम् । ददातिरुभयपदी तेनात्मनेपदे सिद्धे, अकर्त्रभिप्रायार्थमिदम् । तेन 'व्यादत्ते विहगपतिर्मुखं स्वकीयम्' इति प्रयोग आस्यविहरणेऽपि भवति । तत्र क्रियाफलस्य कर्तृगामित्वविवक्षणात् ।

* (वा०) स्वाङ्गकर्मकाच्चेति वक्तव्यम् । तेनेहाप्यात्मने पदं भवति–व्याददते पिपीलकाः पतङ्गस्य मुखम् । अत्र परस्य मुखव्यादानम् ।

क्रीडोऽनुसम्परिभ्यश्च ॥२१॥

अनु-सम्-परि-आङ्-पूर्वात् √क्रीड् (विहारे) इत्यस्मात् आत्म-नेपदं भवति । अनुक्रीडते ।

'आङ्' इत्यनुवर्तते । सङ्क्रीडते । परिक्रीडते । आक्रीडते इत्यपि । उपसर्गग्रहणात्कर्मप्रवचनीयप्रयोगे न–माणवकमनु क्रीडति ।

समवप्रविभ्यः स्थः ॥२२॥

एभ्यः पूर्वात् तिष्ठतेरात्मनेपदम् । संतिष्ठते इत्यादि ।

एभ्यः–सम्-अव-प्र-वि-इत्युपसर्गेभ्यः । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते इत्यप्युदाहरणानि ।

प्रकाशनस्थेयाख्ययोश्च ॥२३॥

प्रकाशनम्—स्वाभिप्रायाविष्करणम् । स्थेयः—विवादपदनिर्णेता तस्य आख्या । तयोः तिष्ठतेरात्मनेपदं भवति । तिष्ठते कन्या छात्रेभ्यः । संशय्य कर्णादिषु तिष्ठते यः ।

निर्णेता–प्रमाणभूत इत्यर्थः । तिष्ठते कन्या–प्रकाशयत्यात्मानमिति । संशय्य·········यः (किरात० ३/१४) कर्णादीन् नेतृत्वेनाश्रयतीत्यर्थः ।

उदोऽनूर्ध्वकर्मणि ॥२४॥

उत्पूर्वात्तिष्ठतेरात्मनेपदम् अनूर्ध्वकर्मणि । गेहे उत्तिष्ठते । तदर्थं घटते इत्यर्थः । अनूर्ध्वकर्मणि किम् ? आसनादुत्तिष्ठति ।

ऊर्ध्वदेशसंयोगानुकूलं कर्म = क्रिया तदूर्ध्वकर्म तन्नेत्यनूर्ध्वकर्म । 'उत्तिष्ठति' इत्यस्योर्ध्वदेशसंयोगं करोतीत्यर्थः ।

उपान्मन्त्रकरणे ॥२५॥

उपपूर्वात्तिष्ठतेर्मन्त्रकरणेऽर्थे वर्तमानादात्मनेपदम् । ऐन्द्र्या गार्हपत्यमुपतिष्ठते ।

*(वा०) उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वाच्यम् । देवपूजायाम्—आदित्यमुपतिष्ठते । संगतकरणे—रथिकानुपतिष्ठते । मित्रकरणे—महामात्रानुपतिष्ठते । संगतमुपश्लेषः, मित्रकरणम् मैत्री-सम्बन्धः इयान् भेदः । पथि—अयं पन्थाः स्रुघ्नमुपतिष्ठते ।

मन्त्रकरणः–मन्त्रः करणं यस्य (धात्वर्थस्य) सः । ऐन्द्र्या–इन्द्रदेवया ऋचा उपतिष्ठते–स्तौति । उपात्·········– अमन्त्रकरणार्थमिदम् । उपश्लेषः–विनाऽपि मैत्रीसम्बन्धात् यथा गङ्गा यमुनामुपतिष्ठते । मैत्रीसम्बन्धः–विनाप्युपश्लेषेणेति विशेषः । स्रुघ्नमुपतिष्ठते–प्राप्नोतीत्यर्थः ।

अकर्मकाच्च ॥२६॥

उपादित्यनुवर्तते । उपपूर्वादकर्मकक्रियावचनात्तिष्ठतेरात्मनेपदम् । यावद्भुक्तमुपतिष्ठते । भोजने भोजने सन्निधीयते इत्यर्थः ।

यावद्भुक्तम्–यावदिति यथार्थेऽव्ययम् वीप्सायाम् अव्ययीभावः भुक्तं भुक्तम् इति । सन्निधीयते–भोजनकाले सन्निहितो भवति ।

उद्विभ्यां तपः ॥२७॥

अकर्मकादिति वर्तते । उत्तपते । वितपते । दीप्यत इत्यर्थः ।

*(वा०) स्वाङ्गकर्मकाच्चेति वक्तव्यम् । स्वमङ्गं स्वाङ्गम् । उत्तपते पाणिम् ।

उत्-विपूर्वात् तपतेरकर्मकक्रियावचनादात्मनेपदम् भवति । 'अद्रवं मूर्तिमत् स्वाङ्गम्' इत्यत्र न, अपितु यस्मिन् कर्तर्यात्मनेपदं तस्य चेत्स्वमङ्गमित्यर्थकं गृह्यते । तेन देवदत्तो 'यज्ञदत्तस्य पृष्ठमुत्तपति' इत्यत्र न भवति ।

आङो यमहनः ॥२८॥

अकर्मकादिति वर्तते । आङ्पूर्वाभ्यामकर्मकक्रियावचनाभ्यामाभ्यामात्मनेपदं भवति । आयच्छते । आहते ।

आभ्याम्–√यम–√हन् धातुभ्याम् । क्रमशः उदाहरणे ।

*(वा०) स्वाङ्गकर्मकाच्चेति वक्तव्यम् । स्वाङ्गञ्चात्रापि स्वमङ्गमेव गृह्यते । आयच्छते पाणिम् । आहते शिरः । आहते–'अनुदात्तोपदेश ··' इत्यनुनासिकलोपः ।

समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः ॥२९॥

अकर्मकादिति वर्तते । सम्पूर्वकेभ्यः गम्यादिभ्योऽकर्मकेभ्यो धातुभ्य आत्मनेपदम् । संगच्छते । समृच्छते । सम्पृच्छते । संस्वरते । (संकल्पा अस्य) समरन्त । संशृणुते । संवित्ते ।

गम्यादिभ्यः–√गम् - √ऋच्छ -√प्रच्छ - √स्वृ- √ऋ- √श्रु- √विद् एतेभ्यः । समरन्त–सम् √ऋ + लुङ्→झ इत्यस्य रूपम् ।

निसमुपविभ्यो ह्वः ॥३०॥

नि - सम् - उप - वि - इत्येवम्पूर्वात् ह्वयतेरात्मनेपदम् । निह्वयते । संह्वयते । उपह्वयते । विह्वयते ।

❀(वा०) उपसर्गादस्यत्यूह्योर्वा वचनम् । निरस्यति/निरस्यते । समूहति/समूहते ।

अकर्त्रभिप्रायार्थमिदम् । कर्त्रभिप्राये तु ञित्वात्सिद्धमेवात्मनेपदम् ।

स्पर्धायामाङः ॥३१॥

'ह्वः' इत्यनुवर्तते । स्पर्धायां विषये आङ्पूर्वात् ह्वयतेरात्मनेपदम् । मल्लो मल्लमाह्वयते ।

स्पर्धा–संघर्षः=पराभिभवेच्छा धात्वर्थस्य विषयः । मल्लः स्पर्धमानो मल्लस्याह्वानं करोतीत्यर्थः । एवं छात्रश्छात्रमाह्वयते । अकर्त्रभिप्रायार्थमिदम् ।

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ॥३२॥

गन्धनम्–हिंसात्मकं सूचनम् । अवक्षेपणम्–भर्त्सनम् । सेवनम्–सेवा । साहसिक्यम्–साहसकर्म । प्रतियत्नः–सतो गुणान्तराधानम् । प्रकथनम्–प्रकर्षेण कथनम् । उपयोगः–धर्मादिप्रयोजने विनियोगः । एष्वर्थेषु वर्तमानात् करोतेरात्मनेपदम् । उत्कुरुते–हिंसात्मकं सूचयतीत्यर्थः इत्यादि ।

अवक्षेपणादिषूदाहरणानि क्रमशः—श्येनो वर्तिकामुदाकुरुते । गणकानुपकुरुते । परदारान् प्रकुरुते । एधो दकस्योपस्कुरुते । 'कृञः प्रतियत्ने' इति सुट् । गाथाः प्रकुरुते । शतं प्रकुरुते । यत्रोभयपदविधिस्तत्राकर्तृगेऽपि फले इति ज्ञेयम् ।

अधेः प्रसहने ॥३३॥

'कृञः' इत्यनुवर्तते । प्रसहनम्—अभिभवः । तमधिचक्रे ।

अधिपूर्वात् करोतेः प्रसहने वर्तमानादात्मनेपदम् । तम् धिचक्रे–अधि √कृ+लिटि रूपम् । न तेन पराजितः इतिभावः ।

वेः शब्दकर्मणः ॥३४॥

विपूर्वात् करोतेः शब्दकर्मणः आत्मनेपदम् । विकुरुते स्वरान् काकः ।

शब्दकर्मणः–शब्दः कर्म-कारकं यस्य तस्मात् ।

अकर्मकाच्च ॥३५॥

विकुर्वते सैन्धवाः । साधु दान्ताः शोभनं चलन्तीत्यर्थः ।

विपूर्वात् करोतेरकर्मकक्रियावचनादात्मनेपदम् । ओदनस्य पूर्णाश्छात्रा विकुर्वते=निष्फलं चेष्टन्ते । सुहितार्थयोगे षष्ठी । पूर्णाः=तृप्ताः ।

सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥३६॥

'णीञ्' प्रापणे इत्यस्माद् धातोरात्मनेपदं भवति सम्माननादिषु विशेषणेषु । सम्माननम्–सम्पूजनम् । चार्वी शास्त्रे नयते पदार्थान् । युक्त्या स्थिरीकृत्य शिष्यान् प्रापयतीत्यर्थः । ते युक्तिभिः स्थाप्यमानाः पूजिता भवन्ति । उत्सञ्जनम्–उत्क्षेपणम् । माणवकमुदानयते । उत्क्षिपतीत्यर्थः । आचार्यकरणम् माणवकमुपनयते । आत्मानमाचार्यीकुर्वन माणवकमात्मसमीपं प्रापयतीत्यर्थः । ज्ञानम्- चार्वी स्वशास्त्रे नयते । तत्र प्रमेयं निश्चिनोतीत्यर्थः । भृतिः—वेतनम् । कर्मकरानुपनयते । भृतिदानेन समीपं करोतीत्यर्थः । विगणनम्–ऋणादिनिर्यातनम् । ऋणं विनयते । व्ययः—धर्मादिषु विनियोगः । शतं विनयते । धर्माद्यर्थं शतं विनियुङ्क्ते इत्यर्थः ।

विशेषणेषु—सम्माननम्, आचार्यकरणम्, भृतिश्च धात्वर्थस्य विशेषणानि, अवशिष्टानि तु धातोर्विशेषणानि तेषु । ते–शिष्याः पूजिताः भवन्ति । अभिलषितार्थसम्पादनेनेतिशेषः । चार्वी–बुद्धिः तत्सम्बन्धात् आचार्योऽपि-चार्वी अजहल्लक्षणया । आत्मानमाचार्यीकुर्वन्–माणवकमीदृशेन विधिनाऽऽत्मसमीपं प्रापयति । यथा स उपनेता स्वयमाचार्यः सम्पद्यते ।

कर्तृस्थे चाशरीरे कर्मणि ॥३७॥

कर्तृस्थे कर्मण्यशरीरे सति नयतेरात्मनेपदम् । क्रोधं विनयते ।

'नियः' इति वर्तते । शरीरम्–तस्यैकदेशोऽपि गृह्यते । क्रोधः–देवदत्तादिकर्तृस्थमशरीरं कर्म ।

वृत्तिसर्गतायनेषु क्रमः ॥३८॥

वृत्तिः—अप्रतिबन्धः, सर्गः—उत्साहः, तायनम्—स्फीतता । एतेष्वर्थेषु क्रमेरात्मनेपदम् । ऋग्वेदे बुद्धिः क्रमते – अप्रतिहता प्रसरति । व्याकरणाध्ययनाय क्रमते उत्सहते । अस्मिन् शास्त्राणि क्रमन्ते–स्फीताः भवन्ति ।

सर्गः—'येनेन्द्रलोकस्य जयाय सृष्टः' इत्यत्र सृजेरुत्साहोऽर्थो दृष्टः ।

स्फीतता–उत्तरोत्तरवृद्धिः ।

उपपराभ्याम् ॥३९॥

वृत्तीत्यादिसूत्रमनुवर्तते । उप-परा-पूर्वात्क्रमतेरेष्वर्थेषु वर्तमानादात्मनेपदम् भवति । उपसर्गनियमार्थमेतत् । उपक्रमते । पराक्रमते ।

नियमार्थम्-तेनोपपराऽतिरिक्तोपसर्गपूर्वान्न भवति–संक्रामति । 'क्रमः परस्मैपदेषु' इति दीर्घः ।

आङ् उद्‌गमने ॥४०॥

आङ्पूर्वात्क्रमतेरात्मनेपदम् उद्गमनेऽर्थे । आक्रमते रविः । आक्रमते चन्द्रः ।

उद्‌गमनम्—ऊर्ध्वगमनम् । 'नभः समाक्रामति चन्द्रमाः' इत्यत्र तु √क्रम् इत्यस्य धातोर्व्याप्तिरर्थः ।

वेः पादविहरणे ॥४१॥

विपूर्वात् क्रमतेरात्मनेपदं पादविहरणे । सुष्ठु विक्रमते वाजी ।

अश्वादीनां गतिविक्षेपो विक्रमणमुच्यते । विहरणम्–विक्षेपः । √क्रमु पादविक्षेपे इति पाठादेव विक्रमणेऽर्थे सिद्धे धातूनामनेकार्थत्वादेवमुक्तम् ।

प्रोपाभ्यां समर्थाभ्याम् ॥४२॥

आदिकर्मण्येतौ समर्थौ–तुल्यार्थौ। ताभ्यां परस्मात् क्रमतेरात्मनेपदम्। प्रक्रमते। उपक्रमते भोक्तुम्।

एतौ–प्र–उप-इति। समर्थौ–समः–तुल्यः अर्थो ययोस्तौ शकन्ध्वादित्वात्पररूपम्। अथवा 'सम्' इति शब्द एव तुल्यार्थकः। आदिकर्मणि–प्रारम्भे। प्रक्रमते–प्रारभते।

अनुपसर्गाद्वा ॥४३॥

अप्राप्तविभाषेयम्। क्रमते/क्रामति।

उपसर्गरहितात् क्रमेरात्मनेपदं वा। अप्राप्ते विभाषा–विकल्पः।

अपह्नवे ज्ञः ॥४४॥

अपह्नवे √ज्ञा इत्यस्मात् आत्मनेपदम्। शतम् अपजानीते।

अपह्नवः–अपलापः। अप-उपसर्गपूर्वक एव √ज्ञा अपह्नवे वर्तते।

अकर्मकाच्च ॥४५॥

'ज्ञः' इति वर्तते। जानातेरकर्मकात्मनेपदम्। सर्पिषो जानीते।

सर्पिषो जानीते—'अनुपसर्गाज्ज्ञः' इत्यात्मनेपदम्। नात्र सर्पिः ज्ञानकर्म, अपि तु ज्ञानपूर्विकायां प्रवृत्तौ करणम्। सर्पिषा उपायेन प्रवर्त्तते, इत्यर्थः। 'ज्ञोऽविदर्थस्य करणे' इति षष्ठी।

संप्रतिभ्यामनाध्याने ॥४६॥

अनाध्यानम्–उत्कण्ठाभावः। शतं संजानीते। अनाध्याने किम्? मातुः संजानाति–उत्कण्ठते इत्यर्थः।

'ज्ञः' इति वर्तते। सम्-प्रति–इत्येवंपूर्वात् √ज्ञा धातोः आत्मनेपदमनाध्याने। आध्यानम्–उत्कण्ठापूर्वकस्मरणम्। तदभावोऽनाध्यानम्।

भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥४७॥

भासनादिषु वदेरात्मनेपदम्। भासनम्–दीप्तिः। वदते चार्वी शास्त्रे। भासमानः पदार्थान् व्यक्तीकरोतीत्यर्थः।

उपसम्भाषा–उपसान्त्वनम् । कर्मकरान् उपवदते । उपसान्त्वयतीत्यर्थः । ज्ञानम्–वदते चार्वी । यत्नः–उत्साहः । क्षेत्रे वदते । विमतिः–नानामतिः । क्षेत्रे विवदन्ते । उपमन्त्रणम्–कुलभार्यामुपवदते ।

भासमानः–'शास्त्रे' इति शेषः । वदते चार्वी–ज्ञानेनासौ वदितुं जानातीत्यर्थः । चार्वीति तद्विशिष्ट आचार्यः । क्षेत्रे वदते–तद्विषयम् उत्साहमाविष्करोति । क्षेत्रे विवदन्ते–नानामतयो विचित्रं भाषन्ते । उपवदते–'भद्रे ! भजस्व माम्' इदं ते दास्यामि । इत्येवंकथनेन स्वाभीष्टे प्रवर्त्तयतीत्यर्थः ।

व्यक्तवाचां समुच्चारणे ॥४८॥

'वद्' इति वर्तते । प्रसिद्धमुपसंग्रहार्थमेतत् । व्यक्तवाच इति हि मनुष्याः प्रसिद्धाः । तेषां समुच्चारणे वर्तमानाद् वदतेरात्मनेपदम् । सम्प्रवदन्ते द्विजाः ।

प्रसिद्धाः–कुक्कुटादिरुतमपि व्यक्तं भवति । शुकसारिकादीनां तु पुरुषप्रयत्नवशात् कदाचित् व्यक्ता वाक्, परं मनुष्यवाक् व्यक्ततरा भवति । तेनेह न–

अयि विजहीहि दृढोपगूहनं त्यज नवसङ्गमभीरुवल्लभम् ।
अरुणकरोद्गम एष वर्तते वरतनु ! सम्प्रवदन्ति कुक्कुटाः ॥

समुच्चारणम्–सह–उच्चारणम् ।

अनोरकर्मकात् ॥४९॥

'वद्' इति 'व्यक्तवाचाम्' चेत्यनुवर्तते । अनुवदते कठः कलापस्य । अनुः सादृश्ये । यथा कलापोऽधीयानो वदति तथा कठ इत्यर्थः ।

अनु पूर्वाद् वदतेरकर्मकात् आत्मनेपदम् व्यक्तवाग्विषये । सादृश्ये–तेन 'कलापस्य' इत्यत्र शेषे षष्ठी । वदनमात्रसादृश्ये तात्पर्यमिति कर्म न विवक्षितम् ।

विभाषा विप्रलापे ॥५०॥

'वद्' इति 'व्यक्तवाचाम्' इति च वर्तते । विप्रलापे पूर्वप्राप्तं विकल्पते । विप्रवदन्ते सांवत्सराः/विप्रवदन्ति सांवत्सराः । मिथः प्रतिषेधेन विरुद्धं वदन्ति ।

प्राप्तविभाषेयम् । विप्रलापः–परस्परं प्रतिबन्धेन विरुद्धः प्रलापः । सांवत्सराः–संवत्सरान् वदन्ति, संवत्सर + अण्–ज्यौतिषिका इत्यर्थः ।

अवाद्ग्रः ॥५१॥

अवपूर्वाद् गिरतेरात्मनेपदम् । अवगिरते ।

√गृ निगरणे इति तुदादिपठितस्य ग्रहणम् ।

समः प्रतिज्ञाने ॥५२॥

प्रतिज्ञानम् अभ्युपगमः । नित्यं शब्दं संगिरते ।

'ग्रः' इति वर्तते । सम्पूर्वाद् गिरतेरात्मनेपदम् प्रतिज्ञाने । अभ्युपगमः–परेण युक्त्या साधितस्यार्थस्य सम्माननम् = समीचीनमुक्तमत्र भवतेत्येवंरूपमङ्गीकरणम् ।

उदश्चरः सकर्मकात् ॥५३॥

गेहम् उच्चरते—उत्क्रम्य गच्छति इत्यर्थः ।

उत्पूर्वाच्चरतेः सकर्मकक्रियावाचिन आत्मनेपदम् । उत्क्रम्य–उल्लङ्घ्य ।

समस्तृतीयायुक्तात् ॥५४॥

अश्वेन संचरते । 'तृतीया' इति तृतीयाविभक्तिर्गृह्यते । तृतीयेति किम् ? उभौ लोकौ सञ्चरसि–इमं चामुं च नारद ! (देवल !)

'चरः' इति वर्तते । सम्पूर्वाच्चरतेस्तृतीयायुक्तादात्मनेपदं भवति । तृतीया विभक्तिः–न तु तृतीयार्थं इति भावः ।

दाणश्च सा चेच्चतुर्थ्यर्थे ॥५५॥

'समस्तृतीया' वर्तते । सम्पूर्वाद् √दाण् धातोस्तृतीयायुक्तादात्मनेपदम् । दास्या संयच्छते ।

अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया । दास्या–कामुकः सन् दास्यै ददातीत्यर्थः । संयच्छते–दाण् इत्यस्य 'यच्छ' आदेशः ।

उपाद्यमः स्वकरणे ॥५६॥

पाणिग्रहणविशिष्टं स्वकरणम् । भार्यामुपयच्छते ।

उपपूर्वाद् यमः आत्मनेपदं स्वकरणे । पाणिग्रहणम्–कन्यासंस्कारविशेषः । अत्र पाणिग्रहणात्मकमेव स्वीकरणं गृह्यते । शब्दशक्तीनां निश्चित-

विषयत्वात् उप√यम पाणिग्रहणपूर्वकस्वीकारे एवात्मनेपदी वर्तते। भाष्ये तु 'अस्वस्य सतः स्वत्वापादनमेव स्वकरणम्' इत्युक्तम्। तदनुसारिण एव भट्टिकाव्ये प्रयोगाः दृश्यन्ते—उपायंस्त महास्त्राणि। उपायंसत नासतम्। नोपायंस्त दशाननः।

ज्ञाश्रुस्मृदृशां सनः ॥५७॥

धर्मं जिज्ञासते इत्यादि।

√ज्ञा–√श्रु–√स्मृ–√दृश्–इत्येतेषां सन्नन्तानाम् आत्मनेपदम्। गुरुं शुश्रूषते। नष्टं सुस्मूर्षते। नृपं दिदृक्षते इत्युदाहरणान्यपि।

नानोर्ज्ञः ॥५८॥

पुत्रम् अनुजिज्ञासति।

अनुपूर्वाद् ज्ञाधातोः सन्नन्तादात्मनेपदं न। पूर्वेण प्राप्तस्य प्रतिषेधः।

प्रत्याङ्भ्यां श्रुवः ॥५९॥

नेति वर्तते। प्रतिशुश्रूषति इत्यादि।

प्रति–आङ्–इतिपूर्वात्√श्रु धातोः सन्नन्तात् आत्मनेपदं न। आशुश्रूषति इत्यपि।

शदेः शितः ॥६०॥

शदिर्यः शित् शिद्भावी शितो वा सम्बन्धी तस्मादात्मनेपदम्। शीयते।

शिद्भावी–यः पश्चात् शिद्भवति। शितः सम्बन्धी–यस्तस्य प्रकृतिः। यत्र 'शप्' भवतीति पर्यवसितम्। शीयते–√शद्लृ शातने + लट् 'पाघ्राध्मा....'इत्यनेन√शद् धातोः 'शीय' आदेशः।

म्रियतेर्लुङ्लिङोश्च ॥६१॥

ङित्त्वात् सिद्धे नियमार्थमेतत्। शितः इत्यनुवर्तते। अमृत। मृषीष्ट। म्रियते।

नियमार्थम्–म्रियतेर्लुङ्लिङोः शितश्चात्मनेपदम्। क्रमशः उदाहरणत्रयम्। अन्यत्र न-मरिष्यति।

पूर्ववत्सनः ॥६२॥

पूर्वधातुवत्सन्नन्तादप्यात्मनेपदम् । आसिसिषते । शिशयिषते ।

पूर्वधातुवत्–सन्प्रत्ययात्पूर्वमपि यो धातुः आत्मनेपदी तद्वत् । √आस्–√शी धातू सनः पूर्वमपि आत्मनेपदिनौ आस्ते । शेते इति । अतः सन्नन्ताभ्यामप्येताभ्यामात्मनेपदम् ।

आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ॥६३॥

आम्प्रत्ययो यस्मात्स आम्प्रत्ययः तस्येव धातोः कृञोऽनुप्रयोगस्यात्मनेपदम् । ईक्षाञ्चक्रे ।

अकर्त्रभिप्रायार्थमिदम् । अनुप्रयोगः–अनु = पश्चात् प्रयुज्यते इति । ईक्षाञ्चक्रे–आम् प्रत्ययो यस्माद्धातोर्भवति स आत्मनेपदी धातुस्तस्येव कृञोऽपि प्रयुज्यमानस्य 'ईक्षाम्' इत्यस्यापि आत्मनेपदम् इत्यर्थः ।

प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥६४॥

प्रयुङ्क्ते । अयज्ञपात्रेति किम् ? द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति ।

प्र–उप–इति पूर्वात् युजेरात्मनेपदम्, यज्ञपात्रप्रयोगविषये तु न । न्यञ्चि–अधः पतितानि ।

समः क्ष्णुवः ॥६५॥

संक्ष्णुते शस्त्रम् ।

√क्ष्णु तेजने । सम्पूर्वात्ततः आत्मनेपदम् ।

भुजोऽनवने ॥६६॥

√भुज पालनाभ्यवहारयोः रुधादिः । तस्मादात्मनेपदम् अनवने । भुङ्क्ते ।

अनवनम्–अपालनम् । तस्माद् अभ्यवहारे–भक्षणे अर्थे आत्मनेपदम् । पालनार्थे तु भुनक्त्येनमग्निराहितः ।

णेरणौ यत्कर्म णौ चेत्स कर्त्ताऽनाध्याने ॥६७॥

'णिचश्च' इति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् ।

अकर्त्रभिप्रायार्थमारम्भः । ण्यन्तादात्मनेपदम् भवति । कथम् ? अणौ यत्कर्म णौ चेत्तदेव कर्म स एव कर्त्ता भवति । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयते हस्ती स्वयमेव । अनाध्याने इति किम् ? स्मरति वनस्य कोकिलः । स्मरयत्येनं वनं स्वयमेव ।

कथम्-सूत्राभिप्रायविषयकोऽयं प्रश्नः । अत्र पञ्चवाक्यानि (१) णेः- ण्यन्तादात्मनेपदम् । (२) अणौ यत्कर्म-अणौ=णेः पूर्वम् यत्कर्म णौ अपि तदेव कर्म, अनेन कर्मान्तरनिवृत्तिः क्रियते । (३) णौ चेत्-अणौ यत्प्रतिपाद्यं णावपि तदेव प्रतिपाद्यं चेत् । (४) स कर्ता-तादृशं कर्मैव कर्त्ता भवति अभ्यासातिशयवशात् । (५) अनाध्याने-आध्यानं=स्मरणं वर्जयित्वा । आरोहन्ति हस्तिनं हस्तिपकाः इतिवाक्यम् अणौ कर्मप्रदर्शनार्थम् । यदा सुशिक्षितो हस्ती हस्तिपकान् प्रति प्रयोजकत्वेन विवक्ष्यते-हस्ती हस्तिपकान् प्रयुङ्क्ते 'माम् आरोहत' इति । ततश्च हेतुमण्णिच् ।

आरोहयते हस्ती स्वयमेव-'आरोहन्ति हस्तिनं हस्तिपकाः' इत्यत्र आङ्पूर्वस्य √रुह धातोः द्वौ क्रियार्थौ भवतः न्यग्भवनम्, न्यग्भावनं च । न्यग्भवनस्य कर्त्ता हस्ती, न्यग्भावनस्य च हस्तिपकाः । हस्ती न्यग्भवति । तं न्यग्भवन्तं हस्तिनं हस्तिपका न्यग्भावयन्ति । यदा तु शिक्षातिशयप्रदर्शनाय हस्तिपकस्य व्यापारो न विवक्षितः, तदा आ √रुह इत्यस्यार्थः न्यग्भावमात्रम् । तत्र च कर्ता हस्ती । एवम् अण्यन्ते यदेव कर्म-क्रियाफलम् आसीत् आरोहणं तदेवात्राप्यस्ति कर्म च हस्ती ण्यन्ते कर्ता भवति । निवृत्तिकारणाभावात् णिचोऽपि निवृत्तिर्न । केवलं कर्मभूतो हस्ती शिक्षया, अभ्यासेन च कर्ता भवति, हस्तिपकान् प्रयोजयति चारोहणायेत्यर्थः । एवं दर्शयते भृत्यान् राजा स्वय मेव । करेणुरारोहयते निषादिनम् इत्यादि प्रयोगा अपि बोध्याः । स्मरयत्येनम्-'गतिबुद्धि....' सूत्रेण 'एनम्' इत्यस्य कर्मत्वेन द्वितीया बुद्धयर्थत्वात्कोकिलस्य कर्मसंज्ञा । अत्र वनं कर्त्ता न कोकिलः ।

भीस्म्योर्हेतुभये ॥६८॥

णेरिति वर्तते । 'स्वरितञितः....'इत्यतःप्राक् अनयोरात्मनेपदम् । हेतुः—प्रयोजकः कर्त्ता लकारवाच्यः । ततश्चेद्भयम् । भयमुपलक्षणार्थम्, विस्मयोऽपि तत एव । जटिलो भीषयते । जटिलो विस्मापयते ।

ण्यन्तधातुभ्यः सर्वे आत्मनेपदविधयोऽकर्त्रभिप्रायार्थाः बोध्याः । अनयोः-√भी-√स्मि-धात्वोः । हेतुभये-हेतोः भयम् तस्मिन् (पञ्चमीतत्०) । उदाहरणद्वयेऽपि भयम् विस्मयश्च हेतोः-कर्तुः जटिलादेवेत्यर्थः ।

गृधिवञ्च्योः प्रलम्भने ॥६९॥

प्रलम्भनम् = मिथ्याफलाख्यानम् । बालं गर्धयते । बालं वञ्चयते ।

√गृध्-√वञ्च-इत्येतयोर्ण्यन्तयोः प्रलम्भने वर्त्तमानयोरात्मनेपदम् ।

लियः सम्माननशालीनीकरणयोश्च ॥७०॥

√लीङ् श्लेषणे दिवादिः, √ली श्लेषणे क्र्यादिः; अविशेषाद् द्वयोर्ग्रहणम् । जटाभिरालापयते—पूजां समधिगच्छतीत्यर्थं । श्येनो वर्तिकामुल्लापयते—न्यक्करोतीत्यर्थः । चात्प्रलम्भनेऽपि । कस्त्वामुल्लापयते ।

लियो ण्यन्तात् सम्मानने शालीनीकरणे चार्थे आत्मनेपदम् । सम्माननम्—पूजा, शालीनीकरणम्—अभिभवः ।

मिथ्योपपदात् कृञोऽभ्यासे ॥७१॥

मिथ्योपपदात् कृञो ण्यन्तादात्मनेपदम् अभ्यासे । पदं मिथ्याकारयते = सापचारं स्वरादिदुष्टम् असकृदुच्चारयति ।

मिथ्योपपदात्—उप उच्चरितं पदम् उपपदम् मिथ्या उपपदं यस्य स तस्मात् । अभ्यासः—पुनः पुनः करणम् । सापचारम्—सदोषम् । दोषोऽत्र स्वरादिकृतः । उदात्ते उच्चारणीयेऽनुदात्तं पुनः पुनः उच्चारयतीत्यर्थः । ण्यन्तस्य करोतेरुच्चारणमर्थः धातूनामनेकार्थत्वात् ।

स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥७२॥

णेरिति निवृत्तम् । कर्त्तारं चेत् क्रियाफलम् अभिप्रैति । यजते । स्वर्गादिप्रधानफलम् इह कर्त्तारमभिप्रैति ।

कर्त्तारं चेत्—स्वरितेतो ये धातवः ञितश्च तेभ्य आत्मनेपदम् भवति कर्त्तारं चेत्याद्यर्थो योजनीयः । स्वरितेतः—येषु स्वरितस्य इत्त्वं प्रतिज्ञातं ते । ञितः—ञकार इत् येषां ते । कर्त्रभिप्रायः—कर्त्तारम् अभिप्रैति इति कर्तृ—अभि—प्र √इ + अण् 'कर्मण्यण्' । अभिप्रैति—क्रियाफलस्य कर्तृगामित्वद्योतनायात्मनेपदं भवतीत्यर्थः । यद्यपि यजमानाभीष्टसिद्धये कृतायाः यागक्रियायाः फलं दक्षिणारूपं याजकम् अपि अभिप्रैति, परमत्र प्रधानफलं स्वर्गाद्येव गृह्यते ।

अर्थात् यत्फलमुद्दिश्य यागादि क्रिया आरभ्यते । तदाह—

यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।
तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम् ॥

यजते–स्वरितेत उदाहरणम् । ञितः–सुनुते । कुरुते इत्यादि ।

अपाद्वदः ॥७३॥

धनकामो न्यायमपवदते । न्यायापवादेन धनमर्जयिष्यामीति मन्यते ।

'कर्त्रभिप्राये क्रियाफले' इति वर्तते 'शेषात्कर्तरि....' इत्यतः प्राक् । अप पूर्वात् √वद् धातोः आत्मनेपदम् । न्यायापवादः–नियमस्य विरोधो निन्दा वा ।

णिचश्च ॥७४॥

कटं कारयते ।

णिजन्तादात्मनेपदम् भवति ।

समुदाङ्भ्यो यमोऽग्रन्थे ॥७५॥

अग्रन्थे = ग्रन्थविषयश्चेत् प्रयोगो न भवति । व्रीहीन् संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । 'आङो यमहनः' इतिसिद्धमेव, अत्राङो ग्रहणं सकर्मकार्थम् । अग्रन्थे किम् ? उद्यच्छति चिकित्सां वैद्यः ।

सम्–उत्–आङ्–इत्येवम् पूर्वात् यमेरात्मनेपदम् । उद्यच्छति चिकित्साम्–चिकित्साशास्त्रमधिगन्तुम् उद्यमं करोतीत्यर्थं ।

अनुपसर्गाज्ज्ञः ॥७६॥

गां जानीते ।

अनुपसर्गात्–उपसर्गविहीनात् √ज्ञा धातोरात्मनेपदम् ।

विभाषोपपदेन प्रतीयमाने ॥७७॥

यत्कर्त्रभिप्राये द्योत्ये आत्मनेपदम्, उपपदेन (कर्तृवाचिशब्देन) प्रतीयमाने तद्वा । स्वं यज्ञं यजति/यजते वा । एवम् पञ्चसूत्र्यामुदाहार्यम् ।

यत् आत्मनेपदम्–'स्वरितञितः....प्रभृति पञ्चभिः सूत्रैर्विहितम् । उपपदम्–उप–समीपे श्रूयमाणं पदम् इत्यन्वर्थस्य ग्रहणम् । प्रतीयमाने–तस्मिन् कर्त्रभिप्राये इत्यर्थः । स्वं....यजते–अत्र स्वपदेन कर्तृगामि क्रियाफलं प्रतीयते। उदाहार्यम्– स्वं कटं करोति/कुरुते वा । स्वं पुत्रमपवदति/अपवदते वा। स्वं कटं कारयति/कारयते वा । स्वं व्रीहिं संयच्छति/संयच्छते वा ।

शेषात्कर्तरि परस्मैपदम् ॥७८॥

येभ्यो धातुभ्यो येन विशेषणेनात्मनेपदम् विहितं ततोऽन्यः शेषः । तस्मात् कर्तरि परस्मैपदम् । याति । वाति ।

पूर्वैः सर्वत्रात्मनेपदविधानं कृतम् । परस्मैपदनियमार्थमारम्भः । शेषाद् एव, कर्तरि एव च । 'कर्तरि कर्मव्यतिहारे' इत्यतः 'कर्तरि' इति पदम् अनुवर्त्तते, तेन कर्त्तैव यः कर्त्ता = शुद्धः कर्त्ता इत्यर्थस्तत्रैव परस्मैपदं न तु कर्तृवद्भावरहितो यः कर्मकर्ता तत्र । तेन 'पच्यते ओदनः स्वयमेव' इत्यत्र न परस्मैपदम् ।

अनुपराभ्यां कृञः ॥७९॥

कर्त्रभिप्राये, गन्धनादिषु चात्मनेपदम् विहितम्, तदपवादः । अनुकरोति । पराकरोति ।

अनु–परा–इतिपूर्वात् करोतेः परस्मैपदं भवति । अत्रापि शुद्धकर्त्तैव गृह्यते । नेह–अनुक्रियते स्वयमेव ।

अभिप्रत्यतिभ्यः क्षिपः ॥८०॥

√क्षिप् स्वरितेत्, ततः कर्त्रभिप्रायेऽप्राप्तं परस्मैपदं विधीयते । अभिक्षिपति इत्यादि । द्वितीयमपि कर्तृग्रहणमनुवर्तते, तेनेह न— अभिक्षिप्यते स्वयमेव ।

अभि–प्रति–अति–इत्येवंपूर्वात् क्षिपः परस्मैपदम् । प्रतिक्षिपति । अतिक्षिपति इति चोदाहरणे ।

प्राद्वहः ॥८१॥

पूर्ववदारम्भः । प्रवहति ।

√वह प्रापणे स्वरितेत् उभयपदी । प्र–उपसर्गपूर्वात्ततः कर्तृगामिन्यपि क्रियाफले परस्मैपदम् ।

परेर्मृषः ॥८२॥

परिमृष्यति । वहेरप्यत्रानुवृत्तिरिति केचित् । परिवहति ।

√मृष तितिक्षायाम् उभयपदी, परिपूर्वात्ततः परस्मैपदम् कर्तृगेऽपि क्रियाफले ।

व्याङ्परिभ्यो रमः ॥८३॥

अनुदात्तेत्त्वादप्राप्तं परस्मैपदं विधीयते । विरमति इत्यादि ।

√रमु क्रीडायाम् अनुदात्तेत् । वि–आङ्–परि–इत्येवंपूर्वाद् √रम् धातोः परस्मैपदम् । आरमति । परिरमति इति च ।

उपाच्च ॥८४॥

अन्तर्ण्यर्थोऽत्र रमिः । पृथक्करणमुत्तरार्थम् । अकर्मकाद्विकल्पं वक्ष्यति । स उपपूर्वादेव यथा स्यात् । उपरमति । उपरमयतीति यावत् ।

'रमः' इत्यस्य समुच्चयार्थश्चकारः । अन्तर्ण्यर्थः–अयम्भावः, उपपूर्वको √रमधातुर्विनाशे निवृत्तौ वाऽर्थेऽकर्मकः । तत्कथमस्य सकर्मकत्वम् ? उपरमति (देवदत्तमिति) यथा चास्य ण्यन्ततात्पर्येण ज्ञायते । अतोऽत्र √रमधातुस्तथा मन्तव्यः । अन्तः–अन्तर्भावितः णेः अर्थः प्रयोज्यप्रयोजकभावरूपो यस्य ।

विभाषाऽकर्मकात् ॥८५॥

'रमः' 'उपात्' इति च वर्तते । पूर्वेण नित्ये परस्मैपदे प्राप्ते विभाषाऽऽरभ्यते । अकर्मकाद् वा भवति । यावद् भुक्तमुपरमति/उपरमते वा । निवर्तते इत्यर्थः ।

यावद्भुक्तम्–'यावदवधारणे' इत्यव्ययीभावः । यावन्ति भोजनानि तावद्भ्यो निवर्तते ।

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥८६॥

'णिचश्च' इति कर्त्रभिप्रायेऽप्राप्तं विधीयते । येऽत्राकर्मकास्तेषाम्'अणावकर्मकादि'त्येव सिद्धेऽचित्तवत्कर्तृकार्थं वचनम् ।

बोधयति पद्मम् । ये प्रु-द्रु-स्रवश्चलनार्थास्तेषामपि 'निगरणचलनेति' सिद्धे, यदा न चलनार्थास्तदर्थं वचनम् । प्रवते-प्राप्नोतीति गम्यते । आपो द्रवन्ति—विलीयन्ते इत्यर्थः । कुण्डिका स्रवति—स्यन्दते इत्यर्थः ।

अप्राप्तम्—परस्मैपदमिति शेषः, तेनात्मनेपदविधानादितिभावः । √बुध-√युध-√नश-√जन-√इङ्-√प्रु-√द्रु-√स्रु-धातुभ्यो ण्यन्तेभ्यः परस्मैपदम् । **बोधयति** । **योधयति** । नाशयति । जनयति । अध्यापयति । **प्रावयति** । **द्रावयति** । **स्रावयति** इत्युदाहरणानि । **अकर्मकाः**—√बुध, √युध,√नश,√जन इत्येते धातवः । **बोधयति पद्मम्**—अत्र कर्ता वासरः, उषःकालो वाऽचित्तवान् । अचलनार्थम् वचनम्—तथा चात्र **प्रावयति**—प्रापयति **द्रावयति**-विलापयति । **स्रावयति**-स्यन्दयतीत्यर्थकान्युदाहरणानि बोध्यानि ।

निगरणचलनार्थेभ्यश्च ॥८७॥

कर्त्रभिप्रायेऽप्राप्तं विधीयते । निगरणम्—अभ्यवहारः । चलनम् कम्पनम् । निगारयति । कम्पयति । सकर्मकार्थोऽचित्तवत्कर्तृकार्थश्च योगः ।

णेः इति वर्त्तते । निगरणार्थेभ्यः चलनार्थेभ्यश्च धातुभ्यो ण्यन्तेभ्यः परस्मैपदं भवति । **सकर्मकार्थः....योगः**—अकर्मकेभ्यश्चित्तवत्कर्तृकेभ्यश्चोत्तरेणैव सिद्धेः ।

अणावकर्मकाच्चित्तवत्कर्तृकात् ॥८८॥

पूर्ववत् । अण्यन्तो योऽकर्मकश्चित्तवत्कर्तृको धातुस्तस्मात् ण्यन्तात् परस्मैपदम् । आसयति मैत्रम् ।

पूर्ववत्—'णेः' इति वर्तते । कर्तृगामिनि क्रियाफले आत्मनेपदापवादः । **आसयति**—आस्ते मैत्रः इति अण्यन्तोऽकर्मक √आस् धातुः ।

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥८९॥

यत्त्वकर्त्रभिप्रायविषयं परमैपदं तदवस्थितमेव न प्रतिषिध्यते । एभ्यो न परस्मैपदम् । 'णिचश्च' इत्यात्मनेपदमेव । पाययते इत्यादि ।

यत्तु....प्रतिषिध्यते—तेन 'वत्सान् पाययति पयः' इत्यत्र 'शेषात्कर्त्तरि...'

इत्यनेन परस्मैपदम् भवत्येव। एभ्यः—√पा-√दम-आङ्√यम-आङ् √यस-परि√मुह-√रुचि-√नृति-√वद-√वस-इति धातुभ्यः। न परस्मैपदम्—आनन्तर्यात् 'निगरण....' 'अणावकर्मकात्....' इति सूत्रद्वयेन कर्त्रभिप्राये क्रियाफले विहितस्य प्रतिषेध। प्रतिषिद्धे परस्मैपदे, कर्त्रभिप्रायविषयमात्मनेपदं तदवस्थितमेव। पाययते √पा पाने इत्यस्य ग्रहणम् न तु√पा रक्षणे इत्यस्य, 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणात्। एवं√वस् निवासे इत्यस्यापि ग्रहणं बोध्यम्। एवम् क्रमशः दमयते। आयामयते। आयासयते। परिमोहयते। रोचयते। नर्त्तयते। वादयते। वासयते इत्युदाहरणानि बोध्यानि। अत्र√यम-√यस धातू आङ्-उपसर्गपूर्वौ, √मुह च परि-उपसर्गपूर्वः इत्यपि बोध्यम्। सर्वत्र 'णिचश्च' इत्यात्मनेपदं भवति।

वा क्यषः ॥९०॥

'लोहितादिडाज्भ्यः क्यष्' इति वक्ष्यति, तदन्ताद्वा परस्मैपदम्। लोहितायति/लोहितायते।

लोहितायति-अलोहितो लोहतो भवति इत्यर्थे क्यष्। एवम् पटपटायति। 'पटपटा' शब्दो डाच्प्रत्ययान्तः। तदन्तात्-क्यष्प्रत्ययान्तात्। पक्षे पटपटायते इत्यपि।

द्युद्भ्यो लुङि ॥९१॥

द्युतादि क्रृपूपर्यन्तेभ्यो लुङि वा परस्मैपदम्। व्यद्युतत्/व्यद्योतिष्ट।

'वा' इति वर्तते। द्युद्भ्यः-द्युतादयः क्रृपूपर्यन्ता अनुदात्तेतस्तेभ्यः। बहुवचननिर्देशादाद्यर्थो लभ्यते। एभ्यो नित्यमेवात्मनेपदं प्राप्तम् लुङि वा भवति। एवम् अलुठत्/अलोठिष्ट।

वृद्भ्यः स्यसनोः ॥९२॥

√वृतु-√वृधु-√शृधु-√स्यन्दू-√क्रृपू-इत्येभ्यः स्ये, सनि च वा परमैप म्। वर्त्स्यति/वर्त्स्यते। विवृत्सति/विवर्तिषते।

'वा' इति वर्तते। √वृत-आदयो द्यु तादिष्वेव पठ्यन्ते। वर्त्स्यति-√वृत इत्यस्य लृटि रूपम्। लृङि तु अवर्त्स्यत्/अवर्तिष्यत् इति बोध्यम्। एवं विवृत्सति इति सनि रूपम्। परस्मैपदे 'इट्' नेति ज्ञेयम्।

लुटि च क्लृपः ॥९३॥

चकारः स्यसनोरनुकर्षणार्थः । लुटि च स्यसनोश्च कृपेः परस्मैपदं वा । कल्प्ता/कल्पिता । कल्प्स्यति/कल्पिष्यते । अकल्प्स्यत्/अकल्पिष्यत । चिक्लृप्सति/चिकल्पिषते ।

भूवादयः क्रीडोऽनु वेः पाद म्रियतेः प्राद्वहस्त्रयोदश

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे

प्रथमाध्यायस्य तृतीयः पादः

क्लृपः–√कृप् इत्यस्य 'कृपो रोलः' इति लकारः । चकारः–असति तस्मिन् लुटचेति नियमः स्यात् ।

प्रथमाध्यायस्यास्मिन् तृतीये पादे भूवादयो धातवः, क्रीडोऽनुसम्परिभ्यश्च, वेः पादविहरणे, म्रियतेलुङ्लिङोश्च इत्येतेभ्यः सूत्रेभ्य आरभ्य विंशतिः सूत्राणि तथा प्राद्वहः इत्यत आरभ्य त्रयोदश सूत्राणीति सङ्कलनेन त्रिनवतिः (९३) सूत्राणि सन्ति ।

इति काशिकावृत्ति सार-सुधायां

प्रथमाध्यायस्य तृतीयः पादः ।

प्रथमाध्याये चतुर्थः पादः

आ कडारादेका संज्ञा ॥१॥

'कडाराः कर्मधारये' इति वक्ष्यति। आ=एतस्मात्सूत्रावधेर्यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रैकस्यैका संज्ञा भवतीति वेदितव्यम्। 'ह्रस्वं लघु' वक्ष्यति। √भिद् भेत्ता। अगुरुत्वान्न गुणाभावः।

वेदितव्यम्–या परा अनवकाशा चेति शेषः। गुणाभावः–'पुगन्तलघूपधस्य च' इति गुणः। एवं 'संयोगे गुरु' शिक्षा–अत्र गुरुत्वात् 'गुरोश्च हलः' इत्यनेन 'अ' प्रत्ययः। अततक्षत्–अत्र तु लघु-गुरुसंज्ञयोरुभयोः प्राप्तौ 'एका संज्ञा' इति नियमेन परत्वाद् गुरुसंज्ञैव भवति तेन 'सन्वल्लघुनि' ··' इत्यादिना इत्वं न भवति।

विप्रतिषेधे परं कार्यम् ॥२॥

तुल्यबलविरोधे परं कार्यं भवति। उत्सर्गापवादनित्यानित्यान्तरंगबहिरंगेषु तुल्यबलता नास्तीति नायमस्य योगस्य विषयो बलवतैव तत्र भवितव्यम्। अप्रवृत्तौ, पर्यायेण वा प्रवृत्तौ वचनमिदमारभ्यते। 'अतो दीर्घो यञि' 'सुपि च' इत्यस्यावकाशः, वृक्षाभ्याम्। 'बहुवचने झल्येत्' अस्यावकाशः, वृक्षेषु। अत्र परं भवति। वृक्षेभ्यः।

विप्रतिषेधः–तुल्यबलविरोध। तुल्यबलयोर्विरोधो यस्मिन्निति बहुव्रीहिः। परम्–परत्वञ्चाष्टाध्यायीपाठानुक्रमेणेति बोध्यम्। उत्सर्ग··· भवितव्यम्। अयमत्र संग्रहरूपः श्लोकः–

परं विदुः पूर्वपरोपपत्तौ, परस्य नित्यस्य च नित्यमेव।
नित्यान्तरङ्गोपगमेऽन्तरङ्गम्, तस्माद्विधिः प्रातिपदो बलीयान्।

तदर्थिका चेयं परिभाषा–परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः।
वृक्षेभ्यः–परत्वात् अकारस्य एत्वं भवति न तु दीर्घः।

यू स्त्र्याख्यौ नदी ॥३॥

ई—ऊ—अन्तं स्त्र्याख्यं नदीसंज्ञम् । कुमारी । यवागूः ।

ई च ऊ च = यू । अविभक्तिको निर्देशः । स्त्रियम् आचक्षाते इति स्त्र्याख्यौ 'मूलविभुजादिभ्य उपसंख्यानम्' इति 'क' प्रत्ययः । उदाहरणे तु हे कुमारि ! हे यवागु ! इति बोध्ये । उभयत्र 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वम् ।

नेयङुवङ्स्थानावस्त्री ॥४॥

पूर्वेण प्राप्ता निषिध्यते । इयङुवङोः स्थानमनयोरिति तौ यू न नदीसंज्ञौ, स्त्रीशब्दं वर्जयित्वा । हे श्रीः ।

प्राप्ता—नदीसंज्ञेति शेषः । अनयोरिति—व्यधिकरणबहुव्रीहिः । हे श्रीः !—अत्र 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वं न । एवम् हे भ्रूः ! इत्यपि ।

वाऽऽमि ॥५॥

पूर्वेण नित्यं प्रतिषेधे प्राप्ते आमि विकल्प्यते । पूर्वोक्तौ यू आमि वा नदीसंज्ञौ । श्रियाम्/श्रीणाम् ।

श्रीणाम्—नदीसंज्ञापक्षे 'ह्रस्वनद्यापो नुट्' इत्यनेन 'नुट्' तदभावे 'इयङ्' श्रियाम् ।

ङिति ह्रस्वश्च ॥६॥

दीर्घस्य विहिता न ह्रस्वस्य, इयङुवङ्स्थानयोश्च प्रतिषिद्धा । ङिति परतो ह्रस्वश्च य्वोः सम्बन्धी, स्त्र्याख्यौ इयङुवङ्स्थानौ च यू वा नदीसंज्ञौ । कृत्यै/कृतये । श्रियै/श्रिये ।

प्रतिषिद्धा—नदी संज्ञा ङिति वा विधीयत इति शेषः । सम्बन्धी—सवर्ण इत्यर्थः । कृत्यै, श्रियै—उभयत्र नदीसंज्ञापक्षे 'आण्नद्याः' इत्याट् ।

शेषो घ्यसखि ॥७॥

ह्रस्वमिवर्णोवर्णान्तं यत्र स्त्र्याख्यं, स्त्र्याख्यं यन्न नदीसंज्ञं स शेषः, सखिवर्जं घिसंज्ञः । अग्नये । धेनवे ।

कः शेषः ? तदाह–ह्रस्वमित्यादि। अग्नये–घिसंज्ञकत्वात् 'घेर्ङिति' इति गुणः।

पतिः समास एव ॥८॥

घिसंज्ञः। भूपतिना। एवकार इष्टतोऽवधारणार्थः। दृढमुष्टिना।

इष्टतोऽवधारणार्थः–समासशब्दादनन्तरं प्रयुज्यमान एवकारः, अतः समासे एव पतिशब्दस्य घिसंज्ञा नियम्यते नतु पतिरेव समासे इति विपरीत-नियमः। अतः 'दृढमुष्टि' इत्यस्यापि घिसंज्ञा भवति।

षष्ठीयुक्तश्छन्दसि वा ॥९॥

कुलुञ्चानां पतये नमः। पक्षे पत्ये।

असमासे अप्राप्ता 'घि' संज्ञा षष्ठयन्तेन युक्तस्य पतिशब्दस्य छन्दसि विकल्पेन भवति।

ह्रस्वं लघु ॥१०॥

भेत्ता। प्रदेशाः पुगन्त'·····' इत्यादय।

एकमात्रिकस्य 'ह्रस्व' संज्ञा पूर्वं कृता, तस्यानेन 'लघु' संज्ञा क्रियते। भेत्ता–√भिद्+ता 'पुगन्तलघूपधस्य च' इति गुणः।

संयोगे गुरु ॥११॥

कुण्डा। प्रदेशाः 'गुरोश्च हलः' इत्येवमादयः।

संयोगे परतो ह्रस्वमक्षरं गुरुसंज्ञं भवति। कुण्डा–√कुण्ड+अ 'गुरोश्च हलः 'इत्यनेन' ततष्टाप्।

दीर्घं च ॥१२॥

ईहामास।

दीर्घमक्षरं गुरुसंज्ञम्। ईहामास–'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेन 'आम्' प्रत्ययः।

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥१३॥

धातोर्वा प्रातिपदिकाद्वा, यस्मात् प्रत्ययो विधीयते तदादि

शब्दरूपं प्रत्यये परतोऽङ्गसंज्ञम् । कर्त्ता । प्रत्ययग्रहणं किम् ? न्यविशत । नेर्विशः' इत्युपसर्गाद् विधिरस्ति, तदादेः 'अङ्ग' संज्ञा स्यात् । विधिग्रहणात् प्रत्ययपरत्वमात्रे न भवति, स्त्री इयती 'यस्येति च' इति लोपो न स्यात् ।

❀(वा०) तदादिवचनं स्यादिनुमर्थम् । करिष्यावः । बनानि ।

प्रत्यये किम् ? श्र्यर्थम् । अत्र 'इयङ्' स्यात् ।

तदादि–स प्रकृतिरूपो धातुः, प्रातिपदिकं वा आदिर्यस्य तत् । कर्त्ता–अत्र √कृ धातोः तृच् प्रत्ययः अङ्गसंज्ञायाः फलं 'सार्वधातुकार्धधातुकयोः' इति गुणः । प्रातिपदिकस्योदाहरणम् औपगवः–उपगु प्रातिपदिकात् अण् प्रत्ययः । अत्रापि 'ओर्गुणः' इत्यनेन गुणः । न्यविशत–'नि√'विश' इत्यस्याङ्गसंज्ञायां ततः पूर्वः 'अट्' स्यात् । स्त्री इयती–इयती परतः स्त्री शब्दस्याङ्गसंज्ञायां 'यस्येति च' इति लोपः स्यात् । स्यादिनुम्–सविकरणस्य = स्य–शप्–नुम्–सहितस्याङ्गसंज्ञार्थं तदादिग्रहणम् । तेन करिष्यावः इत्यत्र 'अतो दीर्घो यञि' इत्यनेन दीर्घः, बनानि इत्यत्र 'सुपि च' इत्यनेन दीर्घः सिद्धचति । श्र्यर्थम्–श्रियै इदम् इति विग्रहे समासे, विभक्तिलोपे तस्मिन् लुप्तविभक्तिरूपे प्रत्यये परतोऽङ्गसंज्ञायां 'श्री' इत्यस्यैकारस्य 'इयङ्' आदेश. स्यादित्यर्थः । अत्र 'प्रत्यय' पदं विहितप्रत्ययपरमिति भावः ।

सुप्तिङन्तं पदम् ॥१४॥

अत्रान्तग्रहणम् अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिवारणार्थम् । गौरी ब्राह्मणितरा । अन्यथा 'घरूप'···इत्यनेन 'गौरी' इत्यस्य ह्रस्वः स्यात् ।

सुप्, तिङ् इति प्रत्याहारग्रहणम् । सुबन्तं तिङन्तञ्च शब्दस्वरूपं पदं भवति । उदाहरणम् ब्राह्मणाः–अत्र सुबन्तस्य पदत्वे 'ससजुषोः रुः' इत्यनेन रुत्वं, तेन रकारस्य विसर्गो भवति । पचन्ति–अत्र तिङन्तस्य पदत्वे 'तिङ्ङतिङः' इति निघातः ।गौरी–तरप् प्रत्ययस्य 'घ' संज्ञा भवति नतु तरबन्तस्य । तेन तरबन्ते परतः ह्रस्वो न भवति ।

नः क्ये ॥१५॥

क्यच्–क्यष्–क्यङ्सु नान्तं पदसंज्ञम् । राजीयति ।

क्य' इति सामान्यपदेन क्यजादीनां त्रयाणां ग्रहणम् । राजीयति–राजन् + क्यच् । क्यष्– क्यङोः उदाहरणे–वर्मायति । राजायते । सर्वत्र पद-संज्ञया 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नकारस्य लोपः ।

सिति च ॥१६॥

'यचि भम्' इत्यस्य पुरस्तादपवादः । भवदीयः । 'झलां जशोऽन्ते' इति दकारः ।

सिति परतः पूर्वं पदसंज्ञं भवति । भवदीयः–भवत् + छस्, छकारस्य 'ईय' आदेशः । दकारः–पदान्ते स भवति ।

स्वादिष्वसर्वनामस्थाने । १७॥

सुशब्दादेकवचनादारभ्य आ कपः प्रत्ययाः । तेषु सर्वनामस्थानवर्जितेषु परतः पूर्वम् पदसंज्ञम् भवति । राजभ्याम् । राजत्वम् ।

अत्र प्रथमैकवचनादेव आरम्भो भवति' 'असर्वनामस्थाने' इति निषेधात् । आ कपः–आदिग्रहणेन न 'सुप्' पर्यन्ताः प्रत्ययाः अपि तु 'कप्' पर्यन्ताः गृह्यन्ते । राजभ्याम्, राजत्वम्–पदत्वात् नलोपः ।

यचि भम् ॥१८॥

यकारादजादौ पूर्वोक्ते 'भ' संज्ञा । गार्ग्यः । दाक्षिः ।

पूर्वोक्ते–स्वादिषु सर्वनामस्थानवर्जितेषु । गार्ग्यः–गर्ग + यञ् (यकारादिः) दाक्षिः–दक्ष + इञ् (अजादिः) । भसंज्ञायां 'यस्येति च' इत्यकारलोपः ।

तसौ मत्वर्थे ॥१९॥

तदन्तविधिः । भसंज्ञौ । विद्युत्वान् । पयस्वी ।

तकारान्तः, सकारान्तश्चोभौ भसंज्ञौ । मत्वर्थ–मतोः अर्थे मतुप्–विनि इति परतः । उभयोरुदाहरणे क्रमशः विद्युत्वान्–भसंज्ञया पदत्वाभावान्न जश्त्वम् । पयस्वी–अत्र भसंज्ञया ससजुषोः रुः' इति रुत्वं न ।

अयस्मयादीनिच्छन्दसि ॥२०॥

एतानि छन्दसि भसंज्ञासाधूनि । भपदसंज्ञाधिकारात्तेन मुखेन

साधुत्वम् । अयस्मयं वर्म । स सुष्टुभा सऋक्वता गणेन । पद-त्वात्कुत्वं, भत्वाज्जश्त्वं न ।

अयस्मयम्–छन्दसि मयट् प्रत्ययः, भसंज्ञया सकारस्य रुत्वं न । स...... ऋक्वता–अत्र भ–पद संज्ञे उभेऽपि भवतः ।

बहुषु बहुवचनम् ॥२१॥

सामान्येन बहुवचनं विहितम्, तस्यानेन बहुत्वसंख्यावाच्यत्वेन विधीयते । बहुषु बहुवचनम्, बहुत्वमस्य वाच्यं भवतीत्यर्थः । द्विजाः पठन्ति ।

विध्यर्थमेतत्सूत्रम् । 'बहुषु' इति भावप्रधानो निर्देशः । विभक्तीनां कर्मादयो येऽर्थाः वाच्याः, तेषां बहुत्वे बहुवचनम् । सूत्रे 'बहुषु' इत्यत्र बहुवचन-निर्देशः संख्यावाचिनं बहुशब्दं ज्ञापयति, न तु वैपुल्यवाचिनम् । तेन बहुः सूपः इत्यत्र न भवति ।

यदि 'पञ्चकं प्रातिपदिकार्थः' इति मतं स्वीकृत्य संख्याऽपि तत्रान्तर्भूता मन्यते तर्हि नियमार्थमेतत्, बहुषु बहुवचनम्; बहुष्वेव बहुवचनं वेति भाष्ये प्रपञ्चितम् । ब्राह्मणेषु बहुषु, 'पठन्ति' इत्यत्र च क्रियायाः बहुत्वे बहुवचनं बोध्यम् ।

द्व्येकयोर्द्विवचनैकवचने ॥२२॥

द्विजौ । द्विजः ।

द्वित्वे द्विवचनम्, एकत्वे एकवचनं भवति । द्वि–एक इत्युभयत्रापि भावप्रधानो निर्देशो बोध्यः । द्विजौ पठतः । द्विजः पठति इत्युदाहरणे क्रमशः द्विवचनस्य, एकवचनस्य च स्तः ।

कारके ॥२३॥

यदित ऊर्ध्वमनुक्रमिष्यामः, 'कारके' इत्येवं तद्वेद्यम् । कारकं–निमित्तम्=हेतुरिति यावत् । कस्य ? क्रियायाः । ग्रामादागच्छति इत्यादि ।

'कारके' इति निर्धारणे सप्तमी । बहुवचने प्राप्ते एकवचनम् । अधिकारसूत्रमिदम् । अत्र कारकशब्दो निमित्तपर्यायः, तेन क्रियायाः निमित्तं–हेतुः कारकं सत् अपादानादिविशेषसंज्ञं भवतीत्यर्थः । ग्रामात्

आगच्छति–ग्रामस्य ध्रुवस्यागमनक्रियां प्रति निमित्तत्वात् कारकत्वम्। यदि ग्रामोऽवधिभावेन नावतिष्ठेत, तत आगमनं न निष्पद्येत; ततो ग्रामः कारकम् ध्रुवत्वात् अपादानम् च।

ध्रुवमपायेऽपादानम् ॥२४॥

सार्थाद्धीनः।

अपायः–विश्लेषः = विभाग इत्यर्थः। अपायश्च द्विष्ठः। ध्रुव–शब्दोऽपायसंश्लेषात् अवधिभावमाचष्टे, तेन अपाये साध्ये यदवधिभूतं तत्कारकमपादानसंज्ञं भवति। सार्थात् हीनः, रथात् पतितः, ग्रामात् आगच्छति इत्युदाहरणानि।

*(वा०) जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्। अधर्माज्जुगुप्सते। अधर्माद्विरमति। धर्मात्प्रमाद्यति।

भीत्रार्थानां भयहेतुः ॥२५॥

चौरेभ्यो बिभेति। चौरेभ्यस्त्रायते।

√भी–भयार्थको धातुः, √त्रा–त्राणार्थको धातुः। तयोः, तदर्थकानाञ्च प्रयोगे भयहेतुः–यस्माद् भयं तत्कारकमपादानसंज्ञम्। क्रमशः उदाहरणे बोध्ये। अर्थग्रहणात् चौरेभ्य उद्विजते। चौरेभ्यो रक्षति।

पराजेरसोढः ॥२६॥

पराजेः प्रयोगे सोढुमशक्यो यः सोऽपादानम्। पाठात्पराजयते।

पराजेः–'परा' उपसर्गपूर्वको √जि धातुः पराजयार्थकस्तस्य प्रयोगे। सोढुमशक्यः–योऽभिभवितुं न शक्यते सः। अत्रोदाहरणे पाठं न पारयतीत्यर्थः। 'विपराभ्यां जेः' इत्यात्मनेपदम्।

वारणार्थानामीप्सितः ॥२७॥

प्रवृत्तिविघातो वारणम्। यवेभ्यो गां वारयति।

वारणार्थानां धातूनां प्रयोगे य ईप्सितोऽर्थं, तत्कारकमपादानम्। उदाहरणे यवाः स्वकीयाः, गौश्च परकीया। ईप्सितशब्दोऽभिप्रेतार्थकः। अतो यवस्यापादानत्वम्। गौस्तु वारणार्थकधातोरीप्सिततमः अतः कर्मत्वेन द्वितीया।

अन्तर्द्धौ येनादर्शनमिच्छति ॥२८॥

व्यवधानमर्न्तार्द्धिः । तन्निमित्तं येनादर्शनमिच्छति, तत्कारकम् अपादानम् । गुरोर्निलीयते ।

अन्तर्द्धौ–निमित्तसप्तमी । येन–कर्तरि तृतीया । गुरोर्निलीयते–(शिष्यः) गुरुणा कर्त्रा आत्मनः कर्मभूतस्यादर्शनम् इच्छति । गुरुर्मां मा द्राक्षीत् इति निलीयते ।

आख्यातोपयोगे ॥२९॥

आख्याता गुरुः, उपयोगो विद्याग्रहणम् । गुरोरधीते ।

उपयोगे आख्याता = तत्कारकमपादानम् । विद्याग्रहणम्–नियमपूर्वकमिति शेषः ।

जनिकर्तुः प्रकृतिः ॥३०॥

शृङ्गाच्छरो जायते ।

जनेः–जन्मनः कर्ता तस्य या प्रकृतिः–कारणम्, तत्कारकमपादानम् । उदाहरणे सरसः कारणम् शृङ्गं, तस्यापादानसंज्ञा ।

भुवः प्रभवः ॥३१॥

भवनं भूः । भूकर्तुः प्रभवो यस्तदपादानम् । हिमवतो गंगा प्रभवति । प्रथमत उपलभ्यते इत्यर्थः ।

प्रभवः–प्रभवत्यस्मादिति । प्रथमत उपलभ्यते–न हिमवान् गंगायाः प्रकृतिः, हिमवति प्रथममेवास्याः उपलम्भः–प्रकाशः भवति ।

कर्मणा यमभिप्रैति स सम्प्रदानम् ॥३२॥

कर्मणा करणभूतेन कर्ता यमर्थमभिप्रैति-अन्वर्थसंज्ञा।विज्ञान - यस्मै कर्मणे ददाति स सम्प्रदानम् । विप्राय गां ददाति ।

(वा०) क्रिययाऽपीति ज्ञेयम् । युद्धाय सन्नह्यते ।

अन्वर्थसंज्ञा–सम्यक् प्रकर्षेण दीयते यस्मै तत्सम्प्रदानम् । अभिप्रैति–ईप्सति । अतएव 'ददाति' क्रियया गोः कर्मत्वम् । अन्तर्भूतयाऽभिप्रायण–

क्रियया तस्य करणत्वं भवति। युद्धाय सन्नह्यते–युद्धविषयकं निश्चयं करोतीत्यर्थ।

रुच्यर्थानां प्रीयमाणः ॥३३॥

रुच्यर्थानां प्रीयमाणो योऽर्थः स सम्प्रदानम्। चैत्राय रोचते मोदकः।

अन्यकर्तृकोऽभिलाषो रुचिः। रुचिना धातुना समानार्थाः रुच्यर्थाः (मध्यमपदलोपी समासः) प्रीयमाणः–√प्री कर्मणि लस्य शानच्, यः प्रसन्नः क्रियते सः। चैत्राय रोचते मोदकः–अत्र प्रीयमाणादन्यो मोदकः कर्त्ता।

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ॥३४॥

ज्ञपयितुमिष्यमाणः ज्ञीप्स्यमानः–बोधयितुमभिप्रेतः। देवदत्ताय श्लाघते–देवदत्तं श्लाघमानस्तां श्लाघां तमेव ज्ञपयितुमिच्छतीत्यर्थः इत्यादि।

√श्लाघ–√ह्नुङ्–√स्था–√शप इत्येतेषां ज्ञीप्स्यमानो योऽर्थः–तत्कारकं सम्प्रदान संज्ञं भवति। ज्ञीप्स्यमानः–√ज्ञा + णिच् + सन् + कर्मणि लस्य शानच्। देवदत्तम्......इत्यर्थः–श्लाघा = स्तुतिः प्रत्यक्षेण देवदत्तं स्तौतीत्यर्थः। एवं देवदत्ताय ह्नुते = अपलपति। यज्ञदत्ताय तिष्ठते–प्रकाशयत्यात्मानम् 'प्रकाशनस्थेयाख्ययोश्च' इत्यात्मनेपदम्। देवदत्ताय शपते–शपथेन किञ्चित्प्रकाशयतीत्यर्थः।

धारेरुत्तमर्णः ॥३५॥

धारयतेः प्रयोगे उत्तमर्णो योऽर्थः स सम्प्रदानम्। चैत्राय शतं धारयति।

उत्तमम् ऋणं यस्य स उत्तमर्णः। यदीयं धनं तस्योत्तमम् ऋणम् धनस्वामीत्यर्थः। अथवा ऋणे उत्तमः उत्तमर्णः निपातनात् सिद्धम्।

धारयति–शतं ध्रियते अन्यस्तत् प्रयुङ्क्ते इति √धृङ् + णिच्। अत्र चैत्र उत्तमर्णः–धनस्वामी = प्रयोक्ता विद्यते।

स्पृहेरीप्सितः ॥३६॥

स्पृहयतेः प्रयोगे ईप्सितो योऽर्थः स सम्प्रदानम्। पुष्पेभ्यः स्पृहयति।

√स्पृह ईप्सायां चुरादिः, तस्य ईप्सितः। ईप्सिततमत्वविवक्षायां तु पुष्पाणि स्पृहयति। परत्वात्कर्मसंज्ञा।

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥३७॥

अमर्षः क्रोधः। अपकारः द्रोहः। अक्षमः ईर्ष्या। गुणेषु दोषाविष्करणमसूया। एषां तदर्थानाम् च प्रयोगे यं प्रति कोपस्तत्कारकं सम्प्रदानम्। द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते, तस्मात्सामान्येन विशेषणम् यं प्रति कोप इति। चैत्राय क्रुद्ध्यति।

दोषाविष्करणम्–दम्भादिदोषकथनम्। क्रोधः कोप एव, तदितरे कोपप्रभवाः भवन्ति। चैत्राय द्रुह्यति, ईर्ष्यति, असूयति वेत्युदाहरणान्तराणि।

क्रुधद्रुहोरुपसृष्टयोः कर्म ॥३८॥

क्रुधद्रुहोः–सोपसर्गयोस्तु प्रयोगे यं प्रतिकोपस्तत्कारकं कर्मसंज्ञम्। चैत्रमभिक्रुद्ध्यति।

उपसृष्टयोः–उपसृजन्ति=संबध्नन्ति इति उपसर्गाः (उप √सृज्+अच्) तेन उपसर्गसम्बद्धयोः=सोपसर्गयोरित्यर्थो भवति। चैत्रमभिद्रुह्यति च।

राधीक्ष्योर्यस्य विप्रश्नः ॥३९॥

एतयोः कारकं प्रागुक्तं सम्प्रदानम् स्यात्। कीदृशम् ? यस्य विप्रश्नः। यस्य शुभाशुभं पृच्छ्यत इत्यर्थः। चैत्राय राध्यति, ईक्षते वा। पृष्टो नैमित्तिकश्चैत्रस्य दैवम् पर्यालोचयतीत्यर्थः।

एतयोः–√राध–√ईक्ष धात्वोः। विप्रश्नः–विविधः प्रश्नः।

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता ॥४०॥

आभ्यां परस्य शृणोतेः पूर्वस्याः क्रियायाः प्रवर्त्तकः कर्त्ता सम्प्रदानम् स्यात्। देवदत्ताय गां प्रतिशृणोति=प्रतिजानीत इत्यर्थः।

आभ्याम्–प्रति–आङ्, उपसर्गाभ्याम्। प्रति–आङ् वा पूर्वस्य √श्रु धातोः अभ्युपगमः–प्रतिज्ञानमर्थः। प्रतिज्ञानञ्च परेण कर्त्रा प्रयुक्तस्य

भवति । स प्रवर्त्तनः = प्रयोक्ता सम्प्रदानमित्यर्थः । **देवदत्ताय गाम् आश्रृणोति च ।** देवदत्तेन मह्यं गां देहीति याचितः स यदा ददामीति प्रतिजानीते तदेदमुदाहरणम् । देवदत्तोऽत्र √याच् धातोः कर्ता ।

अनुप्रतिगृणश्च ॥४१॥

एतत्पूर्वस्य गृणातेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं तथा । अनुगृणाति होत्रे । शंसन्तं तं प्रोत्साहयति ।

एतत्–अनु–प्रति । 'पूर्वस्य कर्त्ता' इत्यनुवर्तते अनु√गॄ, प्रति √गॄ च शंसितुः प्रोत्साहनार्थकौ । होता प्रथमं शंसति तम् अन्यः प्रोत्साहयति । प्रतिगृणाति होत्रे ।

साधकतमं करणम् ॥४२॥

क्रियासिद्धौ प्रकृष्टोपकारकं कारकं सत् करणसंज्ञं स्यात् । दात्रेण लुनाति ।

साधकतमम्–क्रियायाः सिद्धौ बहूनि साधनान्यपेक्ष्यन्ते । तेषां मध्ये प्रकृष्टं यत् साधकम् = उपकारकं विवक्षितम् इति शेषः । दात्रेण लुनाति–अत्र दात्रस्य छेद्यद्रव्यानुप्रवेशव्यापारेण लवनक्रियायाः सिद्धिः । तदुक्तम्—

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥

तमब्ग्रहणं ज्ञापयति–इह कारकाधिकारे इतोऽन्यत्र विना तमग्ब्रहणेन प्रकर्षो नाश्रीयते, तेन 'गंगायां घोषः' इत्यत्र गौणेऽप्यधिकरणे सप्तमी सिद्धयति ।

दिवः कर्म च ॥४३॥

दिवः साधकतमं कर्म, चात्करणम् । अक्षान्/अक्षैर्वा दीव्यति ।

करणसंज्ञा पूर्वेण प्राप्ता, पक्षे कर्मसंज्ञा विधीयते ।

परिक्रयणे सम्प्रदानमन्यतरस्याम् ॥४४॥

परिक्रयणे = वेतनादिना स्वीकरणे साधकतमं वा सम्प्रदानम् । शतेन/शताय वा परिक्रीतः ।

पूर्वेण करण संज्ञा प्राप्ता पक्षे सम्प्रदान संज्ञा विधीयते। वेतनादिना—वेतनं = भृतिः नियतकालमेव भवति नात्यन्तिकम्। आदिशब्देन बन्धकादीनां ग्रहणम्।

आधारोऽधिकरणम् ॥४५॥

कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणक्रियाम् प्रति य आधारः तत्कारकम् अधिकरणसंज्ञम्। कटे शेते। स्थाल्यामोदनं पचति।

आध्रियन्तेऽस्मिन् क्रियागुणा इत्याधारः। कटे शेते—कर्तृस्था शयनक्रियाऽत्र कटे आध्रियते। स्थाल्याम्....पचति—कर्मस्था क्रियाऽत्र स्थाल्यामाध्रियते विक्लेदनक्रियायाः कर्मस्थत्वात्। तेनोभयोः कटस्थाल्योरधिकरण संज्ञा।

अधिशीङ्स्थासां कर्म ॥४६॥

अधिपूर्वाणामेषामाधारः कर्मसंज्ञं भवति। ग्राममधिशेते इत्यादि।

एषाम्—√शीङ्—√स्था—√आस् इति धातूनाम्। 'अधिकरण' संज्ञा पूर्वेण प्राप्ता कर्म संज्ञा विधीयते। ग्राममधितिष्ठति। ग्राममध्यास्ते इति चोदाहरणे। कर्मणि द्वितीया भवति।

अभिनिविशश्च ॥४७॥

ग्राममभिनिविशते। क्वचिन्न, पूर्वेणान्यतरस्यामित्यनुवृत्तेः। धर्मेऽभिनिवेशः।

अभि—नि पूर्वस्य विशतेराधारः कर्मसंज्ञम्। अभि—नि इति समुदायस्यात्र ग्रहणम्। 'परिक्रयणे संम्प्रदानमन्यतरस्याम्' इत्यतो 'अन्यतरस्याम्' इत्यस्य मण्डूकप्लुतानुवृत्तिः, सा च व्यवस्थितविभाषा, तेन धर्मेऽभिनिवेशः इत्यत्र सप्तम्येव।

उपान्वध्याङ्वसः ॥४८॥

एतत्पूर्वस्य वसतेरलुग्विकरणस्याधारः कर्मसंज्ञम्। वनमुपवसति इत्यादि।

*(वा०) अभोजनार्थस्य निषेधः। वने उपवसति।

एतत्–उप–अनु–अधि–आङ् इति । अलुग्विकरणस्य–√वस निवासे इत्यस्य भौवादिकस्य, न तु√वस आच्छादने इत्यस्यादादिकस्य ग्रहणम् । 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमि'ति परिभाषाबलादिति शेषः । वनमनुवसति । वनमधिवसति । वनमावसति इत्युदाहरणान्तराणि । **वने उपवसति**–भोजननिवृत्तिं करोतीत्यर्थः ।

कर्तुरीप्सिततमं कर्म ॥४९॥

कर्तुः क्रियया यदाप्तुमिष्टतमं तत्कर्म । ग्रामं गच्छति । कर्तुः किम् ? माषेष्वश्वं बध्नाति । माषाः कर्मणः ईप्सिताः कर्तुर्न ।

कर्तुः–क्रियायाः सम्बन्धेन शेषे षष्ठी । कर्तुः क्रियापेक्षत्वात् कर्तृ-सम्बन्धिनी क्रिया उपस्थिता भवति । **ईप्सितम्**–आप्तुम् इष्टम् ततः अति-शयार्थे तमप् । **कर्मणः**–अश्वस्य, अश्वो हि भक्षणक्रियया माषानाप्तु-मिच्छति ।

तथायुक्तं चानीप्सितम् ॥५०॥

विषं भुङ्क्ते ।

यथा कर्तुरीप्सिततमं क्रियया युज्यते, तथैव चेद् यदनीप्सितं युक्तं भवति, तस्य कर्मसंज्ञा विधीयते । ईप्सितादन्यत्सर्वमनीप्सितम् द्विविधम् । (१) **प्रतिकूलम्**–विषं भुङ्क्ते । (२) **अप्रतिकूलम्**–ग्रामं गच्छन् तृणं स्पृशति ।

अकथितं च ॥५१॥

अकथितं यत्कारकं तत्कर्मसंज्ञम् । केन ? अपादानादि विशेष-कथाभिः । परिगणनं कार्यम्, दुह्याच्यर्थेत्येवमादयस्तथा—

दुहि–याचि–रुधि–प्रच्छि–भिक्षि–चिञामुपयोगनिमित्तमपूर्वविधौ ।
ब्रुवि–शासि–गुणेन च यत्सचते तदकीर्तितमाचरितं कविना ॥

उपयुज्यत इत्युपयोगः पयः प्रभृति, तस्य गवादि निमित्तम् । तस्य गवादेः कर्मसंज्ञा विधीयते । पाणिना स्थाल्यां दोग्धि पयः । पाण्यादिकमप्युप-योगनिमित्तम् तस्य कुतो न ? नैतत्, विहिता तत्र करण संज्ञा । तदर्थमाह–अपूर्वेति, ब्रुविशास्योर्गुणः साधनं प्रधानं कर्म धर्मादिकम् तेन यत्सम्बध्यते । तदकथितमुक्तं सूत्रकारेण । गां दोग्धि पयः इत्यादि ।

केन–कारकत्वे सति अपादानादिविशेषेण । **परिगणनम्**–अन्यधातु-व्यवच्छेदार्थम् । **अपूर्वविधौ**–यस्यान्यो विधिर्नोक्तस्तस्य कर्मसंज्ञा ।

कविना-सूत्रकारेण । उदाहरणानि-√दुह् धातोरुक्तम् । √याच्-पौरवं गां याचते । √रुध्-गाम् अवरुणद्धि व्रजम् । √प्रच्छि-माणवकं पन्थानम् पृच्छति । √भिक्षि-पौरवं गां भिक्षते । √चिञ्-वृक्षम् अवचिनोति फलानि । √ब्रू-माणवकं धर्मं ब्रूते । √शास्-माणवकं धर्मम् अनुशास्ति ।

अत्र श्लोके चकारेणानुक्तानां केषाञ्चित् द्विकर्मकधातूनां समुच्चयः क्रियते । ते सन्ति-√पच्-दण्ड√जि-√मथ-√मुष-√नी-√हृ-√कृष-√वह इति । तेषामुदाहरणानि क्रमशः-तण्डुलान् ओदनं पचति । गर्गान् शतं दण्डयति । देवदत्तं शतं जयति । सुधां क्षीरनिधिं मथ्नाति । देवदत्तं शतं मुष्णाति । अजां ग्रामं नयति । भारं ग्रामं हरति । अजां ग्रामं कर्षति । भारं ग्रामं वहति इति ।

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ ॥५२॥

गमयति माणवकं ग्रामम् इत्यादि ।

'अर्थ' शब्दः प्रत्येकमभिसम्बध्यते । गत्यर्थानां, बुद्ध्यर्थानां, प्रत्यवसानार्थानां तथा शब्दकर्मणाम्, अकर्मकाणाञ्च धातूनाम् अण्यन्तानां यः कर्ता स ण्यन्तानां कर्मसंज्ञो भवति । गत्यर्थस्य√गम् धातोरुदाहरणम्-अण्यन्तस्य 'गच्छति' इत्यस्य कर्ता माणवकः (माणवकः गच्छति) तस्यैव ण्यन्तस्य णिच् प्रत्ययान्तस्य 'गमयति' इत्यस्य कर्म । बुद्ध्यर्थस्य-गुरुः छात्रं वेदार्थं बोधयति । प्रत्यवसानम् = भक्षणम् । तदर्थकस्य-विष्णुर्देवान् अमृतमाशयति । शब्दकर्मणः- गुरुः शिष्यान् वेदम् पाठयति । अकर्मकस्य- विष्णुः जले पृथ्वीमासयति ।

❀ वार्तिकानि) १-नी-वह धात्वोः प्रतिषेधः । नाययति, वाहयति वा भारं देवदत्तेन ।

२-आदिखाद्योर्न-आदयति, खादयति वा माणवकेनौदनम् ।

३-भक्षेरहिंसार्थस्य न-भक्षयति पिण्डीं देवदत्तेन । सर्वत्र कर्तरि तृतीया ।

हृक्रोरन्यतरस्याम् ॥५३॥

हारयति भारं चैत्रं/चैत्रेण वा ।

'अणि कर्त्ता स णौ' इत्यनुवर्तते । √हृ-√कृ इति धात्वोरण्यन्तयोर्यः कर्त्ता स ण्यन्तयोर्वा कर्मसंज्ञः । हारयति भारं माणवकं/माणवकेन वा । कारयति कटं देवदत्तं/देवदत्तेन वा ।

❀(वा०) अभिवादिदृशोरात्मनेपद उपसंख्यानम्। अभिवादयते गुरुं देवदत्तं/देवदत्तेन वा। दर्शयते राजानं भृत्यं/भृत्येन वा।

स्वतन्त्रः कर्त्ता ॥५४॥

चैत्रः पचति।

स्व आत्मा तन्त्रं प्रधानमस्य स स्वतन्त्रः। यः क्रियासिद्धौ स्वातन्त्र्येण विवक्षितः स कर्ता। स्थाली पचति इति चोदाहरणम्। अत्र स्थाली प्रधानत्वेन विवक्ष्यते।

तत्प्रयोजको हेतुश्च ॥५५॥

तस्य प्रयोजको योऽर्थः स हेतुसंज्ञः। कुर्वाणं प्रयुङ्क्ते कारयति।

'तत्' पदेन कर्ता परामृश्यते। प्रयोजकः—प्रेरकः = उपदेशकः इति यावत्। हेतुसंज्ञः—चकारात् कर्तृसंज्ञश्च। प्रयुङ्क्ते—प्रयोजकव्यापारे 'हेतुमति च' इत्यनेन 'णिच्' भवति, कर्तृत्वाच्च कर्तरि लकारो भवति।

प्राग्रीश्वरान्निपाताः ॥५६॥

'अधिरीश्वरे' इति वक्ष्यति। इत ऊर्ध्वं याननुक्रमिष्यामस्ते निपातसंज्ञा वेदितव्याः। वक्ष्यति 'चादयोऽसत्त्वे' च, वा, ह, अह।

प्राग्वचनं गत्युपसर्गसंज्ञाभिः सह 'निपात' संज्ञा समावेशार्थम्। रीश्वरशब्दस्यार्थो रकारसहित ईश्वरस्तेन 'ईश्वरे तोसुन्कसुनौ' इत्यवधिर्न गृह्यते। अपि तु 'अधिरीश्वरे' इत्यवधिर्गृह्यते।

चादयोऽसत्त्वे ॥५७॥

च, वा....पशु इत्यादि। असत्त्वे किम्? पशुः पुरुषः।

सत्त्वं—द्रव्यम्। तदतिरिक्तेऽर्थे वर्तमानाश्चादयो 'निपात' संज्ञाः स्युः। चादयः क्वचिद् वृत्ति-ग्रन्थे एकोनचत्वारिंशदधिकशतसंख्याकाः (१३९) क्वचिच्च चतुरशीत्यधिकशतमिताः (१८४) पठिताः। पशुः पुरुषः—पशु-शब्दोऽत्र पशुद्रव्यवाची। अद्रव्यार्थकस्तु लोधं नयन्ति पशु मन्यमाना इत्यत्र पशुशब्दः सम्यगर्थकः।

प्रादयः ॥५८॥

प्रादयोऽपि निपातसंज्ञाः ।

असत्त्वेऽर्थे प्रादयः प्र परा........उपान्ताः द्वाविंशतिर्गणे पठिताः । एषां 'निपात' संज्ञा भवति । पृथक्सूत्रमुत्तरार्थम् तेन चादीनामुपसर्गसंज्ञा न भवति ।

उपसर्गाः क्रियायोगे ॥५९॥

'प्रादयः' इत्यनुवर्तते । क्रियायोगे प्रादयः उपसर्गसंज्ञा भवन्ति । प्रणयति । प्रणायकः ।

क्रियया सह योगः क्रियायोगः । प्रणयति 'प्र'-शब्दस्योपसर्गत्वात् 'उपसर्गादसमासेऽपि णोपदेशस्य' इति णत्वम् । 'क्रियायोग' ग्रहणबलेन यं प्रति क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति नान्यं प्रति, तेन प्रगतो नायकोऽस्माद्देशादिति प्रनायको देशः इत्यत्र न णत्वम् । नात्र नयनक्रिया-युक्तः प्रशब्दोऽपि तु गमि-क्रियया ।

गतिश्च ॥६०॥

गतिसंज्ञकाश्च प्रादयो भवन्ति क्रियायोगे । प्रकृ॑त्य । प्रकृ॑तम् ।

'क्रियायोगे' इति वर्तते । योगविभाग उत्तरार्थः, गतिसंज्ञैव यथा स्यात् । चकारः 'उपसर्ग' संज्ञा समावेशार्थः, तेन प्रणीतम् इत्यत्र उपसर्गत्वात् णत्वम् । गतिसंज्ञया 'गतिरनन्तरः' इति प्रकृतिस्वरः आद्युदात्तः । प्रकृत्य-'कुगतिप्रादयः' इति समासः तेन 'क्त्वा' इत्यस्य 'ल्यप्' 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इत्यनेन । प्रकृतम्-'गतिरनन्तरः' इति प्रकृति-स्वरेणाद्युदात्तः प्रशब्दः ।

ऊर्यादिच्विडाचश्च ॥६१॥

ऊर्यादयः च्वि-डाच् इत्येवमन्ताश्च शब्दाः क्रियायोगे गति-संज्ञाः । ऊरीकृत्य इत्यादि ।

'क्रियायोगे' इत्यनुवृत्त्या तत्सामर्थ्यात् च्वि-डाच्-इत्येतदन्तस्यैव 'गति' संज्ञा, प्रत्ययमात्रस्य क्रियायोगाऽसम्भवात् । 'च्वि-डाच्' प्रत्यययोः √कृ √भू-√अस् इति धातु-योगे विधानात् तत्साहचर्येण ऊर्यादीनामपि तैरेव योगे गतिसंज्ञा विधीयते । ऊर्यादयः त्रयस्त्रिंशद् गणे पठिताः । ऊरीकृत्य-

'गति' संज्ञया समासेन 'क्त्वा' प्रत्ययस्य 'ल्यप्' आदेशः। च्व्यन्तस्य–शुक्ली-कृत्य। डाजन्तस्य–पटपटाकृत्य।

अनुकरणं चानितिपरम् ॥६२॥

खाट्कृत्य। अनितिपरं किम्? खाडिति कृत्वा निरष्ठीवत्।

इतिः परो यस्मात्तत् न इत्यनितिपरम्। क्रियायोगेऽनुकरणं गति-संज्ञम्। इति-परम् (अनुकरणम्) तु न। खाट्कृत्य–गतिसंज्ञया समासत्वेन क्त्वो ल्यप्। खाडिति कृत्वा–अत्रानुकरणस्येतिपरत्वेन न गति संज्ञा, तेन समासाभावान्न क्त्वो ल्यप्। पूर्णश्लोकस्त्वयम्—

चुम्बनसक्तः सोऽस्याः च्युतमूलं दशनमात्मनो वदने।
जिह्वामूलस्पृष्टं खाडिति कृत्वा निरष्ठीवत्॥ (कस्यचित्कवेः)

आदरानादरयोः सदसती ॥६३॥

सत्कृत्य। असत्कृत्य।

आदरानादरयोर्यथाक्रमं सत्-असत्-शब्दौ गतिसंज्ञौ स्तः। गति-संज्ञायाः फलं समासस्ततः क्त्वो ल्यप्।

भूषणेऽलम् ॥६४॥

'अलम्' भूषण-पर्याप्ति-शक्ति-वारणवाचकम्, ततो विशेषण-मुपादीयते। अलंकृत्य।

भूषणे योऽलं शब्दः स गतिसंज्ञो भवति। अलंकृत्य–गतित्वात्समासस्तेन क्त्वो ल्यप्।

अन्तरपरिग्रहे ॥६५॥

अन्तः शब्दोऽपरिग्रहे गतिसंज्ञः। अन्तर्हत्य। तत्किम्? अन्तर्हत्वा मूषिकां श्येनो गतः।

*(वा०) अन्तःशब्दस्याङ्किल्युट्विधिणत्वेषूपसर्गसंज्ञा वाच्या। अन्तर्द्धा। अन्तर्द्धिः। अन्तर्द्धानम्। अन्तर्णयति।

परिग्रहः–स्वीकारः। तदभावे गतिसंज्ञा। अन्तः शब्दो मध्येऽधिकरण-भूते, परिग्रहे च वर्त्तते। अतः मध्यार्थे गतिसंज्ञेति भावः। अन्तर्हत्य–क्त्वो ल्यप् मध्ये हत्वेत्यर्थः। अन्तर्हत्वा–हतं परिगृह्येत्यर्थः। अन्तर्द्धा–अन्तर्√धा

इत्यस्मात् 'आतश्चोपसर्गे' इत्यङ् । अन्तर्द्धिः-'उपसर्गे घोः किः' इत्यनेन 'कि' प्रत्ययः । अन्तर्द्धानम्-अन्तर् √धा + ल्युट् । वृत्तौ वार्तिके 'ल्युट्' न वर्तते । अन्तर्णयति-'उपसर्गादसमासेऽपि' इति णत्वम् ।

कणेमनसी श्रद्धाप्रतीघाते ॥६६॥

एतौ श्रद्धा-प्रतीघाते गतिसंज्ञौ । कणेहत्य पयः पिबति । तावत्पिबति यावदस्याभिलाषो निवृत्तः ।

'कणे' शब्दः सप्तम्यन्तप्रतिरूपको निपातः । स चेहाभिलाषातिशये वर्त्तमानो गृह्यते । तत्साहचर्यात् मनः-शब्दोऽप्यभिलाषवृत्तिरेव विज्ञेयः । **कणेहत्य-अतिशयेनाभिलाषं कृत्वा तन्निवृत्तिपर्यन्तम् । एवं मनोहत्य ।**

पुरोऽव्ययम् ॥६७॥

पुरः शब्दोऽव्ययम् गतिसंज्ञः । पुरस्कृत्य । अव्ययं किम् ? पूः, पुरौ, पुरः कृत्वा कांडं गतः ।

पुरस्कृत्य-अत्र पुरः शब्दः (पूर्व + असि पूर्वस्य पुर् आदेशः) 'तद्धितश्चासर्व विभक्तिः' इत्यनेनाव्ययम् । पुरः कृत्वा-इदं प्रत्युदाहरणम् । पूः-पुरौ-इत्यनयोरुल्लेखस्तस्यानव्ययत्वप्रदर्शनार्थं इति ।

अस्तं च ॥६८॥

'अव्ययम्' इति वर्तते । अस्तंगत्य सविता पुनरुदेति ।

अस्तमिति सकारान्तमव्ययमदर्शनार्थकम् । स गतिसंज्ञः । अस्तंगत्य-गतित्वात्समासे क्त्वो ल्यप् ।

अच्छ गत्यर्थवदेषु ॥६९॥

'अच्छ' शब्दोऽभिशब्दार्थेऽव्ययम् । अच्छगत्य । अच्छोद्य ।

अच्छशब्दो गत्यर्थकधातुषु √वद् धातौ च परतो गतिसंज्ञकः । अभि = आभिमुख्यम् अच्छोद्य-क्त्वो ल्यप् 'वचिस्वपियजादीनाम्.....' इति वकारस्य सम्प्रसारणमुकारो गुणैकादेशः ।

अदोऽनुपदेशे ॥७०॥

त्यदादिरदस् शब्दोऽनुपदेशे गतिसंज्ञः । उपदेशः परार्थः

प्रयोगः। स्वयमेव तु यदा बुद्धया परामृशति तदा नास्त्युपदेशः। अदःकृत्य। यददः करोति।

नास्त्युपदेशः–तस्मिन्ननुपदेशे इदं प्रवर्तते। अदः कृत्य-एतत्कर्त्तव्यमिति स्वयमालोक्येत्यर्थ। यददः करोति–'निपातैर्यद्यदि.....' इत्यादिना 'तिङ्ङतिङः' इति प्राप्तनिघातस्य प्रतिषेधे पित्त्वादनुदात्तत्वम्। उपदेशे तु अदःकृत्वा–एतत्कृत्वेत्यर्थ।

तिरोऽन्तर्द्धौ ॥७१॥

तिरोभूय।

अन्तर्द्धिः-व्यवधानम् तत्रार्थे तिरः शब्दो गतिसंज्ञः। तिरोभूय-समासकृत्स्वरौ प्रयोजनम्।

विभाषा कृञि ॥७२॥

तिर कृत्य/तिरस्कृत्य। तिरः कृत्वा/तिरस्कृत्वा। 'तिरसोऽन्यतरस्याम्' इति विसर्गस्य वा सत्वम्।

'अन्तर्द्धौ' इति वर्तते। तत्रार्थे 'तिरः' शब्दः करोतौ परतः वा गतिसंज्ञः।

उपाजेऽन्वाजे ॥७३॥

एतौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते। तौ कृञि विभाषा गतिसंज्ञौ। उपाजेकृत्य/उपाजेकृत्वा।

'विभाषा कृञि' इत्यनुवर्तते 'ते प्राग्धातोः' इत्यतः प्राक्। निपातौ–विभक्तिप्रतिरूपकाविति शेषः। अन्वाजेकृत्य/अन्वाजे कृत्वा इत्युदाहरणद्वयमपि बोध्यम्। गतिसंज्ञापक्षे समासेन क्त्वो ल्यप्।

साक्षात्प्रभृतीनि च ॥७४॥

साक्षात्कृत्य/साक्षात् कृत्वा। मिथ्या-चिन्ता-भद्रादयोप्येवम्।

साक्षात्प्रभृतीनि शब्दस्वरूपाणि कृञि विभाषा गतिसंज्ञानि भवन्ति। साक्षात्–प्रभृतीनि त्रिंशत् पदानि गणे पठितानि। एतानि च्व्यर्थवचनानि गृह्यन्ते, असाक्षात् साक्षात् कृत्वा साक्षात्कृत्य।

अनत्याधान उरसिमनसी ॥७५॥

अत्याधानमुपश्लेषणम् । तदभावे पूर्ववत् । उरसिकृत्य/उरसिकृत्वा । तत्किम् ? उरसि कृत्वा पाणिं शेते ।

मनसिकृत्य/मनसि कृत्वा । उरसि–मनसि शब्दौ विभक्तिप्रतिरूपकौ निपातौ बोध्यौ ।

मध्ये पदे निवचने च ॥७६॥

मध्ये–पदे–निवचने इत्येते शब्दाः अनत्याधाने विभाषा कृञि पूर्ववत् । मध्येकृत्य/मध्ये कृत्वा । पदेकृत्य/पदेकृत्वा । निवेचनेकृत्य/निवेचनेकृत्वा ।

चकारात् 'अनत्याधाने' इति चानुवर्तते । मध्ये–पदे इति सप्तम्यन्तप्रतिरूपकौ निपातौ । निवचनम्–वचनाभावः (अर्थाभावेऽव्ययीभावः) । उच्चारणसामर्थ्यात् समासे सप्तम्या अलुक् । निवचनेकृत्य–वाचं नियम्येत्यर्थः ।

नित्यं हस्ते पाणावुपयमने ॥७७॥

'कृञि' इति वर्तते । उपयमनम् = दारकर्म । हस्तेकृत्य ।

'विभाषा' इति निवृत्तम् । हस्ते-पाणौ (समासे सप्तम्या अलुक्) इत्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ भवतः । पाणौकृत्य इत्यपि = दारकर्म कृत्वेत्यर्थः ।

प्राध्वं बन्धने ॥७८॥

प्राध्वं मान्तमव्ययमानुकूल्ये । तच्चेद्बन्धनहेतुकं पूर्ववत् । प्राध्वंकृत्य ।

'कृञि' इति वर्तते । बन्धने इति निमित्तसप्तमी । पूर्ववत्–कृञि नित्यं गतिसंज्ञं भवति । प्राध्वंकृत्य–बन्धनेनानुकूल्यं कृत्वेत्यर्थः ।

जीवकोपनिषदावौपम्ये ॥७९॥

'कृञि' इति वर्तते । एतावौपम्ये कृञि नित्यं गतिसंज्ञौ । जीविकाकृत्य । उपनिषत्कृत्य ।

जीविका–जीवनोपायः । उपनिषद्–वेदान्तजन्यं ज्ञानम् । औपम्ये–

उपमाया भावस्तस्मिन्, विषये सप्तमी। तेन जीविकामिव कृत्वा, उपनिषदमिव कृत्वेति क्रमशोऽर्थः ।

ते प्राग् धातोः ॥८०॥

ते = गत्युपसर्गसंज्ञकाः धातोः पूर्वं प्रयोज्याः । 'ते' ग्रहणमुपसर्गार्थं गतयो ह्यनन्तराः ।

नियमार्थमिदम् । अत्र प्रयोगनियम आश्रीयते अतो लब्धगत्युपसर्गसंज्ञकाः परामृश्यन्ते । तदाह-गति....प्रयोज्याः । अनन्तराः-अनुवृत्त्यैव लब्धाः इत्यर्थः । यादृशो नियमस्तथैव पूर्वमुदाहृतम् । प्रपठति । प्रविशति । आगच्छति इत्यादि ।

छन्दसि परेऽपि ॥८१॥

अपेः पूर्वेऽपि । हन्ति नि मुष्टिना ।

छन्दसि गत्युपसर्गसंज्ञकाः परेऽपि पूर्वेऽपि प्रयोक्तव्याः । अपेः-अपिशब्दबलात् । निहन्ति मुष्टिना च । परप्रयोगेऽपि क्रियायोग एषामस्तीति ज्ञाप्यते ।

व्यवहिताश्च ॥८२॥

छन्दसि । आ मन्द्रैरिन्द्र हरिभिर्याहि ।

छन्दसि व्यवहिताश्च गत्युपसर्गसंज्ञकाः दृश्यन्ते । आ....याहि/आयाहि इति 'आ' उपसर्ग-सहिता क्रिया । एवम् आ नो भद्राः क्रतवो यन्तु/आयन्तु इति । 'छन्दसि' वचनात् भाषायां व्यवहितानाम् प्रयोगो न भवति ।

कर्मप्रवचनीयाः ॥८३॥

अधिकारोऽयम् 'अधिरीश्वरे' इति यावद् वक्ष्यति । यानित ऊर्ध्वमनुक्रमिष्यामः कर्मप्रवचनीयसंज्ञास्ते वेदितव्याः । वक्ष्यमाणानां संज्ञिनां बहुत्वेन 'कर्मप्रवचनीयाः' इति बहुवचननिर्देशः ।

अन्वर्थसंज्ञा चैषा कर्म प्रोक्तवन्तः, कृत्यल्युटो बहुलम् इति कर्त्तर्यनीयर् । कर्मशब्दः क्रियार्थकः । तथा च ये क्रियां द्योतितवन्तः सम्प्रति न, किन्तु सम्बन्धविशेषं द्योतयन्ति ते कर्मप्रवचनीयसंज्ञका भवन्ति । शाकल्यस्य संहितामनु प्रावर्षत् इत्यत्र निशमनक्रियया संहिताप्रवर्षणयोर्यः सम्बन्धो हेतुहेतुमद्भावलक्षणः, तम् 'अनु' शब्दो द्योतयति ।

अनुर्लक्षणे ॥८४॥

शाकल्यस्य संहितामनु प्रावर्षत् । अनडुद्यज्ञमन्वसिञ्चत् । किमर्थमिदमुच्यते ? यावता लक्षणेत्थम्भूताख्यानेति सिद्धैवानोः कर्मप्रवचनीयसंज्ञा । हेत्वर्थं तु वचनं हेतुतृतीयां बाधित्वा द्वितीयैव यथा स्यात् ।

'अनु' शब्दो लक्षणे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति । प्रावर्षत्–'संहिताम् अनुनिशम्य प्रावर्षत्' इत्यर्थबोधात् हेतुभूत-संहितोपलक्षितं वर्षणमित्यर्थः । एवम् अनडुद्यज्ञसम्पादनोपलक्षितं सिञ्चनमिति । पुनः संज्ञा-विधान-सामर्थ्यात् पराऽपि हेतुतृतीयाऽनेन बाध्यते । 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यनेन संहिता–यज्ञपदयोर्द्वितीया ।

तृतीयार्थे ॥८५॥

नदीमन्ववसिता सेना । नद्या सह सम्बद्धेत्यर्थः ।

अनुशब्दस्तृतीयार्थे द्योत्ये कर्मप्रवचनीयसंज्ञः । अत्र 'सह' इत्यस्यार्थस्तृतीयार्थः 'सहयुक्ते चाप्रधाने' इत्यनेन सह-योगे तृतीयाविधानात् । कर्मप्रवचनीय'अनु'योगे 'नदीम्' इत्यत्र द्वितीया ।

हीने ॥८६॥

अन्वर्जुनं योद्धारः ।

'हीने' इत्युत्कृष्टापेक्षः । हीनोत्कृष्टसम्बन्धे हीने द्योत्येऽनुः कर्मप्रवचनीय संज्ञः । अर्जुनमपेक्ष्यान्ये हीनाः इत्यर्थः । अनुशाकटायनं वैयाकरणाः–शाकटायनमपेक्ष्यान्ये वैयाकरणा हीनाः सन्ति ।

उपोऽधिके च ॥८७॥

चात्–हीने । अधिके सप्तमी । उपनिष्के कार्षापणम् । उप शाकटायनं वैयाकरणाः ।

'उप'शब्दः अधिके हीने च द्योत्ये कर्मप्रवचनीयसंज्ञः । उपनिष्के........–कार्षापणात् निष्कमधिकमित्यर्थः । 'यस्मादधिकम्....' इति सप्तमी । शाकटायनाद् वैयाकरणाः हीना इत्यर्थः ।

अपपरी वर्जने ॥८८॥

अप त्रिगर्त्तेभ्यो वृष्टो देवः ।

अप–परि–इति शब्दौ वर्जने द्योत्ये कर्मप्रवचनीयसंज्ञौ । अप....देवः–त्रिगर्त्तदेशं वर्जयित्वा वृष्टिरित्यर्थः । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । परि परि त्रिगर्त्तेभ्यो वृष्टो देवः । 'परेर्वर्जने' इति द्विर्वचनम् ।

आङ् मर्यादावचने ॥८९॥

वचनग्रहणादभिविधिः । आ मधुराया वृष्टो देवः ।

'आङ्' इति शब्दो मर्यादावचने कर्मप्रवचनीयसंज्ञः । मर्यादावचने–'मर्यादा' इति वचनं यस्मिन् सूत्रे तत्तस्मिन् । 'आङ् मर्यादाभिविध्योः' इत्यत्र य 'आङ्' मर्यादाभिविध्योर्वर्त्तमानः सोऽत्र गृह्यते, तेनाभिविध्यर्थलाभः । आ मधुरायाः–मधुरां विना ताम् मर्यादीकृत्येत्यर्थः । आङ्-योगे पञ्चमी । अभिविधौ तु–आकुमारं यशः पाणिनेः–कुमारपर्यन्तमित्यर्थः । आ कुमारेभ्यः इति वाक्यम् । 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावः ।

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥९०॥

वृक्षम् प्रति विद्योतते विद्युत् । वृक्षो लक्षणम्, विद्युल्लक्ष्यम् । इत्थम्भूतशब्दे√भू प्राप्तौ । साधुश्चैत्रो मातरम् प्रति इत्यादि ।

लक्षणे, इत्थम्भूताख्याने, भागे, वीप्सायां च विषयभूतायाम्–प्रति, परि,अनु–इत्येते कर्मप्रवचनीयसंज्ञा भवन्ति । लक्षणे–वृक्षम्....विद्युत् । प्रतिना वृक्ष-विद्युतोर्लक्ष्य-लक्षणभावसम्बन्धो द्योत्यते । लक्ष्यते येन तल्लक्षणम्–चिह्नं=ज्ञापकमित्यर्थः । √भू (प्राप्तौ, आत्मनेपदी)+क्तः । अयं प्रकार इत्थम् कञ्चित्प्रकारं प्राप्तम् इत्थम्भूतं तस्याख्यानम् । साधु....प्रति–मातरं प्राप्य साधुभावप्राप्तिरिति विषय-विषयिभावलक्षणः सम्बन्धः प्रतिनाऽऽख्यायते । स्वीक्रियमाणोंऽशो भागः–यदत्र मां प्रति स्यात्–यो भागो ममास्ति स दीयतामित्यर्थः । व्याप्तुमिच्छा वीप्सा–वृक्षं वृक्षं प्रति सिञ्चति । अत्र प्रतिशब्देन वृक्ष–सेकक्रिययोः साध्य साधनभावसम्बन्धो द्योत्यते । अत्र कर्म प्रवचनीयत्वात्तद्योगे द्वितीया, उपसर्ग-संज्ञाया निवर्तनात् 'उपसर्गात् सुनोति–' इत्यादिना 'सिञ्चति' इत्यस्य सकारस्य षत्वं न भवति । तथैव वृक्षं परि–अनु वा । मातरं परि–अनु वा । मां परि–अनु वा । वृक्षं वृक्षं परि–अनु वेत्युदाहरणानि बोध्यानि ।

अभिरभागे ॥९१॥

तेष्वेव भागवर्जिते । वृक्षमभिसिञ्चति ।

तेषु–लक्षणादिषु विषयभूतेषु । अभिः कर्मप्रवचनीयसंज्ञो भवति । सिञ्चति–वीप्सायामभिर्वर्तते । कर्मप्रवचनीयत्वात्सकारस्य न षकारः । लक्षणे–वृक्षमभि विद्योतते । इत्थम्भूताख्याने–साधुर्देवदत्तो मातरमभि ।

प्रतिः प्रतिनिधिप्रतिदानयोः ॥९२॥

मुख्यसदृशः प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनं प्रतिदानम् । तस्मिन्नर्थे प्रतिः पूर्ववत् । अभिमन्युरर्जुनात् प्रति । माषानस्मै तिलेभ्यः प्रति यच्छति ।

अभिमन्युरर्जुनात्प्रति–अर्जुनो मुख्यस्तत्सदृशोऽभिमन्युः, सोऽर्जुनमनुकरोति । अत्रानुकार्यानुकरणाभावसम्बन्धः प्रतिना द्योत्यते । तद्योगेऽर्जुने पञ्चमी । माषान्... यच्छति–तिलान् गृहीत्वा माषान् ददातीत्यर्थः । दानक्रियाजनितोऽत्रोत्तमर्णाधमर्णभावलक्षणः सम्बन्धः । तद्योगे तिलेषु पञ्चमी 'प्रतिनिधिप्रतिदाने च यस्मात्' इत्यनेन ।

अधिपरी अनर्थकौ ॥९३॥

न अर्थान्तरवाचिनौ । कुतोऽध्यागच्छति । कुतः पर्यागच्छति । स्वरः प्रयोजनम् । पञ्चम्यपाङ्परिभिः' इति पञ्चमी ।

अनर्थकौ–यौ धातोरेवार्थाभिधायिनौ न-अर्थान्तरवाचिनौ तौ अधि-परि–इत्येतौ कर्मप्रवचनीयौ । योऽर्थ आगच्छति–इत्यस्य स एवाध्यागच्छति, पर्यागच्छतीत्यस्यापि । स्वरः–'गतिर्गतौ' इति निघाताभावः ।

सुः पूजायाम् ॥९४॥

सुसिक्तं मेघेन । पूजायामिति किम् ? सुषिक्तं किं त्वया ।

'सु' शब्दः पूजार्थे कर्मप्रवचनीयसंज्ञः । मेघेन–कर्तरि तृतीया । सुसिक्तम–कर्मप्रवचनीयत्वात् न षत्वम् । अत्र शोभनोद्भावनैव पूजा । सुषिक्तम्– उपसर्गात्....' इत्यादिना षत्वम् । अत्र निन्दाऽवगम्यते न तु पूजा ।

अतिरतिक्रमणे च ॥९५॥

चात्पूजायाम् । अतिसिक्तं भवता ।

अतिक्रमणम्–निष्पन्नेऽपि फले क्रियाप्रवृत्तिः । अतिक्रमणे पूजायाञ्चार्थे

'अति' शब्दः कर्मप्रवचनीयः । अतिसिक्तम्-एवेति शेषः निष्पन्नेऽपि फले सेकः प्रवृत्तः । पूजायाम्–अति सिक्तम्, अति स्तुतं वा भवता=शोभनं कृतमित्यर्थः ।

अपिः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चयेषु ॥९६॥

एतेष्वर्थेष्वपिः कर्मप्रवचनीयः । पदान्तरस्याप्रयुज्यमानस्यार्थः पदार्थः । मधुनोऽपि स्यात् । 'उपसर्गप्रादुर्भ्याम्' इति षत्वं न । सम्भावनमधिकार्थवचनेन शक्तेरप्रतिघाताविष्करणम् । अपि सिञ्चेन्मूलकसहस्रम् । अन्ववसर्गः–कामचाराभ्यनुज्ञानम् । अपि सिञ्च । अपि स्तुहि । गर्हा-निन्दा । धिङ् मैत्रमपि सिञ्चेत् पलाण्डुम् । समुच्चयः–अपि सिञ्च, अपि स्तुहि । एकस्मिन् कर्तरि स्तुतिसेकक्रिययोः कर्तृत्वस्य संचयः । सिञ्च च स्तुहि चेत्यर्थः । सर्वत्रोपसर्गसंज्ञाबाधात्षत्वं न ।

मधुनोऽपि स्यात्–मधुशब्दोऽत्र मधुबिन्दौ वर्तते तस्य दुर्लभतामपिशब्दो द्योतयति । अत्र 'अपि' शब्दोऽप्रयुज्यमान-बिन्दुरित्यस्यार्थे वर्तते । अधिकार्थवचनम्=अधिकार्थो मूलसहस्रसेकः आविष्करणम्=प्रकाशनम् । अपि....सहस्रम्–सेके सामर्थ्यं न विहन्यते इति भावः । कामचारः–इच्छया प्रवृत्तिः तस्याभ्यनुज्ञानम् । अपि सिञ्च, अपि स्तुहि–सिञ्च वा मा वा, स्तुहि वा मा वा; यथेष्टं कुर्वित्यर्थः । धिक्....पलाण्डुम्–पलाण्डुसेकेन निन्दा द्योत्यतेऽपिशब्देन ।

अधिरीश्वरे ॥९७॥

स्व-स्वामिसम्बन्धेऽधिः कर्मप्रवचनीयः । स्वात्स्वामिनो वा विभक्तिः । अधि भुवि रामः । अधि रामे भूः ।

ईश्वरः स्वामी स च स्वमपेक्षते । सम्बन्धे प्रसिद्धमनूद्यते, अप्रसिद्धमाख्यायते । अधि भुवि रामः–भुवः स्वस्य राम ईश्वरोऽतो भुवि सप्तमी । अधि रामे भूः–रामस्य स्वामिनो भुव ईश्वरत्वमुच्यतेऽतो रामे सप्तमी । 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' इति षष्ठीं बाधित्वा स्वे स्वामिनि वा सप्तमी भवति ।

विभाषा कृञि ॥९८॥

यदत्र मामधि करिष्यति । कर्मप्रवचनीय–संज्ञा स्वरार्था ।

अधिरिति वर्तते। स√कृ धातौ परतो विभाषा कर्मप्रवचनीयसंज्ञः। स्वरार्था–गतिसंज्ञाया बाधनात् 'तिङि चोदात्तवति' इति निघातो न।

लः परस्मैपदम् ॥९९॥

'लः' इत्यादेशापेक्षया षष्ठी। लादेशाः = तिबादयः, शतृ, क्वसु चेति परस्मैपदसंज्ञाः भवन्ति।

लः–'ल्' इत्यस्यादेशाः। तेन लकारादेशानां तिबादीनां 'परस्मैपद'संज्ञा भवति। तिबादयः–तिप् तस् झि। सिप् थस् थ। मिप् वस् मस् इति नव। शेषास्तङ् आत्मनेपदं वक्ष्यते।

तङानावात्मनेपदम् ॥१००॥

तङिति नवानां वचनानां प्रत्याहारः। 'अन' इति शानच्कानचोर्ग्रहणम्।

'लः' इति वर्तते। पूर्वेण परस्मैपदसंज्ञायां प्राप्तायां लादेशयोस्तङानयोः 'आत्मनेपद'संज्ञा विधीयते। तङ्–त आताम् झ। थास् आथाम् ध्वम्। इट् वहि महिङ्।

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥१०१॥

'तिङः' इति प्रत्याहारग्रहणम्। एतस्मिंस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः। तिप्-तस्-झि-इत्येवं प्रथमः। इत्यादि।

'तिङः' इति प्रथमा–बहुवचनम्। प्रत्याहारः–तिपः तिशब्दादारभ्य आ महिङो ङकारात्। परस्मैपदमात्मनेपदञ्चानुवर्तते। तदनुवृत्तौ च द्वौ राशी भवतः। परस्मैपदसंज्ञके प्रथमे राशौ ये त्रयस्त्रिकास्तेषु, एवमात्मनेपदसंज्ञके द्वितीये राशौ त्रयस्त्रिकास्तेषु क्रमशः प्रथम–मध्यम–उत्तम–संज्ञाः भवन्ति। यथा तिप्–तस्–झि इत्येवं प्रथमः इत्यादि।

तान्येकवचनद्विवचनबहुवचनान्येकशः ॥१०२॥

तानि त्रीणि त्रीणि पदानि एकैकशः क्रमादेतत्संज्ञानि। तिप इत्येकवचनमित्यादि।

तानि–यानि पूर्वं लब्धप्रथम–पुरुषादिसंज्ञकानि। त्रीणि त्रीणि–अनन्तरसूत्रकृतानि तिप्–तस्–झि इत्येवंरूपाणि। क्रमात् एतत्संज्ञानि–

एकवचन–द्विवचन–बहुवचनसंज्ञकानि। 'तिप्' इत्येकवचनम्–प्रथमपुरुषञ्चेति शेषः। इदं सर्वं रेखाचित्रेण वितन्यते।

परस्मैपदम्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तिप्	तस्	झि
मध्यमपुरुषः	सिप्	थस्	थ
उत्तमपुरुषः	मिप्	वस्	मस्

आत्मनेपदम्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	त	आताम्	झ
मध्यमपुरुषः	थास्	आथाम्	ध्वम्
उत्तमपुरुषः	इट्	वहि	महिङ्

सुपः ॥१०३॥

'सुप्' इति प्रत्याहारः पूर्ववत्।

प्रत्याहारः–प्रथमैकवचन 'सु'शब्दादारभ्य सुपः पकारपर्यन्तम्। सुपः सन्ति एकविंशतिः। पूर्ववत्–तिङामिव सुपामपि त्रिकेष्वेकैकम् इति क्रमेण एकवचनादिसंज्ञा विधीयन्ते। तच्चैवम्—

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सु	औ	जस्
द्वितीया	अम्	औट्	शस्
तृतीया	टा	भ्याम्	भिस्
चतुर्थी	ङे	भ्याम्	भ्यस्
पञ्चमी	ङसि	भ्याम्	भ्यस्
षष्ठी	ङस्	ओस्	आम्
सप्तमी	ङि	ओस्	सुप्

विभक्तिश्च ॥१०४॥

सुपः, तिङश्च विभक्तिसंज्ञाः।

चकारः पुरुष–वचनसंज्ञासमावेशार्थः। 'सुपः, तिङः'–इत्यनुवर्तेते।

विभक्तिसंज्ञायाः प्रयोजनम् 'न विभक्तौ तुस्माः' इत्यादिषु इत्संज्ञाया निषेधः इत्यादि बोध्यम् ।

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥१०५॥

तिबादीनामयं 'पुरुष' नियमः–युष्मद्युपपदे सति व्यवहितेऽव्यवहितेऽपि समानाधिकरणे = समानाभिधेये तुल्यकारके स्थानिनि–प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपि मध्यमः पुरुषो भवति । त्वं पचसि । पचसि ।

उपपदे–अत्र पूर्वं परं च प्रयुज्यमानं पदमुपपदं गृह्यते । उपोच्चारितं पदमुपपदम् । 'उप'शब्दः सामीप्ये । उपपदग्रहणं तु पूर्वभूतेऽपि युष्मदि यथा स्यात्, अन्यथा 'तस्मिन्निति....'परिभाषया परभूते एव स्यात् । अधिकरणशब्दोऽभिधेयवाची । स्थानिन्यपि–स्थानशब्दः प्रसङ्गवाची स्थानम् अस्यास्तीति स्थानी । तस्यैव स्थानं यस्यार्थो गम्यते शब्दो न प्रयुज्यते । तेनाप्रयुज्यमानार्थलाभः । अपिशब्दात्प्रयुज्यमानेऽपि । त्वं पचसि । युवां पचथः । यूयं पचथ । अप्रयुज्यमाने युष्मदि पचसि । पचथः । पचथ इत्युदाहरणानि ।

समानाधिकरणग्रहणं किम् ? त्वया पच्यते इत्यत्र मा भूत् । भिन्नम् अत्र अधिकरणम् । 'त्वया' इत्येतत् कर्तृवाचि, कर्तरि तृतीया–विधानात् । 'पच्यते' इति कर्मवाचि, कर्मणि लकारविधानात् । इह 'भवान् पचतु' इत्यत्र युष्मदर्थप्रतीतेः मध्यमः प्राप्नोति स न भवति, यतो हि 'भवत्' इति शब्दो लिङ्गवान् न च सम्बोधनविषयः । 'युष्मद्' इति तु अलिङ्गः सम्बोधनविषयश्च इति भवत्–युष्मदोर्भेदः ।

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥१०६॥

परिहासे गम्ये मन्योपपदस्य धातोर्मध्यमः पुरुषो भवति, मन्यतेश्चोत्तमः । स चैकवत् । एहि मन्ये ओदनं भोक्ष्यसे । नहि भोक्ष्यसे, भुक्तः सोऽतिथिभिः । मध्यमोत्तमयोः प्राप्तयोः उत्तममध्यमौ विधीयेते ।

प्रहासः–परिहासः, क्रीडा । यत्र भूतार्थाभावाद् वञ्चनैव केवलं तत्र वक्तुरभिप्रायाख्याने प्रहासो गम्यते । एकवत्–द्वयोर्बहुषु चैकवद्भावः । उत्तम एवैकवद् न मध्यमः । एहि........अतिथिभिः–प्रहासकथनमिदम् । सत्यप्योदने भोक्तुमागतं श्यालादिकम् प्रतीयमुक्तिः । तत्त्वकथने तु एहि मन्यसे, ओदनं भोक्ष्ये इति भवति । द्विवचन-बहुवचनयोस्तूदाहरणे क्रमशः एहि मन्ये ओदनं भोक्ष्येथे, नहि भोक्ष्येथे; भुक्तः सोऽतिथिभिः । एहि मन्ये ओदनं भोक्ष्यध्वे, नहि भोक्ष्यध्वे; भुक्तः सोऽतिथिभिः इति बोध्ये ।

अस्मद्युत्तमः ॥१०७॥

उपपद इतिवत् प्रक्रिया । अहं पचामि । पचामि ।

उपपदे समानाभिधेये प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपि उत्तमपुरुषो भवति। प्रयुज्यमाने–आवां पचावः । वयं पचामः । अप्रयुज्यमाने–पचावः । पचामः इत्यादि ।

शेषे प्रथमः ॥१०८॥

शेष इति मध्यमोत्तमविषयादन्य उच्यते । यत्र युष्मदस्मदी समानाधिकरणे उपपदे न स्तस्तत्र प्रथमः पुरुषो भवति । पचति ।

'उपपदे' इति निवृत्तम् । 'शेषे' इति विषयसप्तमी । युष्मदस्मदोरभावः शेषः । पचतः । पचन्ति च ।

परः सन्निकर्षः संहिता ॥१०९॥

परोऽत्रातिशये । सन्निकर्षः-प्रत्यासत्तिः = अर्धमात्राकालव्यवधानं स संहिता । दध्यत्र ।

अतिशये—यथा परं सुखम्, परं दुःखम् इत्यत्र 'पर' शब्दोऽतिशयार्थकः तद्वत् । 'संहिता' शब्दः पदस्य पदान्तरेण यदानन्तर्यं तत्रैव प्रसिद्धः, तथा च संहितामधीते न पदानीति वक्तारो वदन्ति । ततश्च 'कुमार्यौ' इत्याद्येकपदे संहिताकार्यं न स्यात्तदर्थोऽयमारम्भः । परग्रहणेन वर्णानामर्धमात्राकालव्यवधानादधिकव्यवधानं व्यावर्त्यते । वर्णानां सन्निकर्षस्यानेन संहिताकार्यं विधीयते । दध्यत्र–दधि + अत्र । संहितायां यण्सन्धिः ।

विरामोऽवसानम् ॥११०॥

विरतिर्विरामः, विरम्यतेऽनेनेति वा विरामः सोऽवसानसंज्ञः । दधिँ । वृक्षः ।

विरामः–वर्णोच्चारणाभावः, भावे घञ् । येनान्त्येन वर्णेन विरम्यते सोऽवसानसंज्ञो भवति । अत्र पक्षे 'हलश्च' इति घञ् । दधिँ–'अणोऽप्रगृह्यस्यानुनासिकः' इत्यत्र 'वाऽवसाने' इत्यवसानपदमनुवर्तते, तेनात्रानुनासिकत्वम् । वृक्षः–'खरवसानयोर्विसर्जनीयः' इत्यनेन रुत्वस्य विसर्गः ।

आकडारादॄबहुष्वनुप्रतिगृणश्चोर्यादिछन्दसि तिङो दश

इति श्रीमत्कश्यपगोत्रजेन सूरिवर्यधरणीधरशिष्येण समाराधितराम-कृष्णेन
सामवेदित्रिपाठिरामकृष्णात्मजेन सिद्धसारस्वतमन्त्रेण
आचार्यबलभद्रेण विरचिते काशिकावृत्तिसारे
प्रथमाध्यायस्य चतुर्थः पादः ।

प्रथमाध्यायस्यास्मिन् चतुर्थे पादे आकडारादेका संज्ञा, बहुषु बहुवचनम्, अनुप्रतिगृणश्च, ऊर्यादिच्विडाचश्च, छन्दसि परेऽपि इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा तिङस्त्रीणि त्रीणि....इत्यत आरम्य दश सूत्राणीति संकलनेन दशोत्तरशतसंख्याकानि (११०) सूत्राणि सन्ति ।

इति सामवेदि-विप्रवंश-लब्धजन्मना श्रीमत्त्रिपाठिबालकरामात्मजेन
शिवादेवीगर्भजातेनाचार्येण चन्द्रभानुत्रिपाटिना
विरचितायां काशिकावृत्तिसार-सुधायां
प्रथमाध्यायस्य चतुर्थः पादः

प्रथमाध्यायः समाप्तः ।

अथ द्वितीयाध्याये प्रथमः पादः

समर्थः पदविधिः ॥१॥

यः कश्चिदिह शास्त्रे पदविधिः, स सर्वः समर्थो वेदितव्यः। विधीयते इति विधिः। पदानां विधिः पदविधिः समासादिः। समर्थः = शक्तः। विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्यः। वक्ष्यति–'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' कष्टं श्रितः कष्टश्रितः।

समर्थः किम् ? पश्य चैत्र ! कष्टं श्रितो मैत्रस्य गुरुकुलम् ।

पदग्रहणं किम् ? वर्णविधौ समर्थपरिभाषा मा भूत् । तिष्ठतु दध्यशान त्वं शाकेन । तिष्ठतु कुमारीच्छत्रं मा हर देवदत्त । यणादेशो नित्यश्च तुग्भवति ।

इदं परिभाषासूत्रम्। परितो व्यापृता भाषा परिभाषा। तथा चोक्तम् अस्य सूत्रस्य भाष्ये–परिभाषा पुनरेकदेशस्था सर्वशास्त्रमभिज्वलयति, यथा वेश्म प्रदीपः। 'विधि'शब्दोऽत्र कर्मसाधनः। तेन पदानाम्–व्यवस्थितानां यः विधिः–कार्यम् समासादि स पदविधिर्भवति। पदानामित्यत्र शेषे षष्ठी, विधीयमानस्य समासादिकार्यस्य पदसम्बन्धित्वेनोपपादनात्। समासादिः– 'आदि' शब्देन पराङ्गवद्भावतद्धितवृत्त्यादीनां ग्रहणम्। समर्थः ⋯ कष्टश्रितः– विशेषेण ग्रहणं विग्रहः। विग्रहार्थं यद्वाक्यं तद्विग्रहवाक्यम् (मध्यमपदलोपी समासः) तदर्थस्याभिधाने शक्तः स समर्थः। कष्टश्रितः इति समस्तपदेन योऽर्थः प्रतीयते स एवार्थः 'कष्टं श्रितः' इति वाक्येनातोऽत्र सामर्थ्यमस्ति। पश्य चैत्र ⋯ गुरुकुलम् इति वाक्ये तु 'कष्ट' शब्दस्य 'पश्य'इत्यनेन सम्बन्धः। 'श्रित' इतिशब्देन सामर्थ्याभावान्न समासः।

देवदत्तस्य गुरुकुलम् इत्यत्र गुरुणा देवदत्तस्य सम्बन्धः समुदायेन। 'गुरुद्वारकः कुलेन सम्बन्धः' इत्यर्थात् गुरुणाऽपि स विज्ञेयः। तदुक्तम्—

समुदायेन सम्बन्धो येषां गुरुकुलादिना,
संस्पृश्यावयवांस्तेऽपि युज्यन्ते तद्वता सह ।

'महत्कष्टं श्रितः' इत्यत्र वाक्ये व्यपेक्षा वर्तते। परन्तु समासवृत्त्यवस्थायां नैकार्थीभावः सम्भवति, इति सापेक्षस्य न समासः ।

एवं शङ्कुलया खण्डः शङ्कुलाखण्डः इत्यत्र तृतीयासमासो भवति। अत्र तु सामर्थ्याभावान्न–किं त्वं करिष्यसि शङ्कुलया, खण्डो देवदत्त उपलेन। नात्र खण्डनम् शङ्कुलया। अन्यान्यप्युदाहरणानि ज्ञेयानि यथावसरम् ।

यणादेशो नित्यश्च तुग्भवति–द्वावप्येतौ यणतुकौ वर्णविधी स्तः। दध्यशान–दधि+अशान, इकारस्य यण्विधिर्यकारः। कुमारीच्छत्रम्–'दीर्घात्' इति सूत्रेण नित्यस्तुक्। पूर्ववाक्ये 'दधि' इत्यस्य द्वितीयवाक्ये 'कुमारी' इत्यस्य 'तिष्ठतु' इत्यनेन सम्बन्धः, न तु 'अशान', 'छत्रम्' शब्दाभ्याम्। वर्णविधौ सन्धिकार्ये समर्थपरिभाषाया अनुपस्थितेरुभयत्र सन्धिकार्यं भवति ।

सुबामन्त्रिते पराङ्गवत्स्वरे ॥२॥

सुबन्तमामन्त्रिते परतः पराङ्गवद्भवति स्वरलक्षणे कार्ये। तादात्म्यातिदेशोऽयं सुबन्तमामन्त्रितमनुप्रविशति। आमन्त्रितस्यादिरुदात्तो भवतीति ससुप्कस्यापि यथा स्यात्। कुण्डेनाटन्। परशुना वृश्चन्, मद्राणां राजन् ।

सुबिति किम्? पीड्ये पीड्यमान ।

आमन्त्रित इति किम्? गेहे गार्ग्यः ।

परग्रहणं किम्। पूर्वस्य मा भूत्, चैत्र कुण्डेनाटन् ।

पराङ्गवत्–अङ्गशब्दोऽवयवार्थकः। पराङ्गवद्भवति–अतस्तद्ग्रहणेन गृह्यते इत्यर्थः। तादात्म्यातिदेशः–तस्य आमन्त्रितस्य आत्मा तदात्मा तस्य भावः तदात्मन्+ष्यञ् तस्यातिदेशः=स्वभावः। तदेव स्पष्टयति–सुबन्तमित्यादिना स्यादित्यन्तेनेति। उदाहरणान्याह–कुण्डेनाटन् इत्यादि। त्रिष्वपि कुण्डादिषु सविभक्तिकेषु 'आमन्त्रितस्य च' इति स्वरो भवति। पीड्ये पीड्यमान–उभयत्रापि कर्मणि लट्, पूर्वत्रोत्तमपुरुषैकवचने इट्, अपरत्र शानजादेशः सम्बोधनस्य रूपम्। गेहे गार्ग्यः–गेहे अन्तोदात्तता, गार्ग्ये चाद्युदात्ततेत्युभयत्रापि पृथक् स्वरो भवति ।

❀(वा०) सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमनन्तरत्वात्। तीक्ष्णया सूच्या सीव्यन्–इत्यत्र तीक्ष्णया इत्यस्यापि पराङ्गवद्भावादाद्युदात्तत्वं भवति।

❀(वा) अव्ययानां प्रतिषेधो वक्तव्यः–उच्चैरधीयान–इत्यत्र उच्चैः शब्दस्यान्तोदात्तत्वमेव भवति।

प्राक् कडारात्समासः ॥३॥

कडारसंशब्दनात् प्राग् यानित ऊर्ध्वमनुक्रमिष्यामस्ते समाससंज्ञास्ते वेद्याः। वक्ष्यति–'यथा सादृश्ये'। यथावृद्धं द्विजानानय।

कडारात्प्राग् यावन्तो व्यवस्थिताः, सर्वे ते समाससंज्ञकाः सन्तः 'अव्ययीभाव' इत्यादि संज्ञां लभन्ते। समास-संज्ञायां सत्यां 'कृत्तद्धितसमासाश्च' इत्यनेन 'प्रातिपदिक' संज्ञादि कार्यं भवति। तेन यथावृद्धम् इत्यस्य पदत्वं सिद्ध्यति। 'अव्ययीभाव' संज्ञया 'अव्ययीभावश्च' इत्यनेन नपुंसकत्वं भवति।

सह सुपा ॥४॥

'सुप्' इति वर्तते। 'सह' इति सुपा' इति चेत्यधिकृतं वेदितव्यम्। यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रेदमुपस्थितं द्रष्टव्यम्। वक्ष्यति–'द्वितीया श्रित......' इति। द्वितीयान्तं श्रितादिभिः सुबन्तैः सह समस्यते। कष्टश्रितः। 'सह' ग्रहणं योगविभागार्थम् अनुव्यचलत्।

तत्रेदम्–सुप्, सह, सुपा इति त्रयम् समासविषये उपस्थितं भवति। तेन 'द्वितीया श्रित' इति सूत्रस्य 'द्वितीयान्तं सुबन्तं श्रितादिना सुबन्तेन सह समस्यते' इत्येषोऽर्थो लभ्यते। सहग्रहणम्....–अयं भावः–समास इति महती संज्ञा अन्वर्था, समसनं समासः=संक्षेपः इति। स च अनेकेषां सुबन्तानामेव भविष्यति, तेनासत्यपि सहग्रहणे 'सुपा' इति तृतीययैव सहार्थे लब्धे सहभूतयोरेव पदयोः पदानां वा 'समास' संज्ञा भविष्यत्यतः 'सह' पदं 'समुदायस्यैव समाससंज्ञा यथा स्यादेकैकस्य मा भूत्, इत्यर्थं नापि तु 'सह' इति योगविभागार्थं तद्ग्रहणम्। अतोऽस्य सूत्रस्यार्थद्वयम्–

सुप् समर्थेन सह समस्यते तेन 'अनुव्यचलत्' इति पदे 'नि'पदस्य पूर्वं तिङन्तेन समासे कृते समाससंज्ञायाम् अन्तोदात्तत्वं सिद्ध्यति। तदनन्तरम् 'अनु' पदेन समासो भवति।

सुबन्तं सुबन्तेन सह समस्यते। उदाहरणम्–कष्टं श्रितः कष्टश्रितः आदि।

अव्ययीभावः ॥५॥

अधिकारोऽयम् । यानित ऊर्ध्वमनुक्रमिष्यामः, 'अव्ययीभाव'-संज्ञास्ते वेदितव्याः । वक्ष्यति–'यथा सादृश्ये' । यथावृद्धं द्विजानानय।

यथावृद्धम्–अत्रोदाहरणेऽव्ययीभावसंज्ञायां सत्याम् 'अव्ययीभावश्च' इति नपुंसकत्वे 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यस्य प्रवृत्तिर्भवति 'अव्ययीभाव' इत्यन्वर्थसंज्ञा 'अनव्ययम् अव्ययं भवतीत्यव्ययीभावः ।' तेन यदाऽव्यय-रूप-पदार्थस्य प्राधान्यं भवति, तदाऽव्ययीभावो नान्यथा । प्रधानम् अव्ययम् पूर्वपदम् । तद्वशेनोत्तरपदम् अनव्ययमपि समुदायान्तर्भूतं सत् अव्ययत्वं प्रतिपद्यते ।

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रति-शब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्ति-साकल्यान्तवचनेषु ॥६॥

'सह सुपा' इति वर्तते । विभक्त्यादिष्वर्थेषु यदव्ययं तत्सुबन्तेन समर्थेन सह समस्यते । सोऽव्ययीभावाख्यः समासः । वचनग्रहणं प्रत्येकमभिसम्बध्यते । विभक्त्यर्थे तावत्-स्त्रीष्वधिकृत्य कथा प्रवर्तते इति अधिस्त्रि । सप्तम्यर्थेऽव्ययम् इत्यादि ।

विभक्त्यादिष्वर्थेषु-विभक्त्यादीनर्थान् यदव्ययं वक्ति-द्योतयतीत्यर्थः । **वचनमिति**–वचनं कर्मसाधनं विभक्त्यादिभिः समानाधिकरणम् । **अधिस्त्रि**–अत्र'अधि' शब्दः सप्तम्यर्थवाचकः । 'विभक्ति'शब्देनेह कारकमुच्यते, विभज्यते कारकार्थोऽनयेति । स्त्रीषु इत्यत्र वैषयिकसप्तमी, तेन स्त्रीविषया कथेत्यर्थो लभ्यते । 'अव्ययीभावश्च' इति नपुंसकत्वम् । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वः ।

अन्येषामुदाहरणानि–समीपार्थे–कुम्भस्य समीपम् उपकुम्भम् ।

समृद्धिवचने–मद्राणां समृद्धिः, सुमद्रम् ।

व्यृद्धिः = ऋद्धेरभावः । अर्थाभावः = वस्तुनोऽभावः इत्युभयोः पृथगुपादानम् । प्रथमस्योदाहरणम्, यवनानां व्यृद्धिः, दुर्यवनम् ।

द्वितीयस्योदाहरणम्, मक्षिकाणामभावो निर्मक्षिकम् ।

अत्ययः–अतिक्रमः । अतीतानि हिमानि, अतिहिमम् ।

असम्प्रति = उपभोगस्य वर्तमानकालप्रतिषेधः । अतितैसृकम् । (तैसृकम्–आच्छादनम् तस्यायमुपभोगकालो नास्ति ।)

शब्दप्रादुर्भावः = शब्दस्य प्रादुर्भावः = प्रकाशः पणिनिशब्दस्य प्रकाशः इतिपाणिनि ।

पश्चात्–रथानाम् पश्चात् इति अनुरथम् ।

यथार्थाश्चत्वारो भवन्ति–योग्यता, वीप्सा, पदार्थानतिवृत्तिः, सादृश्यम् च ।

तत्र योग्यतायाम्–रूपस्य योग्यम् अनुरूपम् ।

वीप्सायाम्–अर्थम् अर्थम् प्रति प्रत्यर्थम् ।

पदार्थानतिवृत्तिः = पदार्थस्यानतिक्रमः–शक्तिम् अनतिक्रम्य यथाशक्ति ।

आनुपूर्व्यम् = अनुक्रमः–ज्येष्ठस्यानुपूर्व्येणेति अनुज्येष्ठम् ।

यौगपद्यम् = एककालता-युगपत् चक्रम् इति सचक्रम् 'अव्ययीभावे चाकाले' इति सहस्य 'स' आदेशः ।

सादृश्यम् = तुल्यता, यथार्थकथनेनैव सिद्धे पुनः सादृश्यवचनम् विशेषण-भूतसादृश्यार्थकम् । सदृशः किख्या इति सकिखि । अत्र सदृशोऽन्यस्य सिंहादे-र्विशेषणम् । दुर्बलः शृगालः 'किखो' कथ्यते ।

सम्पत्तिः = अनुरूप आत्मभावः । अत एव न समृद्धेर्गतार्थता । ब्रह्मणः सम्पत्तिः = अनुरूपः इति सब्रह्म बाभ्रवाणाम् ।

साकल्यम् = अशेषता-तृणमपि अपरित्यज्येति सतृणम् अत्ति । तृणमपि भक्षयन् कथमन्यत्परित्यजेदित्यर्थः ।

अन्तवचनम्–अत्र यावतोऽध्ययनस्य परिग्रहस्तस्य समाप्तिरन्तः उदा-हरणम्–अग्निग्रन्थपर्यन्तम् इति साग्नि ।

यथाऽसादृश्ये ॥७॥

'यथा' इत्येतदव्ययमसादृश्ये वर्तमानं सुपा सह समस्यते । यथावृद्धं द्विजान् आनय । सादृश्यनिरासायैतद्वचनम्-यथा हरिस्तथा हरः ।

यथावृद्धम्–ये ये वृद्धाः इति विग्रहः । अत्र 'यथा' शब्दो वीप्सायां वर्तते । पूर्वेणैव सिद्धे पुनरेतत्सूत्रम् सादृश्यवाचिना यथाशब्देन समासप्रतिषेधार्थम् । यथा हरिस्तथा हरः इत्यत्र सादृश्यवाची यथा शब्दः । यथा देवदत्तसदृशो यज्ञदत्त इत्यर्थः । अतोऽत्र न समासो भवति ।

यावदवधारणे ॥८॥

अवधारणमियत्तापरिच्छेदः । यावदमत्रं द्विजानामन्त्रयस्व । यावन्त्यमत्राणि नव पञ्च वा सप्त वा तावत् आमन्त्रयस्व ।

'यावत्' इत्यव्ययम् अवधारणार्थे वर्तमानं सुपा सह समस्यते। अव्ययीभावश्च स भवति । इयत्ता–इयतो भावः = परिमाणम् तस्या परिच्छेदो निश्चयः । अमत्रम् = पात्रम् ।

सुप्प्रतिना मात्रार्थे ॥९॥

मात्रा, विन्दुः, स्तोकमल्पमिति पर्यायाः । मात्रार्थे वर्त्तमानेन प्रतिना सह सुबन्तं समस्यते, अव्ययीभावश्च समासो भवति । अस्त्यत्र किञ्चित्सूपः सूपप्रति ।

किञ्चिदित्यव्ययमतः सूप इति पुंल्लिगेन समानाधिकरणम् । वृक्षम् प्रतीत्यत्र तु लक्षणे 'प्रति' शब्दो वर्तते न मात्रार्थे ।

अक्षशलाकासंख्या परिणा ॥१०॥

'अक्ष-शलाका' शब्दौ संख्याशब्दाश्च परिणा समस्यन्ते । कितवव्यवहारे समासोऽयमिष्यते । अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये, अक्षपरि ।

कितवाः–द्यूतकारास्तेषां व्यवहारे–अक्षशलाकापातनेऽयं समासः । स्वभावात् एवायमर्थो लभ्यते । अक्षेण....जये–अयं भावः–पञ्चिकानामकं द्यूतम् पञ्चभिः अक्षैः शलाकाभिर्वा भवति । तत्र यदा सर्वे उत्तानाः अवाञ्चो वेत्येकरूपाः भवन्ति तदा पातयिता जयति । अतो जये यदक्षाणां वृत्तं तदपेक्षया-ऽन्यथात्वे सति समासो भवति । अन्यथावृत्तौ चाक्षादीनां कर्तृत्वं करणत्वं वा भवति । अतस्तृतीयान्ता एवाक्षादयः समस्यन्ते । जयकालेऽक्षादीनां यदेकरूपं वर्तनं तद्विपरीते वर्तने परिणा द्योत्ये समासः, इति निष्कर्षः । अक्षपरि-इत्यस्यायमेवाभिप्रायः । एवं शलाकापरि । एकपरि । द्विपरि । त्रिपरि । चतुष्परि ।

विभाषा ॥११॥

अधिकारोऽयम् । अपत्रिगर्त्तम्/अपत्रिगर्त्तेभ्यः ।

विभाषा-इदमधिकारसूत्रम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तद् विभाषा भवति ।

अपपरिबहिरश्चवः पञ्चम्याः ॥१२॥

अपत्रिगर्त्तम्/अपत्रिगर्त्तेभ्यः ।

अपपरि....–अप, परि, बहिस्, अञ्चु इत्येते सुबन्ताः पञ्चम्यन्तेन सह विभाषा समस्यन्ते, अव्ययीभावश्च समासो भवति । उदाहरणम्—अपत्रिगर्त्तम्/अपत्रिगर्त्तेभ्यः । एवम् परित्रिगर्त्तम्/परित्रिगर्त्तेभ्य इति बोध्यम् । बहिर्योगे समासविधानादेव तद्योगे पञ्चमी भवति–बहिर्ग्रामम्/-बहिर्ग्रामात् । एवं प्राग्ग्रामम्/प्राग्ग्रामात् । प्राक्–प्र√अञ्चु + क्विप् । 'अञ्च्' इत्यपि अप–परि इत्येतयोः साहचर्यात् 'अव्ययम्' एव गृह्यते ।

आङ् मर्यादाभिविध्योः ॥१३॥

आमधुरम्/आमधुरायाः । आकुमारं यशः पाणिनेः/आकुमारेभ्यः ।

मर्यादायामुदाहरणम्–आमधुरम्/आमधुरायाः । मधुरां नगरीं मर्यादीकृत्येत्यर्थः । अभिविधावुदाहरणम्–आकुमारम्/आकुमारेभ्यः । कुमारमभिव्याप्येत्यर्थः । तेन विना मर्यादा, तेन सहाभिविधिरिति विवेकः ।

लक्षणेनाभिप्रती आभिमुख्ये ॥१४॥

लक्षणं–चिह्नं । तद्वाचिनाऽऽभिमुख्यार्थावेतौ वा समस्येते । अभ्यग्नि शलभाः पतन्ति ।

आभिमुख्यार्थावेतौ–मुखमभीत्यभिमुखम् (अत्राप्यनेनैव समासः) तस्य भावः–आभिमुख्यम्, सोऽर्थो ययोस्तौ एतौ अभिप्रती वा समस्येते । स चाव्ययीभावो भवतीति शेषः । अभ्यग्नि–अग्निम् अभि 'अभिरभागे' इत्यनेन कर्मप्रवचनीयत्वाद् द्वितीया । एवम् अग्निम् प्रति प्रत्यग्नि । अत्राभि-प्रती लक्षणार्थकावाभिमुख्यमपि द्योतयतः । तेनाग्निं लक्ष्यीकृत्याभिमुखं शलभाः पतन्तीत्यर्थो भवति ।

अनुर्यत्समया ॥१५॥

यस्य समीपवाच्यनुस्तेन लक्षणेनानुर्वा समस्यते । अनुवनमशनिर्गतः ।

यत्समया–यस्य समया = समीपम् (षष्ठीतत्पुरुषः) अत्र 'अनु'रेव समीपार्थकः, न तु समया (गौणार्थकः) । अतस्तद्योगे 'अभितः परितः समया....'

इति द्वितीया न भवति। अनुवनम्–वनस्य समीपमिति विग्रहः । 'अव्ययं विभक्ति समीप....' इत्येव सिद्धे विभाषार्थं सूत्रम् ।

यस्य चायामः ॥१६॥

अनुर्यस्यायामः = दैर्घ्यम् तद्वाची, तेन लक्षणेन सह समस्यते । अनुयमुनं मधुरा । यमुनाऽऽयामेन मधुराऽऽयामो लक्ष्यते ।

अनुः....समस्यते–आयामः–दैर्घ्यम् । अत्रापि 'अनुः' एव आयामवाची वर्तते । यस्य चायामस्तल्लक्षणं भवति । लक्षणं च लक्ष्यापेक्षि, इत्यर्थादुपमानोपमेयभावोऽपि समासार्थ इति बोध्यम् । अनुयमुनं मधुरा–यमुनायाः आयामः प्रसिद्धोऽतो यमुना लक्षणम् तेनैव लक्षणभूतेन 'यमुना' पदेन समासो भवति । यमुनायाः आयाम इवायामो यस्याः सा मधुरा तद्वदेवायतेत्यर्थः । अत्र यमुना, मधुरेत्युभेऽपि न स्वरूपतो लक्षणलक्ष्येऽपि तु आयामेन । तदाह–यमुनायामेन मधुरायामो लक्ष्यते ।

तिष्ठद्गुप्रभृतीनि च ॥१७॥

तिष्ठन्ति गावो यस्मिन् काले स तिष्ठद्गु । वहद्गु इत्यादि ।

तिष्ठद्गुप्रभृति शब्दानामस्मिन्गणे पठितानाम् 'अव्ययीभाव' संज्ञार्थम् समाससंज्ञार्थञ्चेदं सूत्रम् । एतेषां गणपठितानां समुदायानामेव निपातनम् । तेन शतृ–शानजादयः सुबन्तेन समासश्च स्वतः सिद्धः । तिष्ठद्गु = काल विशेषः । वहद्गु–वहन्ति गावो यस्मिन् काले सः । एवम् आयतीगवम् इत्यत्र पुंवद्भावाभावः, शत्रादेशः; समासान्तश्च निपात्यते । खलेयवम् इत्यत्र सप्तम्याः अलुक् निपात्यते । गणपाठे सर्वेषामुल्लेखो द्रष्टव्यः ।

पारे मध्ये षष्ठ्या वा ॥१८॥

एते षष्ठ्यन्तेन वा समस्येते, अव्ययीभावसमासश्च भवति । तत्संयोगे चानयोरेदन्तत्वं निपात्यते । पारेगङ्गम् । मध्येगङ्गम् । पक्षे गङ्गापारम् ।

एते–पारे, मध्ये इति पदे । पारं गङ्गाया इति विग्रहो बोध्यः । गङ्गापारमिति 'षष्ठीतत्पुरुष' समासोऽत्र भवति ।

संख्या वंश्येन ॥१९॥

वंशो द्विधा विद्यया, जन्मना च । तत्र भवो वंश्यः । तद्वाचिना

संख्या समस्यते । द्विमुनि व्याकरणस्य । यदा तु विद्यया सह तद्वताम-भेदविवक्षा तदा सामानाधिकरण्यम् । त्रिमुनि व्याकरणम् ।

प्राणिनामेकस्वभावः सन्तानः = सम्बन्धः वंशः । व्याकरणविद्यैक-स्वभावः संतानो वैयाकरणवंशः । जन्मना च ब्राह्मणवंशः । क्षत्रियवंशः इत्यदि । वंश्यः–दिगादित्वाद् यत्प्रत्ययः । उदाहरणमाह–द्विमुनि व्याकरणस्य । द्वौ मुनी = पाणिनिकात्यायनौ व्याकरणस्य वंश्यौ इति विग्रहः। व्याकरणस्येत्यत्र सम्बन्धे षष्ठी । एवं त्रिमुनि इत्यपि ज्ञेयम् । तत्र तृतीयो मुनिः पतञ्जलिः । त्रिमुनि व्याकरणम्–ये त्रयो मुनयस्त एव व्याकरणमिति तेषामतिशयेन व्याकरण-विद्यायोगमाख्यातुमभेदविवक्षा यदा क्रियते तदा व्याकरणेन सह सामानाधि-करण्यात् त्रिमुनि व्याकरणम् इति प्रयोगो भवति । जन्मना वंशस्योदाहरणम् एकविंशतिर्भारद्वाजस्य वंश्याः इति एकविंशति भारद्वाजम् इति ।

नदीभिश्च ॥२०॥

संख्या वर्तते । समाहारे चायमिष्यते । सप्तगङ्गम् ।

'संख्या' इति पदस्य चकारेणानुकर्षणं भवति । 'नदीभिः' इत्यत्र बहुवचननिर्देशात् नदीवाचिभिः गङ्गादिभिः सह 'अव्ययीभाव' समासो भवति । अयं समासः समाहारे एव भवति अभिधानस्वभावात् । सप्तगंगम्–सप्त गङ्गा समाहृता इति विग्रहः । एवं द्वियमुनम् इत्यादि ।

अन्यपदार्थे च संज्ञायाम् ॥२१॥

'नदी' इत्यनुवर्तते । वाऽधिकारेप्ययं नित्यसमासः । न हि वाक्येन संज्ञा गम्यते । उन्मत्तगङ्गं देशः ।

नदीवाचिभिः सहान्यपदार्थे वर्तमानं सुबन्तं संज्ञायां विषये समस्यते । संज्ञायां नित्यसमासः । उन्मत्तगङ्गम्–उन्मत्ता गङ्गा यस्मिन् देशे स इति विग्रहः । एवं लोहितगङ्गमित्यादि बोध्यम् ।

तत्पुरुषः ॥२२॥

प्राग्बहुव्रीहेरधिकारोऽयम् । वक्ष्यति–'द्वितीया श्रितातीत......' कष्टश्रितः ।

कष्टश्रितः–अत्र तत्पुरुषसंज्ञायां 'तत्पुरुषे तुल्यार्थ'इत्यादिना पूर्वपद-प्रकृतिस्वरत्वम् । पूर्वाचार्यैरियं महती संज्ञा कृता, तेन 'उत्तरपदार्थप्रधानस्त-

त्पुरुषः' इति विशेषणविशिष्टस्यार्थस्य लाभो भवतीति हेतोः महर्षिणापाणिनि-नापि साङ्गीकृता ।

द्विगुश्च ॥२३॥

द्विगुश्च तत्पुरुषसंज्ञः । प्रयोजनम् पञ्चराजी ।

द्विगोस्तत्पुरुषसंज्ञाविधानात् 'पञ्चराजी' इत्यत्र 'राजाहःसखिभ्यष्टच्' इत्यनेन टच् समासान्तो भवति । एवं द्व्यहः इत्यादिषु टिलोपः पुंस्त्वम्, पञ्चगवम् इत्यादिषु च नपुंसकत्वं भवति ।

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥२४॥

कष्टं श्रितः कष्टश्रितः ।

*(वा) श्रितादिषु गमिगाम्यादीनामुपसंख्यानम् । ग्रामगमी । ग्रामगामी । ओदनबुभुक्षुः ।

'सुप् सुपा' इत्यनुवृत्तेः द्वितीयान्तं सुबन्तं श्रितादिभिः सुबन्तैः सह समस्यते । स च 'तत्पुरुष' समासो भवति । श्रितादयः–श्रित–अतीत–पतित–गत–अत्यस्त–प्राप्त–आपन्नाः । उदाहरणानि–कष्टं श्रितः कष्टश्रितः । एवं कान्तारातीतः । नरकपतितः । ग्रामगतः । तरंगात्यस्तः । सुखप्राप्तः । सुखापन्नः इति । अत्यस्तः = व्यतिक्रान्तः । गमिगाम्युभयोरुपादानम् उणादीनामन्येषां च ग्रहणार्थम्, तेन आदेनबुभुक्षुः इत्यादिषु द्वितीया समासः ।

स्वयं क्तेन ॥२५॥

स्वयंधौतौ पादौ ।

स्वयम् इत्येतदव्ययम् 'आत्मना' इत्यर्थकम् क्तान्तेन समस्यते । एवं स्वयंविलीनमाज्यम् । समासे सति एकपदत्वं समासस्वरश्च भवति ।

खट्वा क्षेपे ॥२६॥

'द्वितीया' इत्यनुवर्तते । क्तान्तेन समस्यते निन्दायाम् । सर्व एवाविनीतः 'खट्वारूढः' इत्युच्यते । खट्वारूढो जाल्मः ।

क्षेपः–निन्दा । जाल्मः–अयुक्तकारी । यो भूमिशयनादौ खट्वाम् आरोहति स खट्वारूढः = अयुक्तकारी भवति । अयमपि नित्यसमासः, वाक्येन निन्दार्थस्याबोधात् । खट्वारोहणमत्र विरुद्धमार्गगमनस्योपलक्षणम् । आरूढः–आ √ रुह + क्त ।

सामि ॥२७॥

सामिकृतम् ।

समासत्वेन ऐकस्वर्यम्, ऐकपद्यं च भवति । सामि इत्येतदव्ययम् अर्ध-शब्दपर्यायः । तत् क्तान्तेन सह समस्यते, स च तत्पुरुषो भवति ।

कालाः ॥२८॥

अनत्यन्तसंयोगार्थं वचनम् । षण्मुहूर्त्ताश्चराचराः । अहरतिसृताः । अहःसङ्क्रान्ताः । कालाः = कालवाचिनः ।

'कालाः अत्यन्तसंयोगे' इत्येकेनैव सूत्रेण सिद्धे पृथक्सूत्रकरणम् अनत्यन्तसंयोगार्थम् । चराचराः–अनवस्थिताः । अहरतिसृताः–अहन् + अतिसृताः 'रोऽसुपि' इत्यह्नो रेफादेशः । एव मासं प्रमितः इति मासप्रमितः प्रतिपच्चन्द्रमाः । मासं प्रमातुमारब्ध इत्यर्थः ।

अत्यन्तसंयोगे च ॥२९॥

मुहूर्त्तसुखम् ।

कालवाचिनः शब्दाः द्वितीयान्ता अत्यन्तसंयोगेऽर्थे प्रतीयमाने सुपा सह समस्यन्ते । मुहूर्त्तं सुखम् इति विग्रहः । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया ।

तृतीया तत्कृतार्थेन गुणवचनेन ॥३०॥

तृतीयान्तार्थकृतगुणेन तृतीया समस्यतेऽर्थेन च । शंकुलाखण्डः ।

तृतीयान्तार्थ........–अयम्भावः–सूत्रे तदिति सर्वनाम्ना तृतीयान्तस्य प्रत्यवमर्शः । न च शब्देन गुणवचनस्य करणत्वं सम्भवतीत्यतः तृतीयान्तार्थकृतेनेति विज्ञायते । शंकुलाखण्डः–शंकुलया खण्डः इति विग्रहः । अत्र खण्ड, शब्दो 'घञ्' प्रत्ययान्तः क्रियारूपापन्ने गुणे वर्तते । ततोऽभेदोपचारात् खण्डवति द्रव्ये वर्तते इति गुणवचनः । स च तृतीयान्तशंकुलया कृत इति समासः । अर्थस्योदाहरणम् धान्येनार्थो धान्यार्थः ।

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥३१॥

एतैः सह तृतीयान्तं समस्यते । मासपूर्वः ।

*(वा) पूर्वादिष्ववरस्योपसंख्यानम् । मासावरः ।

एतैः–पूर्वादिभिः । **मासपूर्वः**–मासेन पूर्व इति विग्रहः । एतत्सूत्र-प्रामाण्यादेव पूर्वादिभिर्योगे तृतीयाविभक्तिः । मात्रा सदृशः **मातृसदृशः** । पित्रा समः **पितृसमः** माषेणोनम् **माषोनम्** । वाचा कलहः **वाक्कलहः** । आचारेण निपुणः **आचारनिपुणः** । गुडेन मिश्रः **गुडमिश्रः** । आचारेण श्लक्ष्णः **आचारश्लक्ष्णः** इत्युदाहरणानि बोध्यानि ।

कर्तृकरणे कृता बहुलम् ॥३२॥

कर्तरि करणे च तृतीया कृदन्तेन बहुलं समस्यते । अहिहतः । नखभिन्नः । बहुलं किम् ? दात्रेण लूनवान् ।

कर्तरि करणे–सूत्रे कर्तृकरणे इति प्रथमा द्विवचनान्ते, तृतीयेत्यनुवर्तते । कर्तृतृतीयाया उदाहरणम् अहिहतः करणतृतीयायाश्च नखभिन्नः । अहिना हतः, नखैर्भिन्नः इति विग्रहौ । बहुलग्रहणात् दात्रेण लूनवान् इत्यत्र समासो न भवति । पादहारकः (पादाभ्याम् ह्रियते) इत्यत्र चापादानपञ्चम्यन्तेन चतुर्थ्यन्तेन वा समासो भवति ।

कृत्यैरधिकार्थवचने ॥३३॥

स्तुतिनिन्दाप्रयुक्तमध्यारोपितार्थवचनमधिकार्थवचनम् । कर्तृ-करणे कृत्यैः सहाधिकार्थवचनेन समस्येते । कर्तरि–काकपेया नदी । करणे–नखच्छेद्यं तृणम् ।

अधिकार्थवचनम्–यत्र कथने स्तुतिः निन्दा चोभेऽपि बुद्धयाऽऽरोप्येते । काकपेया–एवं पूर्णतोया यत्तटस्थैः काकैरपि पातुं शक्येति स्तुतिस्तथा एवमल्प-तोया यत्काकैरपि पातुं शक्येति निन्दा गम्यते । **नखच्छेद्यम्**–एवं कोमलं तृणं यन्नखेन छेद्यमिति स्तुतिः, जर्जरमिति निन्दा ।

अन्नेन व्यञ्जनम् ॥३४॥

दध्ना उपसिक्त ओदनः दध्योदनः ।

अन्नं संस्कार्यम् । **व्यञ्जनं**-संस्कारकम् । समासवृत्तौ उपसेचन-क्रियाया अन्तर्भावात् उभयोरन्न–व्यञ्जनयोर्दध्योदनयोः सामर्थ्यम् ।

भक्ष्येण मिश्रीकरणम् ॥३५॥

गुडेन मिश्रा धानाः गुडधानाः ।

अमिश्रं मिश्रं क्रियतेऽनेनेति मिश्रीकरणम् । अत्रापि वृत्तौ मिश्रण-

क्रियाया अन्तर्भावात् उभयोः सामर्थ्यम् । भक्ष्यशब्दः हनुचलनेनाभ्यवहार्यार्थे रूढः । तस्य संस्कारकं मिश्रीकरणम् । अभ्यवहार्यम् = अदनीयम् । कठिनमन्नं खरं विशदं च कथ्यते, तस्य मुखे पेषणं क्रियते । तदर्थं संस्कारकद्रव्यस्य गुडादेः मिश्रणं भवति ।

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ॥३६॥

तदिति सर्वनाम्ना चतुर्थ्यन्तस्यार्थः । तस्मा इदं तदर्थम् । एतेन, एतैश्च चतुर्थ्यन्तं समस्यते । तदर्थेन प्रकृतिविकारभावे समास इष्यते । यूपाय दारु यूपदारु इत्यादि ।

एतेन–तदर्थेन । एतैः–अर्थ-बलि-हित-सुख-रक्षितैः । यूपाय दारु यूपदारु-अत्र प्रकृतिः दारु, विकृश्चियूपः । एवं द्विजार्थं पयः । भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् इतीमान्युदाहरणानि ।

*(वा) अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या । ब्राह्मणार्थं पयः । ब्राह्मणार्था यवागूः ।

पञ्चमी भयेन ॥३७॥

वृकभयम् ।

*(वा०) भयभीतभीतिभीभिरिति वाच्यम् ।

पञ्चम्यन्तं सुबन्तं भयशब्देन समस्यते । स च तत्पुरुषो भवति । वृकेभ्यो भयम् इति विग्रहः । वृकभीतः । वृकभीतिः । वृकभीः इत्युदाहरणत्रयम् अपि ।

अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ॥३८॥

एतैरल्पार्था पञ्चमी समस्यते । दुःखापेतः । अल्पश इति समासस्याल्पविषयतामाचष्टे, तस्मात् प्रासादात्पतित इत्यादौ न ।

एतैः–अपेत-अपोढ-मुक्त-पतित-अपत्रस्तैः । दुःखादपेतः इति विग्रहः । अल्पशः–इत्यत्र 'बह्वल्पार्थात्.....' इत्यनेनाल्पशब्दात् 'शस्' प्रत्ययः । अल्पविषयतामाचष्टे–अर्थात् यत्र पञ्चम्यन्तं प्रातिपदिकम् अल्पार्थकं तत्रैव समासः । प्रासादात् पतितः इत्यादौ तु सर्वप्रासादवाचिनः प्रातिपदिकाद् उत्पन्ना पञ्चमी ।

स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ॥३९॥

एतानि क्तेन समस्यन्ते । स्तोकान्मुक्तः । 'पञ्चम्याः स्तोकादिभ्यः' इत्यलुक् इत्यादि ।

एतानि–स्तोक-अन्तिक-दूरार्थकाः कृच्छ्रशब्दश्च । क्तेन–'क्त' प्रत्ययान्तेन । समासस्य फलं तु स्वरादि बोध्यम् । अन्तिकादागतः । दूरादागतः । कृच्छ्रान्मुक्तः इत्युदाहरणान्यपि ज्ञेयानि ।

सप्तमी शौण्डैः ॥४०॥

अक्षेषु शौण्डः अक्षशौण्डः । शौण्डादयः 'अधिपटु, प्रवीण' इत्यादयः ।

सप्तम्यन्तं शौण्डादिभिः सह समस्यते । शौण्डैः–इत्यत्र बहुवचननिर्देशात् आद्यर्थो लभ्यते । अक्षेषु इत्यत्र प्रसक्तिक्रियाया अन्तर्भावात् अधिकरणे सप्तमी । एवम् अक्षधूर्त्तः ।

सिद्धशुष्कपक्वबन्धैश्च ॥४१॥

सांकाश्यसिद्धः इत्यादि ।

संकाशेन निर्वृत्तं वनं सांकाश्यम् (संकाश+ण्य) सांकाश्ये सिद्धः इति विग्रहः । आतपशुष्कः । स्थालीपक्वः । चक्रबन्धः इत्युदाहरणान्यपि बोध्यानि ।

ध्वांक्षेण क्षेपे ॥४२॥

अर्थग्रहणम् । ध्वांक्षवाचिना सुबन्तेन सप्तम्यन्तं समस्यते क्षेपे । तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः । अनवस्थित इत्यर्थः । क्षेपे किम ? तीर्थे ध्वांक्षस्तिष्ठति ।

व्याख्यानादर्थप्रधानत्वाच्चोपदेशस्य तस्यैव ग्रहणं भवति । अनवस्थितः–यथा ध्वांक्षाः=काकाः चिरं न तिष्ठन्ति तथाऽयमपि कार्यं प्रत्यनिश्चितः ।

कृत्यैर्ऋणे ॥४३॥

'कृत्य'प्रत्ययान्तैर्ऋणे गम्ये सप्तम्यन्तं समस्यते । मासे देयम् ऋणम् मासदेयम् । नियोगोपलक्षणार्थमेतत् । पूर्वाह्णगेयं साम ।

नियोगः-अवश्यम्भावः । ऋणम् अवश्यदेयम् इति साहचर्यान्नियोगमात्रमुपलक्षयति । यथा ऋणम् अवश्यदेयम् तथा सामापि पूर्वाह्णे अवश्यगेयमिति नियोगोऽत्र वर्तते ।

संज्ञायाम् ॥४४॥

सप्तम्यन्तं समस्यते संज्ञायां विषये । संज्ञा = समुदायोपाधिः । नित्यसमासोऽयम् । अरण्येतिलकः ।

समुदायोपाधिः-समुदायेन चेत् संज्ञा गम्यते । अत एव नित्यसमासः । नहि समुदायेन संज्ञा गम्यते । अरण्येतिलकः-'हलदन्तात्सप्तम्याः संज्ञायाम्' इति सप्तम्या अलुक् ।

क्तेनाहोरात्रावयवाः ॥४५॥

पूर्वाह्णे कृतं पूर्वाह्णकृतम् ।

अहरवयवाः रात्र्यवयवाश्च सप्तम्यन्ताः क्तान्तेन सह समस्यन्ते । पूर्वरात्रे कृतं पूर्वरात्रकृतम्, इत्याद्युदाहरणानि बोध्यानि ।

तत्र ॥४६॥

'तत्र' इत्येतत् सप्तम्यन्तं क्तान्तेन समस्यते । तत्रकृतम् । तत्रभुक्तम् ।

'सप्तमी' इत्यस्य साधर्म्यात्सप्तम्यन्तमेवेत्यर्थः । तेन तत्र भवान् इत्यादौ विभक्त्यन्तरे न समासः । समासत्वादैकपद्यम्, ऐकस्वर्यञ्च भवति ।

क्षेपे ॥४७॥

क्षेपे गम्यमाने सप्तम्यन्तं क्तान्तेन सह समस्यते । भस्मनिहुतम् । निष्फलमित्यर्थः ।

भस्मनिहुतम्-'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् ।

पात्रेसमितादयश्च ॥४८॥

समुदाया एव निपात्यन्ते । पात्रेसमिताः । पात्रेबहुलाः ।

अवधारणेनात्र क्षेपो गम्यते । 'पात्र एव समिता न क्वचित्कार्ये' इत्यर्थः । कूपमण्डूक । पितरिशूरः ।

पात्रे–भोजनसमये एव समिताः-सङ्गता इत्यर्थः । आकृतिगणोऽयम्, तेन गेहेशूरः, उदुम्बरमशकः इत्यादिपदानां सिद्धिर्भवति ।

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ॥४९॥

एते समानाधिकरणेन सुबन्तेन समस्यन्ते । पूर्वकाल इत्यर्थ-निर्देशः । शिष्टेषु स्वरूपग्रहणम् । पूर्वकालोऽपरकालेन समस्यते । स्नातानुलिप्तः ।

एते–पूर्वकालः (पूर्वानुष्ठितः)–एकः–सर्वः–जरत्–पुराणः–नवः–केवलः इति सुबन्तशब्दाः । समानाधिकरणेन–भिन्नप्रवृत्तिनिमित्तस्य शब्द-स्यैकस्मिन्नर्थे वृत्तिः–सामानाधिकरण्यम् तद्विशिष्टेन । स्नातानुलिप्तः–पूर्वं स्नातः पश्चादनुलिप्तः इत्यर्थः । एवम् एकशाटी । सर्वदेवाः । जरद्धस्ती । पुराणान्नम् । नवान्नम् । केवलान्नम् इत्युदाहरणानि ।

दिक्संख्ये संज्ञायाम् ॥५०॥

दिक्संख्यावाचिनः सुबन्ताः समानाधिकरणेन समस्यन्ते संज्ञायाम् । पूर्वेषुकामशमी । पञ्चाम्राः ।

संज्ञायामेवेति नियमार्थं सूत्रम् । पूर्वा चासौ इषुकामशमी चेति विग्रहवाक्यम् । अत्र वाक्येन संज्ञा न गम्यते, अत एव नित्यसमासः ।

तद्धितार्थोत्तरपदसमाहारे च ॥५१॥

'दिक्संख्ये' इत्यनुवर्त्तते । ते तद्धितार्थे विषये, उत्तरपदे च परतः समाहारे च वाच्ये समानाधिकरणेन सुबन्तेन सह समस्येते । पौर्वशालः । पूर्वशालाप्रियः । पाञ्चनापितिः इत्यादि ।

पौर्वशालः-पूर्वस्यां शालायां भवः इति विग्रहः । इदं दिशि तद्धितार्थ-स्योदाहरणम् । उत्तरपदपरत्वस्योदाहरणम् पूर्वशालाप्रियः इति । समाहारे दिक्शब्दो न सम्भवति । संख्यायां तद्धितार्थस्योदाहरणम् पाञ्चनापितिः–पञ्चानां नापितानामपत्यमिति विग्रहः । उत्तरपदपरत्वस्योदाहरणम् पञ्च गावो धनं यस्येति पञ्चगवधनः । समाहारस्योदाहरणम् पञ्चानां पूलानां समाहार इति पञ्चपूली ।

संख्यापूर्वो द्विगुः ॥५२॥

पूर्वसूत्रे यः संख्यापूर्वः समासः स द्विगुर्भवति । दशकपालः । संख्यापूर्वत्वं विशेषणम् ।

द्विगुः–द्विगुसंज्ञकः । दशकपालः–दशसु कपालेषु संस्कृतः इति विग्रहः । तद्धितप्रत्ययस्य 'द्विगोर्लुगनपत्ये' इत्यनेन लुक् ।

कुत्सितानि कुत्सनैः ॥५३॥

कुत्सितवाचिनः शब्दाः कुत्सनवचनैः सह समस्यन्ते । याज्ञिककितवः ।

कुत्सितानि, कुत्सनैः इत्युभयत्रापि बहुवचननिर्देशादर्थग्रहणम् । कुत्सायामेवायं समास इष्यते । याज्ञिकश्चासौ कितवश्चेति विग्रहः यथा कितवः 'किं तवास्ति' इति धनमात्रप्रश्नेन जात्यादिकमपृष्ट्वैव द्यूते प्रवर्त्तते, एवं कितव इव यो याज्ञिको याजने प्रवर्त्तमानोऽयाज्यस्य धनवत्तामात्रमपेक्षते । न तु तस्य यागार्हतां स याज्ञिककितव उच्यते । एवं वैयाकरणखसूचिः (निष्प्रतिभः) । मीमांसकदुर्दुरूढः (नास्तिकः) इत्यप्युदाहरणे स्तः । विशेष्यस्य पूर्वनिपातार्थं सूत्रम् ।

पापाणके कुत्सितैः ॥५४॥

पाप–अणक, एतौ कुत्सनाभिधायिनौ शब्दौ कुत्सितवचनैः सह समस्येते । पापनापितः । अणकनापितः ।

पूर्वनिपातार्थमिदं सूत्रम् । पापश्चासौ नापितः, अणकश्चासौ नापितः इति विग्रहवाक्ये । आणकनापितः इत्यपि भवति, अणक, आणक उभयोरपि कुत्सनार्थकत्वादित्यपि बोध्यम् ।

उपमानानि सामान्यवचनैः ॥५५॥

उपमीयतेऽनेनेत्युपमानम् । उपमानोपमेययोः साधारणो धर्मः सामान्यम् । शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता ।

सामान्यवचनैः–सामान्यविशिष्टोपमेयवचनैरित्यर्थः । सामान्यम् उक्तवन्तः इति सामान्यवचनास्तैः । शस्त्रीश्यामा देवदत्ता–अत्रोपमानं शस्त्री, उपमेया देवदत्ता तयोः साधारणो धर्मः श्यामत्वं तद्विशिष्टेन श्यामाशब्देन समासो भवति । शस्त्री–छुरिका तस्याः श्यामत्वं प्रसिद्धमेव ।

श्यामाशब्दोऽभेदोपचारात् देवदत्तायां वर्तते। इति शस्त्र्याः उपमानत्वं श्यामायाः उपमेयत्वं च सिद्धयति।

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥५६॥

उपमेयवाची व्याघ्रादिभिरुपमानवचनैः समस्यते। न चेत् सामान्यधर्मः प्रयुज्यते। पुरुषव्याघ्रः। तत् किम्? पुरुषः व्याघ्र इव शूरः।

उपमितम्–उपमेयम्। उपमानवचनैरिति उपमेयापेक्षया सामर्थ्येन लभ्यते पुरुषः व्याघ्र इवेति विग्रहः। अत्रोभयोः सामान्यधर्मः=शौर्यं न प्रयुक्तम्। विशेष्यस्य पूर्वनिपातार्थमिदं सूत्रम्। आकृतिगणोऽयम् तेन मुखकमलम्। करकिसलयमित्यादि प्रयोगाः सिद्धयन्ति। तत्–सामान्याप्रयोगः।

विशेषणं विशेष्येण बहुलम् ॥५७॥

नीलोत्पलम्। बहुलग्रहणम् व्यभिचारार्थम्। नित्यसर्पः। रामो जामदग्न्यः। नीलमुत्पलं नीलोत्पलम्।

विशेषणं सुबन्तं विशेष्यवाचिना सुबन्तेन बहुलं समस्यते। व्यभिचारः–नियमातिक्रमणम्। तदर्थं बहुलग्रहणम्। तेन नित्यसर्पः नित्यः=शाश्वतः सर्पः इत्यत्र नित्यं समासो भवति। रामो जामदग्न्यः इत्यत्र न भवति। नीलम् उत्पलं नीलोत्पलमित्यत्र विकल्पेन भवति।

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ॥५८॥

एते समानाधिकरणेन सुपा समस्यन्ते। पूर्वपुरुषः। अपरपुरुषः।

एते – पूर्व-अपर - प्रथम-चरम - जघन्य-समान-मध्य-मध्यम-वीर इति शब्दाः। सुपा–सुबन्तेन। पूर्वश्चासौ पुरुषश्चेति विग्रहः। एवं प्रथमपुरुषः। चरमपुरुषः। जघन्यपुरुषः। समानपुरुषः। मध्यपुरुषः। मध्यमपुरुषः। वीरपुरुषः इति उदाहरणानि सन्ति।

श्रेण्यादयः कृतादिभिः ॥५९॥

*(वा०) श्रेण्यादिषु च्व्यर्थवचनं कर्त्तव्यम्। अश्रेणयः श्रेणयः कृताः इति श्रेणिकृताः। कृतादिराकृतिगणः।

एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूहः श्रेणिः। च्व्यर्थ-वचनम्—तेन पृथक् स्थितानां श्रेणिकरणे प्रवृत्तिर्भवति। श्रेणीनामपि दण्डितानां प्रयोगे न भवति। कृतादिः आकृतिगणः—आकृत्या = प्रयोगदर्शनेन ग्राह्यो गणः इत्यर्थः। श्रेण्यादीनां तु गणे पाठः।

क्तेन नञ्विशिष्टेनानञ् ॥६०॥

नञैव विशेषो यस्य सर्वमन्यत् प्रकृत्यादिकं तुल्यं तन्नञ्-विशिष्टम्। तेन क्तान्तेन सह अनञ् क्तान्तं समस्यते। कृतं च तदकृतं च कृताकृतम्। भुक्ताभुक्तम्।

अत्र विशिष्टशब्दोऽवधारणसहिताधिकार्थवाचकः। तेन यत्र नञर्थं विना सर्वं प्रकृतिप्रत्ययादिकं समानं भवति तत्रैव समासः। कृतम् अकृतम् इत्युभयोरेकस्मिन् कृत पदे अवधारणम्, नञर्थोऽधिकः अतोऽत्र समासः। सिद्धं च तदभुक्तञ्चेति पदयोर्न समासः प्रकृतेर्भिन्नत्वात्। अत्र नुट्, इट् इत्यादिका आगमाः न भेदकाः भवन्ति, तेन अशितानशितेन जीवति। क्लिष्टाक्लिशितेन वर्तते इत्यादयः प्रयोगाः सिद्ध्यन्ति।

❀(वा०) कृतापकृतादीनामुपसंख्यानम्। कृतापकृतम्। गतप्रत्यागतम् इत्यादि।

❀(वा०) समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तर-पद लोपश्च। शाकप्रधानः पार्थिवः शाकपार्थिवः। शाकः प्रधानं यस्य स शाकप्रधानः (बहुव्रीहिः) शाकप्रधानः पार्थिवः इति विग्रहः। 'शाकप्रधान' इत्यत्रोत्तरपदस्य 'प्रधान' इत्यस्य लोपः।

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ॥६१॥

सत्पुरुषः इत्यादि।

सत्-महत्-परम-उत्तम-उत्कृष्ट इति पूजार्थकाः शब्दाः पूज्यमानैः उत्तरपदैः सह समस्यन्ते। उदाहरणानि—सत्पुरुषः। महापुरुषः। आन्महतः····· इति सूत्रेण 'महत्' इत्यन्तस्यात्त्वम्। परमपुरुषः। उत्तमपुरुषः। उत्कृष्टपुरुषः इति। महाजनः महोदधिः इत्यादौ पूजाया अभावेऽपि 'विशेषणं विशेष्येण·····' इति समासः, बहुलग्रहणानुवृत्तेर्वा।

वृन्दारकनागकुञ्जरैः पूज्यमानम् ॥६२॥

'पूज्यमानम्' इति वचनात् वृन्दारकादयः पूजा। शब्दाः गृह्यन्ते। गोवृन्दारकः। प्रशस्तो गौरित्यर्थः।

वृन्दारक शब्दः देवजातिवाचकः । तथा नागकुञ्जरौ हस्तिजातिवाचिनौ इमे । सर्वे उपमानभूताः एव पूजार्थकाः । गोनागः । गोकुञ्जरः इत्याद्युदाहरणानि । 'उपमितं व्याघ्रादिभिः·····' इत्यत्र व्याघ्रादेराकृतिगणत्वादेव सिद्धे समासे पूजायामेव यथा स्यात्, निन्दायां मा भूत् माणवकोऽयं नागः (मूर्खः) ।

कतरकतमौ जातिपरिप्रश्ने ।।६३।।

एतौ जातिपरिप्रश्ने वर्तमानौ समस्येते । कतरः कठः कतरकठः ।

'गोत्रं च चरणैः सह' इति वचनात् कठशब्दो जातिवाचकः । कठेन प्रोक्तमधीते इति कठः 'कलापिवैशम्पायनान्तेवासिभ्यश्च' इत्यनेन प्रोक्तप्रत्ययस्य 'णिनि' इत्यस्य 'कठचरकाल्लुक्' इति लोपः । एवं कलापिना प्रोक्तमधीते इति कालापः । 'कलापिनोऽण्' इत्यनेन कलापिन्+अण् कतरः कालापः इति कतरकालापः । कतमकठः । कतमकालापः इत्युदाहरणद्वयमपि ज्ञेयम् । कतरकतमौ जातिपरिप्रश्नादन्यत्रापि वर्तेते तत्र न भवति । कतरो भवतोर्देवदत्तः कतमो भवतां देवदत्तः । अत्र क्रमशः 'डतरच्-डतमच्' इति प्रत्ययौ निर्धारणे स्तः ।

किं क्षेपे ।।६४।।

किं शब्दः क्षेपे गम्ये सति समस्यते । किं राजा यो न रक्षति ।

क्षेपः–निन्दा । कुत्सितो राजेति विग्रहः । 'किमः क्षेपे' इति निषेधात् 'राजाहःसखिभ्यष्टच्' इत्यनेन टच् समासान्तो न भवति । 'स किंसखा' इति भारविः ।

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ।।६५।।

स्त्रीपुंसलक्षणा पोटा । गृष्टिरेकबारप्रसूता गौः । वशा वन्ध्या । वेहद् गर्भघातिनी । बष्कयणी तरुणवत्सा । पोटादिभिः सह जातिवाचि सुबन्तं समस्यते । इभ्यपोटा । इभ्ययुवतिः । अग्निस्तोकः । उदश्वित्कतिपयम् । गोगृष्टिः । गोधेनुः । गोवशा । गोवेहत् । गोबष्कयणी । कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः । कठधूर्तः ।

स्त्रीपुंसलक्षणा–स्त्री, पुमान्; तयोर्लक्षणम्—स्तनादि यस्याः सा। नपुंसकम् इत्यर्थः। नपुंसकवाचो 'पोटा' शब्दः स्त्रीलिङ्गः 'षण्डः' इति 'पुंल्लिगः'। अयं शब्दशक्तिमहिमा। यथोक्तम्—

पोटाशब्दस्तु तत्रापि स्त्रीत्वयुक्तः प्रवर्त्तते।
शब्दानां चित्रशक्तित्वात् षण्डशब्दो यथा पुमान्॥

युवतिः–नवयौवना स्त्री। स्तोकम्–अल्पम्। कतिपयम्–अल्पादधिकम्। धेनुः–प्रत्यग्रप्रसूता। प्रवक्ता–वेदोपदेष्टा। श्रोत्रियः–वेद-वेदाङ्गपारङ्गतः। अध्यापकः–शिक्षकः (वेदगुरुः, जीविकाशास्त्रगुरुश्च) धूर्त्तः–वञ्चकः।

इभ्यपोटाप्रभृतिषु 'विशेषणं विशेष्येण·····' इति समासे प्राप्ते परनिपातार्थमिदं सूत्रम्। अन्यथा पोटादीनां गुणवाचकानां पूर्वनिपातः प्रसज्येत। पोटा इभ्या, युवतिः इभ्या इत्यादि विग्रहः। उदश्वित्–तक्रं ह्युदश्विन्मथितम्। कठधूर्त्तः–यः कठः सः धूर्त्तं इत्यर्थः। अत्र जातिर्न कुत्सिता धूर्त्तस्य सम्बन्धमात्रे विवक्षिते समासो भवति।

प्रशंसावचनैश्च ॥६६॥

जातिवाचि सुबन्तं एतैः समस्यते। रूढिशब्दाः प्रशंसावचना गृह्यन्ते। ते च विशिष्टलिङ्गत्वादन्यलिङ्गेऽपि जातिशब्दे स्वलिङ्गोपादाना एव समानाधिकरणा भवन्ति। अश्वप्रकाण्डम्। गोमतल्लिका। गोमर्चचिका।

रूढिशब्दाः–अयम्भावः–त्रिविधाः प्रशंसाशब्दाः सन्ति। केचिज्जातिशब्दाः परार्थे प्रयुज्यमानाः प्रशंसां ब्रुवन्ति यथा—सिंहो देवदत्तः। केचिद् गुणशब्दाः गुणगुणिनोः सम्बन्धेन प्रशंसावाचकाः सन्ति यथा—रमणीयो ग्रामः। केचिद् रूढिशब्दाः। अत्र वचनग्रहणात् प्रशंसावाचिन एव ये सन्ति ते न तु जाति शब्दाः, गुणशब्दाः वा रमणोयादयः। विशिष्टलिङ्गत्वात्–नियतलिङ्गत्वात्। स्वलिङ्गोपादानाः–स्वस्य लिङ्गस्योपादानं येषु ते। यथा प्रकाण्डशब्दे नपुंसकत्वम्। अश्वप्रकाण्डम्–प्रशस्तः अश्वः इत्यर्थं। मतल्लिकामर्चचिकाप्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनि·········। इत्यमरः।

युवा खलतिपलितवलिनजरतीभिः ॥६७॥

युवशब्दः खलत्यादिभिः समानाधिकरणैः समस्यते। युवा

खलतिः युव खलतिः । युवतिर्जरती युवजरती । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।

प्रातिपदिक… ग्रहणम्–एषा परिभाषाऽस्ति । अत्र प्रमाणं जरतीति स्त्रीलिङ्गनिर्देशः । न हि युवा जरती इत्यनयोः सामानाधिकरण्यं भवितुमर्हति । अतः 'युव' शब्द ग्रहणे 'युवति' शब्दस्य ग्रहणं भवति । युवति-जरता-शब्दयोः सामानधिकरण्यं भवत्येव । तेन तयोः समासः सूपपद्यते । युवा पलितः युवपलितः । युवतिः पलिता युवपलिता । युवा वलिनः युववलिनः युवतिर्वलिना युववलिना इत्यप्युदाहरणचतुष्टयं बोध्यम् ।

कृत्यतुल्याख्या अजात्या ॥६८॥

कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्च अजातिवचनैः सह समस्यन्ते । भोज्योष्णम् । पानीयशीतम् । तुल्यश्वेतः । सदृशश्वेतः । अजात्या किम् ? प नीयं जलम् ।

सूत्रे आख्याग्रहणम् स्वरूपनिरासार्थम् । कृत्यप्रत्ययान्तस्य तुल्यपर्यायस्य च पूर्वनिपातार्थमिदम् । भोज्यञ्च तदुष्णम् । तुल्यश्चासौ श्वेतः इत्यादि विग्रहो बोध्यः । पानीयं जलम्–अत्र जलशब्दो जातिवाचकः । अत्र प्रतिषेधसामर्थ्यात् 'विशेषणं विशेष्येण बहुलम्' इति विशेषणसमासोऽपि न । एवं भोज्य ओदनः इत्यपि ।

वर्णो वर्णेन ॥६९॥

वर्णविशेषवाचि तादृशेनैव समस्यते । कृष्णशबलः ।

तादृशेन–वर्णविशेषवाचिना । कृष्णशबलः–इत्यत्रावयवद्वारा कृष्णशब्दोऽपि समुदायवाचीत्युभयोः सामानाधिकरण्यम् । 'कृष्ण' इति शब्द उपलक्षणम् । लोहितसारङ्गः इत्यत्र लोहित शब्दोऽपि सारङ्गेण समानाधिकरणो भवति । कृष्णावयवत्वात्समुदाय एव कृष्ण उच्यते, लोहितावयवसम्बन्धात् समुदायोऽपि लोहितो भवति । इदं गौणं सामानाधिकरण्यं कथ्यते । तेन 'विशेषणं विशेष्येण……' इत्यनेनात्र समासो न भवति । अत्र कृष्णशब्दस्यैव पूर्वनिपातो भवत्युपसर्जनत्वात् ।

कुमारः श्रमणादिभिः ॥७०॥

अयमेतैः समस्यते । येऽत्र श्रमणा, प्रव्रजितेत्येवमादयस्तैः सह

कुमारशब्दः स्त्रीलिङ्ग एव समस्यते । येऽन्यथा तेऽन्यथा । कुमारी श्रमणा कुमारश्रमणा । कुमाराध्यापकः ।

अयम्-कुमारशब्दः । एतैः-श्रमणादिभिः । श्रमणादिषु कतिपये शब्दाः पुंल्लिङ्गा कतिपये च स्त्रीलिङ्गाः सन्ति । स्त्रीलिङ्गैः श्रमणादिभिः सह कुमारी शब्दः समस्यते, पुंल्लिगैः अध्यापकादिभिः सह कुमारशब्दः । अत्र प्रमाणम् 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषा ।

चतुष्पादो गर्भिण्या ॥७१॥

चतुष्पाद्वाचिनः गर्भिणीशब्देन समानाधिकरणेन समस्यन्ते । गोगर्भिणी ।

चतुष्पादः-चत्वारः पादाः यासां ताः । गोश्च सा गर्भिणीति विग्रहः । विशेषणसमासेन सिद्धे गर्भिणोशब्दस्य परनिपातार्थं सूत्रम् ।

मयूरव्यंसकादयश्च ॥७२॥

समुदाया एते निपात्यन्ते । ते च तत्पुरुषाः । मयूरव्यंसकः । काम्बोजमुण्डः । छन्दसि-हस्तेगृह्य । पादेगृह्य । आकृतिगणोऽयम् ।

जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति । जहिजोडः । जहिस्तम्बः ।

व्यंसकः-धूर्त्तः मयूरश्चासौ व्यंसकश्चेति विशेषणत्वाद् ,व्यंसकशब्दस्य पूर्वनिपाते प्राप्ते परनिपातार्थं सूत्रम् । काम्बोज इव मुण्डः अत्रोपमानसमासः । जहिजोडः-जहि जोडम् इत्यभीक्ष्णं य आह स उच्यते जहि जोडः । एवं जहिस्तम्बम् इत्यभोक्ष्णं य आह स कथ्यते जहिस्तम्बः ।

आकृतिगणत्वादस्य 'आख्यातमाख्यातेन क्रिया सातत्ये ।' इति तिङन्तं तिङन्तेन समस्यते क्रियायाः सातत्ये गम्यमाने । क्रिया प्रधासश्चायं समासो बोध्यः । एहिस्वागता (एहि स्वागतम् इति यस्यां क्रियायाम् असकृदुच्यते सा) एवम् एहीडम् । आहरवसना । कृन्तविचक्षणा । उत्पतनिपता इत्यादि प्रयोगाः द्रष्टव्याः । अनेनैव सूत्रेण उच्चावचम् । निश्चप्रचम् । अकिञ्चनम् । अश्नीतपिबता । पचलवणा इत्यादि प्रयोगाः सिद्ध्यन्ति । अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः ।

अविहितलक्षणः–यस्य तत्पुरुषस्य लक्षणं न कृतम्, परं प्रयोगो दृश्यते सः ।

समर्थोऽन्यपदार्थसिद्धशुष्कसन्मह द्वादश ।

इति श्रीमदाचार्यबलभद्रेण विरचिते काशिकावृत्तिसारे
द्वितीयाध्यायस्य प्रथमः पादः ।

द्वितीयाध्यायस्यास्मिन् प्रथमे पादे समर्थः पदविधिः, अन्यपदार्थे च संज्ञायाम्, सिद्धशुष्कपक्वबन्धैश्च, इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः इत्यत आरभ्य द्वादश सूत्राणीति संकलनेन द्विसप्ततिः (७२) सूत्राणि सन्ति ।

इति काशिकावृत्तिसार-सुधायां
द्वितीयाध्यायस्य प्रथमः पादः

अथ द्वितीयाध्याये द्वितीयः पादः

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ॥१॥

पूर्वादयोऽवयवा अवयविना वा समस्यन्ते । एकं चेद्द्रव्यम् । षष्ठीसमासापवादः । पूर्वं कायस्य पूर्वकायः । एकदेशिना किम् ? पूर्वं नाभेः कायस्य । एकाधिकरणे किम् ? पूर्वं छात्राणाम् ।

सर्वेणैकदेशेनाह्नः समासः । 'संख्याविसायपूर्वस्याह्नस्य' इति ज्ञापकात् । मध्याह्नः । सायाह्नः ।

पूर्वादयः—पूर्व-अपर-अधर-उत्तर शब्दाः (अवयववाचिनः) एकदेशिना—एकः देशः अस्ति अस्येति (एक देश + इनि) तेन अवयविनेत्यर्थः । एकाधिकरणे इत्यत्र तृतीयार्थे सप्तमी । अत्र 'एकदेशिना' इत्यस्य विशेषणम् 'एकाधिकरणे' इति पदम् । तदाह-एकं चेद्द्रव्यम्-अवयवी चेदेकत्वसंख्याविशिष्ट इत्यर्थः । 'पूर्वकायः' इति तु कर्मधारयसमासेन सिद्ध्यति । 'कायपूर्वः' इत्यस्य निवृत्त्यर्थमेव सूत्रम् । ज्ञापकात्-अन्यथा 'अह्नशब्दस्य सायपूर्वत्वं नोपपद्यते इति भावः ।

अर्द्धं नपुंसकम् ॥२॥

समप्रविभागे 'अर्धं' शब्दो नपुंसकम् । तदेकदेशिना समस्यते । अर्द्धं पिप्पल्याः अर्धपिप्पली । नपुंसकं किम् ? ग्रामार्द्धः ।

समप्रविभागः—समांशः । समः = तुल्यः प्रविभागः । तस्मिन्नर्थे 'अर्द्ध' इति शब्दो नियत-लिङ्गः नपुंसकलिङ्गो भवति ।

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ॥३॥

षष्ठीसमासापवादः । 'अन्यतरस्याम्' ग्रहणात् सोऽपि भवति, पूरणेति निषेधश्च न प्रवर्त्तते । एतान्येकदेशिनैकाधिकरणेन वा समस्यन्ते । द्वितीयं भिक्षायाः द्वितीयभिक्षा पक्षे भिक्षाद्वितीयम् ।

एतानि—द्वितीय-तृतीय-चतुर्थ-तुर्य इति पदानि । भिक्षाद्वितीयम् इत्यत्र षष्ठीसमासः । एवं तृतीयभिक्षा/भिक्षातृतीयम् । चतुर्थभिक्षा/भिक्षा–चतुर्थम् । तुर्यभिक्षा/भिक्षातुर्यम् ।

❀ (वा०) तुरीयशब्दस्यापीष्यते । तुरीयभिक्षा/भिक्षातुरीयम् ।

प्राप्तापन्ने च द्वितीयया ॥४॥

द्वितीयासमासे प्राप्ते वचनम् । विधानसामर्थ्यात्सोऽपि । एते शब्दरूपे द्वितीयान्तेन समस्येते । प्राप्तजीविकः ।

सोऽपि—'द्वितीया श्रित·········प्राप्तापन्नैः' इति सूत्रेण द्वितीया-समासोऽपि । प्राप्तो जीविकाम् इति विग्रहः । द्वितीयासमासे जीविका–प्राप्तः । आपन्नजीविकः/जीविकापन्नः ।

कालाः परिमाणिना ॥५॥

मासो जातस्य मासजातः ।

परिमाणम् अस्यास्तीति परिमाणी तेन=तद्वाचिना सुबन्तेन सह परिमाणवाचिनः कालशब्दाः समस्यन्ते । मासो जातस्य–जननक्रियाया ऊर्ध्वम् अस्य मासो व्यतीतः । अत्र जातः परिमाणी मासश्च तस्य परिमाणम् । एवं द्वयोः अह्नोः समाहारः द्व्यहः । द्व्यहः जातस्य इति द्व्यहजातः । संवत्सरजातः इत्यादि ।

नञ् ॥६॥

न ब्राह्मणः अब्राह्मणः ।

नञ् समर्थेन सुबन्तेन सह समस्यते । अत्रोत्तरपदार्थसदृशः समासार्थः । अब्राह्मणः इत्यस्य ब्राह्मणसदृशः ब्राह्मणभिन्नः क्षत्रियः मनुष्यो वेति प्रतीतिर्भवति ।

❀ (वा०) नञो न लोपस्तिङि क्षेपे । न पचसि अपचसि त्वं जाल्म ।

ईषदकृता ॥६॥

ईषच्छब्दोऽकृदन्तेन समस्यते ।

* (वा०) गुणवचनेनेति वाच्यम् । ईषत्कडारः । ऐकपद्यम् ऐकस्वर्यञ्च प्रयोजनम् । 'गुणवचनेन इति किम् ? ईषद् गार्ग्यः इह न भवति ।

'कडार' शब्दः श्यामवर्णवाची । ईषत्पिङ्गलः इत्याद्युदाहरणानि । ईषद् गार्ग्यः-'गार्ग्य' शब्दो जातिवचनः ।

षष्ठी ॥८॥

राजपुरुषः ।

*(वा०) कृद्योगा षष्ठी समस्यते इति वाच्यम् । पलाशशातनः । 'प्रतिपदविधान- षष्ठया न समासः' इतिवक्ष्यमाणस्यायं पुरस्तादपकर्षः ।

राज्ञः पुरुषः इति विग्रहः । कृद्योगा-'कर्तृकर्मणोः कृति' इति 'कृत्' शब्दोपादानेन विहिता । पलाशशातनः-पलाशानि शात्यन्ते येन दण्डादिना सः करणे ल्युट् । पलाशानां शातनः इति कर्मणि षष्ठो । अपकर्षः-अपवादः ।

याजकादिभिश्च ॥९॥

पूर्वेण समासः सिद्धः । एवं'कर्तरि च' इति प्रतिषेधे वचनमिदम् । ब्राह्मणयाजकः ।

ब्राह्मणानां याजकः इति विग्रहः ।

*(वा०)तत्स्थैर्गुणैः षष्ठी समस्यते । चन्दनस्य गन्धः चन्दनगन्धः । तत्स्थैः—तस्मिन् स्थिताः=तत्स्थाः तैः ।

न निर्धारणे ॥१०॥

मनुष्याणां क्षत्रियः शूरः ।

*(वा०) प्रतिपदविधाना षष्ठी न समस्यते इति वाच्यम् । सर्पिषो ज्ञानम् ।

निर्धारणे षष्ठी न समस्यते । मनुष्याणाम्—'यतश्च निर्धारणे' इति षष्ठो । सर्पिषः—'ज्ञोऽविदर्थस्य करणे' इति शेषत्वेन विवक्षिते करणे षष्ठी ।

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ॥११॥

छात्राणाम् पञ्चमः । सुहितम् = तृप्तिः । फलानां सुहितः ।

पूरण–गुण–सुहितार्थ-सत्-अव्यय-तव्य–समानाधिकरण इत्येतैः सह षष्ठी न समस्यते । पूरणगुणाभ्यामप्यर्थस्य सम्बन्धः । पूरणार्थे उदाहरणम्-छात्राणां पञ्चमः । गुणार्थ–काकस्य कृष्णत्वम् । सत्–शतृशानचौ ब्राह्मणस्य कुर्वन्, ब्राह्मणस्य कुर्वाणः । अव्ययम् - ब्राह्मणस्य कृत्वा । तव्य—ब्राह्मणस्य कर्त्तव्यम् । तव्यता तु भवत्येव ब्राह्मणकर्त्तव्यम् । समासेनात्र 'अन्तस्वरितम्' उत्तरपदं भवति । समानाधिकरण–पाणिनेः सूत्रकारस्य ।

क्तेन च पूजायाम् ॥१२॥

'मतिबुद्धिपूजार्थेभ्यश्च' इति वक्ष्यति, तस्येदं ग्रहणम् । राज्ञां मतः । बुद्धः, पूजितः ।

'मतिबुद्धि………'सूत्रेण यः पूजायां 'क्त'प्रत्ययो विहितस्तदन्तेन षष्ठी न समस्यते। राज्ञां बुद्धः । राज्ञां पूजितः इति बोध्यम् । राज्ञाम्–'क्तस्य च वर्तमाने' इति षष्ठी ।

अधिकरणवाचिना च ॥१३॥

अधिकरणवाचिना क्तेन न षष्ठीसमासः । इदमेषाम् आसितम् । गतम्, भुक्तम् ।

एषाम्—'अधिकरणवाचिनश्च' इति षष्ठी । एषां गतम् । एषां भुक्तम् इति बोध्यम् ।

कर्मणि च ॥१४॥

क्तेनेति निवृत्तम् । कर्मणि या षष्ठी सा न समस्यते । चित्रं गवां दोहोऽगोपेन ।

गवाम्—उभयप्राप्तौ कर्मणि' इत्यनेन षष्ठी, तस्यैवात्र ग्रहणम् । एवं विचित्रा सूत्रस्य कृतिः पाणिनिना ।

तृजकाभ्यां कर्तरि ॥१५॥

कर्तरि या षष्ठी सा आभ्यां न समस्यते । भवतः शायिका ।

तृज्ग्रहणमुत्तरार्थम् । कर्त्तर्येव तद्विधानात्तस्य योगे कर्तरि षष्ठी नैव भवति ।

आभ्याम्—तृचा, अकेन च । उत्तरार्थम्—कर्तरि चेत्यत्रानुवृत्त्यर्थम् ।

कर्त्तरि च ॥१६॥

कर्तरि यौ तृच्-अकौ ताभ्यां सह षष्ठी न समस्यते । अपां स्रष्टा । ओदनस्य भोजकः ।

अपाम्—कर्मणि षष्ठी, ओदनस्य—अत्रापि कर्मणि षष्ठी । स्रष्टा इत्यत्रकर्तरि तृच् । भोजकः इत्यत्र कर्तरि ण्वुल् (अकः)

नित्यं क्रीडाजीविकयोः ॥१७॥

एतयोर्नित्यं षष्ठी समस्यते । उद्दालकपुष्पभञ्जिका ।

एतयोः—क्रीडा जीविकयोः । क्रीडायाम्-उद्दालकपुष्पाणां भञ्जिका √भञ्ज्+ण्वुल्+टाप् । जीविकायाम् दन्तानां लेखकः इति दन्तलेखकः । इमे उदाहरणे 'अक' (ण्वुल्) इत्यस्यैव । क्रीडाजीविकयोः 'तृच्' न दृश्यते इति नोदाहृतम् ।

कुगतिप्रादयः ॥१८॥

'कु' शब्दोऽव्ययं साहचर्यात् । कुपुरुषः । ऊरीकृत्य । सुपुरुषः ।

*(वार्तिकानि) (१) प्रादयो गताद्यर्थे प्रथमया । प्राचार्यः ।

(२) अत्यादयः क्रान्ताद्यर्थे द्वितीयया । अतिमालः ।

(३) अवादयः क्रुष्टाद्यर्थे तृतीयया । अवकोकिलः ।

(४) पर्यादयो ग्लानाद्यर्थे चतुर्थ्या । अलंकुमारिः ।

(५) निरादयः क्रान्ताद्यर्थे पञ्चम्या । निष्कौशाम्बिः ।

साहचर्यात्—गत्यादिभिः प्रादिभिश्च साहचर्यम् । कु-गति-प्रादयः शब्दाः समर्थशब्देन समस्यन्ते । कुत्सितः पुरुषः, इत्यत्र 'कुः' पापार्थकः । 'ऊरी' पदं च्विप्रत्ययान्तं गतिसंज्ञकम् । 'सु'शब्दः प्रादिषु वर्तते । प्राचार्यः—प्रगतः आचार्यः । अतिमालः-मालाम् अतिक्रान्तः । अवकोकिलः—कोकिलया अवक्रुष्टः । अलंकुमारिः—कुमार्यै अलम् । निष्कौशाम्बिः—कौशाम्ब्याः निष्क्रान्तः इति विग्रहवाक्यानि बोध्यानि ।

❀(वा०) इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् । वाससी इव ।

उपपदमतिङ् ॥१९॥

नित्यमिति वर्तते । उपपदमतिङन्तं समर्थेन समस्यते । कुम्भकारः । अतिङिति किम् ? एधानाहारको व्रजति । 'सुप्सुपा' इति नाभिसम्बध्यते अतिङ्ग्रहणज्ञापकात् । तेन गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरित्येतदुपपन्नं भवति । अश्वक्रीती ।

कुम्भकारः—कुम्भं करोति इति विग्रहवाक्यम् । एधानाहारको व्रजति—एधान् आहर्त्तुम् व्रजति । अत्र 'आहारक' पदस्य क्रियारूपोऽर्थः । अतएव 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इत्यनेन ण्वुल् । 'सुप्सुपा......... भवति'—अयम्भावः-'उपपदमतिङ्' इत्यस्मिन् सूत्रे 'अतिङ्' इति 'योग-विभागः क्रियते । स च 'कुगतिप्रादयः' इति पूर्वसूत्रेणापि सम्बध्यते । 'अतिङ्'-ग्रहणेनैव ज्ञाप्यते, यदेतयोरुभयोः सूत्रयोः 'सुप् सुपा' इत्यस्य सम्बन्धो न भवति । तेन 'गतिकारकोपपदानाम्.......' इति परिभाषा सिद्धयति । प्रयोजनम्-'अश्वक्रीती इति पदे सुपः प्रागेव समासे जाते 'क्रीतात् करण पूर्वात्' इत्यनेन ङीष् प्रत्ययो भवति ।

अमैवाव्ययेन ॥२०॥

पूर्वेण सिद्धे नियमार्थं वचनम् । स्वादुंकारं भुङ्क्ते ।

नियमार्थम्—अव्ययेनोपपदस्य यः समासः सः 'अम्' (णमुल्) इत्यनेनैव भवति नान्येन । स्वादुङ्कारम्-'कारम्' इत्यत्र 'स्वादुमि' णमुल्' .इति णमुल् । अतएव ज्ञापकात् स्वादुम् इति मकारान्तं निपात्यते । मकारस्यानुस्वारपरसवर्णे ङकारः ।

तृतीयाप्रभृतीन्यन्यतरस्याम् ॥२१॥

'उपदंशस्तृतीयायाम्' इत्यतः प्रभृति यान्युपपदानि तान्यमैवा-व्ययेन वा समस्यन्ते । मूलकोपदंशं भुङ्क्ते/मूलकेनोपदंशं वा ।

'अमैव' इति पूर्वसूत्रादनुवर्तते । समासे कृते विभक्तिलोपः ।

क्त्वा च ॥२२॥

उच्चैःकृत्य / उच्चैः कृत्वा ।

क्त्वाप्रत्ययान्तेन सह तृतीयाप्रभृतीन्युपपदानि वा समस्यन्ते । समासे कृते 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति 'क्त्वा' इत्यस्य 'ल्यप्' भवति ।

शेषो बहुव्रीहिः ॥२३॥

उपयुक्तादन्यः शेषः । स कः ? यत्रान्यः समासो नोक्तः । वक्ष्यति 'अनेकमन्यपदार्थे' चित्रगुः । शेष इति किम् ? उन्मत्तगङ्गम् ।

उपयुक्तात्–अभिहितात् । उन्मत्तगङ्गम्–अत्र 'अव्ययीभावः समासः ।

अनेकमन्यपदार्थे ॥२४॥

प्रथमार्थं वर्जयित्वा । प्राप्तमुदकं यं प्राप्तोदकः इत्यादि । अनेकोक्तेर्बहूनामपि, सुसूक्ष्मकेशः ।

*(वा०) समानाधिकरणानां बहुव्रीहिरिष्यते । नेह, पञ्चभिर्भुक्तमस्य ।

(वा०) अव्ययानामुपसंख्यानम् । उच्चैर्मुखः।

प्रथमार्थे बहुव्रीहिर्न भवति तस्यानभिधानात् । तदाह–प्रथमार्थं वर्जयित्वा । सुसूक्ष्मकेशः–सुष्ठु सूक्ष्माः केशाः यस्य सः । समानाधिकरणानाम्—तुल्यविभक्तिकानामित्यर्थः । पञ्चभिर्भुक्तम् अस्येत्यत्रा–समानविभक्तिकानि पदानि ।

*(वा०) सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च ववक्तव्यः । कण्ठे स्थितः कालो यस्य स कण्ठेकालः । एवम् उरसिलोमा । उष्ट्रस्य मुखमिव मुखं यस्य स उष्ट्रमुखः ।

संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये ॥२५॥

संख्येयार्थया संख्यया एते समस्यन्ते । उपदशाः इत्यादि ।

संख्येयम्—संख्यातुं योग्यं द्रव्यम् । एते—अव्यय–आसन्न-अदूर–अधिक-संख्या इति शब्दाः । उपदशाः—दशानां समीपे ये सन्ति ते नव, एकादश वा । अत्र 'उप' इत्यव्ययम् एवम् आसन्नदशाः । अदूरदशाः । अधिकदशाः । द्वित्राः । त्रिचतुराः इत्युदाहरणानि ज्ञेयानि ।

दिङ्नामान्यन्तराले ॥२६॥

दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा।

दिङ्नामानि—दिशां नामानि तानि, अन्तराले वाच्ये समस्यन्ते। **दक्षिणपूर्वा**-दिगिति शेषः। एवं **पूर्वोत्तरा**। **उत्तरपश्चिमा**। **पश्चिमदक्षिणा** दिगित्यपि बोध्यानि।

तत्र तेनेदमिति सरूपे ॥२७

सप्तम्यन्ततृतीयान्ते पदे इदमेतस्मिन्नर्थे समस्येते। इति शब्देन यत्तत्रेति निर्दिष्टं ग्रहणं चेत्तेनेति निर्दिष्टं प्रहरणं चेत्, यदिदमिति निर्दिष्टं युद्धं चेत्। केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि।

तत्र—सप्तम्यन्तम्। **तेन**—तृतीयान्तम्। गृह्यतेऽस्मिन्निति **ग्रहणम्**। **प्रहरणम्**-दण्डादि। **केशाकेशि, दण्डादण्डि**—अत्र 'इच् कर्मव्यतिहारे' इत्यनेन 'इच्' समासान्तः, 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घत्वम्।

तेन सहेति तुल्ययोगे ॥२८॥

'सह' इत्येतत्तृतीयान्तेन समस्यते। सह पुत्रेण गतः सपुत्रः। तुल्ययोगे किम्? सहैव दशभिः पुत्रैर्भारं वहति गर्दभी। विद्यमानैरेवेत्यर्थः।

सह इति 'शब्दस्वरूपम्'। **तेन**—तृतीयान्तेन। **तुल्ययोगः**—समान सम्बन्धः। **सपुत्रः**—'वोपसर्जनस्य' इति 'सह' इत्यस्य 'स' इत्यादेशः।

क्वचिद्विद्यमानतार्थे समासो दृश्यते। सकर्मकः। सलोमकः।

चार्थे द्वन्द्वः ॥२९॥

समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। आद्ययोर्न समासोऽसामर्थ्यात्। प्लक्षन्यग्रोधौ। वाक्त्वचम्।

समुच्चयः—परस्परनिरपेक्षपदार्थानामेकं प्रति सम्बन्धः। यथा गाम् अश्वं पुरुषं पशुञ्च प्रतिदिनं नयमानो यमो न तृप्यति। **अन्वाचयः**-यत्रैकं प्रधानम् इतरदप्रधानम् यथा भो वटो! भिक्षामट, गाञ्चानय।

इतरेतरयोगः—परस्परापेक्षाणामवयवभेदानुगतः सम्बन्धः।

समाहारः—परस्परापेक्षाणामेव तिरोहितावयवभेदः संहति-प्रधानः।

आद्ययोः—समुच्चयान्वाचययोः । इतरेतरयोगस्योदाहरणम्-प्लक्षन्यग्रोधौ-प्लक्षश्च न्यग्रोधश्च । समाहारस्योदाहरणम्-वाक्त्वचम्—वाक् च त्वक् चेत्येतयोः समाहारः । 'द्वन्द्वाच्चुदषहान्तात् समाहारे' इत्यनेन 'टच्' समासान्तः, 'जातिरप्राणिनाम्' इत्येकवद्भावः ।

उपसर्जनं पूर्वम् ॥३०॥

समासे उपसर्जनं प्राक् प्रयोज्यम् । द्वितीया-कष्टश्रितः ।

यद्यपि लोके उपसर्जनस्य—अप्रधानस्य एव पूर्वप्रयोगो दृश्यते, तथापि वक्तुर्दोषात् अनियमस्य सम्भावनायां नियमः कार्यं एव । 'उपसर्जन' संज्ञा सूत्रे प्रथमानिर्दिष्टस्याप्रधानस्य भवति । यथा 'द्वितीया श्रितातीत........' इति सूत्रे द्वितीया प्रथमानिर्दिष्टा अतः कष्टं श्रितः इत्यत्र समासे कष्टस्य पूर्वप्रयोगः । एवं यत्र सूत्रे तृतीयादयः प्रथमानिर्दिष्टाः, तत्र तदन्तानाम् पूर्वप्रयोगो भवति । क्रमशः उदाहरणानि–तृतीया–शङ्कुलाखण्डः । चतुर्थी–यूपदारु । पञ्चमी–वृकभयम् । षष्ठी–राजपुरुषः । सप्तमी–अक्षशौण्डः ।

राजदन्तादिषु परम् ॥३१

दन्तानां राजा राजदन्तः इत्यादि ।

पूर्वसूत्रेण वक्ष्यमाणसूत्रैश्च पूर्वप्रयोगे प्राप्ते परप्रयोगार्थं सूत्रम् । इदमपवादसूत्रमुपसर्जनस्यानुपसर्जनस्य च परप्रयोगं विदधाति । वनस्याग्रे इति अग्रेवणम् । शब्दार्थौ इत्याद्युदाहरणानि ।

द्वन्द्वे घि ॥३२॥

मृदुगुप्तौ । अनेकप्राप्तावेकस्य नियमः, शेषे त्वनियमः । पटुशुक्लमृदवः/पटुमृदुशुक्लाः ।

द्वन्द्वसमासे 'घि' संज्ञकौ—ह्रस्वेकारोकारान्तौ शब्दौ प्राक् प्रयोज्यौ । मृदुश्च गुप्तश्चेति विग्रहः । अत्र मृदुशब्दस्य 'घि' संज्ञकत्वात्पूर्वप्रयोगः । पटुशुक्लमृदवः–अत्र पटुशब्दे नियमः, मृदु शब्दे त्वनियमः ।

अजाद्यदन्तम् ॥३३॥

द्वन्द्वे अजाद्यदन्तशब्दस्य पूर्वप्रयोगः । उष्ट्रखरम् ।

उष्ट्राश्च खराश्चेति समाहारद्वन्द्वः । अत्रोष्ट्रशब्दस्य पूर्वनिपातः । इन्द्राग्नी इत्यत्र तु परत्वादयमेव भवति न तु 'घि' संज्ञकः ।

❀ (वा०) बह्वष्वनियमः । अश्वरथेन्द्राः/इन्द्राश्वरथाः ।

अल्पाच्तरम् ॥३४॥

द्वन्द्वे अल्पाच्तरम् शब्दस्वरूपं पूर्वं प्रयोक्तव्यम् । प्लक्षन्यग्रोधौ ।

प्लक्षे द्वावचौ, न्यग्रोधे च त्रयः ।

❀ (वा०) अभ्यर्हितञ्च ।मातापितरौ । अत्र मातुः पूर्वनिपातः ।

❀ (वा०) लघ्वक्षरम् पूर्वम् । कुशाश्च काशाश्चेति कुशकाशम् ।

सप्तमीविशेषणे बहुव्रीहौ ॥३५॥

सप्तम्यन्तं च बहुव्रीहौ पूर्वं प्रयोक्तव्यम् । कण्ठेकालः । चित्रगुः ।

सप्तमी च विशेषणं चेति द्वन्द्वः । कण्ठे कालो यस्य सः, सप्तम्या अलुक् ।

निष्ठा ॥३६॥

बहुव्रीहौ निष्ठान्तम् पूर्वं भवति । भिक्षितभिक्षः ।

भिक्षिता भिक्षा येन सः इति विग्रहः ।

वाहिताग्न्यादिषु ॥३७॥

पूर्वेण प्राप्ते विकल्पः । आहिताग्निः/अग्न्याहितः ।

आहितः अग्निर्येन सः इति विग्रहः । आहिताग्निराकृतिगणः, तेन लोहितचन्दनोचितः (किराते) इति सिद्धयति ।

कडाराः कर्मधारये ॥३८॥

कडारादयो गुणशब्दाः कर्मधारये समासे वा पूर्वं प्रयोक्तव्याः । कडारजैमिनिः/जैमिनिकडारः ।

कडारादयो गुणशब्दाः । विशेषणत्वेन नित्यं प्राप्ते विकल्पः ।

पूर्वापराधरोत्तरं तृतीयाप्रभृतीन्यष्टादश ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
द्वितीयाध्यायस्य द्वितीयः पादः ।

द्वितीयाध्यायस्यास्मिन् द्वितीये पादे पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे इत्यस्मादारभ्य विंशतिः सूत्राणि तथा तृतीयाप्रभृतीन्यन्यतरस्याम् इत्यत आरभ्य अष्टादशसूत्राणीति संकलनेन अष्टत्रिंशत् (३८) सूत्राणि सन्ति ।

इति काशिकावृत्तिसार--सुधायां
द्वितीयाध्यायस्य द्वितीयः पादः ।

अथ द्वितीयाध्याये तृतीयः पादः

अनभिहिते ॥१॥

यदित ऊर्ध्वमनुक्रमिष्यामः 'अनभिहिते' इत्येवं तद्वेदितव्यम् । अनभिहिते=अनुक्ते कर्मादौ द्वितीयादिविभक्तिर्भवति । केनानभिहिते ? तिङ्कृत्तद्धितसमासैः । वक्ष्यति 'कर्मणि द्वितीया' कटं करोतीत्यादि ।

अत्रानुक्तपदे √वचिधातुः प्रतिपादनार्थकस्तेन तिङ्कृत्तद्धितसमासैरेवानुक्ते द्वितीयादयो विभक्तयो भवन्ति नतु विशेष्येणानुक्ते । अन्यथा कटं करोति भीष्ममुदारं दर्शनीयमित्यत्र 'कट' शब्देन द्वितीयाया उक्तत्वाद् भीष्मादिविशेषणेभ्यो द्वितीया न स्यात् ।

कर्मणि द्वितीया ॥२॥

कर्मणि कारके या संख्या तत्र द्वितीया विभक्तिर्भवति । कटं करोति ।

अत्र साधनं कर्म गृह्यते न तु क्रिया कर्म तत्र द्वित्वबहुत्वयोरभावात् ।

❋(वा०) उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥

उभयतो ग्रामम् । सर्वतो ग्रामम् । धिग् देवदत्तम् । उपर्युपरि ग्रामम् इत्यादि ।

❋(वा०) अभितः-परितः-समया-निकषा-हा-प्रति-योगेषु च दृश्यते । अभितो ग्रामम् । परितो ग्रामम् । समया ग्रामम् । निकषा ग्रामम् । हा देवदत्तम् । बुभुक्षितं न प्रतिभाति किञ्चित् ।

तृतीया च होश्छन्दसि ॥३॥

कर्मणि वर्तते, चात्सापि । छन्दसि जुहोतेस्तृतीया । यवाग्वाऽग्निहोत्रं जुहोति/यवागूं वा । छन्दसि किम् ? जुहोति ।

साऽपि—द्वितीयाऽपि । अग्निहोत्रशब्दोऽत्र तन्नामककर्मवाचीति मीमांसकाः । परमिदं न सूत्रानुगुणम् यतः कर्मणि वर्तते, अतोऽत्राग्निहोत्रशब्दो हविषि वर्तते तथा च यवाग्वाख्यं हविर्देवतोद्देशेन प्रक्षिपतीत्यर्थः ।

अन्तराऽन्तरेण युक्ते ॥४॥

आभ्यां योगे द्वितीया । अन्तरा त्वां मां कमण्डलुः । अन्तरेण हरिं न सुखम् ।

अन्तरा शब्दो मध्यार्थकः, अन्तरेण शब्दश्च विनार्थकः । उभावपि निपातौ गृह्येते ।

कालाध्वनोरत्यन्तसंयोगे ॥५॥

एतद्वाचिभ्यो द्वितीयाऽत्यन्तसंयोगे । क्रियागुणद्रव्यैः कालाध्वनोः सम्बन्धः =अत्यन्तसंयोगः । मासम् अधीते इत्यादि ।

एतद्वाचिभ्यः–मासम् अधीते । क्रोशम् अधीते ।

अपवर्गे तृतीया ॥६॥

अपवर्गः =फलप्राप्तौ क्रियापरिसमाप्तिः । तस्मिन् गम्यमाने तृतीया भवति । मासेनानुवाकोऽधीतः ।

सामर्थ्यात् अत्र क्रियाऽत्यन्तसंयोग एव गृह्यते । अध्वन उदाहरणम्-क्रोशेनानुवाकोऽधीतः ।

सप्तमीपञ्चम्यौ कारकमध्ये ॥७॥

कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यामेते विभक्ती स्तः । अद्य भुक्त्वा मैत्रो द्व्यहे/द्व्यहाद्वा भोक्ताऽन्नम् ।

अत्र मैत्ररूपकर्तृशक्त्योर्मध्ये कालः । मैत्रे एका शक्तिरद्यभुजेः साधनम्, अपरा द्व्यहभुजेः । तथा चानयोर्मध्ये कालः । कालस्योदाहरणम् उक्तम् । अध्वनः उदाहरणम्-इहस्थोऽयमिष्वासः क्रोशे लक्ष्यं विध्यति/क्रोशाल्लक्ष्यं विध्यति । अत्रेष्वासः कर्ता लक्ष्यं कर्म कर्माधिकरणयोः कर्मापादनयोर्वा मध्ये क्रोशः ।

कर्मप्रवचनीययुक्ते द्वितीया ॥८॥

कर्मप्रवचनीयैर्युक्ते द्वितीया भवति । जपम् अनु प्रावर्षत् ।

जपम् अनु—अत्र अनोः 'अनुर्लक्षणे' इति कर्मप्रवचनीयसंज्ञा ।

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥९॥

अधिकार्थेनेश्वरार्थेन च कर्मप्रवचनीयेन युक्ते सप्तमी भवति । उपनिष्के कार्षापणम् । 'यस्येश्वर......' इति स्वात्स्वामिनो वा विभक्तिः । अधि भुवि रामः । अधि रामे भूः ।

उपनिष्के—निष्कात् अधिकम् इति विग्रहः । 'उपोऽधिके च' इति 'उप' इत्यस्य कर्मप्रवचनीय संज्ञा । स्वात् = पदार्थात् । अयम्भावः–'अधिरीश्वरे' इत्यनेन 'अधि' 'इत्यस्य' 'कर्मप्रवचनीय' संज्ञा क्रियते । ईश्वरः स्वामी स च स्वं पदार्थमपेक्ष्य भवति । यदा स्वं कर्मप्रवचनीयेन युज्यते तदा 'अधिभुवि' यदा च स्वामी तेन युज्यते तदा 'अधिरामे' इति पर्यायेणोभयोर्योगः ।

पञ्चम्यपाङ्परिभिः ॥१०॥

एतैः (अप, आङ्, परि) कर्मप्रवचनीयैर्युक्ते पञ्चमी । अप त्रिगर्तेभ्यो वृष्टो देवः । आ त्रिगर्तेभ्यः । परि त्रिगर्तेभ्यः ।

अप-परि शब्दयोः 'अपपरी वर्जने' तथा 'आङ् मर्यादावचने' इत्यनेन कर्मप्रवचनीय संज्ञा ।

प्रतिनिधिप्रतिदाने च यस्मात् ॥११॥

प्रतिनिधिः = मुख्यसदृशः, प्रतिदानम् = दत्तस्य प्रतिनिर्यातनम् । यस्मादेतौ, तत्र कर्मप्रवचनीययुक्ते पञ्चमी । अभिमन्युरर्जुनतः प्रति । तिलेभ्यः प्रति यच्छति माषान् ।

अर्जुनतः प्रति—प्रतियोगे पञ्चम्यास्तसिः । अत्रार्जुनतोऽभिमन्युः प्रतिनिधिरस्ति । तिलेभ्यः..........माषान्-पूर्वं गृहीतास्तिलास्तेभ्यो माषाः प्रतिदानम् ।

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥१२॥

गत्यर्थानां कर्मणि अध्ववर्जिते एते विभक्ती भवतः चेष्टायाम् । ग्रामं गच्छति/ग्रामाय वा । 'अध्ववर्जिते' इति किम् ? अध्वानं गच्छति ।

अध्वन्यर्थग्रहणम्-पन्थानं गच्छति। आस्थितप्रतिषेधोऽयम्। आस्थितः =सम्प्राप्तः, आक्रान्त उच्यते। यत्र तूत्पथेन पंथानं गच्छति तत्र स्यादेव चतुर्थी। अध्वने गच्छति।

चेष्टा—शरीरव्यापारः। आक्रान्तः—गमनकर्त्राऽधिष्ठितः मार्गः। येन मार्गेण ग्रामादिकं प्राप्यते।

चतुर्थी सम्प्रदाने ॥१३॥

द्विजाय गां ददाति।

❀(वा०) चतुर्थीविधाने तादर्थ्य उपसंख्यानम्। यूपाय दारु।

❀(वा०) उत्पातेन ज्ञापिते च।

वाताय कपिला विद्युदातपायातिलोहिनी।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्॥

तादर्थ्ये—तस्मै इदं तदर्थम् तस्य भावस्तादर्थ्यम्। उत्पातः—प्राणिनां शुभाशुभसूचकः भूतविकारः। ज्ञापितः—सूचितः।

क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥१४॥

क्रियार्था क्रिया उपपदं यस्य स तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी। फलेभ्यो व्रजति।

स्थानिनः—यस्यार्थः प्रतीयते न तु प्रयोगोऽस्ति, स स्थानीत्युच्यते। फलेभ्यो व्रजति—अत्र 'आहर्तुम्' (आ √हृ + तुमुन्) अप्रयुज्यमानः स्थानी, तस्य कर्म 'फलानि' इति।

तुमर्थाच्च भाववचनात् ॥१५॥

तुमर्थभाववचनप्रत्ययान्तात् चतुर्थी। पाकाय व्रजति।

तुमुन्प्रत्ययेन समानार्थः तुमर्थः। तस्मिन्नर्थे भाववचनः—भावार्थकः प्रत्ययोऽन्ते यस्य स तस्मादित्यर्थः।

नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च ॥१६॥

न॑मो॒ दे॒वे॑भ्यः॒। अलमिति पर्याप्त्यर्थस्य ग्रहणम्। तेन प्रभुर्मल्लो मल्लाय इत्यादयः सिद्धयन्ति।

नमः-स्वस्ति -स्वाहा-स्वधा-अलम्-वषट् इत्येतैर्योगे चतुर्थी भवति। **पर्याप्त्यर्थस्य ग्रहणम्**–'तस्मै प्रभवति सन्तापादिभ्यः' इत्यत्र 'प्रभवति' योगे चतुर्थीनिर्देशात् । प्रजाभ्यः स्वस्ति । अग्नये स्वाहा । पितृभ्यः स्वधा। इन्द्राय वषट् इत्युदाहरणान्तराणि ।

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ॥१७॥

प्राणिवर्जिते मन्यतेः कर्मणि चतुर्थी वा, अनादरे गम्यमाने । न त्वां तृणाय/तृणं वा मन्ये। अनादरे इति किम् ?

अश्मानं दृषदं मन्ये मन्ये काष्ठमुलूखलम् ।
अन्धायास्तं सुतं मन्ये यस्य माता न पश्यति ॥

*(वा०)यदेतदप्राणिष्विति तदनावादिष्विति वाच्यम्। न त्वा नावं मन्ये । यावत्तीर्णं न नाव्यम् । न त्वा शृगालं मन्ये इत्यादि । त्वामित्यस्य कर्मत्वाविशेषेऽपि व्यवस्थितविभाषाविज्ञानादेव चतुर्थी न भवति।

अश्मानं दृषदमित्यादौ तत्त्वाख्यानं नत्वानादरः। **व्यवस्थित-विभाषा**–यत्र विभाषा अभीष्टा तत्रैव भवति, सा च 'त्वाम्' इत्यत्र नाभीष्टा ।

कर्तृकरणयोस्तृतीया ॥१८॥

देवदत्तेन कृतम् । दात्रेण लुनाति ।

कर्तरि करणे च तृतीया। कर्तरि प्रथमं, करणे च द्वितीयमुदाहरणं बोध्यम् ।

सहयुक्तेऽप्रधाने ॥१९॥

सहार्थेन युक्तेऽप्रधाने तृतीया । पुत्रेण सहागतः पिता ।

सहार्थः—'सह' इत्यस्य पर्यायाः सह, साकम्, सार्धम्, समम् इत्यादयः। **प्रधानः**—यस्य साक्षात् क्रियादिभिः सम्बन्धः यथा पितुः। पुत्रस्य तु प्रतीयमानः इति तस्याप्राधान्यम् ।

येनाङ्गविकारः ॥२०॥

अङ्गम्=शरीरम् । 'येन' इति च तदवयवो हेतुतया निर्दिश्यते । येनाङ्गेन विकृतेनाङ्गिनो विकारस्ततस्तृतीया । अक्ष्णा काणः ।

अङ्गम् अस्यास्तीति 'अङ्गः' अर्श आदित्वात् 'अच्' प्रत्ययान्तः सूत्रे उपात्तः इति भावः । येन—अवयवार्थेकेनाङ्गेन विकृतेनेत्यस्य सामर्थ्यात् ।

इत्थम्भूतलक्षणे ॥२१॥

कश्चित्प्रकारम् प्राप्तः इत्थम्भूतः । तस्य लक्षणं तस्मिन् । कमण्डलुना छात्रमद्राक्षीत् ।

अत्र पुरुषत्वं सामान्यम् । तस्य प्रकारश्छात्रत्वम् तम् प्राप्तश्छात्रः । तस्य लक्षणं कमण्डलुः, तस्मिन् तृतीया भवति ।

संज्ञोऽन्यतरस्यां कर्मणि ॥२२ ॥

सम्पूर्वकस्य जानातेः कर्मणि वा तृतीया । मात्रा/मातरं वा संजानीते ।

द्वितीया नित्यं प्राप्ता तृतीयया विकल्प्यते । संजानीते—'सम्प्रतिभ्यामनाध्याने' इत्यात्मनेपदम् ।

हेतौ ॥२३॥

फलसाधनयोग्यः पदार्थो हेतुस्तत्र तृतीया । धनेन कुलम् । कन्यया शोकः ।

हेतुर्द्विविधः (१) शास्त्रीयः—'तत्प्रयोजको हेतुश्च' इत्यत्रोपदिष्टः (२) लौकिकः—तस्यात्र ग्रहणम् । स च फलम् अनिष्पादयन्नपि तत्साधनयोग्यः पदार्थः । कुलम् अकुर्वाणेऽपि धने तत्करणयोग्यता विद्यते । एवं कन्यायां शोककरणयोग्यतेति बोध्यम् ।

अकर्तर्यृणे पञ्चमी ॥२४॥

कर्तृवर्जितं यदृणं हेतुस्ततः पञ्चमी । शताद्बद्धः ।

पूर्वसूत्रात् 'हेतुः' इत्यनुवर्तते । कर्तृवर्जिते पञ्चमी, कर्तरि तु तृतीया । शतेन बन्धितः ।

विभाषा गुणेऽस्त्रियाम् ॥२५॥

गुणे हेतावस्त्रीलिङ्गे वा पञ्चमी । पक्षे तृतीया । जाड्याद्/जाड्येन वा बद्धः ।

गुणशब्दोऽत्र परार्थरूपापन्नस्य सम्बन्धिमात्रस्य वाचकः । तेन पर्वतो वह्निमान् धूमवत्त्वात् इत्यादिषु पञ्चमी भवति ।

षष्ठी हेतुप्रयोगे ॥२६॥

पाठस्य हेतोर्वसति ।

हेतोः—हेतुशब्दस्य प्रयोगः हेतुप्रयोगः । तस्मिन् हेतौ = हेतुहेतुमद्-भावसम्बन्धे द्योत्ये उभयत्र षष्ठी भवति । उदाहरणम्-पाठस्य हेतोर्वसति ।

सर्वनाम्नस्तृतीया च ॥२७॥

कस्य हेतोः/केन हेतुना वा वसति ।

सर्वनाम्नो हेतोश्च प्रयोगे तृतीया षष्ठी चोभे पर्यायेण भवतः ।

❀ (वा०) निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् । किं निमित्तं/केन निमित्तेन/कस्मै प्रयोजनाय/कस्माद्धेतोः/कस्य कारणस्य/कस्मिन् निमित्ते वा वसति । वृत्तौ तु 'निमित्तकारणहेतुषु..........'इत्युक्तम् ।

अपादाने पञ्चमी ॥२८॥

ग्रामादागच्छति ।

❀ (वा०) यतश्चाध्वकालनिर्माणम् ततः पञ्चमी, तद्युक्तादध्वनः प्रथमासप्तम्यौ, कालात्सप्तमी । गवीधुमतः सांकाश्यं चत्वारि योजनानि, कार्तिक्या आग्रहायणी मासे ।

अपादाने कारके पञ्चमी भवति । यतश्चेत्यादि—अध्वनः कालस्य च निर्माणे अवधिभूते पञ्चमी, अध्ववाचिनि प्रथमा सप्तमी वा, कालवाचिनि तु सप्तमी भवति । गवीधुम नगरं, सांकाश्यं तु तपोवनम् । चत्वारि योजनानि-पक्षे चतुर्षु योजनेषु इत्यपि भवति ।

❀ (वा०) ल्यब्लोपे कर्मण्युपसंख्यानम् । प्रासादमारुह्य प्रेक्षते/प्रासादात्प्रेक्षते ।

❀(वा०) अधिकरणे चोपसंख्यानम् । आसने उपविश्य प्रेक्षते । आसनात् प्रेक्षते ।

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥२९॥

'अन्य' इत्यर्थग्रहणम्, तेन अन्यो, भिन्नो वा रामात् इत्यादि ।

अन्यादिभिर्योगे पञ्चमी भवति । आरात् = दूरान्तिकार्थोऽव्ययः आराद्-वनात् । इतरः = निर्दिष्टस्य प्रतियोगी इतरो देवदत्तात् । ऋते = वर्जनार्थोऽव्ययः ऋते रामान्न सुखम् । दिक्शब्दाः = दिशि दृष्टाः शब्दाः पूर्वादयः पूर्वो ग्रामात् । उत्तरो ग्रीष्मात् । अञ्चूत्तरपदशब्दाः = प्राक् प्रत्यगादयः प्राग् ग्रामात् । 'आच्, आहि' इत्येतौ तद्धितप्रत्ययौ—दक्षिणा ग्रामात् । दक्षिणाहि ग्रामात् इत्युदाहरणे ।

षष्ठ्यतसर्थप्रत्ययेन ॥३०॥

अतसर्थप्रत्ययेन युक्ते षष्ठी विभक्तिर्भवति । दक्षिणतो ग्रामस्य ।

अतसर्थाः प्रत्ययाः = अतसुच्, असि, अस्तातिप्रत्ययाः स्वार्थे भवन्ति । पुरो ग्रामस्य । उपरिष्टाद् ग्रामस्येत्युदाहरणद्वयमपि बोध्यम् ।

एनपा द्वितीया ॥३१॥

एनपा युक्ते द्वितीया षष्ठ्यपीष्यते । दक्षिणेन ग्रामं/ग्रामस्य वा ।

अत्र योगविभागः कर्तव्यः । 'एनपा' इत्येको योगः 'षष्ठी' इत्यनुवर्तते तेन एनपा युक्ते षष्ठी भवतीत्यर्थो लभ्यते । 'द्वितीया' इति द्वितीयो योगः 'एनपा' इत्यनुवर्तते तथा च एनपा युक्ते द्वितीया भवतीत्यर्थद्वयेनोभयोर्विभक्त्योरिष्टिः ।

पृथग्विनानानाभिस्तृतीयान्यतरस्याम् ॥३२॥

पञ्चम्यनुवर्तते । एतैर्योगे तृतीया, पक्षे पञ्चमीद्वितीये । पृथक्-रामेण/रामात्/रामं वा ।

'पृथक्, विना, नाना' सर्वे एतेऽसहायेऽर्थे वर्तन्ते । सूत्रे त्रयाणामुपादानम् पर्यायनिवृत्त्यर्थम् । विना रामेण । नाना नारीं निष्फला लोकयात्रा इत्युदाहरणे । इदमप्युदाहरणं बोध्यम्—

विना वातं विना वर्षं विद्युत्प्रपतनं विना।
विना हस्तिकृतान् दोषान् केनेमौ पातितौ द्रुमौ ॥

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ॥३३॥

एभ्यः करणे कारके वा तृतीया पक्षे पञ्चमी। यदा च धर्ममात्रं करणतया विवक्ष्यते न द्रव्यं तदा स्तोकादीनामसत्त्ववचनता। स्तोकान्मुक्तः/स्तोकेन मुक्तः।

एभ्यः–स्तोक-अल्प-कृच्छ्र-कतिपय इति शब्देभ्यः। धर्ममात्रम्–एते स्तोकादयः शब्दाः शुक्लादिवत् गुणवाचिनो द्रव्यवाचिनश्च। गुणवाचिनः असत्त्ववचनाः – अद्रव्यवचना इत्यर्थः। अल्पात्/अल्पेन वा मुक्तः। कृच्छ्रान्मुक्तः। कतिपयेन मुक्तः इत्युदाहरणान्तराणि।

सप्तम्यधिकरणे च ॥३४॥

पञ्चम्यनुवर्तते। एतैर्योगे वा षष्ठी। दूरं ग्रामस्य/ग्रामाद्वा।

एतैः–दूरार्थकैः = दूरविप्रकृष्टादिभिः, अन्तिकार्थकैः = अन्तिकाभ्याशादिभिः। वा षष्ठी–पक्षे पञ्चमीति शेषः। अन्तिकं ग्रामस्य/ग्रामाद्वा।

दूरान्तिकार्थेभ्यो द्वितीया च॥३५॥

पञ्चम्यनुवर्तते। एभ्यो द्वितीया, पक्षे पञ्चमी, समुच्चयात् तृतीया। दूरम्/दूरात्/दूरेण ग्रामस्य। असत्त्ववचनमनुवर्त्तते। सत्त्ववचनेभ्यो यथायथं विभक्तयो भवन्ति। दूरः पन्थाः। दूराय पथे देहि।

समुच्चयार्थस्य लाभश्चकारोपादानात्। यथायथम्-विशेषणविशेष्यादि नियमानुसारम्।

सप्तम्यधिकरणे च ॥३६॥

चाद्दूरान्तिकार्थेभ्यः। कटे आस्ते इत्यादि। —

❀(वा०) क्तस्येन्विषयस्य कर्मण्यपि। अधीती व्याकरणे।

अधिकरणे कारके सप्तमी भवति। दूरान्तिकार्थेभ्यश्च द्वितीया-तृतीया-पञ्चमी-सप्तम्यश्च चतस्रो विभक्तयो विकल्पेन भवन्ति। दूरे ग्रामस्य इत्यादि। इन्विषयस्य–इन् प्रत्ययान्तः शब्दो विषयो यस्य स तस्य क्तस्येत्यर्थः। अधीती–अधीतम् अनेनेति विग्रहे 'इष्टादिभ्यश्च' इति इनिः।

अधीतवान् व्याकरणम् इतिवत् अत्रापि व्याकरणं कर्म, तेनात्र सप्तमी ।

❀(वा०)साध्वसाधु प्रयोगे च । साधुर्देवदत्तो मातरि ।

❀(वा०)निमित्तात्कर्मयोगे सप्तमी वक्तव्या ।

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥

यस्य च भावेन भावलक्षणम् ॥३७॥

भावः = क्रिया । यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी । प्रसिद्धा च क्रिया क्रियान्तरं लक्षयति । दुह्यमानासु गोषु गतः ।

अत्र प्रसिद्धा = ज्ञातकाला क्रिया क्रियान्तरस्य = अनिर्ज्ञातायाः क्रियायाः लक्षणं भवति । प्रसिद्धक्रियायाः सप्तमी भवति । गोदोहनकालः प्रसिद्धः, तेन गमनकालो लक्ष्यते । एवं फलायमानेष्वाम्रेषु गतः, पक्वेष्वागतः इत्यादौ 'जातेषु' इति क्रिया गम्यते, तेनात्र सप्तमी ।

षष्ठी चानादरे ॥३८॥

अनादराधिके भावलक्षणे भाववतः षष्ठी चात्सप्तमी । रुदति रुदतो वा प्रावाजीत् ।

भावलक्षणे पूर्वेण प्राप्ता सप्तमी अनादराधिके सति षष्ठ्या विकल्प्यते । अनादरः = तिरस्कारः सोऽधिको यस्मिन् इति भावः । रुदति– √रुद् + शतृ । पित्रादीनां रोदनमनादृत्य प्रव्राजकोऽभवत् इत्यर्थः ।

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥३९॥

एतैर्योगे षष्ठीसप्तम्यौ । गवां गोषु का स्वामी इत्यादि ।

एतैः—स्वामी-ईश्वर-अधिपति-दायाद-साक्षी-प्रतिभू-प्रसूत इति शब्दैः । गोषु/गवामीश्वरः । गोषु/गवामधिपतिः । गोषु/गवां दायादः । गवां/गोषु साक्षी । गोषु/गवां प्रतिभूः । गवां/गोषु प्रसूतः इति षष्ठी–सप्तम्यन्तोदाहरणानि ।

आयुक्तकुशलाभ्यां चासेवायाम् ॥४०॥

आसेवा = तात्पर्यम् । तस्यां गम्यमानायाम्, आयुक्तः =

व्यापृतः । कुशलः = निपुणः ताभ्यां योगे एते । आयुक्तः कुशलो वा हरिपूजने/हरिपूजनस्य वा ।

एते—षष्ठीसप्तम्यौ । विकल्पेन षष्ठीविधानार्थं सूत्रम् । सप्तमी तु अधिकरणत्वादेव प्राप्ता ।

यतश्च निर्धारणम् ॥४१॥

निर्धारणम्–जातिगुणक्रियाभिः समुदायात् एकस्य पृथक्करणम् । यतो निर्धार्यते ततः षष्ठीसप्तम्यौ भवतः । क्षत्रियः मनुष्याणां/मनुष्येषु वा शूरः ।

क्षत्रियः—जातेरिदमुदाहरणम् । गुणस्य–गवां/गोषु वा कृष्णा बहुक्षीरा । क्रियायाः–अध्वगेषु धावन्तः शीघ्रतमाः/अध्वगानां वा ।

पञ्चमी विभक्ते ॥४२॥

तयोरपवादः । विभक्तम् = विभागः । यस्मिन्निर्धारणाश्रये विभक्तमस्ति, ततः पञ्चमी । माथुराः पाटलिपुत्रेभ्य आढ्यतराः ।

तयोः—षष्ठीसप्तम्योः । यतो निर्धार्यते स निर्धारणाश्रयः । अत्र माथुराणां आढ्यत्वे पाटलिपुत्रवासिभ्यो विभागः, अतो निर्धारणाश्रया पञ्चमी ।

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ॥४३॥

आभ्यां योगेऽर्चायां सप्तमी विभक्तिर्न चेत्प्रतिः प्रयुज्यते । मातरि साधुः । अर्चायां किम् ? साधुर्भृत्यो राज्ञः इत्यत्र तत्त्वकथने न । अप्रतेः किम् ? साधुर्मातरम्प्रति ।

अर्चायाम्–गम्यमानायामिति शेषः । मातरि निपुणः इत्यप्युदाहरणम् । साधुर्मातरम् प्रति–अत्र कर्मप्रवचनीय 'प्रति' योगे द्वितीया ।

प्रसितोत्सुकाभ्यां तृतीया च ॥४४॥

प्रसितः = प्रसक्तः यस्तत्र नित्यमेव बद्ध इति यावत् । केशैः प्रसितः/केशेषु वा ।

प्रसित– उत्सुक शब्दाभ्यां योगे तृतीया-सप्तम्यौ भवतः । केशैः प्रसितः—आबद्धः इति । केशैः/केशेषु वा उत्सुकः ।

नक्षत्रे च लुपि ॥४५॥

लुबन्तान्नक्षत्रशब्दादेते तृतीयासप्तम्यौ भवतः । पुष्येण पायसमश्नीयात् / पुष्ये वा । 'पुष्ययुक्ते काले' इत्यर्थः ।

पुष्येण युक्तः कालः इत्यर्थे 'नक्षत्रेण युक्तः कालः' इत्यनेन अण्, तस्य 'लुबविशेषे' इति लुप् ।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥४६॥

प्रातिपदिकार्थः=सत्ता । लिङ्गम्=स्त्रीपुंनपुंसकम् । परिमाणं प्रस्थादि । उच्चैः । कृष्णः । खारी । एकः ।

यः पदार्थः केवलमस्तीति वक्तुं शक्यते स सर्वः प्रातिपदिकार्थः यथा अव्ययार्थः । वचनम्–एकत्व-द्वित्व-बहुत्वादीनि । मात्राशब्दः प्रत्येकमभिसम्बध्यते । प्रातिपदिकार्थादिषु प्रथमा विभक्तिर्भवति । उच्चैः–इति प्रातिपदिकार्थमात्रस्योदाहरणम् । एवं लिङ्गमात्रस्य–कृष्णः । कुमारी । कुण्डम् । परिमाणमात्रस्य–खारी =खारीपरिमितं धान्यादि । वचनमात्रस्य–एकः । द्वौ । बहवः इति ।

सम्बोधने च ॥४७॥

सम्बोधनम्=आभिमुख्यकरणम् । तदधिके प्रातिपदिकार्थे प्रथमा न प्राप्नोतीत्यारम्भः । हे देवदत्त! ३ ।

यद्वस्तु येनाकारेण सिद्धं तस्य तेनाकारेणाभिमुखीकरणं सम्बोधनम् । तत्र प्रथमा भवति । हे देवदत्त! ३ । अत्र 'दूराद्धूते च' इत्यनेनान्तिमाकारस्य प्लुतत्वम् ।

सामन्त्रितम् ॥४८॥

सम्बोधने या प्रथमा तदन्तं शब्दरूपमामन्त्रितसंज्ञं भवति । आमन्त्रित प्रदेशाः—'आमन्त्रितस्य च' इत्येवमादयः ।

सा–सम्बोधने या विहिता प्रथमा तदन्तमित्यर्थः । 'आमन्त्रितस्य च' इत्यनेन आद्युदात्तत्वं विधीयते । हे देवदत्त !

एकवचनं सम्बुद्धिः ॥४६॥

आमन्त्रितप्रथमायाः यदेकवचनं तत्संबुद्धिसंज्ञं स्यात् । हे वटो! हे देवदत्त ! सम्बुद्धिप्रदेशाः 'एङ्ह्रस्वात्सम्बुद्धेः' इत्येवमादयः ।

हे वटो!–अत्र सम्बुद्धि संज्ञायां 'ह्रस्वस्य गुणः' इति गुणः । हे देवदत्त ! हे वटो! इत्युभयत्र 'एङ् ह्रस्वात्सम्बुद्धेः इति 'सु' प्रत्ययस्य लोपो भवति ।

षष्ठी शेषे ॥५०॥

कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसम्बन्धादिः शेषः । तत्र षष्ठी । सम्बन्धश्चतुर्विधः = स्वस्वामिसम्बन्धः । जन्यजनकसम्बन्धः । स्थान्यादेशसम्बन्धः । अवयवावयविसम्बन्धः । राज्ञः पुरुषः । पितुः पुत्रः । अस्तेर्भूः । पशोः पादः ।

उक्तादन्यः शेषः । तमेव विवृणोति–कर्मादिभ्यः इत्यादि । व्यतिरिक्तः–अधिकः । चतुर्णां सम्बन्धानां क्रमशः चत्वार्युदाहरणानि ज्ञेयानि ।

ज्ञोऽविदर्थस्य करणे ॥५१॥

अज्ञानार्थस्य जानातेः करणे षष्ठी । सर्पिषो जानीते । सर्पिषा करणेन प्रवर्त्तते इत्यर्थः ।

अविदर्थस्य–√विद् ज्ञाने इत्यस्यार्थः ज्ञानं तद्भिन्नार्थस्य । जानीते–'अकर्मकाच्च' इत्यात्मनेपदम् । अत्रास्य प्रवृत्तिरर्थः धातूनामनेकार्थत्वात् । प्रवृत्तौ प्रियतमं सर्पिस्तेन तस्य करणत्वं सिद्धम्, तत्र षष्ठी ।

अधीगर्थदयेशां कर्मणि ॥५२॥

अधीगर्थाः = स्मृत्यर्थाः । √दय दाने, √ईश ऐश्वर्ये; एषां कर्मणि शेषत्वेन विवक्षिते षष्ठी । मातुरध्येति इत्यादि ।

अधीगर्थाः–अधीक्–अधि + √इक् (स्मरणे) 'अधीक्' इत्यनेन समानार्थाः स्मरणार्थाः धातवः । मातुः स्मरति । सर्पिषो दयते । मधुनः ईष्टे इत्यादीनि उदाहरणानि ज्ञेयानि । शेषत्वेन विवक्षाऽभावे मातरं स्मरति इत्याद्यपि ।

कृञः प्रतियत्ने ॥५३॥

सतो गुणान्तराधानम् प्रतियत्नः । तत्र करोतेः कर्मणि शेषत्वेन विवक्षिते षष्ठी । एधोदकस्योपस्कुरुते ।

एधः = इन्धनम्, दकम् = जलम् एधांसि; दकञ्चेति 'जातिरप्राणिनाम्' इत्येकवद्भावः । अथवा एधाश्च उदकञ्चेति विग्रहः । उपस्कुरुते-गुणाधानं करोतीत्यर्थः । अत्र करोतेः कर्मणि एधोदके षष्ठी । उपस्कुरुते-उप + कुरुते 'उपात्प्रतियत्न.........' इत्यादि सूत्रेण सुट्, 'गन्धनावक्षेपण.........' इत्यादिना आत्मनेपदम् ।

रुजार्थानां भाववचनानामज्वरेः ॥५४॥

भाववचनानां रुजार्थानां ज्वरिवर्जितानां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी । चौरस्य रुजति रोगः ।

रुजार्थानाम्-रुजा (√रुज् + अङ् + टाप्) अर्थो येषां ते रुजार्थास्तेषाम् । भाववचनानाम्-भावो वचनः कर्ता येषां ते तेषाम् । रोगः इत्ययं भाववाची कर्ताऽस्ति ।

आशिषि नाथः ॥५५॥

नाथतेः कर्मणि षष्ठी स्यादाशिषि । सर्पिषो नाथते । सर्पिर्मे भूयादित्याशास्ते ।

√नाथ √नाध् इति याच्ञोपतापैश्वर्याशीःषु पठ्यते । आशिष्यर्थे एवात्मनेपदम् भवति, 'आशिषि नाथः' इत्युपसंख्यानात् ।

जासिनिप्रहणनाथक्राथपिषां हिंसायाम् ॥५६॥

हिंसार्थानामेषां कर्मणि षष्ठी । निप्रेतिसंघात-विग्रहीत-विपर्यस्तग्रहणम् । चौरस्य निहन्ति, प्रहन्ति, प्रणिहन्ति, निप्रहन्ति इत्यादि ।

एषाम् -√जासि, निप्रहण, √नाट, √क्राथ, √पिष इति धातूनाम् । निप्रहणः-नि, प्र इत्येताभ्यां प्रत्येकं वोपसृष्टो √हन् धातुः तेन यथासम्भवं चत्वारि रूपाणि उदाहृतानि । चौरस्योज्जासयति । चौरस्योन्नाटयति । वृषलस्य क्राथयति । चौरस्य पिनष्टि इत्युदाहरणान्तराणि बोध्यानि ।

व्यवहृपणोः समर्थयोः ॥५७॥

एतयोर्द्यूते व्यवहारे च समानार्थयोः कर्मणि षष्ठी । शतस्य व्यवहरति । शतस्य पणते ।

एतयोः–व्यवहृ (वि+अव+√हृ), √पण् धात्वोः समर्थयोः–समानार्थयोः । द्यूते, क्रयविक्रयोश्चानयोः समानार्थत्वं दृश्यते । व्यवहरति = दीव्यति, क्रयविक्रयेण विनियुङ्क्ते वा । पणते–स एवार्थोऽत्रापि ।

दिवस्तदर्थस्य ॥५८॥

द्यूतार्थस्य दिवः कर्मणि षष्ठी । शतस्य दीव्यति ।

तदर्थस्य–सः द्यूतव्यवहाररूपोऽर्थो यस्य स तस्य ।

विभाषोपसर्गे ॥५९॥

उपसर्गे सति वा । शतस्य/शतं वा प्रतिदीव्यति ।

'दिवस्तदर्थस्य' इत्यनुवर्तते । पक्षे कर्मणि द्वितीया भवति ।

द्वितीया ब्राह्मणे ॥६०॥

ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि कारके द्वितीया । गामस्य तदहः सभायां दीव्येयुः । अनुपसर्गस्य नित्यं षष्ठ्यां प्राप्तायामिदं वचनम् । सोपसर्गस्य छन्दसि व्यवस्थितविभाषयाऽपि सिद्ध्यति ।

ब्राह्मणम्–मन्त्रस्य व्याख्यात्मको वेदभागः । गामस्य–अत्र सम्बन्धे षष्ठी गामस्य सभायाम् इति । तदहः–इत्येतदुदाहरणम् । अत्र कर्मणि द्वितीया ।

प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने ॥६१॥

प्रेष्यब्रुवोर्हविषः कर्मणि षष्ठी देवतासम्प्रदाने सति । 'प्रेष्य' इतीष्यते दैवादिकस्य लोण्मध्यमपुरुषस्यैकवचनम् । तत्साहचर्याद् ब्रुविरपि तद्विषय एव गृह्यते । अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य । अग्नये छागस्य हविषो वपायै मेदसोऽनुब्रूहि ।

प्रेष्य–प्र √इष् गतौ (दिवादिः) लोट्–मध्यमपुरुषैकवचने रूपम् । तेनान्यधातोरन्यलकारेऽन्यपुरुषे वचने वा नास्य सूत्रस्य प्रवृत्तिः । अग्नये–अत्राग्निदेवता सम्प्रदानम् । वपायाः मेदसः इति च हविषः कर्म तत्र षष्ठी । प्रे ३ष्य–'ब्रूहिप्रेष्य' इत्यादिना प्लुतादेशः ।

चतुर्थ्यर्थे बहुलं छन्दसि ॥६२॥

छन्दसि चतुर्थ्यर्थे बहुलं षष्ठी । पुरुषमृगश्चचन्द्रमसो दातव्यः/चन्द्रमसे वा ।

बहुलग्रहणात् कृष्णो रात्र्यै इत्यत्र सप्तम्यर्थे, अहल्यायै जारः इत्यत्र षष्ठ्यर्थे च चतुर्थी भवति ।

यजेश्च करणे ॥६३॥

छन्दसि बहुलं षष्ठी । घृतस्य/घृतेन वा यजते ।

√यज् धातोः करणे इति शेषः । √यज् धातुर्देवपूजायां वर्तते, तस्य घृतं करणम् ।

कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ॥६४॥

पञ्चकृत्वोऽह्नो भुङ्क्ते ।

'कृत्वसुच्' इत्यस्यार्थानां प्रत्ययानां प्रयोगे काले=कालवाचिनि अधिकरणे षष्ठी विभक्तिर्भवति । पञ्चकृत्वः–'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' । अह्नः इत्यत्र कालेऽधिकरणे षष्ठी ।

कर्तृकर्मणोः कृति ॥६५॥

कृत्प्रयोगे कर्तरि कर्मणि च षष्ठी । भवतः शायिका । भवत आसिका ।

शायिका, आसिका–√शी, √आस धातुभ्यां 'पर्यायार्हणोत्पत्तिषु ण्वुच्' इत्यनेन भावे ण्वुच् । भवतः इत्यत्र कर्तरि षष्ठी । कर्मणि–अपां स्रष्टा इत्युदाहरणम् ।

उभयप्राप्तौ कर्मणि ॥६६॥

आश्चर्यो गवां दोहोऽगोपेन ।

उभयप्राप्तौ–उभयोः = कर्तृकर्मणोः प्राप्तिर्यस्मिन् (कृति) तस्मिन् कर्मण्येव षष्ठी न कर्तरि। दोहः–√दुह + भावे घञ् तस्य कर्मणि-गोषु षष्ठी न तु गोपे कर्तरि।

क्तस्य च वर्तमाने ॥६७॥

न लोकेति निषेधे प्राप्ते विधिः। वर्तमानकालविहितस्य क्तस्य प्रयोगे षष्ठी भवति। राज्ञां मतः, बुद्धः, पूजितो वा।

राज्ञां मतः इत्यादि—'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तः। राज्ञाम् इत्यत्र कर्तरि षष्ठी।

अधिकरणवाचिनश्च ॥६८॥

अधिकरणवाचिनः क्तस्य प्रयोगे षष्ठी भवति। अयमपि प्रतिषेधापवादः। इदमेषामासितं, गतम्, भुक्तं वा।

'क्तोऽधिकरणे च' इत्यनेनाधिकरणे 'क्त' प्रत्ययो भवति। आसितम्–इत्यादिषु अधिकरणे क्तः। एषाम् इत्यत्र कर्तरि षष्ठी।

न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥६९॥

ल-उ-उक्-अव्यय-निष्ठा-खलर्थ-तृन् एषाम् प्रयोगे न षष्ठी। 'ल' इति शतृशानचौ, कानच्क्वसू, किकिनौ च गृह्यन्ते। ओदनम् पचन्, पचमानः, पेचानः, पेचिवान्। पपिः सोमम्। उ—कटं चिकीर्षुः।

'ल' शब्देन लादेशाः गृह्यन्ते। कि-किनोरपि लिट्त्वातिदेशात्तयोरपि ग्रहणं भवति। ओदनम् पचन् इत्यादीनि शत्रादीनां क्रमशः उदाहरणानि बोध्यानि। उक–आगामुकं वाराणसीं रक्ष आहुः। अव्ययम्–कटं कृत्वा। निष्ठा–देवदत्तेन कृतम्। ओदनम् भुक्तवान्। खलर्थ प्रत्ययः–ईषत्करः कटो भवता। तृन्–अत्र 'तृन्' इति प्रत्याहारः 'शतृ' इत्यस्य 'तृ' शब्दादारभ्य 'आक्वेस्ताच्छील्य तृन्' इति पर्यन्तम्। तेन शानन्–चानश्–शतृ–तृनामपि प्रतिषेधो भवति। सोमं पवमानः। अधीयन् पारायणम् इत्याद्युदाहरणानि। सर्वत्रोदाहरणेषु कारकषष्ठ्याः प्रतिषेधः, शेषे षष्ठा तु भवत्येव।

अकेनोर्भविष्यदाधमर्ण्ययोः ॥७०॥

अकस्य भविष्यत्काले विहितस्य, इनस्तु भविष्यति चाधमर्ण्ये

च विहितस्य प्रयोगे कर्मणि षष्ठी न। कटं कारकः। ग्रामं गमी। सुखमृणं दायी।

आधमर्ण्यम्–अधमर्ण + भावे ष्यञ्। तत्रार्थे 'आवश्यकाधमर्ण्ययोर्णिनिः' भवति, इति 'इना' (णिना) तस्यैव सम्बन्धः नत्वकस्य। कारकः–√कृ + ण्वुल् तस्य 'अक' इत्यादेशः। गमी–√गम् + इनि। दायी–√दा + णिनि।

कृत्यानां कर्तरि वा ॥७१॥

भवतः कटः कर्त्तव्यः/भवता वा।

कृत्यानाम्–कृत्य प्रत्ययानाम् प्रयोगे कर्तरि वा षष्ठी विभक्तिर्भवति।

तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् ॥७२॥

तुल्यार्थैर्योगे तृतीया पक्षे षष्ठी भवति। तुल्यो देवदत्तेन/देवदत्तस्य वा।

अर्थग्रहणेन द्योतकानाम् इवादीनां योगे न। तुला–उपमा इत्याभ्यां योगे तु षष्ठ्येव। तुला, उपमा वा कृष्णस्य नास्ति।

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ॥७३॥

आयुष्य-मद्र-भद्र-कुशल-सुख-अर्थ-हित, इत्येतैर्योगे चतुर्थी आशिषि। चकारात्षष्ठी भवति। आयुष्यं रामस्य/रामाय वा भूयात्।

अनभिहित इत्थं यतश्च प्रेष्यब्रुवोस्त्रयोदश ॥ इति

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
द्वितीयाध्यायस्य तृतीयः पादः।

एवं मद्रं रामस्य/रामाय वेत्याद्युदाहरणानि बोध्यानि। आयुष्यादीनां पर्यायैः = चिरञ्जीवित–शम्-पथ्यम्, इत्येतैर्योगेऽपि चतुर्थी, षष्ठी च भवति।

द्वितीयाध्यायस्यास्मिन् तृतीये पादे अनभिहिते, इत्थम्भूतलक्षणे, यतश्च निर्धारणम् इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा प्रेष्यब्रुवोर्हविषो देवता-सम्प्रदाने इत्यत आरभ्य त्रयोदश सूत्राणीति संकलनेन त्रिसप्ततिः (७३) सूत्राणि सन्ति।

इति काशिकावृत्तिसार–सुधायां
द्वितीयाध्यायस्य तृतीयः पादः।

अथ द्वितीयाध्याये चतुर्थः पादः

द्विगुरेकवचनम् ॥१॥

द्विगोरर्थः समाहारे एकवत् । पञ्चपूली ।

एकस्य वचनम् एकवचनम् । एकस्यार्थस्य वाचक इत्यर्थः । तदभिमत्याह–द्विगोरर्थः एकवत् इति । समाहारद्विगोरेवात्र ग्रहणम् । पञ्चपूलाः समाहृताः इति विग्रहः । 'अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' इति स्त्रीलिङ्गे 'द्विगोः' इति ङीप् ।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ॥२॥

'एकवचनम्' इति वर्तते । अङ्गशब्दस्य प्रत्येकं सम्बन्धः । प्राण्यङ्गादीनां द्वन्द्व एकवत् । पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् । समाहारस्यैकत्वात्सिद्धमेवैकवचनम्, इदं प्रकरणं विषयविभागार्थम् प्राण्यङ्गादीनां समाहार एव । दधिपयआदीनामितरेतरयोग एव । वृक्षमृगादीनामुभयथा ।

'प्राण्यङ्गानाम्, तूर्याङ्गानाम्, सेनाङ्गानाञ्च क्रमशः उदाहरणानि पाणिपादम्–इत्यादीनि पाणी च पादौ च तेषां समाहारः । मार्दङ्गिकाश्च, पाणविकाश्च तेषां समाहारः । रथिकाश्चाश्वारोहाश्च तेषां समाहारः इति विग्रहाः बोध्याः । विषयविभागार्थम्–एवमर्थो व्यज्यते य एकवचनो द्वन्द्वः स प्राण्यङ्गादीनामेवेति ।

अनुवादे चरणानाम् ॥३॥

चरणशब्दः शाखानिमित्तकः पुरुषे वर्तते, तत्र चरणानां द्वन्द्व एकवत् । प्रमाणान्तरावगतस्यार्थस्य शब्देन कीर्तनमात्रमनुवादः । उदगात्कठकालापम्, प्रत्यष्ठात्कठकौथुमम् । कठकालापादीनामुदयप्रतिष्ठे प्रमाणान्तरावगते यदा पुनः शब्देनानूद्येते तदेदमुदाहरणम् ।

यदा तु प्रथमत एवोपदेशस्तदा प्रत्युदाहरणम् । अनुवाद इति किम् ? उदगुः कठकालापाः ।

चरण शब्दः कठकालापादि शाखाभेदेषु मुख्यरूपेण, तदध्यायिपुरुषेषु च गौणरूपेण वर्तते । शाखाभेदवाचिनः एकवद्भावः 'जातिरप्राणिनाम्' इत्यनेनैव सिद्धः इति पुरुषवृत्तिरेवात्र गृह्यते । प्रमाणान्तरम् प्रत्यक्षादि । कठाश्च कालापाश्च तेषां समाहारः इति विग्रहः ।

अध्वर्युक्रतुरनपुंसकम् ॥४॥

अध्वर्युर्वेदे यस्य क्रतोर्विधानं सोऽध्वर्युक्रतुः । अध्वर्युक्रतुवाचिनां शब्दानामक्लीबानां द्वन्द्व एकवत् । अर्काश्वमेधम् । सायाह्नातिरात्रम् । अनपुंसकं किम् ? राजसूयवाजपेये । अत्र क्रतुशब्दः सोमयानेषु रूढः, तस्मादत्र न भवति दर्शपौर्णमासौ ।

अध्वर्युवेदः—यजुर्वेदः । अर्कश्चाश्वमेधश्च, सायाह्नश्चातिरात्रश्चेति तयोः समाहारः इति विग्रहः । दर्शपौर्णमासयोः सोमपानाभावान्न तौ सोमयागौ ।

अध्ययनतोऽविप्रकृष्टाख्यानाम् ॥५॥

अध्ययनतः—अध्ययननिमित्तेन अविप्रकृष्टा = प्रत्यासन्ना आख्या येषां ते, तेषां द्वन्द्व एकवद् भवति । पदकक्रमकम् । क्रमवार्तिकम् । अविप्रकृष्टाख्यानामिति किम् ? याज्ञिकवैयाकरणौ ।

अध्ययनतः—अधीतिरध्ययनम् तस्मात् 'आद्यादिभ्यः………' इत्यादिना तसिः । आख्या—सूत्रोपात्तमध्ययनम् । पदान्यधीते पदकः । क्रमम् अधीते क्रमकः । वृत्तिः—संहिता ताम् अधीते इति वार्तिकः । पदक्रमयोः, क्रमसंहितयोश्च सम्पाठेन = अध्ययनेन निमित्तेन या आख्या सा प्रत्यासन्ना ।

जातिरप्राणिनाम् ॥६॥

जातिवाचिनां द्वन्द्व एकवत् प्राणिवर्जम् । धानाशष्कुलि ।

सूत्रे जातिः—जातिवाच्यवयवो द्वन्द्वः । धानाश्च शष्कुल्यश्च तासां समाहारः । षण्णां रसानां कुलं शष्कुली । द्रव्यजातीनामेवायम् एकवद्भावो न गुणजातीनाम् । तेन रूपरसगन्धस्पर्शाः, गमनाकुञ्चनप्रसारणानि इत्यादिषु नैकवद्भावः ।

विशिष्टलिङ्गो नदीदेशोऽग्रामाः ॥७॥

विशिष्टलिङ्गानाम् = भिन्नलिङ्गानां नदीवाचिनां देशवाचिनां च ग्रामवर्जितानां द्वन्द्वः एकवत् । नद्यवयवो द्वन्द्वो 'नदी' इत्युच्यते देशावयवश्च 'देशः' । सूत्रे नदी, देशः इत्यसमासनिर्देशः । उद्धचेरावति । गंगाशोणम् । कुरुकुरुक्षेत्रम् ।

नद्यवयव........**निर्देशः**–अत्र नदी, देशः अवयववाचिनौ गृह्येते । सूत्रे तु गौणो निर्देशः उद्धचश्चेरावती च; गंगा च शोणश्च, कुरवश्च कुरुक्षेत्रञ्चेति विग्रहाः बोध्याः ।

❀(वा०) अग्रामा इत्यत्र नगराणां प्रतिषेधो वाच्यः । मथुरा च पाटलिपुत्रं च मथुरापाटलिपुत्रम् ।

क्षुद्रजन्तवः ॥८॥

क्षुद्रजन्तुवाचिनां द्वन्द्व एकवद्भवति । दंशमशकम् ।

अत्र जन्तुपदसन्निधानात् अल्पशरीरः क्षुद्रः गृह्यते । दंशाश्च मशकाश्च तेषां समाहारः । अत्र स्मृतिरपि—

क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः ।
शतं वा प्रसृतौ येषां केचिदानकुलादपि ॥

येषां च विरोधः शाश्वतिकः ॥९॥

येषां शाश्वतिको विरोधस्तेषां द्वन्द्व एकवत् । मार्जारमूषिकम् ।

शाश्वतिकः–नित्यः । मार्जारश्च मूषिकश्च । उभयोः नित्यविरोधो वर्तते ।

शूद्राणामनिरवसितानाम् ॥१०॥

निरवसानम् = बहिष्करणम् । न निरवसितास्ते तथा तेषाम् शूद्रवाचिनां शब्दानां द्वन्द्व एकवत् । तक्षायस्कारम् तत्किम् ? चाण्डालमृतपाः ।

बहिष्करणम्–यैर्भुक्ते पात्रं संस्कारेणापि न शुद्धचति तस्मात्पात्रात् ते पृथक् क्रियन्ते । तक्षा चायस्कारश्चेति विग्रहः । चाण्डालमृतिपौ पात्राद् बहिष्कृतौ स्तः ।

गवाश्वप्रभृतीनि च ॥११॥

एतानि कृतैकत्वानि साधूनि । गवाश्वम् इत्यादि । गवाश्व-प्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तम् । रूपान्तरे तु नायं विधिः । गोऽश्वम्/गोऽश्वौ । पशुद्वन्द्वविभाषैव भवति ।

गवाश्वादीनि कृतैकवद्भावान्येव गणे पठितानि, तेषां साधुत्वमात्रमनेन विधीयते । रूपान्तरे–यत्रावङ् आदेशो नास्ति तत्र । पशुद्वन्द्वविभाषा–'विभाषा वृक्ष मृग……' इत्यादि वक्ष्यमाणसूत्रेण ।

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराध-रोत्तराणाम् ॥१२॥

एषां द्वन्द्वो विभाषा एकवत् । वृक्षादीनां शकुनिपर्यन्तानां विशेषग्रहणम् । प्लक्षन्यग्रोधम्/प्लक्षन्यग्रोधाः ।

*(वा०) फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहु-प्रकृतिरेव द्वन्द्व एकवत्, न द्विप्रकृतिः । बदरामलके ।

विशेषग्रहणम्–अयम्भावः द्वन्द्वः वृक्षादिभिः प्रत्येकं विशिष्यते । तेनैषा विभाषा तुल्यजातीयेष्वेवावतिष्ठते । वृक्षस्योदाहरणमुक्तम् अन्येषां क्रमशः उदाहरणानि मृग–रुरुपृषतम्/रुरुप्रषताः । तृण–कुशकाशम्/कुशकाशाः । धान्य–व्रीहियवम्/व्रीहियवाः । व्यञ्जन–दधिघृतम्/दधिघृते । पशु–गोमहिषम्/गोमहिषाः । शकुनि–तित्तिरिकपिञ्जलम्/तित्तिरिकपिञ्जलाः । अश्ववडवम्-अश्ववडवम्/अश्ववडवौ । पूर्वापर–पूर्वापरम्/पूर्वापरे । अधरोत्तर-अधरोत्तरम्/अधरोत्तरे । बहुप्रकृतिः–बह्वर्था बहुवचनान्ता वा प्रकृतिर्यस्य सः बह्वर्थानां फलादीनां, बहुवचनान्तानां वैषां द्वन्द्व एकवद् भवतीत्यर्थः । तेन यदा बदराणि चामलिकानि चेति विग्रहः क्रियते तदा बदरामलकम् इत्येकवद्भवति यदा च बदरश्चामलकञ्चेति विग्रहस्तदा बदरामलके इत्येव भवति । एवमन्यत्रापि ज्ञेयम् ।

विप्रतिषिद्धं चानधिकरणवाचि ॥१३॥

मिथो विरुद्धानामनधिकरणवाचिनामद्रव्यवाचिनां द्वन्द्व एक-वत् । चाद् विकल्पः । शीतोष्णम्/शीतोष्णे । विप्रतिषिद्धमिति किम् ? कामक्रोधौ । अनधिकरण इति किम् ? शीतोष्णे उदके ।

विप्रतिषिद्धम्–परस्परविरुद्धम् । सहानवस्थानलक्षणो विरोधः । अद्रव्यवाचिनाम्–अधिकरणशब्दोऽत्र द्रव्यवाची । आधारवाची त्वधिकरण-शब्दो विभक्त्यर्थः । तत्र द्वन्द्वावयवानां वृत्तिर्न सम्भवति ।

न दधिपयआदीनि ॥१४॥

एतानि नैकवत् । दधिपयसी ।

केषाञ्चित्प्राप्ते केषाञ्चित् विभाषा प्राप्ते निषेधार्थमिदं सूत्रम् । एवम् ऋक्सामे । वाङ्मनसे ।

अधिकरणैतावत्त्वे च ॥१५॥

द्रव्यपरिमाणावगमे द्वन्द्वो नैकवत् । दश दन्तोष्ठाः । दश मार्दङ्गिकपाणविकाः ।

'द्वन्द्वश्च प्राणितूर्य…'इत्यादिना प्राप्तस्यैकवद्भावस्यायं निषेधः । अत्र 'दश' इति पदप्रयोगात् द्रव्यपदार्थदन्तोष्ठस्येयत्ता गम्यते । अत्र अधिकरणम् वर्ति–(समासावयवभूतः) पदार्थः तस्य परिगणनम् एतावत्त्वम् । तस्मिन् गम्यमाने इदं निषेधसूत्रम् प्रवर्तते ।

विभाषा समीपे ॥१६॥

अधिकरणैतावत्त्वस्य समीपे विभाषा द्वन्द्व एकवद्भवति । उपदशं दन्तोष्ठम्/उपदशं दन्तोष्ठाः । अव्ययस्य संख्ययाऽव्ययीभावो विहितः बहुव्रीहिरपि । तत्रैकवद्भावे आद्यः, इतरत्रान्यः ।

उपदशम्–दशानां समीपम् । अत्र 'दश' शब्द एतावत्त्वमाचष्टे 'उप'शब्दः सामीप्यम् । अव्ययस्य……अन्यः–अयम्भावः–'उप' इत्यव्ययस्य संख्यावाचिना सह उभावपि समासौ विहितौ । 'अव्ययं विभक्ति…' इत्यादिना-ऽव्ययीभावः, 'संख्ययाव्ययासन्न…' इत्यादिना बहुव्रीहिः । अयं तु विशेषः– अव्ययीभावे सामीप्यस्य प्राधान्यम् बहुव्रीहौ तु समीपिनः संख्येयस्य । एकवद्भावेऽव्ययीभावस्यानुप्रयोगः, इतरेतरयोगे तु बहुव्रीहिः । उपदशम् इत्यत्र टच् समासान्तः, उपदशाः इत्यत्र तु डच् ।

स नपुंसकम् ॥१७॥

यस्यैकवद्भावः स नपुंसकलिङ्गः द्विगुर्द्वन्द्वश्च । पञ्चगवम् । पाणिपादम् इत्यादि ।

❀(वा०) अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते । पञ्चपूली ।

❀(वा०) वा टाबन्तः । पञ्चखट्वी/पञ्चखट्वम् ।

❀(वा०) अनो नलोपश्च वा स्त्रियाम् । पञ्चतक्षम्/पञ्चतक्षी ।

❀(वा०) पात्रादेर्न । पञ्चपात्रम् । चतुर्युगम् । त्रिभुवनम् ।

द्विगोरुदाहरणं पञ्चगवम्–पञ्चानां गवां समाहारः । द्वन्द्वस्योदाहरणम्–पाणिपादम्–पाणी च पादौ च तेषां समाहारः । पञ्चपूली–'द्विगोः' इति ङीप् एवं पञ्चखट्वी इत्यत्रोपसर्जनह्रस्वत्वे सति तथा पञ्चतक्षी इत्यत्र न लोपे सति ङीप् ।

अव्ययीभावश्च ॥१८॥

क्लीबः । अधिस्त्रि । पूर्वपदार्थप्रधानस्यालिङ्गतैव प्राप्ता, अन्यपदार्थप्रधानस्याभिधेयलिङ्गता; अत इदम् । उन्मत्तगङ्गम् । अनुक्तसमुच्चयार्थश्चकारः ।

❀(वा०) पुण्यसुदिनाभ्यामह्नः । पुण्याहम् । सुदिनाहम् ।

❀(वा०) पथः संख्याव्ययादेः । चतुष्पथम् । विपथम् ।

❀(वा०) क्रियाव्ययविशेषणानां च । मृदु पचति । प्रातः सुन्दरम् ।

अधिस्त्रि–अत्र पूर्वपदार्थोऽव्ययः 'अधि' इत्यलिङ्गता तस्य । उन्मत्तगङ्गम्–अत्रान्यपदार्थोऽव्ययीभावः स पदार्थश्च देशः पुल्लिङ्गः अतः सूत्रेणोभयत्र नपुंसकत्वं विधीयते । पुण्याहं, सुदिनाहम्–'रात्राह्नाहाः पुंसि' इति पुंस्त्वस्यापवादः । सुदिन शब्दः प्रशस्तवाचकः । मृदु पचति–अत्र क्रियाद्वारेण स्त्रीत्वे प्राप्ते, प्रातः सुन्दरम्–इत्यत्राव्ययस्य विशेषणे नियमाभावे सति नियमारम्भः ।

तत्पुरुषोऽनञ् कर्मधारयः ॥१९॥

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र नञ्कर्मधारयौ

विनाऽन्यः स तत्पुरुषः क्लीबो ज्ञेयः वक्ष्यति 'विभाषासेनेत्यादि' विप्रसेनम्/विप्रसेना ।

अनञ्कर्मधारयः–नञ् च कर्मधारयश्चेति नञ्कर्मधारयौ तौ न वर्तेते यस्मिन् सः ।

संज्ञायां कन्थोशीनरेषु ॥२०॥

कन्थान्तं प्राग्वत् नाम्नि, कन्था चेदुशीनरेषु भवति । सौषमिकन्थम् । आह्वरकन्थम् । नाम्नि किम् ? वीरणकन्था । उशीनरेषु किम् ? दाक्षिकन्था । परवल्लिङ्गापवाद इदम् प्रकरणम् ।

प्राग्वत्–नपुंसकलिङ्गं भवति । सौषमीनां कन्था, आह्वराणां कन्था (एते द्वेऽपि कन्थे उशीनरदेशे निर्मीयेते स्म) । वीरणम्–उशीरम् तस्य कन्था । दाक्षिग्रामः–उशीनरदेशादन्यत्रासीत् ।

उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ॥२१॥

अनयोरादेराख्यानेच्छायामेतदन्तस्तत्पुरुषः क्लीबः । पाणिन्युपज्ञमकालकं व्याकरणम्, तेनादौ प्रणीतमित्यर्थः । पाणिन्युपक्रमम् । तदाद्याचिख्यासायामिति किम् ? मैत्रोपज्ञो रथः ।

अनयोः–उपज्ञोपक्रमयोः । उपज्ञा–स्वयम्प्राप्तं ज्ञानम् । उपक्रमः–प्रारम्भः । उपज्ञा चोपक्रमश्चेति समाहारद्वन्द्वः । आचिख्यासा–आख्यानस्येच्छा । पाणिनेः उपज्ञा, पाणिनेः उपक्रमश्चेति विग्रहः । पाणिनिना प्रथमतः प्रणीतम् प्रारब्धं वा व्याकरणमित्यर्थः । अकालम्–कालाधिकाररहितम् ।

छाया बाहुल्ये ॥२२॥

'विभाषा सेना……' इति वक्ष्यमाणे नित्यार्थ आरम्भ, पूर्वपदार्थबाहुल्ये गम्यमाने । शलभच्छायम् ।

शलभानां छाया इति विग्रहः । अत्र पूर्वपदार्थ शलभानां बाहुल्यं गम्यते । नहि बाहुल्येन विना छाया सम्भवति । पूर्वपदार्थबाहुल्ये–बाहुल्ये सति या छाया तद्वाची यः 'छाया' शब्दः तदन्तस्तत्पुरुषो नपुंसकलिङ्गो भवतीत्यर्थः ।

सभा राजाऽमनुष्यपूर्वा ॥२३॥

सभान्तः क्लीबः, न चेत्सभा राजपूर्वा, अमनुष्यपूर्वा च भवति । इनसभम् ।

*(वा०) पर्यायस्यैवेष्यते । नेह - राजसभा । अमनुष्यशब्दोऽत्र रूढया रक्ष आदीनाह—रक्षःसभम् । नेह-मैत्रसभा ।

अत्र सूत्रे अराजा, अमनुष्यपूर्वेति द्वौ नञौ तेन राजभिन्नो राजपर्यायः, अमनुष्यशब्देन रूढया रक्षः आदि चार्थौ लभ्येते । 'इन' शब्दो राजपर्यायस्तेन तत्र क्लीबत्वं भवति । एवं रक्षःसभम् इत्यपि । राजसभा, मैत्रसभा इत्यत्र तु न भवति ।

अशाला च ॥२४॥

अशाला च या सभाऽर्थात्सङ्घातवचना तदन्तः क्लीबः । दासीसभम् ।

सभा शब्दस्य द्वावर्थौ शाला, सङ्घातश्च । तत्र शालार्थस्य प्रतिषेधात् सङ्घातार्थग्रहणम् । दासीनां सभा, दासीसंङ्घ इत्यर्थः । शालार्थे तु अनाथ-सभा । अनाथशालेत्यर्थः ।

विभाषा सेनासुराच्छायाशालानिशानाम् ॥२५॥

सेना-सुरा-छाया-शाला तथा निशा एतदन्तस्तत्पुरुषो वा क्लीबः । विप्रसेनम्/विप्रसेनेत्यादि ।

यवसुरम्/यवसुरा । कुड्यच्छायम्/कुड्यच्छाया । गोशालम्/गोशाला । श्वनिशम्/श्वनिशा इत्युदाहरणानि । श्वनिशा = कृष्णचतुर्दशी यस्यां निशायां श्वानो मत्ता विहरन्ति, उपवसन्ति इति न्यासकारः शाबरभाष्ये ।

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥२६॥

समाहारे क्लीबस्य विहितत्वादितरेतरस्यात्र ग्रहणम् । कुक्कुटमयूर्याविमे, अर्धपिप्पली ।

*(वा०) द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु न । पञ्चकपालः । प्राप्तजीविकः इत्यादि ।

द्वन्द्वतत्पुरुषयोः–इत्यत्र षष्ठी तयोरुत्तरपदलिङ्गं विधीयते । द्वन्द्वे कुक्कुटमयूर्यौ–अत्र मयूरीपदस्य लिङ्गमस्ति मयूरीकुक्कुटौ इत्यत्र तु कुक्कुटपदस्य । एवम् तत्पुरुषे अर्धपिप्पली–इत्यत्र पिप्पलीपदस्य लिङ्गं भवति । पञ्चसु कपालेषु संस्कृतः पुरोडाशः । अत्र तद्धितस्याणो लुक् । प्राप्तजीविकः–जीविकां प्राप्तः इत्यत्र 'प्राप्तापन्ने च द्वितीयया' इति समासः । उभयत्र क्रमशः नपुंसकत्वं स्त्रीत्वञ्च न भवति ।

पूर्ववदश्ववडवौ ॥२७॥

अर्थातिदेशश्चायं न निपातनम् । द्विवचनमतन्त्रम्—अश्ववडवान् ।

अश्ववडवौ–इत्यत्र पूर्वपदस्य लिङ्गम् भवति । अश्वश्च वडवा चेति विग्रहः । एकवद्भावस्य विभाषया पक्षे परवत्–वडवाशब्दस्य लिङ्गे प्राप्ते अर्थातिदेशोऽयम् । अतन्त्रम्–अप्रधानम् अविवक्षितमित्यर्थः ।

हेमन्तशिशिरावहोरात्रे च च्छन्दसि ॥२८॥

हेमन्तशिशिरौ, अहोरात्रे अनयोश्छन्दसि प्राग्वत् । हेमन्तशिशिरावृतूनां प्रीणामि । अहोरात्रे इदं ब्रूमः ।

प्राग्वत्–पूर्ववल्लिङ्गं भवति । पक्षे हेमन्तशिशिरे इत्यत्र परवल्लिङ्गम् । अहोरात्रौ–इत्यत्र च 'रात्राह्नाहाः पुंसि' इत्यनेन पुंस्त्वम् भवति ।

रात्राह्नाहाः पुंसि ॥२९॥

कृतसमासान्तानां निर्देशः । एते पुंसि । परवल्लिङ्गापवादः । द्विरात्रः । पूर्वाह्णः । द्व्यहः ।

परवल्लिङ्गत्वे प्राप्ते इदं वचनम् । रात्र-अह्न-अह इत्येते पुल्लिङ्गाः भाष्यन्ते । द्वयोः रात्र्योः समाहारः इति द्विरात्रः अच् समासान्तः । अह्नः पूर्वम् पूर्वाह्णः टच् प्रत्ययः, अह्नादेशश्च । द्वयोरह्नोः समाहारः इति द्विगुः ।

अपथं नपुंसकम् ॥३०॥

अपथशब्दः क्लीबः । अपथमिदम् । तत्पुरुष इत्येव । नेह-अपथो देशः ।

अपथम्—न पन्थाः इत्यपथम् अकारः समासान्तः । समासान्तनिर्देशात् अपन्थाः इत्यत्रेदं न प्रवर्तते अपथो देशः—नास्ति विद्यमानः पन्था यस्मिन्निति बहुव्रीहिः ।

अर्धर्चाः पुंसि च ॥३१॥

अर्धर्चादयः शब्दाः पुंसि क्लीबे च । यथायोगं लिङ्गभेदः, यथा धर्मशब्दोऽपूर्वः पुंसि, तत्साधने क्लीबः । तानि धर्माणि प्रथमान्यासन् । अर्धर्चः अर्धर्चम् इत्यादि ।

'अर्धर्चादयः' इत्यर्थः 'अर्धर्चाः' इत्यत्र बहुवचनबलाल्लभ्यते । यथायोगम्—शब्दरूपाश्रया द्विलिङ्गता क्वचिदर्थभेदेनापि भवति । तदुदाहरति— यथा धर्मशब्द इत्यादि । अपूर्वः = यागादिक्रियाजन्यः स्वर्गादिफलानुगुणः कर्तर्युत्पन्नः संस्कारविशेषः ।

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ॥३२॥

अत्रेदमः 'अश्' आदेशः टादौ परतः । अस्य शोभनं शीलम् । अथो अस्य बह्वपि स्वम् । अशादेशवचनं साकच्कार्थम् । इमकस्य शेषं पूर्ववत् ।

अत्र—अन्वादेशे = अनुकथने । अनुकथनं = पश्चात्प्रतिपादनम् । टादौ— तृतीयादौ । अथो शब्दोऽन्वादेशवाची । यद्यपि शित्त्वात् 'अश्' आदेशः सर्वस्येदमो भवति, तेन न विशेषस्तृतीयादौ; परं साकच्कस्य आदेशे विशेषः स्यात् । इमकस्य शोभनं शीलम्, अथो अस्य प्रभूतं धनमित्यत्रान्वादेशे अकच् प्रत्ययसहितस्येदमः अश् आदेशो भवति । अश् अनुदात्तो भवति ।

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥३३॥

एतदः पूर्ववत् त्रतसोः परयोः, तौ चानुदात्तौ । एतस्मिन् ग्रामे सुखं वसामः । अथो अत्र युक्ता अधीमहे ।

पूर्ववत्–अन्वादेशविषयस्य 'अश्' आदेशः । अत्र–शित्वात् सर्वस्यैतदः अश् 'सप्तम्यास्त्रल्' इति त्रल् । इदं त्रल्युदाहरणम्, तसि च–एतस्माच्छात्रा-च्छन्दोऽधीष्व । अथो अतो व्याकरणमप्यधीष्व ।

द्वितीयाटौस्स्वेनः ॥३४॥

अन्वादेशे अनुदात्त इति वर्तते । द्वितीया-टा-ओस् एषु पूर्वोक्त-योरेनादेशः । इमं छात्रं छन्दोऽध्यापय, अथो एनं व्याकरणमध्यापय ।

पूर्वोक्तयोः–इदम्–एतद्,इति शब्दयोः । एवम् इदम् शब्दस्य अनेन/एनेन । अनयोः/एनयोः । एतद् शब्दस्य च एतम् एनम् । एतेन/एनेन तथा एतयो/एनयोः इति रूपाणि बोध्यानि ।

आर्धधातुके ॥३५॥

'आर्धधातुके' अधिकारोऽयम् 'ण्यक्षत्रियार्षञितः ……' इति यावत् ।

'आर्धधातुके' इत्यत्र विषयसप्तमी, तेनार्धधातुकविवक्षायामादेशेषु कृतेषु पश्चाद् यथाप्राप्तं प्रत्यया भवन्ति । तथा च √अस् धातोः 'भू' इत्या-देशानन्तरं 'अचो यत्' इत्यनेन 'यत्' प्रत्ययो भवति । अन्यथा हलन्तात् ण्यत् स्यात्तेन 'भव्यम्' न सिद्ध्येत । अपि तु वृद्धौ सत्यां 'भाव्यम्' स्यात् ।

अदो जग्धिर्ल्यप्ति किति ॥३६॥

अदो जग्धिः स्यात् ल्यपि तादौ च किति । प्रजग्ध्य । जग्धः इत्यादि ।

ल्यपि उदाहरणम् प्रजग्ध्य इति । तादौ किति क्तप्रत्यये जग्धः इति । जग्ध्+त इति स्थितौ हल्-सन्धिकार्येण जग्धः इति सिद्ध्यति । जग्धि–इत्यत्रेकार उच्चारणार्थः तेनात्र 'इदितो नुम् धातोः' इति नुम् न भवति ।

लुङ्सनोर्घस्लृ ॥३७॥

अदो 'घस्लृ' इत्यादेशः लुङि, सनि च । अघसत् । जिघत्सति ।

लुङि–अघसत् लृदित्वात् च्लेरङ् । सनि–जिघत्सति इत्युदाहरणम् ।

घञपोश्च ॥३८॥

घासः । प्रघसः ।

√अद् इत्यस्माद् भावे घञि वृद्धिः घासः । अपि च प्रघसः ।

बहुलं छन्दसि ॥३६॥

अदः 'घस्लृ' आदेशः छन्दसि बहुलं भवति । घस्तान्नूनम् । सग्धिश्चम् ।

घस्ताम्–√अद्+लङ्—तस्→ताम् । अदादित्वात् शपो लुक् 'बहुलं छन्दसि……' इत्यादिना अडभावः अथवा √अद्+लुङ् 'मन्त्रे घस………' इत्यादिना च्लेर्लुक् अडभावश्च । सग्धिः–√अद्+क्तिन् सन्धिकार्ये कृते 'ग्धिः' समाना ग्धिः इति सग्धिः 'समानस्य छन्दसि………' इत्यनेन समानस्य 'स' इत्यादेशः । पक्षे आत्ताम् इत्यादि ।

लिट्यन्यतरस्याम् ॥४०॥

लिटि अदो घस्लादेशो वा । जघास/आद । जक्षतुः/आदतुः इत्यादि ।

जक्षतुः–√घस्+अतुस् इति स्थितौ उपधालोपे 'शासिवसि………' इत्यादिना षत्वे, चर्त्वे च रूपं सिद्धयति ।

वेञो वयिः ॥४१॥

लिट्यन्यतरस्याम् इति वर्तते । इकार उच्चारणार्थः । उवाय । ऊयतुः/ऊवतुः । ऊयुः/ऊवुः । 'लिटि वयो यः' इति यस्य सम्प्रसारण-निषेधः, 'वश्चान्यतरस्यां किति' इति वकारो विधीयते । ववौ । ववतुः । 'वेञः' इति न सम्प्रसारणम् ।

इकार उच्चारणार्थः तेन इदित्त्वात् 'नुम्' न भवति । ऊयतुः, ऊयुः— 'लिट्यभ्यासस्योभयेषाम्' इत्यनेन वकारस्य सम्प्रसारणम् ।

हनो वध लिङि ॥४२॥

अकारान्तोऽयमादेशः, तेन 'अवधीत्' इत्यत्राकारलोपस्य स्थानिवद्भावात् हलन्तलक्षणा वृद्धिर्न । वध्यात् ।

हलन्तलक्षणा– 'वदव्रजहलन्तस्याचः' इत्यनेन ।

लुङि च ॥४३॥

हनो 'वध' आदेशः । अवधीत् । पृथक्करणमुत्तरार्थम् । आत्मनेपदेषु लुङि विकल्पो यथा स्यात्, लिङि मा भूत् ।

एकयोगे सति लिङोऽप्यनुवृत्तिः स्यादिति भावः ।

आत्मनेपदेष्वन्यतरस्याम् ॥४४॥

हनो 'वध' इत्यादेशो वा आत्मनेपदेषु लुङि । आवधिष्ट/आहत ।

आवधिष्ट—'आङो यमहन·····' इत्यात्मनेपदम् ।

इणो गा लुङि ॥४५॥

इणो 'गा' भवति लुङि । पुनर्लुङ्ग्रहणम् आत्मनेपदेऽपि नित्यत्वार्थम् । अगात् । अगामि त्वया ।

*(वा०) इण्वदिक इति वाच्यम् । इङिकावध्युपसर्गतो न व्यभिचरतः । अध्यगात् ।

इण्वदिक इति—सर्वत्र भवति, तेन पृथग्वार्तिककरणस्यौचित्यमिति भावः । न व्यभिचरतः—सर्वदा अधिपूर्वकावेव प्रयुज्येते ।

णौ गमिरबोधने ॥४६॥

अबोधनार्थस्येणो गमिरादेशो णौ । गमयति । अधिगमयति । तत्किम् ? अर्थान् प्रत्याययति ।

गमि- इकारः उच्चारणार्थः । गमयति—मित्वात् ह्रस्वत्वम् । अधिगमयति—'इण्वदिक' इति हेतोः । प्रत्याययति = बोधयति ।

सनि च ॥४७॥

जिगमिषति । अधिजिगमिषति । पृथक्करणमुत्तरार्थम् 'इङश्चेति' सन्येव यथा स्यात् णौ मा भूत् ।

इणो गमिरादेशः सनि । अधिजिगमिषति—'इण्वदिक' इति हेतोः ।

इङश्च ॥४८॥

इङश्च सनि परतो गमिरादेशः । अधिजिगांसते ।

अधिजिगांसते–'पूर्ववत्सनः' इत्यात्मनेपदम्, 'अज्झनगमां सनि' इति दीर्घः ।

गाङ् लिटि ॥४६॥

√इङ्धातोः । अधिजगे । ङित्त्वं 'गाङ्कुटादिभ्यः' इत्यत्रास्य ग्रहणं यथा स्यात् । न हि स्थानिवद्भावेन 'गाङ्' इति रूपं लभ्यते ।

लिटि–लकारादावेव । तेन 'एश्' आदेशात्पूर्वमेव 'गाङ्' इत्यादेशो भवति । स्थानिवद्भावेन–'गाङ्कुटादिभ्यः' इत्यत्र स्वरूपस्य ग्रहणम् ।

विभाषा लुङ्लृङोः ॥५०॥

अध्यगीष्ट/अध्यैष्ट । अध्यगीष्यत/अध्यैष्यत ।

√इङ् इत्यस्य । अध्यगीष्ट/अध्यगीष्यत्–'घुमास्थागा……' इत्यादिना ईत्त्वम् । अध्यैष्ट/अध्यैष्यत–'आडजादीनाम्' इत्याट्, आटश्चेति वृद्धिः ।

णौ च संश्चङोः ॥५१॥

सन्परे, चङ्परे च णौ इङो वा गाङ् । अधिजिगापयिषति/ अध्यापिपयिषति । अध्यजीगपत्/अध्यापिपत् ।

√इङ–अपेक्षया 'णौ' इत्यत्र परसप्तमी । णेरपेक्षया सनि, चङि च परसप्तमी । सन्; चङ् वा परो यस्यैवम्भूते णौ परे इङो वा गाङ् इत्यर्थः । अधिजिगापयिषति–अधि √इङ्→गा + णिच् (पुक्) + सन् (इट्) गुणायादेशौ । अध्यजीगपत्–'णिश्रि···' इत्यादिना च्लेश्चङ्, सन्वद्भावात् 'सन्यतः' इतीत्त्वम् । 'दीर्घो लघोः' इति दीर्घः ।

अस्तेर्भूः ॥५२॥

भविता । 'ईहामास' इत्यत्र तु न, तथा चोच्यते –

भ्वसौ विहायाभ्यधितैष कृञ्पदं ग्रहीतुकामस्त्रितयं तदेव हि ।
अनुप्रयोगे तु भुवाऽस्त्यबाधनं स्मरन्ति कर्तुर्वचनान्मनीषिणः ॥

'कृश्वानुप्रयुज्यते' इत्यत्र प्रत्याहारग्रहणेनास्तेर्ग्रहणसामर्थ्यात् ।

√अस् धातोः 'भू' इत्यादेशो भवति आर्धधातुके । **भविता**–भू धातोरेव सिद्धे 'असिता' इत्यस्य निवृत्तये सूत्रारम्भः । **ईहामास**–अत्र √ईह् धातोर्लिटि, आमि, 'आमः' इत्यनेन लिटो लुकि 'कृञ्चानुप्रयुज्यते लिट्' इत्यत्र 'कृञ्' पदम् प्रत्याहारं स्वीकृत्य कृञ्, भू, अस् इत्येतेषां ग्रहणात् अत्र √अस् धातोरनुप्रयोगे तस्यापि 'भू' इत्यादेशः प्राप्नोति । स न भवति, तत्र सूत्रे √अस् धातोर्ग्रहणसामर्थ्यात् । अन्यथा √अस् धातोर्ग्रहणमेवानर्थकं स्यात् । तदाह–भ्वसौ…त्रितयम्—कृञ्, भू, अस् इत्येतेषां त्रितयं ग्रहीतुकामः 'कृञ्' पदम् अभ्यधित—आह । **अनुप्रयोगे**–'कृञ्चानु……' इत्यादिना √अस् धातोरनुप्रयोगे भुवा अस्तेः अबाधनम् मनीषिणः स्मरन्ति । **कर्तुः**–सूत्रकारस्य वचनात् ।

ब्रुवो वचिः ॥५३॥

आर्धधातुके । वक्ता । वक्तुम् ।

'वचिः' इत्यत्र इकार उच्चारणार्थः ।

चक्षिङः ख्याञ् ॥५४॥

आख्याता । 'ख्याञ्' इत्यस्य ञित्त्वात् पक्षे परस्मैपदमपि आख्यास्यति/आख्यास्यते ।

❀(वा०) क्शादिरप्ययमादेश इष्यते । आक्शाता ।

❀(वा०) वर्जने निषेधः । खलाः संचक्ष्याः = वर्ज्याः इत्यर्थः ।

❀(वा०) असनयोश्च निषेधः । नृचक्षाः राक्षसः । विचक्षणः पण्डितः ।

क्शादि–आकात्पूर्वो भागः खकारयकारसहितः ख्या, ककारशकारसहितश्च क्शा (ञकारानुबन्धविशिष्टः) इत्यर्थः । उभयोः खकारककारयोरकार उच्चारणार्थः । **संचक्ष्याः**–√चक्ष् + ण्यत् 'ऋहलोर्ण्यत्' । **नृचक्षाः**–नॄन् चष्टे इति नृ √चक्ष् + असुन् 'अत्वसन्तस्य चाधातोः' इति दीर्घः । **विचक्षणः**–वि √चक्ष् + कर्तरि ल्युट् ।

वा लिटि ॥५५॥

चक्षिङः ख्याञ् आदेशो वा लिटि । आचख्यौ/आचचक्षे ।

विकल्पार्थमिदं सूत्रम् । आचख्ये/आचक्शौ/आचक्शे इत्यपि भवन्ति ।

अजेर्व्यघञपोः ॥५६॥

अजेः 'वी' इत्यादेशो भवत्यार्धधातुके घञपोस्तु न । प्रवायकः । प्रवयणीयः । घञि समाजः । अपि च समजः ।

प्रवायकः–प्र + √अज् + ण्वुल् । **प्रवयणीयः** इत्यत्र अनीयर् ।

❀(वा०) क्यपि न भवति ।समज्या ।

वा यौ ॥५७॥

'यु' इति ल्युटो ग्रहणम्, तस्मिन्नजेर्वा 'वी' । प्रवयणः/प्राजनो वा दण्डः ।

प्रवयणः–'कृत्यचः' इति णत्वम् ।

ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ॥५८॥

ण्यादयो गोत्रप्रत्ययाः । ण्यन्तात्, क्षत्रियगोत्रात्, आर्षात्, ञितश्च परयोरणिञोर्लुग्न भवति । 'कुर्वादिभ्यो ण्यः' कौरव्यः पिता, कौरव्यः पुत्रः । श्वाफल्कः पिता, श्वाफल्कः पुत्रः । वाशिष्ठः पिता, वाशिष्ठः पुत्रः । 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' बैदः पिता, बैदः पुत्रः ।

'आर्धधातुके' इति निवृत्तम् । **कौरव्यः पुत्रः**–कौरव्य + इञ् तस्य लुक् । **श्वाफल्कः**–श्वफल्क + अण् 'ऋष्यन्धवृष्णिकुरुभ्यश्च' इत्यनेन । श्वाफल्कः पिता ततः इञ् तस्य लुक् श्वाफल्कः पुत्रः । एवं वाशिष्ठः पिता–वशिष्ठ + अण् आर्षः । ततः इञ् तस्य लुक् वाशिष्ठः पुत्रः । एवम् विद + अञ् ततः इञो लुक् **बैदः पिता, पुत्रश्च** ।

पैलादिभ्यश्च ॥५९॥

युवप्रत्ययस्य लुक् । पैलः पुत्रः ।

पीलायाः अपत्यं पैलः पिता पीला + अण् । पैलस्यापत्यम् पैल + फिञ् 'अणो द्व्यचः । इत्यनेन तस्य लुक् पैलः पुत्रः।

इञः प्राचाम् ॥६०॥

प्राचां गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक्। पान्नागारेरपत्यं युवा पान्नागारिः पिता, पान्नागारिः पुत्रः ।

'प्राचाम्' इति गोत्रविशेषणम् । 'युव' प्रत्ययस्य लुग्विधानात् अर्थादाक्षिप्तं गोत्रमिति भावः । पन्नम्–प्राप्तम् अगारं येन स पन्नागारः । तस्य गोत्रापत्यं पान्नागारिः पन्नागार + इञ । पान्नागारेर्युवापत्यमित्यर्थे पान्नागारि + फक् तस्यानेन लुक् ।

न तौल्वलिभ्यः ॥६१॥

अनन्तरो लुक् निषिध्यते । तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य न लुक् । तौल्वलिः पिता, तौल्वलायनः पुत्रः इत्यादि ।

तुल्वलस्य गोत्रापत्यं तौल्वलिः तुल्वल + इञ् । तौल्वलेः युवापत्यं तौल्वलायनः तौल्वलि + फक् फकारस्यायनादेशः ।

तद्राजस्य बहुषु तेनैवास्त्रियाम् ॥६२॥

बहुत्वे वर्तमानस्य तद्राजसंज्ञकास्त्रीलिङ्गस्य लुक् तत्कृते बहुत्वे । अङ्गाः । वङ्गाः । तत्कृते किम् ? प्रियवाङ्गाः । अस्त्रियां किम् ? आङ्ग्यः स्त्रियः ।

तद्राजसंज्ञकाः–'ते तद्राजाः', 'ञ्यादयस्तद्राजाः' इति सूत्राभ्यां येषां 'तद्राज' संज्ञा विहितास्ते । तत्कृते बहुत्वे–'तद्राज' प्रत्ययैरेव बहुत्वं कृतं स्यात् । अङ्गाः–अङ्गस्यापत्यानि बहूनि 'द्वयञ्मगध ......' इत्यादिना विहितस्याणो लुक् । प्रियवाङ्गाः–प्रियो वाङ्गः (वङ्गस्यापत्यं युवा) येषां ते । अत्र युवप्रत्ययस्य न लुक् तेन तत्कृतं बहुत्वमपि न । आङ्ग्यः–अङ्गस्यापत्यानि स्त्रियः इति आङ्ग + ङीप्, आङ्गी । बहुवचने तु आङ्ग्यः ।

यस्कादिभ्यो गोत्रे ॥६३॥

'बहुषु तेनैवास्त्रियाम्' इत्यनुवर्तते । यस्कादिभ्यः परस्य गोत्रप्रत्यय लुक् बहुषु तेनैवास्त्रियाम् । यस्काः । लभ्याः ।

यस्काः–यस्कस्य गोत्रापत्यानि बहूनि इति यस्क + अण् 'शिवादिभ्योऽण्' तस्य लुक् । एवं लभ्यस्य गौत्रापत्यानि बहूनि इति लभ्याः ।

यञञोश्च ॥६४॥

'बहुषु तेनैवास्त्रियाम्' 'गोत्रे' इति चानुवर्तते । अनयोर्लुक् । गर्गाः । विदाः ।

अनयोः–यञः, अञश्च । गर्गाः–गर्गस्य गोत्रापत्यानि 'गर्गादिभ्यो यञ्' इति विहितस्य यञो लुक् । एवम् विदाः–विदस्य गोत्रापत्यानि 'अनृष्यानन्तर्ये विदादिभ्योऽञ्' इति अञो लुक् ।

अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ॥६५॥

बहुष्वित्याद्यनुवर्तते, एभ्यो गोत्रप्रत्ययस्य लुक् । अत्रयः । भृगवः इत्यादि ।

अत्रयः–अत्रेः गोत्रापत्यानि 'इतश्चानिञः' इति अत्रि+ढक् तस्य लुक् । भृगु-कुत्स-वसिष्ठ-गोतम-अङ्गिरस् इत्येतेषामपत्यानि 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इति भृगु+अण् तस्य लुक् । एवं कुत्साः । वशिष्ठाः । गोतमाः । अङ्गिरसः इत्यादि ।

बह्वच इञः प्राच्यभरतेषु ॥६६॥

बह्वचो य इञ् प्राच्यगोत्रे, भरतगोत्रे च तस्य लुक् बहुत्वे । पन्नागाराः । युधिष्ठिराः ।

बह्वचः इति 'प्रातिपदिकात्' इत्यस्य विशेषणम् बहवः अचः यस्मिन् स तस्मात् । पन्नागारस्य गोत्रापत्यानि पन्नागार+इञ् तस्य लुक् । पन्नागाराः प्राच्याः । एवम् युधिष्ठिरस्य गोत्रापत्यानि युधिष्ठिर+इञ् तस्य लुक् युधिष्ठिराः भरताः । भरत आद्यः संज्ञाकारी येषां ते । अथवा भरतापत्येषु 'भरत'शब्दोऽभेदोपचाराद् वर्तते । प्राच्याश्च भरताश्चेति द्वन्द्वः । यद्यपि भरताः प्राच्या एव तथापि तेषां पृथगुपादानम् अन्यत्र प्राचां ग्रहणे भरतानां ग्रहणं न । तेन 'इञः प्राचाम्' इत्यनेन भरतानां युवप्रत्ययस्य लोपो न भवति, आर्जुनिः पिता, आर्जुनायनः पुत्रः ।

न गोपवनादिभ्यः ॥६७॥

विदाद्यन्तर्गणोऽयम् । तत्र गोत्रप्रत्ययस्य अञः 'यञञोश्च' इति लुक् प्राप्तो निषिध्यते । गौपवनाः इत्यादि ।

गौपवनाः–गोपवनस्य गोत्रापत्यम् 'अनृष्यानन्तर्ये विदादिभ्योऽञ्' इति अञ्, वृद्धिः । गोपवनादयोऽष्टौ ये गणे पठिताः, तेभ्य एव लुको निषेधो भवति अन्येभ्यस्तु बहुषु लुग्भवत्येव हरितस्य गोत्रापत्यानि हरिताः ।

तिककितवादिभ्यो द्वन्द्वे ॥६८॥

तिकादिभ्यः कितवादिभ्यश्च मिथो द्वन्द्वे गोत्रप्रत्ययस्य न लुक् । तैकायनश्च कैतवायनश्च इति तिककितवाः । 'तिकादिभ्यः फिञ्' तस्य लुक् इत्यादि ।

तिककितवादीनां कृतद्वन्द्वसमासानामेव गणे पाठस्तेनासमस्तानां न लुक् । आदिशब्दस्य प्रत्येकं योगः ।

उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ॥६९॥

वा लुक्, द्वन्द्वे चाद्वन्द्वे च । उपकलमकाः । भ्रष्टककपिष्ठलाः । कृष्णाजिनकृष्णसुन्दरा इति । उपकाः । उपकायनाः इत्यादि ।

उपकलमकाः–औपकायनाश्च, लामकायनाश्चेति विग्रहः । 'नडादिभ्यः फक्' तस्य लुक् । भ्रष्टककपिष्ठलाः–भ्राष्टकयश्च, कापिष्ठलयश्चेति विग्रहः । 'अत इञ्' तस्य लुक् । एवं कार्ष्णाजिनयश्च, कार्ष्णसुन्दरयश्च इति विग्रहः । अत्रापि 'इञ्' प्रत्ययस्य लुग्भवति । द्वन्द्वे नित्यं लुग्भवति । अद्वन्द्वे त्वनेन विकल्पः ।

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ॥७०॥

एतयोर्गोत्रप्रत्यययोरण्यञोर्बहुषु लुक्, तयोश्च अगस्ति, कुण्डिनच् इत्यादेशौ भवतः । अगस्तयः । कुण्डिनाः ।

अगस्त्यस्य गोत्रापत्यानि, इत्यर्थे 'ऋष्यन्धक…' इत्यनेन 'अण्' एवं कौण्डिन्यशब्दे 'गर्गादिभ्यो यञ्' । आगस्त्यकौण्डिन्ययोः–इत्यस्य आगस्त्यकौण्डिन्ययोरवयवौ यौ गोत्रप्रत्ययौ तयोरित्यर्थस्तेन गोत्रप्रत्ययस्य लुगनन्तरं प्रकृतिमात्रयोरगस्त्यकुण्डिनयोरुक्तादेशौ । कुण्डिनच्–चकारः स्वरार्थः ।

सुपो धातुप्रातिपदिकयोः ॥७१॥

सुपो विभक्तेर्धातुसंज्ञायाः प्रातिपदिकसंज्ञायाश्च लुग्भवति ।

तदन्तर्गतास्तद्ग्रहणेन गृह्यन्ते । धातोः पुत्रीयति । प्रातिपदिकस्य राजपुरुषः । तयोः किम् ? वृक्षः ।

सुप्–'सुप्' इति 'सु'शब्दादारभ्य सुपः पकारेण प्रत्याहारः । तदन्तर्गताः–तयोः धातुप्रातिपदिकयोरन्तर्गताः अवयवभूताः । तद्ग्रहणेन–धातुप्रातिपदिक-ग्रहणेन । पुत्रीयति–आत्मनः पुत्रम् इच्छति इति विग्रहः, पुत्रम् + क्यच् इत्यवस्थायां 'सनाद्यन्ता धातवः' इत्यनेन 'धातु'संज्ञा तदवयवीभूत 'द्वितीया' विभक्तेर्लुक् । राजपुरुषः–राज्ञः पुरुष इति विग्रहः 'कृत्तद्धितसमासाश्च' इति 'प्रातिपदिक' संज्ञा, तदवयवयोः षष्ठी–प्रथमयोर्लुक् । वृक्षः–नात्र 'सुप्' प्राति-पदिकावयवः ।

अदिप्रभृतिभ्यः शपः ॥७२॥

लुक् । अत्ति । हन्ति इत्यादि ।

अदि प्रभृतिभ्यः–√अद् आदि धातुभ्यः शपो लुक् ।

बहुलं छन्दसि ॥७३॥

वृत्रं हनति । अहिः शयते ।

छन्दसि शपो बहुलं लुग्भवति । हनति, शयते अनयोर्न भवति, त्राध्वं नो देवाः इति भौवादिकस्य √त्रैङ् इत्यस्य तु भवति ।

यङोऽचि च ॥७४॥

अचि यङो लुक् । चादन्यत्रापि बहुलम् । लोलुवः । पोपुवः । अनच्यपि लालपीति ।

लोलुवः–यङन्तात् √लोलूय इत्यस्मात् अचि यङ्लुक् ऊकारस्य 'उवङ्' एवं पोपुवः इत्यत्रापि । लालपीति–√लप् इत्यस्माद्धातोर्लटि यङन्तस्य रूपम् ।

जुहोत्यादिभ्यः श्लुः ॥७५॥

शबनुवर्तते न यङ् । एभ्यः परस्य श्लुर्भवति । जुहोति । बिभर्ति इत्यादि ।

लुकि प्रकृते तदर्थक'श्लु' विधानं 'श्लौ' इत्यनेन द्विर्वचनार्थम् । जुहो-त्यादिभ्यः–√हु आदि धातुभ्यः ।

बहुलं छन्दसि ॥७६॥

बहुलमिति यत्रोक्तं तत्र न भवति, अन्यत्रापि भवति । दाति॑ प्रि॒याणि॑ । पू॒र्णां वि॑वष्टि ।

दाति–अत्र श्लुर्न भवति तेन द्वित्वमपि न, शपो लुग्भवति । विवष्टि–√वश् कान्तौ अदादित्वात् शपो लुकि प्राप्ते श्लुः भवति तेन द्वित्वादिकम् ।

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥७७॥

*(वा०) गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम् । √गा-√स्था-घु √पा-√भू एभ्यः सिचो लुक् परस्मैपदेषु परतः । अगात् इत्यादि ।

इण्-पिबत्योर्ग्रहणम्–'गाति' इत्यत्र श्तिपा निर्देशेन √इण् धातोः लुग्विकरणालुग्विकरणयोर्मध्येरलुग्विकरणस्यैव ग्रहणमिति परिभाषया च पिबतेर्ग्रहणं भवति । तेन गानार्थस्य √गा इत्यस्य रक्षणार्थस्य √पा इत्यस्य ग्रहणं न भवति । तेन नात्र सिचो लुक् नटः अगासीत् । नृपः अपासीत् । अस्थात् । 'घु' इति √दा-√धा-धात्वोः संज्ञा । अदात् । अधात् । अपात् । अभूत् इत्युदाहरणान्यपि बोध्यानि ।

विभाषा घ्राधेट्शाच्छासः ॥७८॥

'सिचः परस्मैपदेषु' 'लुक्' इत्यनुवर्तते । √घ्रा-√धेट्-√शा-√छा-√सा इत्येतेभ्यो विभाषा लुक् भवति । अघ्रात्/अघ्रासीत् इत्यादि ।

'धेट्' धातोर्घुसंज्ञया पूर्वेण नित्यप्राप्तौ, अन्येषाञ्चाप्राप्तौ विभाषावचनम् । अधात्/अधासीत् । अशात्/अशासीत् । अच्छात्/अच्छासीत् । असात्/असासीत् इत्युदाहरणान्तराणि । 'परस्मैपदेषु' इत्येव सिचो लुक् । तेनात्र न लुक् अघ्रासातां सुमनसौ देवदत्तेन । अत्र कर्मणि आत्मनेपदम् ।

तनादिभ्यस्तथासोः ॥७९॥

त, थास् अनयोः परयोस्तनादिभ्यः परस्य सिचो लुक् वा । अतत । अतथाः । थासा साहचर्यादात्मनेपदस्य 'त' शब्दस्य ग्रहणम्, अतः परस्मैपदे 'त' शब्दे सिचो लुक् न भवति अतनिष्ट यूयम् ।

अतत, अतथाः—पक्षे अतनिष्ट,, अतनिष्ठाः । अतनिष्ट यूयम्—मध्यमपुरुषबहुवचम् ।

मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः ॥८०॥

मन्त्रविषये, एभ्य उत्तरस्य लेर्लुक् । √घस्—अक्षन्नमीमदन्त पितरः । एवं √ह्वृ-√णश्-√वृ-√दह्—आदन्त-√वृच्-√कृ-√गमि-√जनि, एतेषां प्रयोगेषु ज्ञेयम् ।

लेः इत्यत्र च्लेर्ग्रहणम् । 'सिचः' इत्यनुवर्तमाने तत्स्थाने यो लिः (च्लिः) तस्येति । √ह्वृ आदीनां क्रमशः उदाहरणानि √ह्वृ—मा ह्वर्मित्रस्य त्वम् ।√णश-प्राणङ्मर्त्यस्य ।√वृ—सुरुचो वेन आवः । √दह—मा नु आधक् । आदन्त—आप्रा द्यावा पृथिवी अन्तरिक्षम् । √वृच-मा नो अस्मिन्महाधने परावर्क् । √कृ—अक्रन् कर्म । गम—अग्मन् । जन—अज्ञत वा अस्य दन्ताः । अत्र मन्त्रग्रहणं वेदोपलक्षणम् तेन ब्राह्मणेऽपि भवति ।

आमः ॥८१॥

आमः परस्य लेर्लुग् भवति । ईहाञ्चक्रे ।

अत्र 'लेः' इत्येवानुवर्तते न सिचा विशेषितस्तेन लिट् लकारस्य 'लिः' गृह्यते । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् । तेनेह न—√अम् रोगे इत्यस्य आम । आमोऽर्थवतो ग्रहणम् तेन 'जगाम' इत्यादिष्वपि नेदं प्रवर्तते ।

अव्ययादाप्सुपः ॥८२॥

अव्ययात् परस्य आप्सुपोर्लुक् । यत्र यात्रायाम् । कृत्वा ।

आप्—टाप्, डाप् इति स्त्रीप्रत्यययोर्ग्रहणम् । यत्र—'त्रल्' प्रत्ययान्तस्या व्ययसंज्ञा तस्माट्टापो लुक् । कृत्वा—क्त्वान्तस्याप्यव्ययसंज्ञा । तस्मात्सुपो लुक् ।

नाव्ययीभावादतोऽम्त्वपञ्चम्याः ॥८३॥

अदन्तादव्ययीभावात् सुपो न लुक्, अमादेशस्तु भवति, पञ्चमीं वर्जयित्वा । उपकुम्भं तिष्ठति । नेह—उपकुम्भादानय ।

उपकुम्भम्–कुम्भस्य समीपम् (अव्ययीभावः) उपकुम्भात्–पञ्चम्याः रूपम् 'रामात्' इतिवत् । अत्र पञ्चम्या 'अम्' आदेशो न भवति तस्याः 'लुक्' अपि न । तेनात्र 'पञ्चमी' दृश्यते ।

तृतीयासप्तम्योर्बहुलम् ॥८४॥

पूर्वेण नित्यम् अम्भावे प्राप्ते वचनम् । अनयोर्बहुलम् अम् आदेशो भवति । उपकुम्भेन कृतम्/उपकुम्भं कृतम् । उपकुम्भे निधेहि/ उपकुम्भं निधेहि ।

*(वा०) सप्तम्याः समृद्धिनदीसमाससंख्याऽवयवेभ्यो नित्यमिति वक्तव्यम् । सुमद्रम् । उन्मत्तगङ्गम् । एकविंशति भारद्वाजम् ।

उपकुम्भम्–पक्षे तृतीयासप्तम्योः रूपम् । सुमद्रम्–मद्राणां समृद्धिः । उन्मत्तगङ्गम्–उन्मत्ता गंगा यस्मिन् देशे, एकविंशति भारद्वाजम्–एकविंशतिः भरद्वाजाः इति विग्रहवाक्यानि । भारद्वाजमिति भाष्यप्रयोगादत्र अञो न लुक् ।

लुटः प्रथमस्य डारौरसः ॥८५॥

लुडादेशस्य प्रथमपुरुषस्य परस्मैपदस्यात्मनेपदस्य च डा, रौ, रस् एते आदेशाः भवन्ति । कर्त्ता । कर्त्तारौ । कर्त्तारः । अध्येता । अध्येतारौ । अध्येतारः ।

द्विगुरुपञ्जोपक्रमं वेञो न तौल्वलिभ्यआमः पञ्च

इति श्रीमत्कश्यपगोत्रजेन सूरिवर्यधरणीधरशिष्येण समाराधितराम–कृष्णेन
सामवेदित्रिपाठिरामकृष्णात्मजेन सिद्धसारस्वतमन्त्रेण
आचार्यबलभद्रेण विरचिते काशिकावृत्तिसारे
द्वितीयाध्यायस्य चतुर्थः पादः ।

अत्रार्थकृतम् आनन्तर्यम्, तेन परस्मैपदे तिप्–तस्–झि, इति त्रयाणाम् आत्मनेपदे च त–आताम्–झ इति त्रयाणाम् एक–द्वि–बह्वर्थानाम् क्रमशः एक-द्वि-बह्वर्थाः डा-रौ-रस् इत्यादेशाः भवन्ति । एकस्यैकार्थः, द्वयर्थस्य द्वयर्थः, बह्वर्थस्य बह्वर्थः । परस्मै पदे उदाहरणम् कर्ता इत्यादित्रयम् आत्मने पदे च अध्येता इत्यादित्रयं ज्ञेयम् ।

द्वितीयाध्यायस्यास्मिन् चतुर्थे पादे द्विगुरेकवचनम्, उपज्ञोपक्रमं तदाद्याचिख्यासायाम्, वेञो वयिः, न तौल्वलिभ्यः इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा आमः इत्यत आरभ्य पञ्च सूत्राणीति संकलनेन पञ्चाशीतिः (८५) सूत्राणि सन्ति ।

इति सामवेदि-विप्रवंशलब्धजन्मना श्रीमत्त्रिपाठिबालकरामात्मजेन
शिवादेवीगर्भजातेनाचार्येण चन्द्रभानुत्रिपाठिना
विरचितायां काशिकावृत्तिसार-सुधायां
द्वितीयाध्यायस्य चतुर्थः पादः ।

द्वितीयाध्यायः समाप्तः ।

अथ तृतीयाध्याये प्रथमः पादः

प्रत्ययः ॥१॥

अधिकारोऽयम् । 'प्रत्यय'शब्दः संज्ञात्वेनाधिक्रियते । आ पञ्चमाध्यायपरिसमाप्तेर्यानित ऊर्ध्वमनुक्रमिष्यामः, 'प्रत्यय'संज्ञास्ते वेदितव्याः । प्रकृत्युपपदोपाधिविकारागमान् वर्जयित्वा । वक्ष्यति- 'तव्यत्तव्यानीयरः' कर्त्तव्यम् । करणीयम् ।

प्रत्ययशब्दः.... अधिक्रियते–शास्त्रस्य लाघवार्थं प्रत्ययसंज्ञाविधानम् । अन्यथा संज्ञिनां बहुत्वेन शास्त्रस्य गौरवं स्यात् । प्रकृति........ वर्जयित्वा– प्रकृतिः 'गुप्तिज्किद्भ्यः सन्' इत्यत्र 'गुप्-आदयः' । उपपदम्–'स्तम्बकर्णयोः रमिजपोः' इत्यत्र 'स्तम्बकर्णौ' । उपाधिः–'हरतेर्दृतिनाथयोः पशौ' इत्यत्र पशुः । एतेषां प्रकृत्यादीनां सनाद्युत्पत्तौ निमित्तत्वमेव न तु प्राधान्यम् अतो नैतेषां प्रत्ययसंज्ञा । प्रधाने हि कार्यसम्प्रत्ययदर्शनात् । विकारः–'हनस्त च' । आगमः–'त्रपुजतुनोः षुक्' । अनयोरपि न 'प्रत्यय'संज्ञा अन्वर्थसंज्ञाकरणात् । प्रतियन्त्यनेनार्थमिति प्रत्ययः । न च केऽपि विकारागमाभ्यां कञ्चनार्थं प्रतियन्ति । कर्त्तव्यम्–'तव्यत्' इत्येतस्य प्रत्ययसंज्ञायां 'कृ' इति प्रकृतेरङ्ग- संज्ञा तेन च गुणः ।

परश्च ॥२॥

अयमप्यधिकारो योगे योगे उपतिष्ठते । परश्च स भवति धातोर्वा प्रातिपदिकाद् वा प्रत्ययसंज्ञः । कर्त्तव्यम् । चकारः पुनरस्य समुच्चयार्थः तेनोणादिषु परत्वं न विकल्प्यते ।

उणादिषु–अन्यथा 'उणादयो बहुलम्' इत्यत्र बहुलग्रहणात् उणादि- प्रत्ययेष्वपि परत्वस्य वैकल्प्यं स्यात् । चकारेण बहुलाधिकारेऽपि ये प्रत्यया विधीयन्ते तेऽपि परे एव भवन्ति ।

आद्युदात्तश्च ॥३॥

आद्युदात्तश्च स भवति यः प्रत्ययः । अयमप्यधिकारः । कर्त्तव्यम् । तैत्तिरीयम् ।

प्रत्ययानामनियतस्वरप्रसंगे वचनमिदमाद्युदात्तार्थम् । कर्त्तव्यम्–अत्र 'तव्य' प्रत्यय आद्युदात्तो भवति । तैत्तिरीयम्–अत्र 'छण्' प्रत्यय आद्युदात्तः ।

अनुदात्तौ सुप्पितौ ॥४॥

पूर्वस्यायमपवादः । सुपः तिपश्च प्रत्यया अनुदात्ता भवन्ति । दृषदौ, दृषदः । पठति । पचति ।

सुपः उदाहरणे दृषदौ, दृषदः । तिपश्च पठति, पचति ।

गुप्तिज्किद्भ्यः सन् ॥५॥

*(वा०) एभ्यः क्रमात् निन्दा-क्षमा-रुग्जयेषु सन्निष्यते । जुगुप्सते । तितिक्षते । चिकित्सति ।

क्रमात्–√गुप् धातोर्निन्दायाम्, √तिज् धातोः क्षमायां, √कित् धातोः रुग्जये = रोगापनयने इति भावः ।

मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ॥६॥

एभ्योऽपि सन् । अभ्यासस्य चेकारस्य दीर्घः । मीमांसते इत्यादि ।

एभ्यः–√मान्-√बध-√दान-√शान् धातुभ्यः । इत्यादि–बीभत्सते । दीदांसते । शीशांसते इत्युदाहरणान्तराणि । उत्तरसूत्राद् 'वा' इत्यपकृष्य विकल्पेन मानयति इत्याद्यपि ।

धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥७॥

इषिकर्म यो धातुरिषिणैव समानकर्तृकस्तस्मादिच्छायां वा सन् । कर्मत्वं समानकर्तृकत्वञ्च धातोरर्थद्वारकं विशेषणम् । कर्तुमिच्छति चिकीर्षति । धातोरिति किम्? सोपसर्गस्य मा भूत्–

प्रकर्त्तुमैच्छत् । कर्मणः किम् ? गमनेनेच्छति । समानकर्तृकात्किम् ? चैत्रस्य भोजनमिच्छति मैत्रः ।

❀(वा०) आशङ्कायामुपसंख्यानम् । कूलं पिपतिषति । श्वा मुमूर्षति ।

❀(वा०) इच्छासन्नन्तात् प्रतिषेधो वाच्यः । चिकीर्षितुमिच्छति । विशेषणं किम् ? जुगुप्सिषते ।

शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः ।
सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ॥

इषिकर्म–इषेः कर्मेति षष्ठी–समासः । **समानकर्तृकः**–समानः = एकः कर्ता यस्येति बहुव्रीहिः । **अर्थद्वारकम्**–चिकीर्षति अत्रोदाहरणे √कृ धातोरर्थः कर्म इच्छया व्याप्तम् यो देवदत्तादिः इषेः कर्ता स एव √कृ धातोरपि । अतस्तद्द्वारेण करोतिरपि कर्मसमानकर्तृकः । **कूलं पिपतिषति**–आशङ्काया-मेष प्रयोगः । आशङ्के कूलं पतिष्यतीत्यर्थः । **जुगुप्सिषते**–अत्र पूर्वः सन् स्वार्थे तदन्तात् इच्छायां सन् भवत्येव । **शैषिकात्**······ **सनिष्यते**–सन् प्रसंगा-दन्योऽपि **शैषिकः**–शेषाधिकारे विहितः । **मतुबर्थिकः**–मतुप्–अर्थोऽस्यास्तीति प्रत्ययो न भवति । अतः शालीये भवः इत्यर्थे पुनर्वृद्धाच्छो न भवति । तथा दण्डिकोऽस्त्यस्येत्यर्थे पुनष्ठन्न भवति । **सरूपः**–विरूपस्तु भवत्येव तेन आहि-च्छत्रीयम् (अणन्ताच्छः) तथा दण्डिमती (इनन्तान्मतुप्) सिद्धयति ।

सुप आत्मनः क्यच् ॥८॥

कर्मण इच्छायां 'वा' इति वर्तते । आत्मनः पुत्रमिच्छति । पुत्रीयति । सुप्–ग्रहणाद् वाक्यस्य मा भूत् । महान्तं पुत्रमिच्छति । आत्मनः किम् ? राज्ञः पुत्रमिच्छति ।

❀(वा०) मान्ताव्ययप्रतिषेधः । किमिच्छति । उच्चैरिच्छति ।

कर्मणः······**वर्तते**–तेन इषिकर्मणः इच्छाकर्तुरात्मसम्बन्धिनः सुबन्ता-दिच्छायामर्थे वा क्यच् प्रत्ययो भवतीत्यर्थः सम्पद्यते ।

काम्यच्च ॥९॥

पुत्रकाम्यति । प्रयोजनाभावान्न कस्येत्संज्ञा ।

सुबन्तात् कर्मण आत्मेच्छायां काम्यच् प्रत्ययो भवति । आत्मनः पुत्रमिच्छति इति वाक्यम् । 'काम्यच्' इत्यत्र 'क' इत्यस्य श्रवणमात्र-प्रयोजनमस्ति ।

उपमानादाचारे ॥१०॥

उपमानात् कर्मणः सुबन्तादाचारेऽर्थे वा क्यच् । आचार-क्रियायाः प्रत्ययार्थत्वात्तदपेक्षयैवोपमानस्य कर्मता । पुत्रमिवाचरति पुत्रीयति ।

❀(वा०) अधिकरणाच्चेति वाच्यम् । √प्रासादे इवाचरति प्रासादीयति ।

वा क्यच्–'काम्यच्' इति नानुवर्तते । पुत्रीयति–छात्रमिति शेषः । प्रासादीयति–कुट्यामिति शेषः ।

कर्तुः क्यङ् सलोपश्च ॥११॥

उपमानात् कर्तुः सुबन्तादाचारेऽर्थे वा 'क्यङ्', सस्य च लोपो भवति । अन्वाचयशिष्टः सलोपस्तदसम्भवेऽपि क्यङ् भवत्येव । श्येन इवाचरति श्येनायते । सलोपविधावपि वाग्रहणं सम्बध्यते, व्यवस्थित-विभाषा च भवति ।

❀(वा०) ओजसोऽप्सरसोर्नित्यं पयसस्तु विभाषया ।
ओजायते । अप्सरायते । पयायते/पयस्यते ।

क्यङ्–ङित्त्वादात्मनेपदम् । अन्वाचयशिष्टः–अन्वाचयः–प्रधानेन सहाप्रधानस्यापि योगः, तथा चात्र द्वे वाक्ये भवतः–कर्तुः क्यङ् भवति सर्वत्र, यत्र त्वस्ति सकारस्तत्र तस्यापि लोपः । श्येनायते–काकः इति शेषः । 'कर्तुः' इत्यत्र स्थाने षष्ठी तेनान्त्यस्यैवालः सकारस्य लोपो भवति नतु सारसायते इत्यत्र 'स' लोपः ।

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ॥१२॥

एभ्योऽच्व्यन्तेभ्यो भवत्यर्थे क्यङ्, हलन्तानाञ्च लोपः । अच्वे-रिति तत्सदृशप्रतिपत्त्यर्थम्, तर्हि 'च्वि' प्रतिषेधः । अभूततद्भावे एभ्यः 'क्यङ्' इत्यर्थः । भृशायते ।

अच्वेरिति ......प्रतिषेधः–यत्र 'च्वि' प्रत्ययस्यार्थोऽभूततद्भावो वर्तते 'च्वि' प्रत्ययस्तु नास्ति तत्र 'क्यङ्' इत्यर्थः । अभृशो भृशो भवतीति वाक्यम् ।

लोहितादिडाज्भ्यः क्यष् ॥१३॥

एभ्यः डाजन्तेभ्यश्च । भुवीति वर्त्तते । लोहितायति/लोहितायते । पटपटायति/पटपटायते ।

एभ्यः–लोहितादिभ्यः । भुवीति........भवत्यर्थे । लोहितायति/लोहितायते–'वा क्यषः' इति विकल्पेनात्मनेपदम् । पटपटायति/पटपटायते–अत्रापि तथैव वा आत्मनेपदम् । 'पटत्' शब्दात् 'अव्यक्तानुकरणात्' इति डाच् । 'डाचि बहुलं द्वे भवतः' इति द्वित्वम्, टिलोपः । 'पटत्पटा' इति स्थिते 'नित्यमाम्रेडिते डाचि' इत्यनेन 'पत्' इत्यस्य तकारस्य पररूपेण पकारः पटपटा इति । 'अच्वेः' इत्यनुवर्तते तेनाभूततद्भावे 'क्यष्' भवतीति ज्ञेयम् ।

कष्टाय क्रमणे ॥१४॥

चतुर्थ्यन्तादस्मात् क्यङ्, न क्यष् अनार्जवे । कष्टाय कर्मणे क्रामति कष्टायते ।

न क्यष्–'क्यङ' एवानुवर्त्तनात् न 'क्यषः' । अनार्जवे–'कष्टाय' इति निर्देशात् चतुर्थीसमर्थविभक्तिर्लभ्यते । 'क्रमण' शब्दः पादविहरणे, अनार्जवे इत्यर्थद्वये वर्त्तते । 'कष्टाय' इति पदे तादर्थ्ये चतुर्थी तेन समर्थः = सङ्गतार्थः । तथा च क्रमणेन = प्रत्ययार्थेन सह यस्य चतुर्थीकृतं सङ्गतार्थत्वम् तस्मात् 'क्यङ्' इत्यर्थो भवति । एवम् क्रमणम् = अनार्जवम् अनाकरणरूपम् भवति । कष्टायते–कष्टाय अनार्जवं करोतीत्यर्थः । क्वचित् क्रमणम् = उत्साहः यथा व्याकरणाध्यनाय क्रमते = उत्सहते इत्यर्थः । पादविहरणे तु अजः कष्टं क्रामति ।

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः ॥१५॥

कर्मभ्याम् आभ्यां क्यङ् एतयोः ।

❀(वा०) तपसः परस्मैपदं च । रोमन्थायते । हनुचलन एव । तपस्यति ।

'कर्मणः' इत्यत्र पदे पञ्चमी । एकवचनं त्वत्र प्रत्येकं सम्बन्धादिति । आभ्याम्–'रोमन्थ-तपः' इति शब्दाभ्याम् । एतयोः–वर्तिचरोः अर्थयोः । रोमन्थं

वर्तयति, तपः चरति इति विग्रहवाक्ये । हनुचलनम्–भक्षितस्य पदार्थस्य पुनरुद्गीर्य चर्वणं हनुचलनम् । तेन इह न भवति 'क्यङ्' कीटो रोमन्थं वर्त्तयति । गुटिकां करोतीत्यर्थः ।

बाष्पोष्मभ्यामुद्वमने ॥१६॥

बाष्पायते । ऊष्मायते ।

❀(वा०) फेनाच्चेति वक्तव्यम् । फेनायते ।

बाष्पमुद्वमति, ऊष्माणम् उद्वमति, फेनमुद्वमतीति विग्रह-वाक्यानि ।

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ॥१७॥

शब्दादिभ्यः करणे क्यङ् । शब्दायते ।

'करण' शब्देनात्र 'क्रिया' उच्यते । शब्दायते–शब्दं करोति । एवं वैरायते कलहायते । अभ्रायते । कण्वायते । मेघायते इत्युदाहरणान्तराणि ।

❀(वा०) सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् । सुदिनायते । दुर्दिनायते । नीहारायते ।

सुखादिभ्यः कर्तृवेदनायाम् ॥१८॥

वेदयितुश्चेत् कर्तुः सम्बन्धीनि सुखादीनि भवन्ति । सुखं वेदयते सुखायते । कर्तृग्रहणं किम् ? सुखं वेदयते मैत्रस्य ।

'कर्मग्रहणम्' अनुवर्त्तते । वेदयितुः······–अयम्भावः–'कर्तृवेदना' इति पदे न षष्ठीतत्पुरुषः अपि तु 'कर्तृ' पदं लुप्तषष्ठीकम् । अत्र आश्रयाश्रयि-भावलक्षणे सम्बन्धे 'कर्तुः' इति पदे षष्ठी । अस्मिन्नर्थे द्योत्ये 'सुख' इत्या-दिभ्यः क्यङ् भवति । मैत्रस्य–'प्रसाधकः' इति शेषः । अत्र प्रसाधकः अनुमानेन कर्त्ता प्रसाध्यस्तु प्रत्यक्षम् । यद्यपि वेदना कर्तुरेव भवति पुनरपि कर्तृग्रहणसामर्थ्यात् यः सुखादीनामाश्रयः समवायिकारणं स एवात्र गृह्यते प्रसाधकस्तु निमित्तकारणम्, तेनात्र न क्यङ् ।

नमोवरिवश्चित्रङः क्यच् ॥१६॥

नमस्यति । वरिवस्यति । चित्रीयते । 'ङ्' आत्मनेपदार्थः ।

शब्दवैर········इत्यतः 'करणे' इत्यनुवर्त्तते तस्य विशेषोऽर्थः 'पूजा' इति गृह्यते। नमस्यति–नमस्कारेण पूजयतीत्यर्थः। वरिवस्–परिचर्या इत्यर्थः। चित्रीयते–अत्र 'चित्रङ्' इति धातुः, विस्मापयते इत्यर्थः।

पुच्छभाण्डचीवराण्णिङ् ॥२०॥

*(वा०) पुच्छादुदसने पर्यसने वा। भाण्डात्समाचयने। चीवरादर्जने परिधाने वा। उत्पुच्छयते। सम्भाण्डयते। सञ्चीवरयते।

'करणे' इत्यनुवर्त्तते। उदसनम्–ऊर्ध्वक्षेपणम्। पर्यसनम्–परितः क्षेपणम् परिपुच्छयते इत्युदाहरणम्। समाचयनम्–राशीकरणम्। अर्जनम्–अलब्धस्य लाभः। परिधानम्–आच्छादनम्।

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥२१॥

एभ्यो णिच् करणे। मुण्डयति। हलिकल्योरत्वनिपातनं सन्वद्भावप्रतिषेधार्थम्। अजहलत्। अचकलत्।

मुण्डयति–मुण्डं करोतीत्यर्थः। एवं मिश्रयति। श्लक्ष्णयति। लवणयति। व्रतयति (भोजने तन्निवृत्तौ च)। पयो व्रतयति (दुग्धं भुङ्क्ते)। शूद्रान्नं व्रतयति (शूद्रान्नं वर्जयति) इति चोदाहरणे। वस्त्रात् समाच्छादने–संवस्त्रयति। 'हलि, कलि' इतीकारान्तयोर्निपातनं 'हल-कल' इति तेन हलिं गृह्णाति हलयति एवं कलिं गृह्णाति कलयति। अजहलत्–अत्र हलशब्दोपादाने सति लुङि 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इत्यनेन सन्वद्भावस्तत्प्रयुक्तं दीर्घकार्यं न भवति। परत्वाद् वृद्धौ सत्यामपि 'अक्' एव लुप्यते। हलिशब्दस्य लुङि वृद्धौ ऐकारस्य लोपेऽपि तस्यानक्त्वात् सन्वद्भावः प्रसज्येत। महत् हलं हलिः। कृतं गृह्णाति कृतयति। तूस्तानि विहन्ति इति वितूस्तयति केशान्। विशदीकरोतीत्यर्थः। तूस्तं केशाः, जटीभूताः केशाः, पापम् इति मतान्तरेण।

धातोरेकाचो हलादेः क्रियासमभिव्याहारे यङ् ॥२२॥

एकाच् हलादिश्च यो धातुः क्रियासमभिव्याहारे वर्त्तते तस्माद् यङ्। पौनःपुन्यं भृशार्थो वा क्रियासमभिव्याहारः। पुनः पुनः अतिशयेन वा पचति पापच्यते।

*(वा०) सूचिसूत्रिमूत्र्यटचर्त्यशूर्णोतीनां ग्रहणं यङ्विधावनेकाजहलाद्यर्थम् । सोसूच्यते ।

विप्रकीर्णानामेकत्र राशीकरणं समुदायभावप्रतिपत्तिः मुख्यः समभिव्याहारः । गौणं समभिव्याहारं दर्शयति–पौनःपुन्यम् इत्यादि । अनेकाचाम् अहलादीनाञ्च सङ्ग्रहार्थमाह–सूचि ······इत्यादि । सोसूत्र्यते । अटाटयते । अरार्यते । अशाश्यते । प्रोर्णोनूयते । (प्र + √ऊर्णुञ् आच्छादने)

नित्यं कौटिल्ये गतौ ॥२३॥

गतिवचनात् कौटिल्ये नित्यं यङ् । चङ्क्रम्यते ।

'गतौ' इत्यस्यार्थः गतिवचनात् इति । गत्यर्थे वर्त्तमानाद्धातोरित्यर्थः । चङ्क्रम्यते–अल्पीयस्यपि मार्गे गतागतं करोत्येवं कुटिलंगतिं करोति । अत्र गतिकौटिल्यमेव गम्यते नतु मनःकौटिल्यम् ।

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ॥२४॥

एभ्यो यङ् धात्वर्थगर्हायाम् । गर्हितं लुम्पति लोलुप्यते । एवं सासद्यते इत्यादि । 'भाव'इत्युक्तेः साधनगर्हायां न—मन्त्रं जपति शूद्रः । नियमार्थं नित्यग्रहणं वर्त्तते । तस्माद् भावगर्हायामेव न क्रियासमभिव्याहारे । भृशं लुम्पति ।

सासद्यते इत्यादि–एवम् √चर्–चञ्चूर्यते । √जप्-जञ्जप्यते । √जभ्-जञ्जभ्यते । √दह–दन्दह्यते । √दश्–दन्दश्यते । नि√गॄ–निजेगिल्यते इत्युदाहरणान्तराणि बोध्यानि । शूद्रस्य वेदानधिकारित्वादत्र साधनगर्हा विद्यते ।

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥२५॥

एभ्यश्चुरादिभ्यश्च णिच् । सत्यमाचष्टे सत्यापयति ।

*(वा०) अर्थवेदसत्यानामापुग्वाच्यः । आपुग्वचनसामर्थ्यान्न टिलोपः । स्वाभाविकत्वादर्थाभिधानस्य यथास्वं प्रत्ययाः निर्दिश्यन्ते । पाशाद्विमोचने–विपाशयति । रूपाद्दर्शने—रूपयति । वीणयोपगायति—उपवीणयति । तूलेनानुगृह्णाति--अनुतूलयति । श्लोकैरुपस्तौति--

उपश्लोकयति । सेनयाऽभियाति—अभिषेणयति । लोमान्यनुमार्ष्टि—अनुलोमयति । त्वचं गृह्णाति—त्वचयति । वर्मणा संनह्यति-संवर्मयति । वर्णं गृह्णाति—वर्णयति । चूर्णैरवध्वंसयति–अवचूर्णयति । चुरादिभ्यः स्वार्थे भवति--चोरयति ।

एभ्यः–सत्यादिभ्यः चूर्णपर्यन्तेभ्यः । 'सत्याप' इति वचनेनैव सत्य-शब्दात् आपुग् भवतीति वेदितव्यम् । अर्थापयति । वेदापयति इत्युदाहरणान्तरे । त्वचयति–अत्र 'त्वच' इति अकारान्तः शब्दो गृह्यते तेन 'अत उपधायाः' इति वृद्धिर्न भवति । आख्यान-विमोचनादयोऽर्थाः स्वाभाविका एवेति न तेषामुपादानं सूत्रे आवश्यकम् । तदाह वृत्तौ स्वाभाविकत्वादिति ।

हेतुमति च ॥२६॥

हेतुः स्वतन्त्रस्य कर्तुः प्रयोजकः, तदीयो व्यापारः प्रेषणादि-लक्षणो हेतुमान् तस्मिन्नभिधेये धातोर्णिच् । कटं कारयति ।

*(वा०) तत्करोतीत्युपसंख्यानम् । सूत्रं करोति सूत्रयति ।

*(वा०) आख्यानात्कृतस्तदाचष्टे इति णिच् कृल्लुक् प्रकृति-प्रत्यापत्तिः प्रकृतिवच्च कारकम् । कंसवधम् (आख्यानम्) आचष्टे कंसं घातयति ।

लोके फलसाधनयोग्यः पदार्थो हेतुरुच्यते । अत्र 'हेतु' पदेन न तस्य ग्रहणमपितु पारिभाषिकस्येत्याह–हेतुः........ । अर्थात् तत्प्रयोजको हेतुश्चेत्यनेन यस्य 'हेतु' संज्ञा विहिता तस्येह ग्रहणम् । तादृशो हेतुः (प्रयोजकः) अस्ति अस्येति हेतुमान् प्रेषणादिः तस्मिन्नर्थे णिच् । कारयति-यः कटं करोति तम् प्रेरयतीत्यर्थः ।

आख्यानात् कृतः–कृदन्तात् णिच् 'तदाचष्टे' इत्यर्थे । प्रकृति-प्रत्यापत्तिः–कृत्प्रत्ययस्य या प्रकृतिः (हनः अप् वधः इत्यत्र 'हन्' प्रकृतिः) तस्याः प्रत्यापत्तिः–अविकृतरूपेण स्थितिः प्रकृतिवच्च कारकम् । कृतः प्रकृतेः 'हन्' इत्यस्याः यादृशं कारकम् अभूत् ण्यन्तायाः अपि तस्याः तादृश-मेव कार्यं च तद्वदेव भवति । कंसं घातयति–अत्र 'कंसम्' इति आख्यान-क्रियायाः अतिदेशात् कर्म ।

कण्ड्वादिभ्यो यक् ॥२७॥

एभ्यो यक् । द्विधा एते धातवः, प्रातिपदिकानि च । तत्र धातुभ्य एव धातोरधिकारात् । कण्डूयति/कण्डूयते ।

'कण्डूञ्' इति धातुः उभयपदी । 'यक्' इत्यस्य कित्वात् गुणस्य प्रतिषेधः । द्विधा एते–यथा चायमस्ति श्लोकः—

धातु-प्रकरणाद्धातुः कस्य चासञ्जनादपि ।
आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः ॥

अस्यार्थः–'धातोः' इत्यस्याधिकारोऽस्ति । 'यक्' इत्यत्र कित्वं करोति सूत्रकारः । कण्ड्वादिगणे केचन शब्दाः दीर्घान्ताः सन्ति । अतः एषां धातुत्वं विकल्पितं स्वीकरोति श्लोक (सूत्र) कारः ।

गुपूधूपविच्छपणिपनिभ्य आयः ॥२८॥

एभ्यः आयः स्वार्थे । गोपायति । अनुबन्धस्य केवले चरितार्थत्वात् 'आय' प्रत्ययान्तान्नात्मने पदम् ।

केवले–√'पण' धातुः अनुदात्तेत् आत्मनेपदी 'पणते' इत्यादि रूपाणि । 'आय'प्रत्यये कृते पणायति इति रूपं भवति अत्र नात्मनेपदम् । अनुदात्तेत् अकारस्तु केवले–'आय' प्रत्ययरहिते 'पण' इत्यत्रात्मने पदं विधाय चरितार्थः । अवयवेष्वचरितार्थं लिङ्गं समुदायस्य विशेषकं भवति । √पन धातोः साहचर्यात् 'पण' इत्यपि स्तुत्यर्थ एव गृह्यते न व्यवहारार्थः । धूपायति । विच्छायति । पनायति इत्युदाहरणान्तराणि ज्ञेयानि ।

ऋतेरीयङ् ॥२९॥

ऋतिः सौत्रो घृणायाम् । ऋतीयते ।

सौत्रः–सूत्रे पठितः । अत्र घृणा शब्दो निन्दार्थकः तदर्थकस्य 'ऋतीया' शब्दस्य निघण्टौ पाठात् । 'ईयङ्' इत्यत्र ङकार आत्मनेपदार्थः ।

कमेर्णिङ् ॥३०॥

कामयते ।

'णिङ्' इत्यत्र णकारो वृद्ध्यर्थः, ङकाराश्चात्मनेपदार्थः ।

आयादय आर्धधातुके वा ॥३१॥

गोपायिता/गोप्ता ।

आयादयः–आय–ईयङ्–णिङ् प्रत्ययाः । आर्धधातुके–वैषयिकाधारे सप्तमी, आर्धधातुकविवक्षायामित्यर्थः । अर्तिता । ऋतीयता । कामयिता चेत्युदाहरणानि बोध्यानि सन्ति ।

सनाद्यन्ता धातवः ॥३२॥

'सन्' आदिर्येषां ते सनादयः, ते अन्ते येषां ते सनाद्यन्ताः । सनाद्यन्ताः समुदायाः धातुसंज्ञा भवन्ति ।

आदि शब्देन 'क्यच्' आदीनां 'णिङ्' पर्यन्तानां ग्रहणम् । अन्तशब्दः समीपार्थकः । समुदायाः–प्रकृतिप्रत्ययसमुदायाः । धातुसंज्ञाः–धातुः संज्ञा येषां ते । 'धातु'शब्दोऽत्र स्वरूपवाची न भूवादिपदार्थकः । चिकीर्षयति । पुत्रीयति । पुत्रकाम्यति इत्युदाहरणानि सन्ति ।

स्यतासी लृलुटोः ॥३३॥

'लृ' इत्युत्सृष्टानुबन्धत्वात् लृङ्-लृटोर्ग्रहणम्, लुटि च । क्रमेण स्यतासी । करिष्यति । अकरिष्यत् । श्वः कर्त्ता । इदित्करणम् अनुनासिकलोपप्रतिषेधार्थम् गन्ता । संगन्ता ।

लृ–टकारस्य ङकारस्य चानुबन्धस्य परित्यागेन तत्कृतभेदस्याभावात् लृट्-लृङ् चोभयोर्ग्रहणम् । 'लृ' इत्येकमेवपदम् द्वयोः सामान्यं तेन यथासंख्यनियमात् तयोः परतः 'स्य' इत्यस्य लुटि च परतः 'तास्' इत्यस्यागमो भवति । उदाहरणानि क्रमशः लृटि, लृङि, लुटि च बोध्यानि । इदित्करणम्–तासि इत्यस्य इकारस्य इत् करणम् । गन्ता–इदित्वाभावे 'अनिदिताम्.......' इत्यनुनासिकलोपः स्यात् ।

सिब्बहुलं लेटि ॥३४॥

धातोः सिप् बहुलं लेटि । जोषिषत् । न भवति पताति विद्युत् ।

धातोरित्यनुवर्त्तते । जोषिषत्–'लिङ्' इत्यस्यार्थे लेट् वेदे । बहुलग्रहणात् क्वचिन्न भवति–पताति । 'पदाति' इति पाठान्तरम् ।

कास्प्रत्ययादाममन्त्रे लिटि ॥३५॥

'कास्' धातोः प्रत्ययान्तेभ्यश्च आम् प्रत्ययो लिटि परतः अमन्त्र-विषये । कासाञ्चक्रे । लोलूयाञ्चक्रे ।

क्रमशः उदाहरति–√कासृ धातोः प्रत्ययान्तेभ्यश्च । लोलूयाञ्चक्रे–√लोलूय धातुः 'यङ्' प्रत्ययान्तः । मन्त्रविषये तु 'कृष्णो नो'नाव' इति प्रत्युदाहरणम् । √नोनूय इति 'यङ्' प्रत्ययान्तस्य लिटि रूपम् । मन्त्रे एव निषेधात् ब्राह्मणे आम्प्रत्ययो भवत्येव–अथ ह शुनःशेप ईक्षाञ्चक्रे……। आम् कृते कासाम् चक्रे इति स्थिते मकारस्यानुस्वारः परसवर्णश्च ञकारः ।

इजादेश्च गुरुमतोऽनृच्छः ॥३६॥

ईहाञ्चक्रे ।

(वा०) ऊर्णोतेश्च प्रतिषेधो वाच्यः । प्रोर्णुनाव ।

इजादिर्यो गुरुमान् धातुस्तस्मात् लिटि परतः आम् प्रत्ययो भवति । √ऋच्छ धातोस्तु न । 'इच्' प्रत्याहार आदिर्यस्य स इजादिः गुरुः=गुरुस्वरः (दीर्घः संयुक्ताक्षरात्प्राक्वर्ती च) अस्ति अस्येति गुरुमान् । ईहाञ्चक्रे–अत्र √ईह् धातुः इजादिः गुरुमान् चास्ति ।

दयायासश्च ॥३७॥

दयाञ्चक्रे । पलायाञ्चक्रे । आसाञ्चक्रे ।

√दय, √अय, √आस धातुभ्यः लिटि परतः आम् प्रत्ययो भवति । पलायाञ्चक्रे–अत्र 'परा' उपसर्गपूर्वकः √अय धातुः ।

उषविदजागृभ्योऽन्यतरस्याम् ॥३८॥

ओषाञ्चकार / उवोष । विदाञ्चकार / विवेद । विदेरामि अदन्तत्वप्रतिज्ञानान्न गुणः ।

√उष–√जागृ धात्वोः साहचर्येण परस्मैपदिनः एव ज्ञानार्थकस्य √विद धातोर्ग्रहणम् । √जागृ इत्यस्य जगाराञ्चकार/जजागार इति रूपद्वयम् । आमि प्रत्यये एव √ विद् धातुः अदन्तः प्रतिज्ञातः, तेन 'विवेद' इत्यत्र गुणो भवत्येव ।

भीह्रीभृहुवां श्लुवच्च ॥३९॥

एभ्यो लिटि आम् वा, श्लाविव च कार्यम्। द्वित्वमित्त्वञ्चेत्यर्थः । बिभयाञ्चकार/बिभाय इत्यादि ।

'अन्यतरस्याम्' इत्यनुवर्तते तेन रूपद्वयं भवति। √ह्री–जिह्रयाञ्चकार/जिह्राय । √भृ–बिभराञ्चकार/बभार। √हु–जुहवाञ्चकार/जुहाव इत्युदाहरणानि बोध्यानि ।

कृञ्चानुप्रयुज्यते लिटि ॥४०॥

'कृञ्' इति प्रत्याहारेण कृभ्वस्तयो गृह्यन्ते । आमः पश्चात् कृञ् अनुप्रयुज्यते लिटि । पाचयाञ्चकार । पाचयाम्बभूव । पाचयामास ।

कृभ्वस्तयः–√कृञ्, √भू, √अस् इति धातवः । प्रत्याहारेण–'अभूततद्भावे कृभ्वस्तियोगे' इति सूत्रस्थं 'कृ' शब्दम् गृहीत्वा 'कृञो द्वितीयतृतीयशम्बबीजात् कृषौ' इत्यस्य ञकारेण प्रत्याहारग्रहणम्। पाचयामास–अत्र √अस् इत्यस्य 'भू' आदेशो न भवति प्रत्याहारग्रहण-सामर्थ्यात् ।

विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ॥४१॥

'विदाङ्कुर्वन्तु' इत्येतद् अन्यतरस्याम् निपात्यते । किं तत् निपात्यते ? विदेर्लोटि आम् प्रत्ययः, गुणाभावः, लोटो लुक्, कृञश्च लोट्परस्यानुप्रयोगः । पक्षे विदन्तु ।

'इति' पदस्य प्रयोगः उपलक्षणार्थः । तेन लोटि सर्वे एव प्रयोगाः निपात्यन्ते–विदाङ्करोतु/विदाङ्कुरुतात् । विदाङ्कुरुताम् । विदाङ्कुर्वन्तु ।

विदाङ्कुरु/विदाङ्कुरुतात् । विदाङ्कुरुतम् । विदाङ्कुरुत । विदाङ्करवाणि । विदाङ्करवाव । विदाङ्करवाम ।

पक्षे वेत्तु वित्तात् वित्ताम् विदन्तु इत्यादयः भवन्ति ।

अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि ॥४२॥

'अभ्युत्सादयाम्' इत्यादयः छन्दसि वा निपात्यन्ते । अभ्युत्सादयामकः । अभ्युदसीषदत् इति भाषायाम् । प्रजनयामकः ।

प्राजीजनत् इति भाषायाम् । चिकयामकः । अचैषीत् इति भाषायाम् । रमयामकः । अरीरमत् इति भाषायाम् । पावयांक्रियात् । पाव्यात् इति भाषायाम् । विदामक्रन् । अवेदिषुः इति भाषायाम् ।

अभ्युत्सादयामकः, प्रजनयामकः, चिकयामकः, रमयामकः इति चतुर्षु क्रमशः √सद्, √जन्, √चि, √रम् धातोः लुङि आम् प्रत्ययः 'अकः' इत्यस्यानुप्रयोगश्च निपात्यते । पावयाङ्क्रियात् इति पदे 'क्रियात्' इति आशीर्लिङो रूपम् । विदामक्रन् इत्यत्र 'अक्रन्' इति लुङः प्रथमपुरुष–बहुवचनान्तस्य रूपम् ।

च्लि लुङि ॥४३॥

धातोः च्लिः प्रत्ययो लुङि ।

'च्लि' इत्यत्र इकारः उच्चारणार्थः, चकारः अन्तोदात्तत्वार्थः ।

च्लेः सिच् ॥४४॥

च्लेः 'सिच्' आदेशो भवति । अकार्षीत् ।

*(वा०) कृषस्पृशमृशतृपदृपां सिज्वा वक्तव्यः । अक्राक्षीत्/अकार्क्षीत्/अकृक्षत् इत्यादि ।

'च्लिः, सिच्' इत्युभयत्रापि चकारः आगमानुदात्तस्वरबाधनार्थः । अक्राक्षीत् इत्यादिवत् अस्प्राक्षीत्/अस्पार्क्षीत्/अस्पृक्षत् । अम्राक्षीत्/अमार्क्षीत्/अमृक्षत् । अत्राप्सीत्/अतार्प्सीत्/अतृपत् । अद्राप्सीत्/अदार्प्सीत्/अदृपत् इत्युदाहरणानि बोध्यानि ।

शल इगुपधादनिटः क्सः ॥४५॥

इगुपधो यः शलन्तो धातुः, तस्मात्परस्य च्लेः अनिटः 'क्स' आदेशः । अधुक्षत् ।

अधुक्षत्–अत्र √दुह् धातुः अनिट् इगुपधः शलन्तश्चास्ति ।

श्लिष आलिङ्गने ॥४६॥

नियमार्थमेतत् । आश्लिक्षत् मैत्रं चैत्रः । आलिङ्गने एव–आश्लिषत् जतु काष्ठम् ।

आलिङ्गनम्–उपगूहनम् तत्रैवार्थे 'क्स' प्रत्ययः । आश्लिषत्–अत्र नैरन्तर्यमर्थः नत्वालिङ्गनम् ।

न दृशः ॥४७॥

अस्मात् च्लेः क्सादेशो न । अदर्शत्/अद्राक्षीत् ।

'शल इगुपधात्'.........'इत्यनेन प्राप्तस्य 'क्स' आदेशस्य निषेधः । तेन क्रमशः च्लेः 'अङ्–सिच्' इति भवतः ।

णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ् ॥४८॥

सिजपवादः । ण्यन्तेभ्य एभ्यश्च च्लेः 'चङ्' आदेशो भवति कर्तरि लुङि । अजीहरत् । अशिश्रियत् इत्यादि ।

❀(वा०) 'कमेरुपसंख्यानम् ।' 'आयादय आर्धधातुके वा' इति यत्पक्षे णिङ् न तदैतदुपसंख्यानम् । अचकमत । णिङ् पक्षे सन्वद्भावः अचीकमत ।

नाकमिष्टं सुखं यान्ति सुयुक्तैर्वडवारथैः ।
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः ॥

इत्यादि–√द्रु धातोः उदुद्रुवत्, √स्रु धातोः असुस्रुवत् इति रूपे बोध्ये ।

नाकम्.........भाषिणः । अयं श्लोको महाभाष्यस्यास्ति । अस्यार्थः–√कम् धातोर्लुङि किं रूपं भवतीति पृष्टाः ये 'कमेरपि च्लेः चङ् आदेशो भवति' इति विज्ञाः 'अचकमत' इति वदन्ति ते पुण्यातिशयलाभात् वडवायुक्तं रथमारूढाः सन्तः स्वर्गं गच्छन्ति । ये तु 'अचीकमत' इति वदन्ति ते लक्षण विशेषस्यास्मरणात् पत्काषिणः सन्तः स्वर्गं यान्तीति विशेषः ।

विभाषा धेट्श्व्योः ॥४९॥

एताभ्यां च्लेर्वा चङ् । अदधत्/अधात्/अधासीत् । अशिश्वियत् । अङोऽप्यत्र विकल्प इष्यते-अश्वत्/अश्वयीत् ।

एताभ्याम्–√धेट्–√टुओश्विभ्याम् । अङोऽप्यत्र.........'जृस्तम्भु.........श्विभ्यश्च' इति सूत्रेण ।

गुपेश्छन्दसि ॥५०॥

वा चङ् । यत्र 'आय' प्रत्ययो नास्ति तत्रायं विधिः । इ॒मा॑न्नो मि॒त्रावरुणौ गृ॒हा॑न् अजूगुपतम्/अगौप्तम्/अगोपिष्टम्/अगोपायिष्टम् इति वा ।

छन्दसि एव, तेन भाषायाम् 'अजूगुपतम्' इति न भवति ।

नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ॥५१॥

एभ्यो ण्यन्तेभ्यः छन्दसि न चङ् । मा……काम॑मूनयीः । मा त्वा॒ग्निर्ध्व॑नयीत्, काम॑मैलयीत्, मैनमर्दयीत् ।

भाषायाम् क्रमशः औनिनत्, अदिध्वनत्, ऐलिलत्, आर्दिदत् इति रूपाणि भवन्ति । मा……ऊनयीः—माङ्योगाभावे तु औनयीः इति रूपं भवति ।

अस्यतिवक्तिख्यातिभ्योऽङ् ॥५२॥

एभ्यः च्लेः अङ् । पुषादित्वात् सिद्धे अस्यतेः पुनर्ग्रहणार्थम् आत्मनेपदार्थम् । पर्यास्थत, पर्यास्थेताम् । अवोचत् । आख्यत् ।

एभ्यः–√असु क्षेपणे, √वच् परिभाषणे, √ख्या प्रकथने इति धातुभ्यः । √वच् धातुना √ब्रूञ् इत्यस्यादेशः तथा √ख्या धातुना √चक्षिङ् इत्यस्यादेशोऽपि समुच्चीयते । आत्मनेपदार्थम्–परस्मैपदे पुषादिगणे पाठादेव सिद्धिः ।

लिपिसिचिह्वश्च ॥५३॥

अलिपत् । असिचत् । आह्वत् । पृथक्करणमुत्तरार्थम् ।

√लिप्, √सिच् (षिच्) √ह्वेञ् धातुभ्यः परस्य च्लेः अङ् स्यात् । उत्तरार्थम्–आत्मनेपदेषु विकल्पार्थम् ।

आत्मनेपदेष्वन्यतरस्याम् ॥५४॥

एभ्यः च्लेर्वा अङ् आत्मनेपदेषु । अलिपत्/अलिप्त इत्यादि ।

एभ्यः–पूर्वसूत्रात् अनुवृत्तेभ्यः √लिप्-√सिच्-√ह्वेञ् धातुभ्यः । एते धातवः उभयपदिनः । इत्यादि–आदि पदेन असिचत/असिक्त । अह्वत/अह्वास्त इति बोध्यानि ।

पुषादिद्युताद्यॢदितः परस्मैपदेषु ॥५५॥

पुषादिभ्यो द्युतादिभ्यो ॡदिद्भ्यश्च च्लेः अङ् परस्मैपदेषु । अपुषत् इत्यादि ।

√द्युत् इत्यस्मात् अद्युतत् 'द्युद्भ्यो लुङि' इति परस्मैपदम् । ॡदितः √गम्ॡ इत्यस्मात् अगमत् ।

सर्त्तिशास्त्यर्त्तिभ्यश्च ॥५६॥

असरत् । अशिषत् । समारत् । पृथक्करणमात्मनेपदार्थम् ।

√सृ–√शासु–√ऋ इति धातुभ्यः च्लेः अङ् भवति । क्रमेणोदहरणानि बोध्यानि । समारत्–सम् उपसर्गः । आत्मनेपदार्थम्–तेनात्रापि भवति–समरन्त ।

इरितो वा ॥५७॥

अभिदत्/अभैत्सीत् ।

इरितः–इश्च रश्च इरौ तौ इतौ यस्य स इरित् तस्मात् च्लेः अङ् वा । अभिदत्–अत्र √भिदिर् धातुः इरित् । पक्षे च्लेः सिच् अभैत्सीत्–इदं परस्मैपदेष्वेव प्रवर्त्तते आत्मनेपदेषु तु अभित्त इत्यादि ।

जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ॥५८॥

वेति वर्त्तते । अजरत्/अजारीत् इत्यादि ।

√जॄष्–√स्तम्भु–√म्रुचु–√म्लुचु–√ग्रुचु–√ग्लुचु–√ग्लुञ्चु–√टुओश्वि इति धातुभ्यः परस्य च्लेः अङ् वा । इत्यादि–√स्तम्भुप्रभृतीनाम् उदाहरणानि क्रमशः–अस्तभत्/अस्तम्भीत् । अम्रुचत्/अम्रोचीत् । अम्लुचत्/अम्लोचीत् अग्रुचत्/अग्रोचीत् । अग्लुचत्/अग्लोचीत् । अग्लुचत्/ अग्लुञ्चीत् । अश्वत्/ अश्वयीत् पक्षे 'चङ्' अपि अशिश्वियत् ।

कृमृदृरुहिभ्यश्छन्दसि ॥५९॥

शकलाङ्गुष्ठकोऽकरत् / अकार्षीत् इत्यादि ।

√कृ–√मृ–√दृ–√रुह् धातुभ्यः च्लेः अङ् छन्दसि । अकार्षीत् इत्युदाहरणं भाषायाम् । इत्यादि–अथोऽमरत् । अदरत् । दिवम्

आरुहत् इत्युदाहरणान्तराणि । भाषायां तु अमृत । अदारीत् । अरुक्षत् इति बोध्यानि ।

चिण् ते पदः ॥६०॥

पदः परस्य च्लेः चिण् 'त' शब्दे परतः । सामर्थ्यादात्मनेपदैकवचनम् । उदपादि सस्यम् ।

सामर्थ्यात्–अयम्भावः, √पद् धातुरात्मनेपदी अतः तस्यैव एकवचने 'त' शब्दो वर्तते, अन्यः 'त' शब्दः परस्मैपदे मध्यमपुरुष–बहुवचनस्य स्थाने भवति । स इह ग्रहीतुं न शक्यते । अतः परिशेषोऽत्र सामर्थ्यम् । उदपादि–उत्√पद्+लुङ् तस्य 'त' आदेशः च्लेः 'चिण्' आदेशे जाते 'चिणो लुक्' इत्यनेन तकारस्य लोपः । एकवचने एव चिण् भवति द्वि-बहुवचनयोः उदपत्साताम्, उदपत्सत् ।

दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ॥६१॥

एभ्यो वा च्लेः चिण् । अदीपि/अदीपिष्ट इत्यादि ।

'चिण् ते' इत्यनुवर्तते । √जन–√बुध–√पूर–√तायृ–√प्यायी धातूनाम् क्रमशः उदाहरणानि–अजनि/अजनिष्ट । अबोधि/अबुद्ध । अपूरि/अपूरिष्ट । अतायि/अतायिष्ट । अप्यायि/अप्यायिष्ट ।

अचः कर्मकर्त्तरि ॥६२॥

अजन्ताद् धातोः परस्य च्लेः कर्मकर्त्तरि त शब्दे चिण् आदशो भवत्यन्यतरस्याम् । प्राप्तविभाषेयम् । अकारि कटः स्वयमेव/अकृत वा ।

कर्मकर्त्तरि–कर्म चासौ कर्त्ता चेति कर्मकर्त्ता तस्मिन् । यदा तदेव कर्म सौकर्यात् कर्तृत्वेन विवक्ष्यते तदा तस्य कर्तृत्वं भवति । **प्राप्तविभाषेयम्**–'कर्मवत्कर्मणा.........' इत्यनेन नित्यं 'चिण्' आदेशः प्राप्तस्तत्र विकल्पः ।

दुहश्च ॥६३॥

वा चिण् । अदोहि गौः स्वयमेव/अदुग्ध वा ।

दुहः परस्य च्लेः चिण् वा भवति कर्मकर्त्तरि ।

न रुधः ॥६४॥

अन्ववारुद्ध गौः स्वयमेव ।

रुधः परस्य च्लेः चिण् न भवति कर्मकर्त्तरि ।

तपोऽनुतापे च ॥६५॥

'न' इति वर्त्तते । तपः परस्य च्लेः चिण् न कर्मकर्त्तरि, अनुतापे च । अतप्त तपस्तापसः । अन्ववातप्त पापेन ।

चकारात् 'कर्मकर्त्तरि' इत्यर्थो लभ्यते ।

अतप्त.......तापसः–अत्र तापसस्य कर्मत्वम् तपः तापसम् अतपत्–अदुःखयत् इत्यर्थ । अनुतापः–पश्चात्तापः तस्य ग्रहणम् अकर्मकर्त्रर्थम् । अन्ववातप्त पापेन–यत् पापं कृतं तेन पश्चात् तप्त इत्यर्थः । अत्र कर्मणि लकारः ।

चिण् भावकर्मणोः ॥६६॥

धातोः परस्य च्लेः चिण् भावे कर्मणि च । अशायि भवता । अकारि कटो मैत्रेण ।

भावकर्मणोः–एतयोरर्थयोः यः 'त' शब्दस्तस्मिन् परतः इति शेषः । अशायि–अकर्मकस्य 'शीङ्' धातोः भावार्थे इदमुदाहरणम् । अकारि–कर्मणि प्रत्ययः ।

सार्वधातुके यक् ॥६७॥

भावे कर्मणि च । आस्यते ।

भावकर्मवाचिनि सार्वधातुके धातोर्यक् प्रत्ययो भवति । आस्यते–भावे उदाहरणम् । कर्मणि–क्रियते कटः । उभयत्रापि कर्तरि तृतीया देवदत्तेन इति शेषः ।

कर्त्तरि शप् ॥६८॥

सार्वधातुके इत्येव । भवति ।

धातोः कर्त्तृवाचके सार्वधातुके परतः शप् प्रत्ययो भवति । शकारः

पकारश्च इतौ भवतः । भवति–√भू धातुः + लट् प्रथमपुरुषैकवचने–भू अ ति, भू इत्यस्य ऊकारस्य गुणः अव् आदेशश्च ।

दिवादिभ्यः श्यन् ॥६९॥

कर्त्तरि सार्वधातुके च वर्त्तते । दीव्यति ।

√दिव् आदिभ्यो धातुभ्यः श्यन् कर्त्तृवाचके सार्वधातुके ।

वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ॥७०॥

एभ्यः श्यन् वा भवति कर्तरि सार्वधातुके । भ्राशते/भ्राश्यते ।

भ्राशते–पक्षे शप् । एवम् भ्लाशते/भ्लाश्यते । भ्रमति/भ्राम्यति । क्रामति/क्राम्यति । क्लामति/क्लाम्यति । त्रसति/त्रस्यति । त्रुटति/त्रुटयति । लषति/लष्यति ।

यसोऽनुपसर्गात् ॥७१॥

दैवादिकत्वात् नित्ये प्राप्ते अनुपसर्गाद् वा श्यन् । यस्यति/यसति ।

सोपसर्गात् √यस् धातोः नित्यं श्यन् । आयास्यति ।

संयसश्च ॥७२॥

वा श्यन् । संयस्यति/संयसति ।

सोपसर्गार्थमिदं सूत्रम् ।

स्वादिभ्यः श्नुः ॥७३॥

कर्त्तरि सार्वधातुके एव । सुनोति ।

√षुञ् इत्यादिभ्यो धातुभ्यः श्नुः प्रत्ययो भवति । शपोऽपवादः ।

श्रुवः शृ च ॥७४॥

√श्रु धातोः श्नुः प्रत्ययः तत्संनियोगे 'शृ' इत्ययम् आदेशः । शृणोति ।

√श्रु धातुः श्रवणार्थको भ्वादिगणी । तस्मात् शपि प्राप्ते श्नुः विधीयते ।

अक्षोऽन्यतरस्याम् ॥७५॥

√अक्षू (व्याप्तौ) धातुः भ्वादिगणी । अस्माद् वा श्नुः । अक्ष्णोति/अक्षति ।

अक्षति–अत्र शप् भवति ।

तनूकरणे तक्षः ॥७६॥

तनूकरणे वर्त्तमानादस्मात् वा श्नुः । तक्ष्णोति/तक्षति ।

तक्षति–काष्ठम् इति शेषः । तनूकरणे इति किम् ? सन्तक्षति वाग्भिः निर्भर्त्सयतीत्यर्थः । √तक्षू, √त्वक्षू इति द्वौ धातू तनूकरणेऽर्थे वर्त्तेते । तनूकरणम्–तक्षणम् = काष्ठस्य खण्डशः विभाजनम् तस्य मसृणरूपापादनम् च ।

तुदादिभ्यः शः ॥७७॥

शपोऽपवादः । तुदति ।

√तुद् आदिभ्यो धातुभ्यः 'श' प्रत्ययो भवति ।

रुधादिभ्यः श्नम् ॥७८॥

'श्नम्' इत्यत्र मकारः अचोऽन्त्यात्परो यथा स्यात् । रुणद्धि ।

रुणद्धि–√रुध् इत्यादिभ्यो धातुभ्यः श्नम् । मकारः इत् । मित्वात् अयम् आगमः अन्त्यादचः उकारात्परो भवति ।

तनादिकृञ्भ्य उः ॥७९॥

शपोऽपवादः, तनोति । तनादित्वादेव सिद्धे कृञो ग्रहणमन्यत्तनादि कार्यं नास्येति ज्ञापयति । अकृत ।

√तनु (विस्तारे) इत्यादिभ्यः √कृञ् धातोश्च उः प्रत्ययो भवति । कृञः उदाहरणम् करोति । तनादि·········अकृत–अयम् भावः, √कृञ् धातुरपि तनादिगणे विद्यते तेनास्मादपि 'उ' प्रत्ययः सिद्धः । पुनः 'कृञ्' धातोः पाठेनेदं ज्ञाप्यते यदस्माद् धातोः अन्यत्तनादि कार्यं न भवति । तेन 'अकृत' इत्यत्र

'तनादिभ्यस्तथासोः' इति सूत्रेण विकल्पेन सिचो लुक् न भवति । अकृथाः इत्यप्युदाहरणम् ।

धिन्विकृण्व्योर च ॥८०॥

आभ्याम् 'उ' प्रत्ययः, अकारश्चान्तादेशः । धिनोति । कृणोति । अतो लोपस्य स्थानिवद्भावाद् गुणो न ।

आभ्याम्–√धिवि-√कृवि धातुभ्याम् । अतो लोपस्य स्थानिवद्भावेन उभयोरपि धात्वोः इकारः उपधायां न भवतीति भावः ।

क्र्यादिभ्यः श्ना ॥८१॥

शपोऽपवादः । क्रीणाति ।

√डुक्रीञ् (द्रव्यविनिमये)इत्यादिभ्यः 'श्ना' प्रत्ययो भवति । क्रीणीते इत्यपि रूपं भवति ।

स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च ॥८२॥

एतेभ्यः 'श्ना' प्रत्ययो भवति श्नुश्च । स्तभ्नाति/स्तभ्नोति ।

√स्तम्भु–√स्तुम्भु–√स्कम्भु–√स्कुम्भु इत्येते चत्वारो धातवः सूत्रे एव पठिताः सन्ति पृथग् धातु-पाठे । रोधनम्; स्तम्भनश्चार्थः सर्वेषाम् एषाम् । √स्कुञ् धातुः आप्रवणार्थकः । स्तुभ्नाति/स्तुभ्नोति । स्कभ्नाति/स्कभ्नोति । स्कुभ्नाति/स्कुभ्नोति । स्कुनाति/स्कुनोति इत्युदाहरणानि ।

हलः श्नः शानज्झौ ॥८३॥

हलः परस्य श्नाप्रत्ययस्य शानच् आदेशो हौ । मुषाण ।

मुषाण–√मुष्+लोट्→सिप्→हिः अत्र 'श्ना' इत्यस्य शानच् आदेशः । 'अतो हेः' इत्यनेन 'हि' इत्यस्य लुक् ।

छन्दसि शायजपि ॥८४॥

छन्दसि श्नः शायच् हौ, अपि शब्देन शानच् अपि । गृ॒भा॒य जि॒ह्वया॑ । ब॒धा॒नं॑ वत्सम् ।

गृभाय–√ग्रह् (उपादाने) लोट्--सिप्—हिः 'श्ना प्रत्ययस्य' शायच् ।

'हृग्रहोर्भश्छन्दसि' इत्यनेन √ग्रह धातोर्हकारस्य भकारः बधान-√बन्ध् (बन्धने) अत्र 'श्ना' प्रत्ययस्य 'शानच्' शेष पूर्ववत्।

व्यत्ययो बहुलम् ॥८५॥

यथायथं विकरणप्रत्ययाः शबादयो विहितास्तेषां छन्दसि बहुलं व्यत्ययो भवति । आण्डा शुष्मस्य भेदति । स च न मरति इत्यादि ।

यथायथम्–यस्मिन् यस्मिन् विषये । **व्यत्ययः**–वि-अति √इ+अच् । अन्योऽन्यविषये गमनम् इत्यर्थः । **भेदति**–√भिद् धातुः रुधादिगणी अस्मात् 'श्नम्' प्रत्ययो विहितः । भिनत्ति–अत्र श्नमो विषये शपो विधानम् । **मरति**–अत्र √मृङ् धातुः तुदादिः अस्मात् 'श' प्रत्ययो विहितः 'रिङ्' च म्रियते, अत्र शविषये शपो विधानं परस्मैपदं च । व्यत्यय-विषये एषा कारिका भाष्ये वर्त्तते—

सुप् - तिङ् - उपग्रह - लिङ्ग-नराणां
काल-हल्-अच्-स्वर-कर्तृ-यङां च ।
व्यत्ययमिच्छति शास्त्रकृत् एषाम्
सोऽपि च सिद्ध्यति बाहुलकेन ॥

शास्त्रकृत्–सूत्रकारः । एते सर्वे व्यत्ययाः सूत्रकारस्य सम्मताः सन्ति । अतस्तेन अस्मिन् सूत्रे 'बहुलम्' इति पदं प्रयुक्तम् इति भावः ।

लिङ्याशिष्यङ् ॥८६॥

आशिषि लिङि 'अङ्' प्रत्यत्यः छन्दसि । स्था-गा-गमि-वचि-वदि-शकि-रुहयः प्रयोजनम् । उपस्थेयं वृषभम् । सत्यमुपगेयम् इत्यादि ।

√गम्–गमेम जानतो गृहान् । √वचि–मन्त्रं वोचेमाग्नये । **√विद्**–विदेयमेनाम् । √शक्–व्रतं चरिष्यामि तच्छकेयम् । √रुह्–स्वर्ग लोकमारुहेयम् इत्युदाहरणानि बोध्यानि । **प्रयोजनम्**–स्थादिभ्य एव अङ् प्रायेण दृश्यते नान्येभ्य इति भावः ।

कर्मवत्कर्मणा तुल्यक्रियः ॥८७॥

कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवत् । यस्मिन् कर्मणि कर्तृभूतेऽपि तद्वत् क्रिया लक्ष्यते, स कर्त्ता कर्मवत् ।

यगात्मनेपदचिण्चिण्वद्भावाः प्रयोजनम् ।
भिद्यते काष्ठं स्वयमेव । अभेदि काष्ठं स्वयमेव ।।

कर्मस्थया–सूत्रे प्रथमकर्मशब्दः कर्मस्थक्रियावाची । **तुल्यक्रिया**–अत्र 'तुल्य' शब्दस्य सदृशोऽर्थः । **कर्मवत्**–कर्माश्रयाणि कार्याणि प्रतिपद्यते इत्यर्थः । **भिद्यते**–अत्र 'यक्' आत्मनेपदं च भवति । **अभेदि**–अत्र कर्माश्रयः च्लेः चिण् । चिण्वद्भावस्योदाहरणम्–कारिष्यते कटः स्वयमेव । अत्र चिण्वद्भावाद् वृद्धिः ।

तपस्तपःकर्मकस्यैव ।।८८।।

अस्य कर्त्ता कर्मवद्भवति । स च तपःकर्मकस्यैव, नान्यकर्मकस्य । क्रियाभेदाद्विध्यर्थमेतत् । उपवासादीनि तपांसि तापसं तपन्ति । दुःखयन्तीत्यर्थः । स तापसस्त्वगस्थिभूतः स्वर्गाय तपस्तप्यते ।

अस्य–√तप् (सन्तापे) इत्यस्य । **दुःखयन्ति**–यदा तापसः कर्म तदा √तप् धातोः दुःखनम् अर्थः । स ....तप्यते–अत्र 'तपः' शब्दः स्वर्गप्राप्तेर्हेतुरस्ति । तेन तपस्तप्यते इत्यस्य तपोऽर्जयतीत्यर्थः । इदमेव कर्मवद्भावस्योदाहरणम् ।

न दुहस्नुनमां यक्चिणौ ।।८९।।

एषां कर्मवद्भावादुपदिष्टावेतौ न । दुग्धे गौः स्वयमेव ।

एतौ–यक्,-चिण् इति । यक् प्रत्ययः, चिण् आदेशश्च । प्रथमस्योदाहरणं दुग्धे । चिणश्च अदुग्ध इति । 'दुहश्च' इति विकल्पेन अदोहि इत्यपि । √स्नु–प्रस्नुते गौः स्वयमेव । प्रास्नोष्ट । √नम्–नमते दण्डः स्वयमेव । अनंस्त ।

❀ (वा०) यक्चिणोः प्रतिषेधे णि-श्रन्थि-ग्रन्थि-ब्रूञ्–आत्मनेपदाऽकर्मकाणामुपसंख्यानम् । कारयते कटः स्वयमेव । अचीकरत इत्यादि ।

कुषिरजोः प्राचां श्यन् परस्मैपदं च ।।९०।।

अनयोः कर्मकर्त्तरि श्यन् प्रत्ययः परस्मैपदं च प्राचां मते । कुष्यति पादः स्वयमेव । प्राचां किम् ? कुष्यते । रज्यते ।

√रञ्ज–रज्यति वस्त्रं स्वयमेव इत्यप्युदाहरणम् । इदं व्यवस्थितविभाषा सूत्रम्, तेन लिट्–लिङ् लकारयोः स्य–सिच् प्रत्यययोश्च परयोः

इदं न प्रवर्तते । चुकुषे । कोषिषीष्ट । कोषिष्यते । अकोषि वा पादः स्वयमेव । अत्र 'श्यन्' प्रत्ययः परस्मैपदं च न भवतः ।

धातोः ॥९१॥

अधिकारोऽयम् । आतृतीयाध्यायान्तं यदित ऊर्ध्वमनुक्रमिष्यामो धातोरित्येवं तद्वेद्यम् । वक्ष्यति—'तव्यत्तव्यानीयरः' इत्यादि ।

धात्वधिकारे वक्ष्यमाणप्रत्ययाः स्युः इत्येतत्प्रयोजनम् अस्य । तेन प्रातिपदिकेभ्यो नैते तव्यादयो भवन्ति । उदाहरणानि—कर्त्तव्यम् । करणीयम् । कार्यम् इत्यादि ।

तत्रोपपदं सप्तमीस्थम् ॥९२॥

तत्रैतस्मिन् धात्वधिकारे यत्सप्तम्या निर्दिष्टं तदुपपदसंज्ञम् । कुम्भकारः ।

कुम्भकारः—अत्र कुम्भ शब्दस्य 'उपपद' संज्ञा । यतो हि 'कर्मण्यण्' इति धात्वधिकारे सूत्रे 'कर्मणि' इति सप्तम्या निर्दिष्टम् ।

कृदतिङ् ॥९३॥

अत्र तिङ्वर्जः प्रत्ययः कृत्संज्ञः ।

कृत् संज्ञायाः प्रयोजनम् 'कृत्तद्धितसमासाश्च' इत्यनेन 'प्रातिपदिक' संज्ञा तेन स्वादिविभक्तयः । कर्त्तव्यम् इत्यादि ।

वाऽसरूपोऽस्त्रियाम् ॥९४॥

अत्र असमानरूपोऽपवादप्रत्ययो वा बाधको भवति स्त्र्यधिकारप्रत्ययं वर्जयित्वा ।

उदाहरणम्—विक्षेपकः विक्षेप्ता इति च । अत्र √क्षिप् धातुः इगुपधः । तेन 'ण्वुल्तृचौ' इत्युत्सर्गसूत्रं बाधयित्वा 'इगुपधज्ञाप्रीकिरः कः' इत्यपवादसूत्रस्य प्रवृत्त्या 'विक्षिपः' इत्येव स्यात् । विकल्पेन बाधकत्वे तु पक्षे ण्वुल्-तृचौ भवतः ।

कृत्याः प्राङ् ण्वुलः ॥९५॥

ण्वुलः प्राग्याननुक्रमिष्यामस्ते कृत्यसंज्ञकाः ।

ण्वुलः– ण्वुल्तृचौ' इति सूत्रात् । 'कृत्य' संज्ञायाः प्रयोजनम् कृत्यैरधिकार्थवचने' इत्यादि सूत्रप्रवृत्तिः ।

तव्यत्तव्यानीयरः ॥९६॥

कर्त्तव्यम् । करणीयम् ।

धातोः तव्यत्–तव्य–अनीयर् इत्येते प्रत्ययाः भवन्ति । 'तव्यत्' इत्यत्र तकारः स्वरितार्थः, 'अनीयर् इत्यत्र रकारः मध्योदात्तार्थः ।

❀(वा०) वसेस्तव्यत् कर्त्तरि णिच्च । वास्तव्यः ।

अचो यत् ॥९७॥

गेयम् ।

अजन्ताद्धातोर्यत् प्रत्ययो भवति । तकारः स्वरार्थः । गेयम्–√गै धातुः 'आदेच उपदेशेऽशिति' इत्यैकारस्य आकारादेशः, तस्य च 'ईद्यति' इत्यनेन ईत्वम् । गी+य इत्यवस्थायाम् ईकारस्य गुणः ।

पोरदुपधात् ॥९८॥

पवर्गान्तादकारोपधाद् यत् । √शप्–शप्यम् ।

शप्यम्– एवम् √लभ्–लभ्यम् ।

शकिसहोश्च ॥९९॥

शक्यम् । सह्यम् ।

√शक्–√सह् धातुभ्याम् यत् ।

गदमदचरयमश्चानुपसर्गे ॥१००॥

गद्यम् । नियमार्थमेतत् ।

√गद् इत्यस्योदाहरणम् उक्तम् । √मद्–मद्यम् । √चर्–चर्यम् । √यम्–यम्यम् । नियमार्थम्–√यम् इत्यस्य पवर्गान्तत्वात् पूर्वेणैव सिद्धे । तेन सोपसर्गात् √गद् इत्यादेः प्रगाद्यम् । प्रमाद्यम् इत्यादि ।

अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु ॥१०१॥

क्रमेण गर्ह्यादिष्वर्थेष्वेते निपात्यन्ते । अवद्यं पापम् । पण्यम् = पणितव्यं यद् गवादि । अनिरोधोऽप्रतिबन्धः । शतेन वर्या ।

पापम् गर्ह्यम्–निन्दनीयं भवति तस्मिन्नर्थे अ √वद्+यत् अवद्यम् । √पण्+यत् पण्यः कंबलः इत्युदाहरणम् । वर्या–इति स्त्रियामेव √वृङ्+यत् +टाप् निपात्यते । एवम् एते अवद्यादयः यत्प्रत्ययान्ताः निपात्यन्ते । अप्रतिबन्धः–अरोधनीयः ।

वह्यं करणम् ॥१०२॥

वहन्त्यनेनेति वह्यं शकटम् ।

√वह् धातोः करणे यत् प्रत्ययो निपात्यते ।

अर्यः स्वामिवैश्ययोः ॥१०३॥

अर्यः स्वामी वैश्यो वा ।

√ऋ (गतौ) धातोः स्वामिनि वैश्ये चार्थे यत्प्रत्ययो निपात्यते ।

उपसर्या काल्या प्रजने ॥१०४॥

उपसर्या इति निपात्यते काल्या चेत् प्रजने भवति । प्राप्तकाला काल्या । प्रजनः प्रजननम् = प्रथमगर्भग्रहणम् । गर्भग्रहणे प्राप्तकाला उपसर्या गौः । उपसर्या वडवा ।

उपसर्या–उप √सृ+यत्+टाप् (स्त्रियाम्) काल्या–काल+यत्+टाप् । उपसर्या गौः–गोः गर्भाधानाय वृषभस्य समीपे गन्तुं योग्येत्यर्थः ।

अजर्यं सङ्गतम् ॥१०५॥

अजर्यम् इति निपात्यते सङ्गतं चेद्भवति । अजर्यम् आर्यसङ्गतम् ।

न जीर्यति इति अजर्यम् । नञ् √जॄष्+यत् (कर्तरि) । √जष् इति वयोहानौ वर्त्तते ।

वदः सुपि क्यप् च ॥१०६॥

अनुपसर्गं इति वर्त्तते । ब्रह्मोद्यम्/ब्रह्मवद्यम् ।

'गदमद……' इति पूर्व सूत्रात् 'अनुपसर्गे' इत्यनुवर्त्य सुप्युपपदे अनुपसर्गे √वद् इत्यस्मात् क्यप् भवति यत् च । **ब्रह्मोद्यम्**–ब्रह्म - वेदः तस्य उद्यम् = वदनम् ब्रह्म √वद् + क्यप् (भावे) वकारस्य सम्प्रसारणम् उकारः । **ब्रह्मवद्यम्**–ब्रह्म √वद् + यत् ।

भुवो भावे ॥१०७॥

भुवो धातोः सुबन्त उपपदेऽनुपसर्गे क्यप् प्रत्ययः । ब्रह्मभूयं गतः = ब्रह्मत्वं गतः—प्राप्तः इत्यर्थः ।

ब्रह्मभूयम्–ब्रह्म √भू + क्यप् । एवं **देवभूयम्**–देवत्वं गतः इत्यपि बोध्यम् ।

हनस्त च ॥१०८॥

तकारश्चान्तादेशः । ब्रह्महत्या ।

'सुपि' 'अनुपसर्गे' इति चानुवर्त्यायमर्थः–सुबन्त उपपदेऽनुपसर्गे √हन् धातोः भावे क्यप् अन्त्यनकारस्य तकारश्च ।

एतिस्तुशास्वृदृजुषः क्यप् ॥१०९॥

एति (√इण्)–√स्तु-√शासु-√वृ-√दृ-√जुष् एभ्यः क्यप् । इत्यः । क्यबिति वर्त्तमाने पुनर्ग्रहणं बाधकबाधनार्थम् । 'ओरावश्यके' इति ण्यत् प्रत्ययं बाधित्वा क्यबेव भवति । अवश्यस्तुत्यः । उपेयम् इति √इ (गतौ) इत्यस्य रूपम् ।

√स्तु–स्तुत्यः । √शास्–शिष्यः । √वृ–वृत्यः । आ √दृ–आदृत्यः । √जुष्–जुष्यः । उपेयम्–एवम् रक्षार्थं वेदानाम् अध्येयं व्याकरणम् इत्यत्र अध्येयम् इति पदे √इङ् धातोर्यत् प्रत्ययः ।

ऋदुपधाच्चाक्लृपिचृतेः ॥११०॥

अस्मात्क्यप् क्लृपिचृती विना । √वृतु—वृत्यम् ।

ऋदुपधाच्च धातोः क्यप् । √क्लृप्-√चृत् धातुभ्यां तु क्रमशः ण्यत् कल्प्यम् । चर्त्यम् इति रूपं भवतः । एवं ऋत्-इत्युपधात् √कृत धातोरपि ण्यदेव भवति कीर्त्यम् । सूत्रे 'ऋत्' इति तपरकरणमस्ति ।

ई च खनः ॥१११॥

ईकारश्चान्तादेशः । खेयम् । दीर्घोक्तिः प्रश्लेषार्था । तत्र द्वितीय इकारो 'ये विभाषा' इत्यात्वबाधनार्थः ।

√खन् धातोः क्यप् प्रत्ययो भवति, अन्त्यस्य नकारस्य च ईकारः आदेशः । खेयम्-ख+इ+य इति स्थितौ 'आदगुणः' इत्यनेन गुणः । प्रश्लेषार्था-सूत्रे द्वौ इकारौ इ+इ=ई दीर्घादेशः ।

भृञोऽसंज्ञायाम ॥११२॥

भृत्याः । अन्यत्र भार्यो नाम क्षत्रियः ।

संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिद्ध्यति ।
स्त्रियां भावाधिकारोऽस्ति तेन भार्या प्रसिद्ध्यति ॥

अन्यत्र-संज्ञायाम् इति तात्पर्यम् । संज्ञायां······स्त्रियां·······प्रसिद्ध्यति इति भाष्य कारिका अस्ति । अस्या अयम् आशयः-सूत्रकारस्य मते 'संज्ञायाम् ·····समज·······भृञिणः' इत्यनेन क्यप् भवति । 'असंज्ञायाम्' इति निषेधस्तु भार्या नाम क्षत्रिया इत्यत्र चरितार्थः । उत्तरयति श्लोकार्धेन-स्त्रियां भावाधिकारो वर्त्तते अतः कर्मणि ण्यत् एव भविष्यति ।

मृजेर्विभाषा ॥११३॥

परिमृज्यम् / परिमार्ग्यम् ।

√मृज् धातोर्वा क्यप् । पक्षे ण्यत् ।

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ॥११४॥

एते क्यपि निपात्यन्ते । राज्ञा सूयते राजसूयः इत्यादि ।

एते-राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्टपच्य-अव्यथ्य इति शब्दाः । सर्वे क्यप्-प्रत्ययान्ताः । राज √षुञ्-राजसूयः । √षू वा √सृ-सूर्यः । मृषा √वद्-मृषोद्यम् । √रुच्-रुच्यः कर्तरि क्यप् । √गुप्-कुप्यम् गकारस्य

ककारः । कृष्ट √पच्–कृष्टपच्याः कृष्टे पच्यन्ते कर्मकर्त्तरि क्यप् । नञ् √व्यथ्–अव्यथ्यः कर्त्तरि क्यप् ।

भिद्योद्ध्यौ नदे ॥११५॥

भिनत्ति कूलम् इति भिद्यः । उज्झत्युदकम् इति उद्ध्यः ।

उभयत्र क्यप् । उद्ध्यः–√उञ्झ् धातोर्झकारस्य धकारः निपात्यते । तेन जकारस्यापि दकारो भवति ।

पुष्यसिद्ध्यौ नक्षत्रे ॥११६॥

पुष्यन्त्यस्मिन् अर्थाः इति पुष्यः ।

√पुष्, √सिध् धातोः अधिकरणे क्यप् निपात्यते । एवं सिद्ध्यन्त्यस्मिन्नर्थाः इति सिद्ध्यः ।

विपूयविनीयजित्या मुञ्जकल्कहलिषु ॥११७॥

विपूयो मुञ्जः । विनीयः कल्कः । जित्यो हलिः ।

वि √पू, वि √नी, √जि धातुभ्यः क्यप् प्रत्यये कृते एते विपूयादयः मुञ्जादिष्वर्थेषु निपात्यन्ते । कल्कः तैले घृते वा त्रिफलादिना साध्यः पिष्ट औषधविशेषः । हलिः–कृष्टभूसमीकरणार्थं स्थूलं काष्ठम् (पटोला) ।

प्रत्यपिभ्यां ग्रहेश्छन्दसि ॥११८॥

प्रति, अपि पूर्वाद्ग्रहेः क्यप् छन्दसि विषये । मत्तस्य न प्रतिगृह्यम् । लोके प्रतिग्राह्यम् ।

तस्मान्नापिगृह्यम् । उभयत्र 'ग्रहिज्या…… …' इति सम्प्रसारणम् ।

पदास्वैरिबाह्यापक्ष्येषु च ॥११९॥

पदेऽस्वैरिणि, बाह्यायां पक्ष्ये चार्थे ग्रहेः क्यप् । पदे तावत्—प्रगृह्यं पदम् । यस्य 'प्रगृह्य' संज्ञा कृता । गृह्यका इमे - परतन्त्राः गृहपक्षिप्रभृतयः । बाह्यायाम्–ग्रामगृह्या ग्रामबाह्या सेना । पक्षे भवः पक्ष्यः । वासुदेवगृह्या सेना तत्पक्षम् आश्रितेत्यर्थः ।

स्वैरी–स्वतन्त्रः । अस्वैरी–परतन्त्रः । तेन प्रगृह्यसंज्ञके पदे सन्धिर्न भवति। परस्परमचो न सन्निकृष्यन्ते इति भावः । गृह्यकाः–पञ्जरादि-बन्धनेन संयता इत्यर्थः। ग्रामगृह्याः–ग्रामस्य गृह्याः । वासुदेवगृह्याः–वासुदेवस्य गृह्याः इत्युभयत्र षष्ठी-समासः ।

विभाषा कृवृषोः ॥१२०॥

कृत्यम्/कार्यम् । वृष्यम्/वर्ष्यम् ।

√कृ–√वृष् धातुभ्यां वा क्यप्, पक्षे ण्यत् । तेन रूपद्वयम् ।

युग्यं च पत्त्रे ॥१२१॥

युग्यो गौः । युग्योऽश्वः ।

पतत्यनेनेति पत्त्रम् = वाहनम् । तस्मिन्नर्थे √युज् धातोः क्यप्, जकारस्य गकारश्च निपात्यते । अन्यार्थे योग्यम् ।

अमावस्यदन्यतरस्याम् ॥१२२॥

अमा सहार्थे । तस्मिन्नुपपदे कालेऽधिकरणे ण्यत् प्रत्ययो भवति । अमा = सह वसतोऽस्यां चन्द्रार्कौ इति अमावस्या । अत्र अन्यतरस्याम् = विकल्पेन वृद्धेरभावो भवति–अमावस्या ।

ण्यत्……भवति–√वस् धातोरिति शेषः । किमत्र निपात्यते इत्याशङ्कायां भाष्ये श्लोकवार्तिकम्—

अमावसोरहं ण्यतोर्निपातयाम्यवृद्धिताम् ।
तथैकवृत्तिता तयोः स्वरश्च मे प्रसिद्ध्यति ॥

अस्यार्थः–अहं ण्यतोः–ण्यत्प्रत्ययान्तयोः अमावसोः = अमा इत्युपपदयोः √वस् धातोः अवृद्धिताम्–ह्रस्वत्वं च (पक्षे) निपातयामि । तेन वसोः–अमावस्या/अमावास्या–पदयोः एकवृत्तिता–'अमावस्याया वा' इति सूत्रेण वुन् अण् प्रत्यययोरुत्पत्तिः स्वरश्च–स्वरितत्वञ्च सिद्ध्यति ।

छन्दसि निष्टक्र्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्य-खन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्य-स्ताव्योपचाय्यपृडानि ॥१२३॥

निष्टक्र्यादयः शब्दाश्छन्दसि निपात्यन्ते । निष्टक्र्यं चिन्वीत

पशुकामः । निस् पूर्वः √कृती (छेदने) धातुः । उन्नीयः । उत्पूर्वो √नी । देवहूयः । । ह्वयतिर्जुहोति वा इत्यादि ।

निष्टक्यर्म्-निस् √कृत्+ण्यत् आद्यन्तशब्दयोर्विपर्ययः निसः षत्वं च निपात्यते । देवहूयः-देव √ह्वेञ् √हु वा+क्यप् तुगभावश्च । प्रणीयः, उन्नीयः- प्र वा उत् √नी+क्यप् । उच्छिष्यम्-उत् √शिष्+ क्यप् श्चुत्वछत्वे च मर्यः- √मृङ्+यत् । स्तर्या-√स्तृञ्+यत्+टाप् स्त्रियामेव निपातनम् । ध्वर्यः-ध्वृ+यत् । खन्यः, खान्यश्च-√खन्+यत् वा ण्यत् । देवयज्या-देव √यज्+यत्+टाप् स्त्रियामेव । आपृच्छ्यः-आ √पृच्छ+क्यप् । प्रतिषीव्यः-प्रति √षिव्+क्यप् । ब्रह्मवाद्यः-ब्रह्म √वद्+ ण्यत् । भाव्यः-√भू+ण्यत् । स्ताव्यः-√स्तु+ण्यत् । उभयत्र वृद्धिरावा-देशश्च । उपचाय्यपृडम्-उप √चि+ण्यत् आयादेशश्च । पृडे एवोत्तरपदे निपातनम् ।

अस्मिन् सूत्रे सप्तदश पदानि निपात्यन्ते । निपातनवार्तिकमिदम् ।

ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः ।
ण्यदेकस्माद्यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः ॥

क्रमशः प्रत्ययानां योजना बोध्या ।

ऋहलोर्ण्यत् ॥१२४॥

ऋवर्णान्ताद्धलन्ताच्च ण्यत्प्रत्ययो भवति । कार्यम् । हार्यम् । वाक्यम् । पाक्यम् ।

√कृ-√हृ इति धातू ऋवर्णान्तौ । √वच्,√पच् इति हलन्तौ । 'चजोः कु……' इति । चकारस्य ककारः, णित्वाद् वृद्धिः ।

ओरावश्यके ॥१२५॥

उवर्णान्ताद् धातोर्ण्यत् प्रत्ययो भवत्यावश्यके द्योत्ये । (अवश्यम्) लाव्यम् । पाव्यम् । अवश्यलाव्यम् इत्यादि ।

अन्तरङ्गतया द्योत्योऽर्थः स्वीकृतः । √लूञ्, √पूञ् इति धातुद्वयम् उकारान्तम् । अवश्यलाव्यम्-'लुम्पेदवश्यमः कृत्ये' इति 'म' लोपः ।

आसुयुवपिरपिलपित्रपिचमश्च ॥१२६॥

आङ् पूर्वात् सुनोतेः—√यु-√वपि-√रपि-√लपि-√त्रपि-

√चम् एभ्यो ण्यत् प्रत्ययो भवति । आसाव्यम् । याव्यम् । वाप्यम् । राप्यम् । लाप्यम् । त्राप्यम् । चाम्यम् । अनुक्तसमुच्चयार्थश्चकारः दभि – दाभ्यम् ।

दाभ्यम्–यद्यपि √दभ धातुर्गणे न पठितस्तथापि चुरादिगणे 'बहुलमेतन्निदर्शनम्' इति वचनादस्य धातुत्वं बोध्यम् ।

आनाय्योऽनित्ये ॥१२७॥

आनाय्यो निपात्यतेऽनित्ये वाच्ये । आनाय्यो दक्षिणाग्निः । रुढिरेषा । तस्य चानित्यत्वं नित्यमजागरणात् ।

निपात्यते–आङ् पूर्वात् √नी धातोः ण्यत् प्रत्ययः आय् आदेशश्चेत्युभयम् । अजागरणात्–अज्वलनात् । अत्रायं विशेषः–यो दक्षिणाग्निः गार्हपत्यादाहवनीयेन सहैकयोनिर्भवति तस्मिन् विशिष्टे दक्षिणाग्नौ आनाय्यः निपात्यते । यश्च तस्माद् भिन्नयोनिः वैश्यकुलादानीयते तत्र आनेयः इत्येव भवति । यथेदं भाष्यवार्तिकम्—

अनाय्योऽनित्य इति चेद् दक्षिणाग्नौ कृतं भवेत् ।
एकयोनौ च तं विद्यादानेयो ह्यन्यथा भवेत् ॥

प्रणाय्योऽसम्मतौ ॥१२८॥

असम्मतौ वाच्यायाम् प्रणाय्यश्चोरः । असम्मतौ किम् ? प्रणेयो द्विजः ।

असम्मतौ–अविद्यमाना सम्मतिः = पूजा यस्मिन् स तस्मिन्नित्यर्थः । सम्मतिरभिलाषोऽप्युच्यते । तेन 'ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्यान्तेवासिने' इत्यत्रापि प्रणाय्यपदम् अभिलाषरहिते निष्कामे प्रयुक्तं सत् साधु ।

पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु ॥१२९॥

एष्वर्थेषु क्रमादेते निपात्यन्ते । पाय्यं मानम् । सान्नाय्यं हविः । निकाय्यो निवासः । धाय्या सामिधेनी ऋक् ।

पाय्यः–√माङ् + ण्यत् युक्–आगमः, मकारस्य पकारश्च ।
सान्नाय्यम्–सम् √नी + ण्यत् 'आय्' आदेशः उपसर्गस्य दीर्घत्वञ्च ।
निकाय्यः–नि √चि + ण्यत् 'आय्' आदेशः, चकारस्य ककारश्च ।

धाय्या- √ धा + ण्यत् युक्—आगमः स्त्रियां टाप् । सामिधेनी शब्दः ऋग्विशेषस्य वाचकः ।

क्रतौ कुण्डपाय्यसंचाय्यौ ॥१३०॥

कुण्डपाय्य-संचाय्यौ निपात्यौ क्रतौ वाच्ये । कुण्डेन पीयतेऽस्मिन् सोम इति कुण्डपाय्यः क्रतुः । सञ्चीयतेऽसौ इति सञ्चाय्यः ।

कुण्डपाय्यः–कुण्ड √पा + यत् । सञ्चाय्यः–सम् √चि + ण्यत्, आय् आदेशश्च । असौ–सोमः, अस्मिन्निति शेषः ।

अग्नौ परिचाय्योपचाय्यसमूह्याः ॥१३१॥

परिचाय्यः । उपचाय्यः । समूह्य चिन्वीत पशुकामः । अग्नौ किम्–परिचेयम् ।

अग्नौ–तदर्थ इष्टकाचयनविशेषे । तस्मिन्नेवार्थे रूढिः । परिचाय्यः–परि √चि + ण्यत्, आयादेशश्च एवम् उपचाय्यः । समूह्यः–सम्√वह् + ण्यत् । √वह् धातोः वकारस्य सम्प्रसारणमुकारः, तस्य दीर्घत्वञ्च । परिचेयम्–एवम् उपचेयम् । संवाह्यम् इति च ।

चित्याग्निचित्ये च ॥१३२॥

चित्यशब्दोऽग्निचित्याशब्दश्च निपात्येते । चीयतेऽसौ इति चित्योऽग्निः । अग्निचयनमेव अग्निचित्या ।

चित्यः–√चि + क्यप् (कर्मणि) फलम् आद्युदात्तत्वम् । अग्निचित्या–अग्नि √चि + य (भावे) तुक् च फलम् अन्तोदात्तत्वम् । चेयम् अन्यत् ।

ण्वुल्तृचौ ॥१३३॥

सर्वधातुभ्यो ण्वुल्-तृचौ स्तः । कारकः । कर्त्ता । चकारः सामान्यग्रहणाविघातार्थः 'तुरिष्ठेमेयस्सु' ।

कारकः–√कृ + ण्वुल् 'वु' इत्यस्य 'युवोरनाकौ' इत्यनेन 'अक' आदेशः । कर्त्ता–√कृ + तृच् गुणः कर्तृ इत्यस्य प्रथमैकवचने रूपम् तकारस्य द्वित्वञ्च । सामान्यग्रहणाविघातार्थः–सामान्यस्य 'तृ' इत्यस्य विघातो मा भूत् तदर्थः–तृनो ग्रहणसिद्धयर्थः इति भावः । तेन 'तुरिष्ठेमेयस्सु' इत्यत्र 'तुः' इति शब्देन तृन्-तृचोरुभयोर्ग्रहणं भवति । एवं 'तुश्छन्दसि' इत्यत्रापि ।

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ॥१३४॥

√नन्दि-√ग्रह-√पच इति त्रिभ्यो गणेभ्यः क्रमात् ल्यु-णिनि-अच् एते स्युः । नन्दनः । ग्राही । पचः इत्यादि ।

नन्दनः–√नन्द + ल्यु 'यु' इत्यस्य 'अन' आदेशः । **ग्राही**–√ग्रह + णिनि । **पचः**–√पच् + अच् । आदिशब्दः प्रत्येकमभिसम्बध्यते । अत्र धातुपाठक्रमेण संनिविष्टाः नन्दादयो न गृह्यन्ते अपि तु नन्दनादि प्रातिपदिकगणेषु पृथक्कृत्य ये धातवः पठ्यन्ते तेऽत्र निर्दिश्यन्ते ।

❀(वा०) अजपि सर्वधातुभ्यः । भवः । सवः । नवः ।

इगुपधज्ञाप्रीकिरः कः ॥१३५॥

इगुपधेभ्यो जानातेः प्रीणातेः किरतेश्च कः प्रत्ययः । विक्षिपः । ज्ञः । प्रियः । किरः ।

वि √क्षिप्–√ज्ञा–√प्री–√कृ इति चत्वारो धातवः सन्ति । तेभ्यः 'क' प्रत्यये उक्तोदाहरणानि बोध्यानि ।

आतश्चोपसर्गे ॥१३६॥

उपसर्गे उपपदे आदन्तात् कः । सुस्थः ।

सुस्थः–सु √स्था + क ।

पाघ्राध्माधेट्दृशः शः ॥१३७॥

एभ्यः शः । उत्पिबः । उज्जिघ्रः । उद्धमः । उद्धयः । उत्पश्यः ।

उत्पिबः इत्यादि–क्रमशः उत् पूर्वाः √पा–√घ्रा–√ध्मा–√धेट्–√दृश् धातवः सन्ति । 'श' प्रत्ययस्य शित्त्वात् सार्वधातुकसंज्ञा √पा–√घ्रा–√ध्मा धातूनां क्रमशः पिब–जिघ्र–धम इत्यादेशाः भवन्ति ।

❀(वा०) जिघ्रतेः संज्ञायां प्रतिषेधो वक्तव्यः । व्याघ्रः ।

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ॥१३८॥

शः । लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातयः । साहयः । अनुपसर्गात् किम् ? प्रलिपः ।

❀(वा०) गवादिषु विन्देः संज्ञायाम् । गोविन्दः । अरविन्दः ।

शः–अनुपसर्गेभ्यो √लिम्प–√विन्द–√धारि–√पारि–√वेदि उद् √एजि–√चेति (√धारि–आदयः सर्वे णिजन्ताः)–√साति (सौत्रः)–√साहि (णिजन्तः) धातुभ्यः । प्रलिपः ।

❀(वा०) नौ लिम्पेरिति वक्तव्यम् । निलिम्पाः (देवाः) ।

ददातिदधात्योर्विभाषा ॥१३९॥

दाञो धाञश्च वा शः । ददः/दायः । दधः/धायः ।

वा शः–पक्षे णः । ददः, दधः–शे कृते शप्→श्लुः, द्विर्वचनादयश्च । दायः, धायः–णे कृते 'आतो युक्' इत्यनेन युक् ।

ज्वलितिकसन्तेभ्यो णः ॥१४०॥

√ज्वल (दीप्तौ) इत्येवमादिभ्यः √कस (गतौ) इत्येवमन्तेभ्यो विभाषया 'ण' प्रत्ययो भवति । ज्वालः/ज्वलः । चालः/चलः । अनुपसर्गादित्येव–प्रज्वलः ।

❀(वा०) तनोतेर्णस्योपसंख्यानं कर्त्तव्यम् । अवतानः ।

ज्वलिति–इति शब्दः आद्यर्थकः । √ज्वल्–इति–आदिर्येषामिति बहुव्रीहिः । एवम् कसन्तेऽपि बहुव्रीहिः । णः–तेन वृद्धिः ज्वालः । पक्षे अच् ज्वलः । अवतानः–अवतनोतीति विग्रहः । अपतानः इति पाठान्तरम् ।

श्याऽऽद्व्यधास्रुसंस्रवतीणवसावहृलिहश्लिषश्वसश्च ॥१४१॥

√श्यैङ्–आकारान्तधातुभ्यः–√व्यध-आ√स्रु–सं √स्रु–अति √इण्–अव √षो–अव √हृ–√लिह–√श्लिष–√श्वस एभ्यो णः । आदन्तत्वादेव सिद्धे श्यायतेः उपसर्गे कं बाधित्वाऽयमेव स्यात् । अवश्यायः । प्रतिश्यायः । आदायः । आधायः । आस्रावः । संस्रावः । अत्यायः । अवसायः । अवहारः । आलेहः । आश्लेषः । श्वासः ।

अस्मिन् सूत्रे आ √स्रु, सम् √स्रु, अति √इ, अव √षो, अव √हृ इत्येतेभ्यः सोपसर्गेभ्यः एव णो भवति । शेषेभ्यः सोपसर्गेभ्योऽनुपसर्गेभ्यश्च । √श्यैङ् धातोः आकारान्तत्वादेव सिद्धे पुनर्ग्रहणम् 'आतश्चोपसर्गे' इति 'क' प्रत्ययस्यापि बाधनार्थम् । अवश्यायः·········आधायः–सर्वत्र 'आतो युक्' इत्यनेन युक्–आगमः ।

दुन्योरनुपसर्गे ॥१४२॥

दुनोतेर्नयतेश्चानुपसर्गे णः । दुनोति दावः । नायः ।

नायः–नयति इति विग्रहः । णः कर्तरि भवति ।

विभाषा ग्रहः ॥१४३॥

ग्राहः जलचरः । ज्योतिषि ग्रहः । व्यवस्थितविकल्पत्वात् ।

ग्राहः/ग्रहः इत्युभे रूपे भवतः । परन्तु जलचरे ग्राहः, ज्योतिषि ग्रहः एव ।

❀(वा०) भवतेश्चेति वक्तव्यम् । भावः/भवः ।

गेहे कः ॥१४४॥

गेहे कर्त्तरि ग्रहेः कः । गृहं वेश्म । तात्स्थ्याद् गृहाः दाराः ।

सूत्रे गेहे इति प्रत्ययार्थस्य कर्तुरुपाधि नतूपपदम् । गृहम्–'ग्रहिज्या.....' इति सम्प्रसारणम् (रकारस्य ऋकारः) । तात्स्थ्यात्–गेहे स्थितिकरणात् । अर्थात् अत्र 'गेह' पदम् आवृत्त्या मुख्यस्य वेश्मनः गौणस्य तत्र स्थितस्य 'दार' पदस्य वाचकम् । गृहाः इत्यपि भवति । तथा च मेघदूते—तत्रागारम् धनपतिगृहानुत्तरेणास्मदीयम् ।

शिल्पिनि ष्वुन् ॥१४५॥

❀(परिगणन वा०) नृतिखनिरञ्जिभ्य एव । नर्तकः । खनकः । रञ्जेरनुनासिकलोपश्च । रजकः ।

नृति.........एव–व्यवस्थितविभाषयाऽयमर्थो लभ्यः । शिल्पिनि कर्त्तरि 'ष्वुन्' भवति । षकारः इत् । षित्वाद् नर्तकी इत्यादि ।

गस्थकन् ॥१४६॥

गायतेः थकन् प्रत्ययो भवति शिल्पिनि । गाथकः ।

√गै (शब्दे) इत्यस्यैवात्र ग्रहणम् न √गाङ् (गतौ) इत्यस्य विवक्षातः ।

ण्युट् च ॥१४७॥

गायनः ।

√गै इत्यस्मादेव । टित्वान्ङीप् गायनी ।

ह्रश्च व्रीहिकालयोः ॥१४८॥

जहातेर्जिहीतेश्च ण्युट् व्रीहौ काले च कर्त्तरि । जहत्युदकमिति हायनाः व्रीहयः । जिहीते भावान् इति हायनो वर्षः ।

ह्रः—√ओहाक् (त्यागे) √ओहाङ् (गतौ) इत्युभयस्यापि ग्रहणम् । हायनाः—'आतो युक्' इति 'युक्' आगमः ।

प्रुसृल्वः समभिहारे वुन् ॥१४९॥

√प्रु–√सृ–√लू इत्येतेभ्यो वुन् समभिहारे । प्रवकः । सरकः । लवकः । समभिहारोऽत्र साधुकारित्वम् ।

'प्रुस्रुल्वः' इति पाठान्तरम् । तेन 'सृ' इत्यस्य स्थाने 'स्रु' पाठेन स्रवकः इति रूपं बोध्यम् । साधुकारित्वम्—तथा च भाष्यवार्तिकम् प्रुसृल्वः साधुकारिणि वुन्विधानम् । सकृदपि यः सुष्ठु करोति तत्र यथा स्यात् । बहुशोऽपि यो दुष्ठु करोति तत्र मा भूत् ।

आशिषि च ॥१५०॥

जीवतात्, जीवकः । भवतात्, भवकः ।

आशिषि गम्यमानायां धातुमात्राद् वुन् भवति । आशीः—प्रार्थना = अप्राप्तस्याभीष्टस्य प्राप्तेरिच्छा । जीवतात्—जीवनक्रियायाः कर्त्ता भवेत् । जीवतात् इति जीव् इत्यस्य लोट् प्रथम–मध्यमपुरुषयोरेकवचनस्य रूपम् । एवं भवतात् इत्यपि ।

प्रत्ययोमुण्डविदाङ्कुर्वदीपजनक्र्यावद्ययुग्यंश्याद्व्यधा दश ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
द्वितीयाध्यायस्य तृतीयः पादः ।

तृतीयाध्यायस्यास्मिन् प्रथमे पादे प्रत्ययः, मुण्डमिश्र ......, विदाङ्कुर्वन्त्विति ......' दीपजन ......, क्र्यादिभ्यः श्ना, अवद्यपण्यवर्या ......, युग्यं च पत्रे इत्यतेभ्य आरभ्य विंशतिः सूत्राणि तथा श्याऽऽद्व्यधास्रु ......, इत्यत आरभ्य दश सूत्राणीति संकलनेन पञ्चाशदुत्तरशतम् (१५०) सूत्राणि सन्ति ।

इति काशिकावृत्तिसार-सुधायां
तृतीयाध्यायस्य प्रथमः पादः ।

अथ तृतीयाध्याये द्वितीयः पादः

कर्मण्यण् ॥१॥

त्रिविधं कर्म—निर्वर्त्यम्, विकार्यम्, प्राप्यम् । सर्वत्र कर्मण्युपपदे धातोरण् स्यात् । क्रमेणोदाहरणम्—कुम्भकारः । काण्डलावः । वेदाध्यायः ।

निर्वर्त्यम्—यत् पूर्वम् असत्, सत् वा जन्मना प्रकाशते यथा कुम्भः पूर्वं नासीत् आसीद्वा मृत्तिकारूपम् स एव कर्त्रा कुम्भरूपेण समुत्पादितः । **विकार्यम्**—यस्य सत एव कश्चिद्विकारो विधीयते यथा लवनकर्मणा काण्डस्य विकारो विधीयते । **प्राप्यम्**—यत्र क्रियया सह सम्बन्धमात्रम् प्रतीयते यथा वेदम् अधीते । अत्राध्ययनक्रियया वेदस्य सम्बन्धमात्रं प्रतीयते । एतत् त्रिविधं कर्म कर्तुरीप्सिततमं भवति । कुम्भकारः इत्यादि–अणः णित्वाद्वृद्धिः ।

ह्वावामश्च ॥२॥

√ह्वेञ्-√वेञ्-√माङ् एभ्यः कर्मण्युपपदे अण् । 'क' प्रत्ययस्यापवादः । स्वर्गह्वायः । तन्तुवायः । धान्यमायः ।

√ह्वेञ् (स्पर्धायां शब्दे च) √वेञ् (तन्तुसन्ताने) √माङ् (माने) स्वर्गह्वायः–'आतो युक्………' इति युक् ।

आतोऽनुपसर्गे कः ॥३॥

आदन्तादनुपसर्गे कर्मण्युपपदे 'क' प्रत्ययः । अणोऽपवादः । गोदः ।

गोदः–गां ददाति । 'आतो लोप इटि च' इत्यनेन आकारस्य लोपः ।

सुपि स्थः ॥४॥

सुप्युपपदे तिष्ठतेः कः । समस्थः । विषमस्थः ।

योगविभागात् सुप्याकारान्तेभ्यो धातुभ्यः कः । द्विपः । पादपः । स्थश्च सुपि क प्रत्ययः ।

किमर्थमिदम् ? कर्त्तरि पूर्वयोगः, अनेन भावे यथा स्यात् आखूनामुत्थानम् आखूत्थः । इत उत्तरं 'कर्मणि' 'सुपि' इति च द्वयमप्यनुवर्त्तते । तत्र सकर्मकेषु धातुषु 'कर्मणि' इत्येतदुपतिष्ठते अन्यत्र 'सुपि' इति ।

योग विभागात्–'सुपि' इत्येको योगः 'आतोऽनुपसर्गे कः' इति चानुवर्त्तते । तेन द्विपः–द्वि√पा इत्यस्मात् कः (द्वाभ्यां मुखशुण्डाभ्यां पिबतीति विग्रहः ।) 'स्थः' इत्येको योगः ।

किमर्थमिदम्–आतोऽनुपसर्गे कः इत्यनेनैव सिद्धे । उत्तरयति–भावे यथा स्यात् । आखूत्थः–उद्√स्था + कः 'उदः स्थास्तम्भोः पूर्वस्य' इति पूर्वसवर्णः । अत्र नित्यसमासो भवति । एवम् आखूनामुत्थानम् इत्यस्वपदविग्रहो बोध्यः ।

तुन्दशोकयोः परिमृजापनुदोः ॥५॥

अनयोरुपपदयोः परिमृजापनुदोर्धात्वोः कः । तुन्दपरिमृजः अलसः । शोकापनुदः पुत्रः । तथा च -

❀(वा०) आलस्यसुखाहरणयोरिति वाच्यम् ।

❀(वा०) क प्रकरणे मूलविभुजादिभ्य उपसंख्यानम् । मूलानि विभुजति इति मूलविभुजो रथः । नखान् मुञ्चन्ति इति नखमुचानि धनूंषि । कुमुदम् ।

आलस्य·······आलस्ये, सुखस्याहरणे चार्थे गम्यमाने कः । **मूलविभुजादिभ्य**······आकृतिगणोऽयम् । अत्र तादर्थ्ये चतुर्थी = मूलविभुजादिसिद्धयर्थमित्यर्थः । **मूलविभुजः**–वि √ भुज (कौटिल्ये तुदादिः) + क । **कुमुदम्**–कौ–पृथिव्यां मोदते ।

प्रे दाज्ञः ॥६॥

सोपसर्गार्थमारम्भः । प्रेणोपसृष्टाद् दधातेर्जानातेश्च कर्मणि कः । सर्वप्रदः । पथिप्रज्ञः ।

सोपसर्गार्थम्–अनुपसर्गात् 'आतोऽनुपसर्गे कः' इत्येव सिद्धेः । प्रेण + उपसृष्टाद्–'प्र' उपसर्गेण सम्बद्धात् । सूत्रस्थे 'प्रे' तृतीयार्थे सप्तमी बोध्या । पथिप्रज्ञः–पन्थानं जानातीत्यर्थः । 'पथि' इत्यत्र वैषयिकाधारे सप्तमी ज्ञेया ।

समि ख्यः ॥७॥

गां संचष्टे गोसंख्यः ।

सम् √स्था इत्यस्माद् धातोः कर्मण्युपपदे 'क' प्रत्ययः । संचष्टे–√चक्षिङः ख्याञ् इत्यस्य ग्रहणमिति तात्पर्यम् ।

गापोष्टक् ॥८॥

'कर्मण्यनुपसर्गे' इत्यनुवर्त्तते । शक्रं गायति शक्रगः । सुरापः ।

*(वा०) सुराशीध्वोः पिबतेरिति वाच्यम् । सुरापी । नेह–क्षीरपा ब्राह्मणी ।

*(वा०) बहुलं छन्दसि । या ब्राह्मणी सुरापी/सुरापा भवति । नैनां देवाः पतिलोकं नयन्ति ।

गापोः–√गा (गाने) √पा (पाने) इत्येताभ्याम् । टक्–टकः कित्वात् आतो लोपः, टित्वात् ङीप् सुरापी । क्षीरपा–अत्र 'क' प्रत्ययः, टाप् च ।

हरतेरनुद्यमनेऽच् ॥९॥

अंशहरः । उद्यमनम्—उत्क्षेपणम् तत्र न भारहारः ।

*(वा०) अच्प्रकरणे शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुष्षु ग्रहेरुपसंख्यानम् । शक्तिग्रहः इत्यादि ।

अंशहरः–अंशं हरति = स्वीकरोति । उत्क्षेपणम्–अधः–स्थितस्य वस्तुनः ऊर्ध्वं नयनम् । शक्तिग्रहः–शक्तिं गृह्णाति । लाङ्गलग्रहः । अङ्कुशग्रहः ।

यष्टिग्रहः । तोमरग्रहः । घटग्रहः । घटीग्रहः । धनुर्ग्रहः इत्युदाहरणान्तराणि ।

वयसि च ॥१०॥

वयसि गम्ये कर्मणि हरतेरच् । अस्थिहरः श्वा । अस्थिहरणशक्तिद्योतकवयोयुक्त इत्यर्थः । कवचहरः क्षत्रियकुमारः ।

वयः–कालकृता शरीरावस्था यौवनादिः । कवचहरः–कवचधारणशक्तिगमकयौवनरूपवयोयुक्तः ।

आङि ताच्छील्ये ॥११॥

पुष्पाहरः । फलाहरः ।

ताच्छील्यम्–तत्स्वभावता । तस्मिन् गम्यमाने आङ्पूर्वात् √हृ धातोरच् । पुष्पाहरः–पुष्पाणाम् आहरणेऽस्य स्वाभाविकी=फलानपेक्षा प्रवृत्तिरित्यर्थः । यत्र ताच्छील्यं न गम्यते तत्र 'अण्' भारहारः ।

अर्हः ॥१२॥

√अर्ह पूजायाम् । अस्मात् कर्मण्युपपदेऽच् । पूजार्हा ब्राह्मणी ।

विशेषतः स्त्रीलिङ्गे सूत्रस्यास्य प्रवृत्तिः स्पष्टा भवति । पूजार्हा–पूजामर्हति इति पूजार्ह शब्दात् टाप् पुंलिङ्गे अचि अणि वा नास्ति विशेषः । अणि प्रत्यये तु ङीप् स्यात् ।

स्तम्बकर्णयो रमिजपोः ॥१३॥

एतयोरुपपदयोः क्रमेण रमिजपोरच् ।

*(वा०) हस्तिसूचकयोरिति वाच्यम् । स्तम्बेरमः हस्ती । कर्णेजपः सूचकः ।

एतयोः–स्तम्ब-कर्णयोः । हस्तिसूचकयोः–यदा √रम् धातोः कर्ता हस्ती √जप् धातोश्च सूचको भवति तदा 'अच्' इत्यर्थः । 'स्तम्बे' 'कर्णे' इत्युभयत्र 'तत्पुरुषे कृति बहुलम्' इति सूत्रेण सप्तम्या अलुक् । सूचकः–पिशुनः इत्यर्थः ।

शमि धातोः संज्ञायाम् ॥१४॥

'शम्' उपपदे धातुमात्रात् संज्ञायामच् । शङ्करः । सम्भवः ।

शम्भवः–शम् भावयति = चिन्तयति √भू अवकल्कने इत्यस्मात् अच् अवकल्कनम्–चिन्तनम् । शम्भवोऽपि शिवस्य नाम् । 'नमः शम्भवाय च.....' इति यजुर्मन्त्रः ।

अधिकरणे शेते ॥१५॥

खे शेते खशयः ।

खशयः अधिकरणे सुबन्त उपपदे √शीङ् धातोरच् । 'शी' इत्यस्य गुणः एकारस्य 'अय्' आदेशश्च ।

❀(वा०) पार्श्वादिषूपसंख्यानम् । पार्श्वाभ्यां शेते पार्श्वशयः । उदरेण शेते उदरशयः । एवं पृष्ठशयः ।

❀(वा०) उत्तानादिषु कर्तृषु । उत्तानः शेते उत्तानशयः ।

❀(वा०) गिरौ डश्छन्दसि । गिरिशः । डित्वाट्टिलोपः । 'गिरिशमुपचचार' 'आरोपितं यद् गिरिशेन पश्चात्' इति लौकिकौ संस्कृतप्रयोगौ अत्र गिरिरस्यास्तीति तद्धितीयः 'श' प्रत्ययो बोध्यः । निरंकुशाः कवयो वा ।

चरेष्टः ॥१६॥

अधिकरणे सुबन्त उपपदे √चर् धातोः 'ट' प्रत्ययः । कुरुचरः ।

कुरुचरः–कुरुषु चरति । टित्त्वान्ङीप् कुरुचरी ।

भिक्षासेनादायेषु च ॥१७॥

अनधिकरणार्थ आरम्भः । भिक्षाचरः । सेनाचरः । आदायचरः ।

आरम्भः—अधिकरणे तु पूर्वेणैव सिद्धेरिति भावः ।

भिक्षाचरः —भिक्षां चरति–चरणेन भिक्षामर्जयति ।

सेनाचरः—सेनां चरति–प्रविशतीत्यर्थः ।

आदायचरः—आदाय = आदानं कृत्वा चरति = गच्छति, भक्षयति वेत्यर्थः ।

पुरोऽग्रतोऽग्रेषु सर्त्तेः ॥१८॥

पुरःसरः । अग्रतःसरः । अग्रेसरः ।

पुरः–अग्रतः–अग्रे इत्येतेषूपपदेषु √सृ धातोः 'ट' प्रत्ययः । 'वा शरि' इत्यनेन पक्षे विसर्गस्य सकारे पुरस्सरः, अग्रतस्सरः इत्यपि । अग्रेसरः–सप्तम्याः अलुक् ।

पूर्वे कर्त्तरि ॥१६॥

पूर्वशब्दे कर्तृवाचिन्युपपदे सर्तेष्टः । पूर्वः सरति–पूर्वसरः ।

अत्र कर्तृवाचकः पूर्वशब्दः सम्बन्धिशब्दः पूर्वः पूर्वजातो वा ।

कृञो हेतुताच्छील्यानुलोमेषु ॥२०॥

कर्मण्युपपदे हेतौ, ताच्छील्ये, आनुलोम्ये च गम्ये करोतेष्टः । क्रमेणोदाहरणम्—शोककरी कन्या । श्राद्धकरः । प्रैषकरः ।

हेतुः–ऐकान्तिकं (नियतम्) कारणम् । अत्र लौकिकस्य हेतोर्ग्रहणम् इति तात्पर्यम् । शोककरी–शोकस्य निश्चितं कारणम् । एवं यशस्करी विद्या यशसो हेतुरित्यर्थः । ताच्छील्यम्–तत्स्वभावता । श्राद्धकरः–श्राद्धकरणम् । अस्य स्वभावः । आनुलोम्यम्–अनुकूलता अर्थात् स्वामिचित्तानुवर्त्तनम् । प्रैषकरः–आज्ञानुवर्त्ती भृत्यः पुत्रो वा । करोतेः–√डुकृञ् करणे इत्यस्य ग्रहणं न तु √कृञ् हिंसायामित्यस्य द्योतनार्थम् ।

दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु ॥२१॥

दिवादिषूपपदेषु करोतेष्टः । अहेत्वाद्यर्थ आरम्भः । दिवा करोति प्राणिनश्चेष्टायुक्तान् इति दिवाकरः । विभाकरः । निशाकरः । प्रभाकरः । भास्करः निपातनात्सकारः । कारकरः । अन्तकरः । अनन्तकरः । आदिकरः । बहुकरः । नान्दीकरः । किंकरः । लिपिकरः । लिबिकरः । बलिकरः । भक्तिकरः । कर्तृकरः । चित्रकर. । क्षेत्रकरः । संख्याकरः । एककरः । जङ्घाकरः । बाहुकर । अहस्करः । यत्करः । तत्करः । धनुष्करः । अरुष्करः ।

'कर्मणि, सुपि' चानुवर्त्तेते । अहेत्वादि'''–हेत्वादिषु पूर्वेणैव सिद्धेरिति भावः । निपातनात्सकारः–तेन विसर्गजिह्वामूलीयौ न भवतः । लिपि-लिबी पर्यायौ । संख्याशब्दः–तद्वाचिनश्च गृह्यन्ते । अरुष् शब्दः शान्तार्थकः ।

❀(वा०) कियत्तद्बहुषु कृञोऽज्विधानम् । किंकरा । यत्करा। तत्करा । बहुकरा । 'ट' प्रत्यये सति ङीप् स्यात् । अचि कृते टाप् भवति ।

कर्मणि भृतौ ॥२२॥

कर्मवाचिनि कर्मशब्द उपपदे करोतेष्टः भृतौ गम्यमानायाम् । कर्मकरः भृतकः । अन्यत्र कर्मकारः ।

भृतिः—वेतनम्=कर्मणो निष्क्रयाय देयं द्रव्यमित्यर्थः । अत्र कर्मणः स्वरूपस्य ग्रहणं भवति तेन 'कर्मशब्द' इत्यर्थो लभ्यते ।

न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ॥२३॥

एषूपपदेषु करोतेष्टो न । हेत्वादिषु प्राप्तः प्रतिषिध्यते । श्लोककारः । कलहकारः ।

प्राप्तः—'कृञो हेतु......' इति सूत्रेण । शब्दकारः । गाथाकारः । वैरकारः । चाटुकारः । सूत्रकारः । मन्त्रकारः । पदकारः इत्युदाहरणान्तराणि । सर्वत्र कर्मण्यण् ।

स्तम्बशकृतोरिन् ॥२४॥

एतयोरुपपदयोः करोतेरिन् ।

❀(वा०) व्रीहिवत्सयोर्वाच्यम् । स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः ।

स्तम्ब करोतीति विग्रहवाक्यम् । व्रीहिवत्सग्रहणं कर्तृविशेषणम् ।

हरतेर्दृतिनाथयोः पशौ ॥२५॥

अनयोरुपपदयोर्हरतेरिन् पशौ कर्त्तरि । दृतिहरिः पशुः । नाथहरिः पशुः ।

दृतिं हरति, नाथं हरतीति विग्रहवाक्ये । दृतिः—कूपाज्जलाहरणाय चर्ममयं पात्रम् । नाथः—नासारज्जुः ।

फलेग्रहिरात्मम्भरिश्च ॥२६॥

एतौ निपात्येते । फलानि गृह्णाति फलेगृहिर्वृक्षः । आत्मानं बिभर्ति आत्मम्भरिः ।

फलेग्रहिः–'फल' शब्दस्यैकारान्तत्वं √ग्रहधातोरिन् प्रत्ययश्च । आत्मम्भरिः–'आत्मन्' शब्दस्य मुमागमः √भृञ् धातोरिन् । चकारात् कुक्षिम्भरिः । उदरम्भरिः ।

छन्दसि वनसनरक्षिमथाम् ॥२७॥

एतेभ्यः कर्मण्युपपदे छन्दसि इन् । ब्रह्म॒व॒निं त्वा । तस्मादेत गो॒ष॒णिम् । यौ प॑थि॒र॒क्षी॑ श्वानौ । ह॒वि॒र्म॒थी॑नाम् ।

एतेभ्यः–√सन √षण संभक्तौ (भ्वादौ न तु तनादौ) √रक्ष (पालने) √मथे (विलोडने) धातुभ्यः । गोषणिम्–गां सनति 'सुषामादिषु च' इत्यनेन सुषामादेराकृतिगणत्वात्षत्वम् । 'गोसनिम्' इत्यपि पाठः । पथिरक्षी–पन्थानं रक्षतः द्विवचनस्यौकारस्य पूर्वसवर्णदीर्घः । हविर्मथीनाम्–हविर्मथन्ति षष्ठी बहुवचनम् ।

एजेः खश् ॥२८॥

ण्यन्तादस्मात् कर्मण्युपपदे खश् । खकारो मुमर्थः, शः सार्वधातुकार्थः । जनमेजयः ।

*(वा०) वातशुनीतिलगर्धेष्वजधेट्तुदजहातिभ्य उपसंख्यानम् । वातमजाः मृगाः । शुनिन्धयः । तिलन्तुदः । गर्धञ्जहा मृगाः ।

जनमेजयः–जनान् एजयति इति जन √एजि (एजृ कम्पने + णिच्) इत्यस्मात् खश् । मुम्–मित्त्वात् धातोः पूर्वमागमः इकारस्य गुणोऽयादेशः । वातमजाः–वातम् अभि अजन्ति । वेगवन्तः इत्यर्थः । शुनिन्धयः–शुनीं धयन्ति । 'खित्यनव्ययस्य' इति शुनी इत्यस्येकारस्य ह्रस्वत्वम्, अनुस्वारपरसवर्णौ । तिलन्तुदः–तिलान् तुदति । गर्धञ्जहाः–गर्धम् उत्सुकतां जहति । अत्र 'गर्ध' इत्यस्य स्थाने भाष्ये, वृत्तौ कौमुद्याञ्च 'शर्ध' इति पाठः उदाहरणञ्च शर्धञ्जहाः माषाः इति ।

नासिकास्तनयोर्ध्माधेटोः ॥२९॥

यथासंख्यमत्र नेष्यते ।

*(वा०) स्तने धेटः । स्तनन्धयः ।

*(वा०) नासिकायां ध्मश्च धेटश्च । नासिकन्धमः । नासिकन्धयः । तन्नासिकास्तनयोरिति लक्षणव्यभिचारचिह्नादल्पाच्तरस्यापूर्वनिपाताल्लभ्यते ।

स्तने कर्मण्युपपदे √धेट् धातोः नासिकायां कर्मणि चोपपदे √ध्मा–√धेट् इत्युभाभ्यां खश् । नेष्यते–यथासंख्यस्वीकारे तु नासिकायां √ध्मा इत्यस्मादेव स्यान्नतु धेटः । अस्वीकारे हेतुः–अल्पाच्तरस्वात् द्वन्द्वे समासे स्तनशब्दस्य पूर्वनिपाते कर्त्तव्ये नासिकायाः पूर्वनिपातः ।

स्तनन्धयः–स्तनं धयति । अनुस्वारपरसवर्णौ । नासिकन्धमः–नासिकां धमति । 'ध्मा' इत्यस्य 'धम' आदेशः । 'खित्यनव्ययस्य' इति आकारस्य ह्रस्वत्वम् । नासिकन्धयः–नासिकां धयति । पूर्ववद्ह्रस्वत्वम् । उभयत्रानुस्वार-परसवर्णौ ।

नाडीमुष्टयोश्च ॥३०॥

अत्रापि घ्यन्तस्यापूर्वनिपातचिह्नात् संख्यातानुदेशो न भवति । नाडिन्धमः । नाडिन्धयः । मुष्टिन्धमः । मुष्टिन्धयः । अनुक्तसमुच्चयार्थश्चकारः । घटिन्धमः । घटिन्धयः इत्यादि ।

घ्यन्तस्य……न भवति–मुष्टिशब्दो 'घि'संज्ञकः । द्वन्द्वे तस्य पूर्वनिपाते कर्त्तव्ये 'नाडी'शब्दस्य पूर्वनिपातात् उभयोरुपपदयोरुभाभ्यां धातुभ्यां 'खश्' प्रत्ययो भवति । नाडिन्धमः–'खित्यनव्ययस्य' इति ह्रस्वत्वम्, अनुस्वार-परसवर्णौ सर्वत्र ज्ञेयौ । इत्यादि–आदिपदेन खरिन्धमः । खरिन्धयः । वातन्धमः । वातन्धयः इति बोध्यौ । केचित् 'खरी' इत्यस्य स्थाने 'खारी' इति पठन्ति तेन खारिन्धमः । खारिन्धयः इति प्रयोगौ भवतः ।

उदिकूले रुजिवहोः ॥३१॥

उत्पूर्वाभ्यामाभ्यां कूले कर्मण्युपपदे खश् । कूलम् उद्रुजति कूलमुद्रुजः । कूलमुद्वहः ।

आभ्याम्–√रुजो (भङ्गे), √वह (प्रापणे) इति धातुभ्याम् ।

वहाभ्रे लिहः ॥३२॥

वहं लेढि वहंलिहो गौः । अभ्रंलिहो वायुः ।

'वह, अभ्र' इत्येतयोः कर्मणोरुपपदयोः √लिह् (आस्वादने) धातोः खश् । वहंलिहः–√लिह् धातोरदादित्वात् शपो लुक् । 'सार्वधातुकमपित्' इति ङित्त्वाद् गुणाभावः । वहः–वृषस्कन्धः ।

परिमाणे पचः ॥३३॥

प्रस्थं पचति प्रस्थंपचा स्थाली ।

परिमाणं प्रस्थादि परिमिते व्रीहादावुपचाराद्वर्त्तते । तस्मिन् कर्मण्युपपदे √पच् धातोः खश् । एवं खारिम्पचः । द्रोणम्पचः कटाहः ।

मितनखे च ॥३४॥

अपरिमाणार्थ आरम्भः । मितम्पचा ब्राह्मणी । नखम्पचा यवागूः ।

मितम्पचा–मितं पचति । नखम्पचा–अत्र √पच् धातुस्तापार्थकः नखं पचति = तापयतीत्यर्थः ।

विध्वरुषोस्तुदः ॥३५॥

विधुन्तुदः । अरुन्तुदः ।

विधु, अरुस् इत्येतयोरुपपदयोः √तुद् धातोः खश् । विधुन्तुदः–विधुं तुदति = राहुः । अरूंषि = मर्माणि तुदति इति सकारात् पूर्वं मुमागमे सकारस्य संयोगान्तलोपः । अनुस्वार-परसवर्णौ । अरुन्तुदः–मर्मपीडकः ।

असूर्यललाटयोर्दृशितपोः ॥३६॥

असूर्यम्पश्या राजदाराः । ललाटन्तप आदित्यः । 'असूर्य' इति चासमर्थसमासोऽयम्, दृशिना नञः सम्बन्धात् ।

असूर्यम्पश्याः–सूर्यं न पश्यन्ति। √दृश् इत्यस्य 'पश्य' आदेशः। अत्र √दृश् धातुना सह 'नञ्' इत्यस्य सम्बन्धः एवञ्च 'असूर्य' इत्यत्र नञ्-समासः सूत्रवचनाद् विज्ञेयः। 'असूर्यम्पश्याः' इति कथनम् राजदाराणां गोपनपरम। एवं गुप्ताः भवन्ति राजदाराः यत्ते सूर्यमपि न पश्यन्ति एवं जातेऽपि सूर्यदर्शने कथनं न विरुध्यते।

ललाटन्तपः–ललाटं तपति–पीडयति। अनुस्वारपरसवर्णौ।

उग्रम्पश्येरम्मदपाणिन्धमाश्च ॥३७॥

उग्रंपश्यः। इरम्मदः। पाणिन्धमाः पन्थानः।

उग्रं पश्यति, √दृश् धातोः 'पश्य' आदेशः। इरया–जलेन माद्यति–वर्धते इरायाः ह्रस्वत्वम् 'श्यन्' इत्यस्याभावश्च। इरम्मदः=वडवानलः, वज्राग्निर्वा। पाणिन्धमाः–पाणयो ध्मायन्ते एषु। येषु मार्गेषु गच्छद्भिः पुरुषैः सर्पाद्यपसारणाय पाणयो ध्मायन्ते=शब्दयन्ते। अधिकरणे खश् 'ध्मा' इत्यस्य 'धम' आदेशः।

प्रियवशे वदः खच् ॥३८॥

प्रियंवदः। वशंवदः। चकारः 'खचि ह्रस्वः' इति विशेषणार्थः। प्रत्ययान्तरकरणमुत्तरार्थः।

*(वा०) खच्प्रकरणे गमेरुपसंख्यानम्। मितंगमो हस्ती।

*(वा०) विहायसो विह च। विहंगमः।

*(वा०) खच्च डिद्वा वाच्यः। विहंगः/विहङ्गमः।

*(वा०) डे च विहायसो विह आदेशः। विहगः।

प्रिय–वद इत्येतयोरुपपदयोः √वद् धातोः खच्।

मितंगमः–अनुस्वारपरसवर्णयोः सतोः मितङ्गमः। एवं विहङ्गमः/विहङ्गः।

विहंगः–डित्वात् टिलोपः।

विहगः–अत्र 'ड' प्रत्ययः। अत्र 'मुम् न भवतीति विशेषः।

द्विषत्परयोस्तापेः ॥३९॥

द्विषन्तपः । परन्तपः ।

द्विषत्–पर इत्युपपदयोः √तापि (णिच्प्रत्ययान्तः √तप्) धातोः खच् । द्विषन्तपः–द्विषन्तं तापयति । ह्रस्वणिलोपौ, संयोगान्तस्य तकारस्य लोपः, अनुस्वारपरसवर्णौ । द्विषतीं तापयति इत्यत्र तु खच् न भवति 'द्विषत्' इति तकारान्तस्य निर्देशात् । तत्र 'अण्' द्विषतीतापः ।

वाचि यमो व्रते ॥४०॥

खच् । वाचंयमः । 'व्रते' इति शास्त्रविहितो नियमः = सङ्कल्पविशेषः । अन्यत्र वाग्यामः ।

'वाच्' शब्दे उपपदे √यम धातोः खच् । वाचंयमः–'वाचंयमपुरन्दरौ च' इति सूत्रेण 'वाच्' इत्यस्य 'वाचम्' इति निपात्यते, मुम् चात्र न भवति । वाचं यच्छति इति विग्रहवाक्यम् । यत्र व्रताभावस्तत्र अण्–वाग्यामः ।

पूःसर्वयोर्दारिसहोः ॥४१॥

पुरन्दरः । सर्वंसहः ।

*(वा०) भगे च दारेरिति वक्तव्यम् । भगन्दरः ।

पुर–सह इत्यतयोरुपपदयोः यथासंख्यं √दारि–√सह धातुभ्यां खच् । पुरन्दरः–पुरम् दारयति इन्द्रः शिवो वा । सर्वंसहो राजा । भगन्दरो गुदरोगः ।

सर्वकूलाभ्रकरीषेषु कषः ॥४२॥

सर्वंकषः खलः इत्यादि ।

सर्वंकषः–अनुस्वारपरसवर्णयोः सर्वङ्कषः । एवम् कूलङ्कषा नदी । अभ्रङ्कषः पर्वतः । करीषङ्कषा वात्या । √कष् हिंसार्थकः ।

मेघर्तिभयेषु कृञः ॥४३॥

मेघङ्करः । ऋतिङ्करः । भयङ्करः । ऋतिः कल्याणपर्यायः ।

*(वा०) उपपदविधौ भयादिग्रहणं तदन्तविधिं प्रयोजयति । अभयंकरः ।

क्षेमप्रियमद्रेऽण् च ॥४४॥

चकारात्खच् । क्षेमकारः/क्षेमङ्करः ।

एवम् प्रियकारः/प्रियङ्करः । मद्रकारः/मद्रङ्करः । मद्रशब्दो हर्षपर्यायः ।

आशिते भुवः करणभावयोः ॥४५॥

आशिते उपपदे भवतेर्धातोः करणे भावे चार्थे खच् ।

करणे—आशितो भवत्यनेनेति आशितम्भव ओदनः ।—

भावे—आशितस्य भवनमिति आशितम्भवम् ।

अत्र 'सुपि' इत्यनुवर्त्तते । आशित शब्दः आङ् √अश् (भोजने) इत्यस्मात् कर्मणि 'क्त' प्रत्ययान्तोऽत्र गृह्यते । आशितः कर्त्ता । आशितम्भवः–यावतौदनेनातिथिराशितो भवति । आशितम्भवम्–आशितस्य कर्तुः क्रिया ।

संज्ञायां भृतॄवृजिधारिसहितपिदमः ॥४६॥

'कर्मणि, सुपि' इति च वर्त्तेते । प्रकृतं संज्ञावशात् यथा–सम्भवं सम्बध्यते । विश्वम्भरः । संज्ञायां किम् ? कुटुम्बभारः ।

प्रकृतम्–क्वचित् 'कर्मणि' इति क्वचित् 'सुपि' इति सम्बध्यते । तस्मिन्नुपपदे √भृ–√तॄ–√वृ–√जि–√धारि–√सहि–√तपि–√दमि धातुभ्यः 'खच्' संज्ञायां विषये ।

विश्वम्भरः–विश्वं बिभर्ति 'मुम्' आगमः । तस्यानुस्वार-परसवर्णौ विश्वम्भरो विष्णुः । विश्वम्भरा पृथिवी । रथे तरति रथन्तरं साम । पतिं वृणीते पतिंवरा कन्या । शत्रुं जयति शत्रुञ्जयो हस्ती । युगं धारयति–युगन्धरः पर्वतः । शत्रुं सहते सत्रुंसहः । शत्रुं तपति शत्रुन्तपः । अरिं दमयति–अरिन्दमः । कुटुम्बभारः–नैषा संज्ञा सर्वोऽपि जनः कुटुम्बं बिभर्ति ।

गमश्च ॥४७॥

गमेः सुप्युपपदे संज्ञायां खच् प्रत्ययः । सुतङ्गमो नाम यस्य सौतङ्गमिः पुत्रः ।

सौतङ्गमिः–सुतङ्गम–इञ् (अपत्यार्थे) कस्यचित् पुरुषस्य नाम सौतङ्गमिरिति तेनेदमनुमानं भवति यदस्य पितुर्नाम सुतङ्गमः स्यात्। सुतङ्गम इति पितुः संज्ञायां सौतङ्गमिरिति भवितुमर्हति । सुतं गच्छति इति विग्रहः । मुम्, अनुस्वार-परसवर्णौ ।

अन्तात्यन्ताध्वदूरपारसर्वान्तेषु डः ॥४८॥

अन्त—अत्यन्त-अध्वन्-दूर-पार-सर्व-अनन्त । अन्तं गच्छति अन्तगः ।

❀(वा०) सर्वत्रपन्नयोर्वक्तव्यम् । सर्वत्रगः । पन्नगः ।

❀(वा०) उरसो लोपश्च । उरगः ।

❀(वा०) सुदुरोरधिकरणे । सुखेन गच्छत्यस्मिन्निति सुगः । दुर्गः ।

❀(वा०) निरो देशे । निर्गो देशः ।

❀(वा०) डप्रकरणे अन्येष्वपि दृश्यते। नगरगः ।

अन्तगः–अन्त √गम्+ड । डित्वात् टिलोपः । एवं अत्यन्तगः । अध्वगः । दूरगः । पारगः । सर्वगः । अनन्तगः । पन्नगः–पन्नं पतितं यथा गच्छति । सर्पः इत्यर्थः । उरगः–उरसा गच्छति । अन्त्यस्य सकारस्य लोपः । निर्गः–निर्गम्यतेऽस्मिन् देशे । नगरगः–नगरं गच्छति । एवं स्त्र्यगारगः । गुरुतल्पगः ।

आशिषि हनः ॥४९॥

आशिषि गम्यायां हन्तेर्डः । तिमिं वध्यात् तिमिहः । शत्रुहः ।

❀(वा०) दारावाहनोऽणन्तस्य च टः संज्ञायाम् ।

दारावुपपदे आङ्पूर्वाद्धन्तेर्धातोरण् प्रत्ययो भवति । अन्त्यस्य च टकारादेशो भवति । दारु आ हन्ति दार्वाघाटः ।

❀(वा०) चारौ वा । चार्वाघाटः/चार्वाघातः ।

❀(वा०) कर्मणि समि च । कर्मणि सम् पूर्वाद्धन्तेरण् अन्त्यस्य च वा 'टः' । वर्णं संहन्ति वर्णसङ्घाटः/वर्णसङ्घातः ।

आशिषि–आशीर्लिङर्थे । दार्वाघाटः–दारु आ √हन्+अण् इति स्थितौ 'हो हन्तेर्ञ्णिन्नेषु' इति सूत्रेण √हन् धातोर्हस्य 'घः' 'हनस्तोऽचिण्णमुलोः' इत्यनेन नकारस्य तकारः 'दारु आ' अत्र यण् सन्धिः। हन्तेर्हकारस्याकारस्य वृद्धिराकारः, दार्वाघातः । तदनन्तरमनेन वार्तिकेन तकारस्य टकारः ।

अपे क्लेशतमसोः ॥५०॥

क्लेशाऽपहः । तमोऽपहः ।

क्लेशतमसोः कर्मणोरुपपदयोः अपपूर्वाद् हन्तेर्डः । क्लेशापहः–क्लेशम् अपहन्ति पुत्रः । तमः अपहन्ति सूर्यः ।

कुमारशीर्षयोर्णिनिः ॥५१॥

अनयोरुपपदयोर्हन्तेर्णिनिः । कुमारघाती । शीर्षघाती । निपातनात् शिरसः शीर्षभावः ।

अत्रापि दार्वाघात इव हन्तेर्हस्य घः, नकारस्य तकारः ।

लक्षणे जायापत्योष्टक् ॥५२॥

एतयोरुपपदयोर्हन्तेष्टक् लक्षणवति कर्त्तरि । जायाघ्नो द्विजः । पतिघ्नी स्त्री ।

जायाघ्नः–कित्त्वात् 'गमहन.........' इति सूत्रेणोपधालोपः, पूर्ववत् हकारस्य घकारः । पतिघ्नी–टित्वात् ङीप् ।

अमनुष्यकर्तृके च ॥५३॥

अमनुष्यकर्तृकेऽर्थे वर्त्तमानाद्धन्तेः कर्मण्युपपदे टक् । पतिघ्नी पाणिलेखा । श्लेष्मघ्नं मधु ।

अमनुष्यकर्तृके- न मनुष्यः कर्त्ता यस्य स तस्मिन् । चौरघातो हस्तीत्यत्र तु 'कृत्यल्युटो बहुलम्' इति बाहुलकादण् ।

शक्तौ हस्तिकपाटयोः ॥५४॥

शक्तौ गम्यायां हस्तिकपाटयोः कर्मणोर्हन्तेष्टक् । मनुष्यकार्थ

आरम्भः । हस्तिघ्नो मनुष्यः । कपाटघ्नश्चौरः । शक्तौ किम् ? विषेण हस्तिनं हन्ति हस्तिघातः ।

हस्तिघ्नः–हस्तिनं हन्तुं शक्त इत्यर्थः । हस्तिघातः–स्वयं हस्तिनं हन्तुं न समर्थः सन् विषेण हन्तीति भावः ।

पाणिघताडघौ शिल्पिनि ॥५५॥

निपात्यौ । पाणिघः । ताडघः शिल्पी ।

*(वा०) राजघ उपसंख्यानम् । राजानं हन्ति राजघः ।

निपात्यौ–पाणि-ताडयोरुपपदयोः √हन् धातोष्टः, हकारस्य घत्वं टिलोपश्च । पाणिघः–पाणी हन्ति करतलवादक इत्यर्थः । पाणिवादास्तु पाणिघाः इत्यमरः । एवंताडघोऽपि ।

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥५६॥

एषूपपदेषु अच्व्यन्तेषु करोतेः करणे कारके ख्युन् । अनाढ्यमाढ्यं कुर्वन्त्यनेन इति आढ्यङ्करणम् इत्यादि ।

एषु–आढ्य-सुभग-स्थूल-पलित-नग्न-अन्ध-प्रियेषु । एते शब्दाः स्वरूपप्रधानाः । 'च्वि' प्रत्ययश्च शब्दादेव भवति नार्थात् तेनार्थतः अभूततद्भावरूपश्च्विपदार्थो लब्धः । अच्वौ– नास्ति 'च्वि'प्रत्ययो यस्मात्तस्मिन् अच्व्यन्तेष्वित्यर्थः । सूत्रे प्रत्येकं सम्बन्धादेकवचनम् । इत्यादि—सुभगङ्करणम् । स्थूलङ्करणम् । पलितङ्करणम् । नग्नङ्करणम् । अन्धङ्करणम् । प्रियङ्करणम् । 'ख्युन्' इत्यत्र खकारनकाराविती, युकारस्य 'अन' आदेशः । खित्वान्मुमागमः, तस्यानुस्वारपरसवर्णौ । नकारस्य णकारादेशः ।

कर्त्तरि भुवः खिष्णुच्खुकञौ ॥५७॥

आढ्यादिषूपपदेषु √भू धातोः कर्त्तरि कारके खिष्णुच्-खुकञ् एतौ स्तः । आढ्यम्भविष्णुः। आढ्यम्भावुकः ।

आढ्यादिषु–च्व्यर्थेष्वच्व्यन्तेष्विति ज्ञेयम् । अनाढ्य आढ्यो भवति । खित्वान्मुम् । आढ्यम्भविष्णुः–गुणावादेशौ । आढ्यम्भावुकः–ञित्त्वाद् वृद्धिः । उभयत्रानुस्वारपरसवर्णौ । एवं सुभगम्भविष्णुः । सुभगम्भावुकः ।

स्थूलम्भविष्णुः । स्थूलम्भावुकः । पलितम्भविष्णुः / पलितम्भावुकः । नग्नम्भविष्णुः । नग्नम्भावुकः । अन्धम्भविष्णुः । अन्धम्भावुकः । प्रियम्भविष्णुः । प्रियम्भावुकः ।

स्पृशोऽनुदके क्विन् ॥५८॥

स्पृशेरनुदके सुपि क्विन् । घृतस्पृक् ।

अनुदके सुपि–उदकभिन्ने सुबन्ते । घृतं स्पृशति– घृतस्पृक् । 'क्विन्प्रत्ययस्य कुः' इत्यनेन √स्पृश् इत्यस्य शकारस्य ककारः । अस्मिन् सूत्रे पूर्वसूत्रात् 'कर्तरि' अनुवर्त्तते तत्पदं कर्तृप्रचयार्थम् = सुबन्तमात्रार्थकं भवति । एकः कर्त्ता कर्मण्युपपदे, अपरः करणादावुपपदे । एवम् सम्बन्धभेदेनात्रापि भवति-मन्त्रेण स्पृशति मन्त्रस्पृक् । जलेन स्पृशति जलस्पृक् । उदके कर्मण्युपपदे तु उदकस्पर्शः ।

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ॥५९॥

ऋत्विगादयः पञ्च शब्दाः क्विन्प्रत्ययान्ताः निपात्यन्ते । अपरे त्रयो धातवो निर्दिश्यन्ते । ऋतावुपपदे यजेः क्विन् ऋतौ, ऋतुप्रयुक्तो वा यजति ऋत्विक् । धृषः क्विन्,द्विर्वचनमन्तोदात्तत्वं च निपात्यते । धृष्णोति इति दधृक् । सृजेः कर्मणि क्विन् अमागमश्च निपात्यते । सृज्यते स्रक् । दिशेः कर्मणि क्विन् निपात्यते । दिश्यते दिक् । उत्पूर्वात् स्निहेः क्विन्, उपसर्गान्तलोपः, षत्वं च निपात्यते उष्णिक् ।

अञ्च्वादित्रिकस्य क्विन् प्रत्ययो भवति । निपातनैः सह निर्देशादत्रापि किञ्चिदलाक्षणिकमस्ति । अञ्चतेः सुबन्तमात्र उपपदे क्विन्–प्राङ् । प्रत्यङ् । उदङ् । युजेः, क्रुञ्चेश्च केवलादेव–युङ् । क्रुङ् । 'न' लोपः कस्मान्न भवति ? निपातनैः सह निर्देशात् ।

ऋत्विक्–√यज् इत्यस्य यकारस्य सम्प्रसारणमिकारः । दधृक्–धृष्णोति–धृष्टतामाचरति (√ञिधृषा प्रागल्भ्ये) उष्णिक्–उत्स्निह्यति–उत् √स्निह् + क्विन् । अलाक्षणिकम्–अञ्चतेः सुबन्तमात्र उपपदे । युजक्रुञ्चोश्च केवलयोरिति भेदः । 'ऋत्विक्' आदीनां व्युत्पत्तिर्यथाकथञ्चिदेव कर्त्तव्या । वस्तुतो रूढिशब्दा एवेमे बोध्याः ।

त्यदादिषु दृशोऽनालोचने कञ्च ॥६०॥

एषूपपदेष्वनालोचने वर्त्तमानाद् दृशेः कञ् चात् क्विन् । तादृक् । तादृशः । आलोचने तु तम् पश्यति तद्दर्शः ।

*(वा०) समानान्ययोश्च वक्तव्यम् ।

सदृक् । सदृशः । अन्यादृक् । अन्यादृशः ।

*(वा०) दृशेः क्सश्च वक्तव्यः ।

तादृक्षः । सदृक्षः । अन्यादृक्षः ।

अनालोचने—आलोचनम् = ज्ञानमात्रमत्र गृह्यते तद्भिन्नमनालोचनं तस्मिन् । तादृक् । तादृशः । तादृक्षः—तमिवेमं पश्यन्ति जनाः इति, सोऽयं स इव दृश्यमानः इति, तमिवात्मानं पश्यति इति वा विग्रहवाक्यम् । एवं कर्मकर्ताऽयम् । यद्यप्यत्र √दृश् धातोर्दर्शनमर्थः तथापि तादृगादयः शब्दाः रूढिशब्दप्रकाराः । अत्र सदृशवस्तुविषये प्रत्ययो भवति । सदृक्—समानस्य 'स' इत्यादेशः ।

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् ॥६१॥

सदादिभ्यो धातुभ्यः सुबन्त उपपदे उपसर्गेऽप्यनुपसर्गेऽपि क्विप् प्रत्ययः । √सद (√षद्लृ)—शुचिषत् । अन्तरिक्षसत् । उपसत् । √सू—सूः । अण्डसूः । शतसूः । √द्विष्—मित्रद्विट् । √द्रुह—मित्रध्रुक् । √दुह—गोधुक् । √युज—अश्वयुक् । √विद--वेदवित् । √भिद—काष्ठभित् । प्रभित् √छिद--रज्जुच्छित् । √जि--शत्रुजित् । √नी--सेनानीः । प्रणीः । √राज--राट् । सम्राट् ।

क्विप् प्रत्ययस्य सर्वलोपो भवति । शुचिषत्—पक्षे शुचिषद् इत्यादयः । मित्रद्विट्—पक्षे मित्रद्विड् एवम् मित्रध्रुक्—पक्षे मित्रध्रुग् इत्यपि ज्ञेयम् । सोपसर्गस्योदाहरणानि—प्रसूः । प्रद्विट् । प्रध्रुक् । प्रधुक् । प्रयुक् । प्रवित् । प्रच्छित् । प्रजित् प्रभृतीनि बोध्यानि । पक्षे जश्त्वेन प्रद्विड्, प्रध्रुग् इत्यादीन्यपि भवन्ति ।

भजो ण्वि ॥६२॥

भजतेः सुबन्त उपपदे 'ण्वि' प्रत्ययः । अर्धं भजते अर्धभाक् । उपसर्गेऽपि प्रभाक् ।

ण्विः—अस्यापि सर्वलोपः । फलन्तु 'अत उपधायाः' इति √भज इत्यस्य उपधाऽकारस्य वृद्धिः अर्धभाक्—पक्षे अर्धभाग् ।

छन्दसि सहः ॥६३॥

ण्विः । तु॒रा॒षाट् ।

तुराषाट्—तुरं त्वरितं सहते । उपधाया दीर्घः 'तुर' शब्दस्य 'अन्येषामपि दृश्यते' इत्यनेन दीर्घः । पक्षे तुराषाड् = इन्द्रः ।

वहश्च ॥६४॥

छन्दसि ण्विः । प्रष्ठवाट् ।

प्रष्ठं वहति । उपधाया दीर्घः । पक्षे प्रष्ठवाड् वृषभः ।

कव्यपुरीषपुरीष्येषु ञ्युट् ॥६५॥

एषूपपदेषु वहेश्छन्दसि ञ्युट् । क॒व्य॒वाह॑नः पि॒तॄणाम् । अ॒ग्नेः पु॑रीष॒वाह॑नः । पु॒रीष्य॒वा॑ह॒नः ।

कव्यवाहनः—ञित्त्वात् √वह धातोरुपधावृद्धिः, ञटावितौ, योरनादेशः ।

हव्येऽनन्तःपादम् ॥६६॥

हव्ये उपपदे छन्दसि विषये वहेर्ञ्युट् अनन्तःपादं चेद् वहिर्वर्त्तते । अ॒ग्निश्च॑ ह॒व्य॒वाह॑न॒ः । अनन्तःपादमिति किम् ? ह॒व्य॒वाड॒ग्निर॒जर॑ः पि॒ता न॑ः ।

अनन्तःपादम्—अन्तःशब्दो मध्यार्थकः । पादस्यान्तः = मध्ये इत्यन्तःपादम् विभक्त्यर्थेऽव्ययीभावः । न अन्तःपादम् इत्यनन्तःपादम् । ऋक्पादमध्ये √वह धातुर्न वर्त्तते चेदित्यर्थः । हव्यवाहनः—अत्र पादान्ते वाहनः ञित्त्वादुपधा वृद्धिः । हव्यवाट्—अत्र पादमध्ये √वह धातुः तेनात्र 'ण्वि' प्रत्ययः ।

जनसनखनक्रमगमो विट् ॥६७॥

'छन्दसि, उपसर्गे, सुपि इति च वर्त्तते । एभ्यः छन्दसि विषये

विट् प्रत्ययो भवति । √जन्—अब्जाः । √सन–गोषा इन्द्रो नृषा असि । √खन—बिलखाः । √क्रम--दधिक्राः । √गम--अग्रेगाः ।

'विट्' प्रत्ययस्य सर्वलोपः । अब्जाः–अप्सु जायते । 'विड्वनोरनुनासिकस्यात्' इति सूत्रेण √जन् धातोर्नकारस्य 'आ' आदेशः दीर्घश्च । गोषाः–गां सनोति । 'सनोतेरनः' इति षत्वम् । एवं नरं सनोति । बिलखाः–बिलं खनति । दधिक्राः–दधि क्रामति । अग्रेगाः–अग्रे गच्छति । 'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् ।

अदोऽनन्ने ॥६८॥

अदेर्धातोरनन्ने सुप्युपपदे विट् । आममत्ति आमात् ।

आमम् = अपक्वम् । अन्ने उपपदेऽण्–अन्नादः ।

क्रव्ये च ॥६९॥

क्रव्यमत्ति क्रव्यात् । पूर्वेणैव सिद्धे वचनमसरूपबाधनार्थम् । तेनाण् न । कथं तर्हि क्रव्यादः ? कृत्तविकृत्तशब्दे उपपदे अण्, तस्य पृषोदरादित्वात्क्रव्यभावः । कृत्तविकृत्तपक्वमांसभक्षः क्रव्यादः । आममांसभक्षः क्रव्यादिति ।

क्रव्याद–क्रव्यात् शब्दयोभेदमाह–कृत्त........क्रव्यादिति ।

दुहः कब्घश्च ॥७०॥

दुहेः सुपि कप् घश्चान्तादेशः । कामदुघा । धर्मदुघा ।

कामं दोग्धि, धर्मं दोग्धि इति च विग्रहः । कामदुघ + टाप् ।

मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ॥७१॥

श्वेतवह, उक्थशस्, पुरोडाश इत्येभ्यो ण्विन् मन्त्रे । धातूपपदसमुदाया निपात्यन्ते । श्वेता एनं वहन्ति श्वेतवा इन्द्रः । उक्थानि, उक्थैर्वा शंसति उक्थशा यजमानः । √दाशृ (दाने) पुरो दाशन्त एनम् इति पुरोडाः ।

श्वेतवाः, उक्थशाः, पुरोडाः इत्येते शब्दाः निपात्यन्ते ।

अवे यजः ॥७२॥

मन्त्रे । त्वं यज्ञे वरुणस्यावया असि ।

मन्त्रे–'अव' उपपदे यजेः ण्विन् । 'ण्विन्' प्रत्ययस्य सर्वलोपः, यजेरुपधायाः वृद्धिः, जकारस्य च रुत्वं निपात्यते ।

विजुपे छन्दसि ॥७३॥

उप उपपदे यजेश्छन्दसि विच् । उपयड्भी रुद्रं यजन्ति ।

विचः सर्वलोपः । उप √यज् इत्यत्र 'व्रश्च……यज……' इत्यादिना सूत्रेण जकारस्य षकारस्तस्य जश्त्वेन डकारः । पक्षे टकारोऽपि उपयट् । 'उपयड्भीरूर्ध्वं वहन्ति' इति उदाहरणपाठान्तरमपि बोध्यम् ।

आतो मनिन्क्वनिब्वनिपश्च ॥७४॥

आदन्तादेते स्युः चाद्विच् । सुदामा । सुधीवा । भूरिदावा । विच्-कीलालपाः ।

छन्दस्येव । सुदामा–सु–शोभनं ददाति √दा+मनिन् । एवम् अश्व इव तिष्ठति अश्वत्थामा । सुधीवा–सु–शोभनं दधाति √धा+क्वनिप् । कित्त्वात् 'घुमास्था………' इत्यनेन ईत्वम् । एवं सुपीवा । भूरिदावा–भूरि ददाति √दा+वनिप् । एवं घृतपावा । कीलालपाः–कीलालं पिबति √पा+विच् ।

अन्येभ्योऽपि दृश्यन्ते ॥७५॥

'छन्दसि' इति निवृत्तम् । अन्येभ्योऽप्यनाकारान्तेभ्य एते भवन्ति, विच्च । सुशर्मा । प्रातरित्वा, प्रातरित्वानौ । विजावाग्ने रेडसि । अपिः सर्वविधिव्यभिचारार्थः । निरुपपदादपि--धीवा । पीवा । दृशिग्रहणं प्रयोगानुसारार्थम् ।

एते–मनिन्,क्वनिप्, वनिप् इति त्रयः प्रत्ययाः । क्रमशः उदाहरणम्–सुशर्मा–√शॄ+मनिन् । प्रातरित्वा–प्रातः √इण्+क्वनिप्, 'ह्रस्वस्य पिति

कृति तुक्' इति तुक् । विजावा–वि √जन्+वनिप् 'विड्वनोरनुनासिकस्य' इत्यात्वम् । रेडसि–√रिष्+विच् षकारस्य जश्त्वम् डकारः–रेड् पक्षे चर्त्वम् टकारः रेट्/रेड् इत्युदाहरणे, 'असि' क्रियापदम् । सर्व ...... अर्थः– विधि=उपाधिः अर्थात् सर्वेऽपि विधयः नियमोल्लङ्घनं कुर्वन्ति तेन भाषायामपि अनाकारान्तेभ्योऽपि उपपदरहितेभ्योऽपि धातुभ्यः प्रत्ययाः भवन्ति । धीवा–√ध्यै+क्वनिप् । पीवा–√प्यै+क्वनिप् । उभयत्र सम्प्रसारणम्, आत्वम्, ईत्वं च भवति ।

क्विप् च ॥७६॥

सर्वधातुभ्यः सोपपदेभ्यो निरुपपदेभ्यश्छन्दसि भाषायां च क्विप् । उखास्रत् । पर्णध्वत् ।

उखायाः स्रंसते, पर्णात् ध्वंसते इति विग्रहवाक्ये । √स्रंस, √ध्वंसु अवस्रंसने इति धातू । 'अनिदिताम्.........' इत्यनुनासिकलोपः 'वसुस्रंसु ध्वंसु.........' इति सस्य दकारः पक्षे तकारश्च । एवं वाहाद् भ्रश्यति इति वाहाभ्रट् 'अन्येषामपि दृश्यते' इति दीर्घः ।

स्थः क च ॥७७॥

क्विप् च । 'सुपि स्थः' इत्येव सिद्धे 'अन्येभ्योऽपि दृश्यते, इति क्विप् । बाधकबाधनार्थं पुनर्वचनम् । 'शमिधातोरित्यचं बाधते । शंस्थः/शंस्थाः ।

सिद्धे–'क' प्रत्यये इति शेषः । बाधकबाधनार्थम्–'अच्' प्रत्ययः क-क्विनोरुभयोर्बाधकः । शंस्थः–शम् √स्था+क । 'आतोलोप.........' इत्याकारलोपः । शंस्थाः–शम् √स्था+क्वनिप् । उभयत्र मकारस्यानुस्वारः ।

सुप्यजातौ णिनिस्ताच्छील्ये ॥७८॥

अजातिवाचिनि सुपि ताच्छील्ये धातोर्णिनिः । उष्णभोजी । अजातौ किं ? ब्राह्मणानामन्त्रयिता । अनुवृत्तौ सत्यां पुनः सुब्ग्रहणम् उपसर्गनिवृत्त्यर्थम् ।

ताच्छील्यम्–निरन्तरं कर्म फलानपेक्षाप्रवृत्तिश्च । तस्मिन् गम्यमाने । उष्णभोजी–उष्णं भुङ्क्ते तच्छीलः उष्ण √भुज्+णिनिः, उपधागुणः । ब्राह्मणान् आमन्त्रयिता–अत्र 'ब्राह्मण'शब्दो जातिवाचकः । तेन न णिनिः

अपि तु 'तृन्' प्रत्ययः 'न लोका.........' इति षष्ठी-प्रतिषेधः ।

❀ (वा०) साधुकारिणि च । साधुकारी । साधुदायी ।

❀ (वा०) ब्रह्मणि वदः । ब्रह्मवादी । उभयमिदम् अताच्छील्यार्थम् ।

कर्त्तर्युपमाने ॥७९॥

उपमाने कर्त्तर्युपपदे धातोर्णिनिः । उष्ट्रक्रोशी । अताच्छील्यार्थ आरम्भः ।

उष्ट्रक्रोशी—उष्ट्रः इव क्रोशति । √क्रुश आह्वाने रोदने च । एवं ध्वांक्ष इव रौति इति ध्वांक्षरावी । उपमान इति किम् ? उष्ट्रः क्रोशति । यत्रोपमानम् उष्ट्रशब्दस्तत्र तद्वाचकस्य 'इव' शब्दस्य गतार्थत्वाद् वृत्तौ न प्रयोगः । तदाह—

इवशब्दो गतार्थत्वाद् वृत्तौ नैव प्रयुज्यते ।
समास उपमानानां शस्त्रीश्यामादिके यथा ॥

व्रते ॥८०॥

व्रते गम्ये सुप्युपपदे णिनिः । स्थण्डिलशायी ।

स्थण्डिले शेते इति स्थण्डिल √शीङ्+णिनि । समुदायेन व्रतं गम्यते । सति शयने स्थण्डिले एव शेते नान्यत्रेतिभावः ।

बहुलमाभीक्ष्ण्ये ॥८१॥

पुनः पुनः कषायं पिबन्ति कषायपायिणो गान्धाराः । बहुल-ग्रहणात् कुल्माषखादः इत्यत्र न ।

आभीक्ष्ण्यम्—पौनःपुन्यम् । कषायपायिणः—कषायः = कटु-आम्लरसः । 'आतो युक्.........' इति युक् । आरोग्यकारणात् पानान्तराभावाद् वा ते कषायपायिणः । एवं क्षीरपायिणः उशीनराः । सौवीरपायिणो बाह्लीकाः । कुल्माषखादः—अत्र कर्मण्यण् ।

मनः ॥८२॥

'सुपि' इति वर्त्तते । मन्यतेर्ग्रहणम् । शोभनमानी ।

शोभनं मन्यते इति विग्रहः। 'णिनि' कृते उपधावृद्धिः।

आत्ममाने खश्च ॥८३॥

दर्शनीयम् आत्मानं मन्यते इति दर्शनीयम्मन्यः। चात् णिनिः बुधमानी।

मननं मानः, आत्मनो मानः कर्मणि षष्ठ्या समासः। अर्थात् यदा 'णिनि' प्रत्ययार्थः कर्त्ता आत्मानमेव दर्शनीयत्वादिना धर्मेण विशिष्टं मन्यते तदेदं प्रवर्त्तते। दर्शनीयम्मन्यः–'अरुर्द्विषदजन्तस्य मुम्' इति मुम्। बुधमानी–आत्मानं बुधं मन्यते। पक्षे बुधम्मन्यः। एवं पण्डितमानी/पण्डितम्मन्यः।

भूते ॥८४॥

अधिकारोऽयं 'वर्त्तमाने लट्' इति यावत्। यद्वाच्यं तद् भूते ज्ञेयम्। वक्ष्यति 'करणे यजः' अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी।

धातोरधिकारात् धात्वर्थे भूते इति ज्ञेयम्।

करणे यजः ॥८५॥

णिनिरनुवर्त्तते न खश्। पूर्वमुदाहृतम्।

करणे उपपदे यजतेः णिनिः प्रत्ययो भवति भूते। अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी। अग्निष्टोमयागः स्वर्गरूपे फले करणं भवति। सोमेनेष्टवान् सोमयाजी इत्युदाहरणं ज्ञेयम्।

कर्मणि हनः ॥८६॥

पितृव्यघाती।

कर्मणि उपपदे हन् धातोर्णिनि प्रत्ययो भवति भूतकाले। पितृव्यं हतवान् इति विग्रहः। पितृव्य √हन् + णिनि। 'हनस्तोऽचिण्णलोः' इति नकारस्य तकारः, 'हो हन्तेर्ञ्णिन्नेषु' इति हकारस्य घकारो भवति।

❀ (वा०) कुत्सितग्रहणं कर्त्तव्यम्। अत्र न भवति चौरं हतवान्। पितृव्यवधादिकं कुत्सितं कर्म।

ब्रह्मभ्रूणवृत्रेषु क्विप् ॥८७॥

ब्रह्महा इत्यादि । 'क्विप् च' इति सिद्धे नियमार्थमिदम् । चतुर्विधश्च नियमः (१) ब्रह्मादिष्वेव हन्तेर्नान्यस्मिन्नुपपदे। पुरुषं हतवान् । (२) ब्रह्मादिषु हन्तेरेव, ब्रह्माधीतवान् । (३) भूते एव, ब्रह्माणं हन्ति । (४) क्विबेव नान्यः प्रत्ययः ।

एते चत्वारो नियमाः 'बहुलं छन्दसि' इत्यतः 'बहुलम्' पदम् अपकृष्य तद् बलात् लभ्यन्ते । चत्वारो नियमाः क्रमशः धातुनियमः, उपपदनियमः, प्रत्ययनियमः, कालनियमश्च । एषु उपपदनियमः प्रायिकः तेन मधुहा इति सिद्धयति ।

ब्रह्महा–भ्रूणहा, वृत्रहा इत्युदाहरणद्वयमपि । ब्रह्माणं, भ्रूणं, वृत्रं वा हतवान् इति विग्रहः ।

बहुलं छन्दसि ॥८८॥

मातृहा । पितृहा । न च मित्रघातः ।

छन्दसि बहुलं क्विप् । मित्रघातः–अत्र अण् भवति । मातरं हतवान् इत्यादि विग्रहवाक्यम् ।

सुकर्मपापमन्त्रपुण्येषु कृञः ॥८९॥

एषु कर्मसु भूते क्विप् । सुकृत् इत्यादि । नियमार्थ आरम्भः । त्रिविधोऽत्र नियमः धातुनियमं विना कालोपपदप्रत्ययविषयः ।

सुकृत्–सु (शोभनम्) कृतवान् । एवं कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्यकृत् इत्युदाहरणानि । धातुनियमो नास्ति तेन शास्त्रकृत् । भाष्यकृत् इत्यादि प्रयोगाः भवन्ति । अत्र 'क्विप् च' इति सूत्रेण क्विप् ।

सोमे सुञः ॥९०॥

सोमसुत् । चतुर्विधोऽत्र नियमः ।

सोमे कर्मण्युपपदे सुनोतोर्धातोः क्विप् भूते । सोमसुत्–सोमं सुतवान् । चतुर्विधोऽत्र नियमः—(१) कालनियमः–भूते क्विप् एव नान्यः प्रत्ययः । (२) धातुनियमः । (३) उपपदनियमः (४) प्रत्ययनियमः ।

अग्नौ चेः ॥९१॥

अग्निचित् । चतुर्विधोऽत्र नियमः ।

अग्नौ कर्मण्युपपदे चिनोतेर्धातोः क्विप् । नियमः–पूर्ववदत्रापि ज्ञेयः ।

कर्मण्यग्न्याख्यायाम् ॥९२॥

'चेः कर्मणि' इति वर्तते । समुदायेनाग्न्याख्या चेत् । श्येन इव चीयते श्येनचित् ।

कर्मणि–कर्मण्येवेत्यर्थलाभः सूत्रस्थ 'कर्मणि' पदेन । तेनायमर्थो भवति । कर्मण्युपपदे √चि धातोः कर्मण्येव कारके 'क्विप्' । **आख्याग्रहणम् रूढिसम्प्रत्ययार्थम्**–अयम्भावः–लोके तावदग्निशब्दो ज्वलनपदार्थकः वेदे तु **अग्नेरर्थः** इष्टकाचयो भवति, अग्न्यर्थो य इष्टकानां रचनाविशेषः स **श्येनचित्** उच्यते । एवं **कङ्कचित्** ।

कर्मणीनिर्विक्रियः ॥९३॥

क्रीणातेरिनिः । सोमविक्रयी । कुत्सायामिति वाच्यम् । नेह धान्यविक्रायः ।

क्रीणातेः–'वि' पूर्वादिति 'कर्मण्युपपदे' इति च शेषः । **कुत्सायाम्**– 'कर्मणि' इति वर्त्तमाने पुनः कर्मग्रहणेन एतदर्थलाभः । **धान्यविक्रायः**– कर्मण्यण् । **सोमविक्रयः** कुत्सितं कर्म नतु **धान्यविक्रयः** ।

दृशेः क्वनिप् ॥९४॥

मेरुदृश्वा । पुनर्वचनं प्रत्ययान्तरनिवृत्त्यर्थम् ।

मेरुं दृष्टवान् इति विग्रहवाक्यम् । **निवृत्त्यर्थम्**–'अन्येभ्योऽपि दृश्यन्ते' इत्येव क्वनिप्सिद्धेः ।

राजनि युधिकृञः ॥९५॥

राजानं योधितवान् राजयुध्वा । राजकृत्वा ।

राजन्शब्दे कर्मण्युपपदे √युध् धातोः √कृ धातोश्च क्वनिप् । युधिरत्र अन्तर्भावितण्यर्थः तदैव सकर्मको भवति । राजा अयुध्यत तं पुरुषो योद्धुं प्रायुङ्क्त इत्यर्थकोऽत्र √युध् धातुः । अत्र राजा प्रयोज्यकर्म तद्बलेन **√युध् सकर्मकः** । **राजकृत्वा**–राजानं कृतवान् ।

सहे च ॥९६॥

सहयुध्वा । सहकृत्वा ।

सह शब्दे उपपदे √युध्, √कृ धातुभ्यां क्वनिप् ।

सप्तम्यां जनेर्डः ॥९७॥

उपसरे जातवान् उपसरजः । मन्दुरजः ।

सप्तम्यन्ते उपपदे √जन धातो'र्डः' प्रत्ययः । उपसरजः–'ड' इत्यस्य डित्त्वात् 'जन्' इत्यस्य टिलोपः । मन्दुरजः–मन्दुरायां जातः । 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति ह्रस्वः ।

पञ्चम्यामजातौ ॥९८॥

बुद्धिजः । संस्कारजः । नेह—अश्वाज्जातः ।

पञ्चम्यन्ते उपपदे जातिवर्जिते जनेर्डः प्रत्ययः । बुद्धेर्जातः, संस्काराज्जातः इति विग्रहवाक्ये । 'जनिकर्त्तुः प्रकृतिः' इत्यपादाने पञ्चमी । अश्वाज्जातः–अश्वो हि जातिः ।

उपसर्गे च संज्ञायाम् ॥९९॥

अथेमाः मानवीः प्रजाः ।

उपसर्गे उपपदे जनेर्डः संज्ञायाम् । संज्ञा–समुदायोपाधिः । प्रजाः–प्रजाताः इति विग्रहः । प्राणिसमूहस्यैषा संज्ञा ।

अनौ कर्मणि ॥१००॥

अनुपूर्वाज्जातेः कर्मण्युपपदे डः । पुमांसमनुजातः पुमनुजः ।

पुमांसम् अनुरुद्ध्य जातः । तेनास्य सकर्मकत्वम् ।

अन्येष्वपि दृश्यते ॥१०१॥

जनेर्डो दृश्यते । न जायतेऽजः । द्विजाः । अनौ कर्मणीत्युक्तमकर्मण्यपि भवति । अनुजातोऽनुजः ।

अन्येषु–पूर्वसूत्रोक्ताद्भिन्नेषु उपपदेषु कारकेषु च अजः–न जायते । द्विजाः-द्विजाताः । 'अन्येष्वपि.....' इति सूत्रस्थोऽपिशब्दः √जन् धातुभिन्नस्यापि सङ्ग्रहार्थः । परितः खाता इति परिखा परि √खन्+ड+टाप् ।

निष्ठा ॥१०२॥

निष्ठाख्यः प्रत्ययो भूते भवति । कृतम् । कृतवान् ।

❀(वा०) आदिकर्मणि निष्ठा वाच्या । प्रकृतः कटं देवदत्तः । प्रकृतवान् कटं देवदत्तः ।

निष्ठाख्यः- निष्ठा आख्या–संज्ञा यस्य सः । 'क्तक्तवतू निष्ठा' इति सूत्रेण 'क्त-क्तवतु' इति द्वयोः प्रत्यययोर्निष्ठा संज्ञा भवति । आदिकर्मणि– आदिभूते कर्मणि–क्रियायाम् । प्रकृतः–'प्र' शब्दोऽत्र आदिकर्म द्योतयति । प्रकरोति कटं देवदत्त इत्यर्थः ।

सुयजोर्ङ्वनिप् ॥१०३॥

सुत्वा । यज्वा ।

√सु–√यज् इत्येताभ्यां ङ्वनिप् । सुत्वा, यज्वा–'ह्रस्वस्य पिति कृति' इति तुक् । ङित्त्वात् न गुणः ।

जीर्यतेरतृन् ॥१०४॥

जरन् । वाऽसरूपेण निष्ठा । जीर्णः । जीर्णवान् ।

√जॄ (वयोहान्यर्थकः) इत्यस्मात् अतृन् । जरन्–'उगिदचाम्........' इति नुम् । वाऽसरूपेण–अयम्भावः–'गत्यर्था........जीर्यतिभ्यश्च' इति सूत्रेण √जॄ धातोः क्त क्तवतू विधीयेते । तावपि भवतः अत्र बाध्यबाधक–भावो विकल्पेन भवति । तथा च सूत्रम्–'वाऽसरूपोऽस्त्रियाम्' ।

छन्दसि लिट् ॥१०५॥

भूतेऽर्थे । अ॒हं सूर्य॑मु॒भय॑तो॑ ददर्श॒ ।

छन्दसि विषये धातोर्लिट् प्रत्ययो भूते । ददर्श–उत्तमपुरुषस्यैक-वचने रूपम् ।

लिटः कानज् वा ॥१०६॥

'कानच्' इत्ययमादेशो वा । अग्निं चिक्यानः ।

छन्दसि लिटः कानच् आदेशो वा भवति । चिक्यानः–√चिञ् (चयने) + लिट् → कानच् 'लिटि धातो....' इति द्वित्वम् । 'विभाषा चेः' इति कुत्वम् । 'एरनेकाचः........' इति यण् । एवं सोमं सुषुवाणः ।

क्वसुश्च ॥१०७॥

छन्दसीति वर्तते । लिटः क्वसुरादेशो वा । जक्षिवान् । न भवति–अहं सूर्यमुभयतो ददर्श ।

जक्षिवान्–√अद् + लिट् → क्वसु । 'लिटयन्यतरस्याम्' इत्यदेर्घस्लृ आदेशः ।

भाषायां सदवसश्रुवः ॥१०८॥

उपसेदिवान्/उपासदत् । अनूषिवान् । उपशुश्रुवान् ।

√सद्–√वस्–√श्रु इत्येतेभ्यः परस्य लिटो भाषायां वा 'क्वसुः' आदेशः । अत्र 'लिटि' भूतसामान्यार्थकः । उपसेदिवान्–'अत एकहल्मध्ये....' इत्यादिनैत्त्वाभ्यासलोपौ । उपासदत्–लुङि एतद्रूपम् । लङि–उपासीदत् । लिटि–उपससाद । अनूषिवान्–द्वित्वे कृते उभयोः वकारयोः सम्प्रसारणम् । पक्षे अन्ववात्सीत्, अन्ववसत्, अनूवास । उपशुश्रुवान्–पक्षे उपाश्रौषीत्, उपाशृणोत्, उपशुश्राव ।

उपेयिवाननाश्वाननूचानश्च ॥१०९॥

एते निपात्यन्ते । स्फुटम् ।

एते–उपेयिवान् । अनाश्वान् । अनूचानः । उपेयिवान्–उप√इण् (गतौ) + लिट्—क्वसु । एवं समीयिवान्, ईयिवान् इत्यपि ।

अनाश्वान्–नञ् √अश् (भोजने) + लिट्—क्वसु । नञ् समासोऽपि निपात्यते ।

अनूचानः–अनु √वच (परिभाषणे) + कानच् अत्र परस्मैपदिनो √वच् धातोः कानच् निपात्यते ।

लुङ् ॥११०॥

भूतेऽर्थे । अकार्षीत् ।

भूतेऽर्थे वर्त्तमानाद् धातोर्लुङ् प्रत्ययो भवति । भूतसामान्ये लुङ् वेदितव्यः । उदाहरति–अकार्षीत् ।

अनद्यतने लङ् ॥१११॥

अकरोत् ।

अनद्यतने–न विद्यते अद्यतनो यस्मिन् स तस्मिन् भूते वर्त्तमानाद् धातोर्लङ् । अतिक्रान्ताया रात्रेश्चतुर्थो यामः, आगामिन्याश्च प्रथमो यामः इत्येताभ्यां सहितः सकलो दिवसोऽद्यतनः इति न्यासः । अतीतायाः रात्रेः पश्चार्धेन, आगामिन्याः पूर्वार्धेन च सहितो दिवसोऽद्यतनः इति सिद्धान्त-कौमुदीकारः । उदाहरति–अकरोत् ।

❀(वा०) परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः । अरुणद् यवनः साकेतम् । अरुणद् यवनो माध्यमिकाम् । अर्थात् लोकप्रसिद्धे तदानीन्तनप्रयोक्तुर्दर्शनविषये च 'लङ्' भवति । यवनेन साकेतावरोधो लोकप्रसिद्धोऽस्ति व्यासङ्गात् परोक्षश्च ।

अभिज्ञावचने लृट् ॥११२॥

अभिज्ञा—स्मृतिः । तद्वचन उपपदे लृट् । अभिजानासि कृष्ण ! वने वत्स्यामः ।

'वचने' इति कथनात् अभिज्ञापर्यायवचनग्रहणम् । तेन अभिजानासि, स्मरसि, बुध्यसे इत्यादियोगेऽपि भवति । लृट्–भूतानद्यतने एव ।

न यदि ॥११३॥

यच्छब्दसहितेऽभिज्ञावचन उपपदे लृट् न । अभिजानासि कृष्ण ! यद् वनेऽवसाम ।

अवसाम–अत्र 'लङ्' उत्तमपुरुषबहुवचनप्रयोगः ।

विभाषा साकाङ्क्षे ॥११४॥

अभिज्ञावचन उपपदे यच्छब्दसहिते केवले च विभाषा 'लृट' प्रत्ययः साकांक्षश्चेत् प्रयोक्ता भवति । लक्ष्यलक्षणयोः सम्बन्धे

प्रयोक्तुराकांक्षा चेद् भवति । अभिजानासि कृष्ण ! वने वत्स्यामस्तत्रौदनं भोक्ष्यामहे । अभिजानासि कृष्ण ! वनेऽवसाम तत्रौदनमभुंक्ष्महि । एवं यद्योगेऽपि ।

वासो ल..णम्, भोजनं लक्ष्यम् । 'यदि' इति निवृत्तम् । परिज्ञातं लक्षणं भवति, अपरिज्ञातं च लक्ष्यम् । उदाहरणवाक्ये √ भुज् धात्वर्थो लक्ष्यः, √ वस् धात्वर्थो लक्षणम् । वक्ता च वासेन भोजनं स्मारयितुं प्रवर्त्तते ।

परोक्षे लिट् ॥११५॥

भूतेऽनद्यतन इति च वर्तते । ननु च धात्वर्थः सर्वः परोक्ष एव । सत्यम्, लोके तथापि प्रत्यक्षाभिमानः । स यत्र नास्ति तत्परोक्षम् । चकार । जहार । उत्तमविषयेऽपि चित्तव्याक्षेपात् परोक्षता भवत्येव । यथा सुप्तोऽहं किल विललाप ।

*(वा०) अत्यन्तापह्नवेऽपि वक्तव्यः । नाहं कलिङ्गान् जगाम ।

अक्षणः परं परोक्षम् । परोक्ष एव–विततो धात्वर्थः कात्स्न्येनैकस्मिन् क्षणे न सम्भवति । चित्तव्याक्षेपात्–मदस्वप्नादिभिश्चित्तविक्षेपो भवति । अपह्नवः–अपलापः । कलिङ्गगमनस्यात्यन्तं प्रतिषेधः ।

हशश्वतोर्लङ् च ॥११६॥

चाल्लिट् पूर्वोक्तेऽर्थे । हाऽकरोत्, चकार । शश्वदकरोत्, चकार ।

पूर्वोक्ते–भूतानद्यतनपरोक्षे । ह चकार । शश्वच्चकार इत्युदाहरणे । 'ह' इति निश्चयार्थकमव्ययम् ।

प्रश्ने चासन्नकाले ॥११७॥

पूर्वोक्तेऽर्थे धातोर्लङ्लिटौ आसन्नकाले पृच्छ्यमाने । कश्चित् पृच्छति–अगच्छद् देवदत्तः/जगाम वा ।

प्रश्नशब्दोऽत्र कर्मसाधनः । प्रष्टव्यः प्रश्नः । आसन्नकालः–पञ्चवर्षाभ्यन्तरमासन्नकालः, तदतीतो विप्रकृष्टकालः । विप्रकृष्टकाले तु लिट् एव–जघान कंसं किल वासुदेवः ।

लट् स्मे ॥११८॥

स्म-योगे पूर्वोक्तेऽर्थे लट् । रामो राज्यं करोति स्म ।

इत्यतीतार्थकम् अव्ययम् । स्म–इत्युपपदे भूतानद्यतन-परोक्षे लट् । **नडेन स्म पुराधीयते** इत्युदाहरणं काशिकावृत्तौ दत्तम् । 'स्म' इत्यस्य क्रियाया अनन्तरप्रयोगः हरदत्तेनापि व्याख्यारूपेण कृतः । **पुराकल्पे नडाख्यं तृणविशेषं हस्ते गृहीत्वाऽधीयते स्म ।**

अपरोक्षे च ॥११९॥

अपरोक्षे भूतानद्यतने स्म-योगे लट् । एवं स्म पिता ब्रवीति ।

पितुः कथनमत्रापरोक्षमस्ति । पूर्वसूत्रेण परोक्षे विधानादस्यारम्भः ।

ननौ पृष्टप्रतिवचने ॥१२०॥

पूर्वोक्तं निवृत्तम् भूतसामान्ये विधिः । 'ननु' शब्द उपपदे प्रश्नपूर्वकप्रतिवचने गम्ये भूते लट् । अकार्षीः कटं देवदत्त ? ननु करोमि भोः !

पूर्वोक्तम् अनद्यतनपरोक्षम् । पृष्टप्रतिवचनम्–प्रश्नपूर्वकं प्रतिवचनम् । **मध्यमपदलोपो समासः । ननु करोमि भोः** इत्युदाहरणम् ।

नन्वोर्विभाषा ॥१२१॥

न–नु एतयोरुपपदयोर्वा । अकार्षीः कटं देवदत्त ? न करोमि भोः/नाकार्षम् ।

वा–लट् पक्षे लुङ् । अहं नु करोमि/अहं न्वकार्षम् । इत्यपि ज्ञेयम् ।

पुरि लुङ् चास्मे ॥१२२॥

मण्डूकप्लुत्याऽनद्यतनानुवृत्तिः । 'पुरा'शब्द उपपदे 'स्म'वर्जिते भूतानद्यतने विभाषया लुङ् । लट् च । वसन्तीह पुरा छात्राः/अवात्सुः ।

यदा लट्-लुङौ न भवतः तदा लङ्-लिटावपि यथा–विषयं भवतः । अवसन्निह पुरा छात्राः । ऊषुरिह पुरा छात्राः । पुरि–'पुरा'शब्दस्य सप्तम्येकवचनान्तं पदम् । 'आतो धातोः' इत्यत्र 'आतो' योगविभागादाकारलोपः ।

वर्त्तमाने लट् ॥१२३॥

प्रारब्धोऽपरिसमाप्तश्च वर्त्तमानः । वर्त्तमानेऽर्थे वर्त्तमानाद् धातोर्लट् । पचति ।

वर्त्तमानो धात्वर्थः । पचति—यावता कालेन पाकफलावच्छिन्नो व्यापारो निवर्त्तते स वर्त्तमानकालः ।

लटः शतृशानचावप्रथमासमानाधिकरणे ॥१२४॥

लट एतावादेशौ । अप्रथमान्तेन चेत्तस्य सामानाधिकरण्यम् । पचन्तं चैत्रं पश्य । पचमानं पश्य । पचता कृतम् । पचमानेन कृतम् । अप्रथमेत्यादि किम् ? देवदत्तः पचति । पुनर्लड्ग्रहणमधिकविधानार्थम् । क्वचित् प्रथमासमानाधिकरणेऽपि यथा स्यात् । सन् द्विजः । केचित् 'नन्वोर्विभाषा' इत्यतो विभाषाग्रहणमनुवर्तयन्ति । सा च व्यवस्थितविभाषा । यथादर्शनं प्रयोगा नेतव्याः ।

सामानाधिकरण्यम्—समानम् अधिकरणम् = अभिधेयं यस्य तत् समानाधिकरणं तस्य भावः । पुनर्लट्—'वर्त्तमाने लट्' इत्यतोऽनुवृत्ते । परस्मैपदिनो धातोः शतृ, आत्मनेपदिनः शानच् । उभयपदिनः √पच् इत्यस्मादुभयम् । यथादर्शनम्—यथा प्रयोगाः दृश्यन्ते तदनुसारम् ।

सम्बोधने च ॥१२५॥

सम्बोधने लट एतौ । हे पचन् ! हे पचमान !

प्रथमासमानाधिकरणार्थमिदम् ।

लक्षणहेत्वोः क्रियायाः ॥१२६॥

लक्ष्यते-चिह्न्यते येन तल्लक्षणम् । जनको हेतुः । एतयोरर्थयोर्वर्त्तमानाद्धातोः परस्य लट एतौ । लक्षणहेतू क्रियाविषयौ चेत् । शयानाः भुञ्जते । हेतौ—अर्जयन् वसति ।

लक्षणे—शयानाः भुञ्जते । यवनाः इति शेषः । अत्र शयनं लक्षणं भुजिक्रियाविषयो यवनानाम् । शयानाः—√शीङ् (स्वप्ने) आत्मनेपदी ततः

शानच् । अर्जयन्–√अर्ज् (अर्जने चुरादिगणे पठ्यते)+णिच्+शतृ । अत्रार्जनं वासस्य हेतुः ।

तौ सत् ॥१२७॥

तौ शतृशानचौ सत्संज्ञौ । ब्राह्मणस्य कुर्वन् । कुर्वाणः इत्यादि ।

इत्यादि पदेन ब्राह्मणस्य करिष्यन् । करिष्यमाणः इति लृडादेशयोरपि शतृशानचोः सङ्ग्रहः । सत्संज्ञाफलन्तु 'पूरणगुणसुहितार्थसदव्यय.........' इत्यादिना षष्ठीसमासप्रतिषेधः ।

पूङ्यजोः शानन् ॥१२८॥

अनयोः शानन् । पवमानः । यजमानः ।

शानन् प्रत्ययो भवति न तु लट् आदेशः । पवमानः–√पूङ्+शानन् । यजमानः–यज् धातुः । उभयत्र 'आने मुक्' इति 'मुक्' आगमः ।

ताच्छील्यवयोवचनशक्तिषु चानश् ॥१२९॥

क्रमेणोच्यते–कतीह मण्डयमानाः । कतीह शिखण्डं वहमानाः । कतीह पचमानाः ।

ताच्छील्यम्–तत्स्वभावता । वयोवचनम्–शरीरावस्था शैशवादिः, तत्कथनम् । शक्तिः–सामर्थ्यम् । एष्वर्थेषु धातोः 'चानश्' प्रत्ययो भवति ।

मण्डयमानाः–√मडि (भूषायाम्)+चानश् । भूषणमेषां स्वभाव इत्यर्थः । शिखण्डः–चूडा । तद्वयो गम्यते यस्मिन् बालकाः शिखण्डं वहन्ति । पचमानाः–पाके समर्थाः ।

इङ्धार्योः शत्रकृच्छ्रिणि ॥१३०॥

अनयोः शतृ अकृच्छ्रिणि कर्त्तरि । अधीयन् पारायणम् । धारयन्नुपनिषदम् ।

अकृच्छ्री–अकृच्छ्रः=सुखसाध्यो धात्वर्थोऽस्येति अकृच्छ्री कर्त्ता । 'अत इनिठनौ' इति इनिः । तस्मिन् कर्त्तरि √इङ्–√धार् (धृङ् चुरादिः+णिच्) धातुभ्यां शतृ ।

द्विषोऽमित्रे ॥१३१॥

शत्रौ कर्त्तरि द्विषेः शतृ । द्विषन् ।

अमित्रः-शत्रुः । √अम् + इत्र 'अमेर्द्विषति चित्' इति सूत्रेण ।

सुञो यज्ञसंयोगे ॥१३२॥

यज्ञसंयुक्तेऽभिषवे वर्त्तमानात् सुनोतेः शतृ । सर्वे सुन्वन्तः । सत्त्रिण उच्यन्ते ।

संयुक्तः—सम्बन्धः । अभिषवः-सोमस्य निर्माणक्रिया । सुन्वन्तः इत्युदाहरणम् प्रथमाबहुवचनान्तम् । सत्त्रिणः-यजमानाः यज्ञस्य स्वामिनः प्रधानकर्त्तारो भवन्ति ।

अर्हः प्रशंसायाम् ॥१३३॥

अर्हन्निह भवान् विद्याम् । नेह-अर्हति चौरो वधम् ।

प्रशंसायाम् √अर्ह धातोः शतृ । अर्हन् इत्युदाहरणम् ।

आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥१३४॥

'आ' एतस्मात् 'क्विप्'संशब्दनात् यानित ऊर्ध्वमनुक्रमिष्याम-स्तच्छीलादिषु कर्तृषु ते वेदितव्याः ।

अत्र 'आङ्' अभिविध्यर्थकस्तेन क्विपोऽपि ग्रहणम् । क्विबपि तच्छीलादिष्वर्थेषु भवतीति भावः । तच्छीलः-स्वभावः चैतनिको धर्मः शीलम्, यः फलनिरपेक्षः कार्ये प्रवर्त्तते । तद्धर्मा-स धर्मः-आचारो यस्य सः । धर्मशब्दोऽत्र आचारवाची । यः शीलेन विनाऽपि स्वधर्मे प्रवर्त्तते । तत्साधुकारी-यो धात्वर्थं साधु करोति । साधु-प्रशस्तम् ।

तृन् ॥१३५॥

सर्वधातुभ्यस्तच्छीलादिषु कर्तृषु । क्रमेणोदाहरणानि-तच्छीले-कर्ता कटान् । तद्धर्मिणि—अन्नमपहर्तारः श्राद्धिकाः भवन्ति श्राद्धे सिद्धे । तत्साधुकारिणि—कर्त्ता विकटम् ।

तच्छीले–कर्ता कटान् । कटः = आसनविशेषः । तद्धर्मिणि–अपहर्तारः । श्राद्धिकाः श्राद्धे भोक्तारः वृत्तौ आह्वरकाः (अह्वरदेशोद्भवाः) इति पाठान्तरम् । एषां श्राद्धान्नापहरणं कुलधर्मः ।

तत्साधुकारिणि–कर्त्ता विकटम् । विकटः = स्फोटकः, सोमलताविशेषः । वृत्तौ कर्ता कटम्, गन्ता खेटम् इत्युदाहरणे दत्ते । कटं साधु करोति, खेटं (ग्रामम्) साधु गच्छति ।

❀ (वा०) तृन्विधावृत्विक्षु चानुपसर्गस्य । होता । पोता ।

❀ (वा०) नयतेः षुक् च । नेष्टा ।

❀ (वा०) त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वञ्च । त्वष्टा ।

❀ (वा०) क्षदेश्च नियुक्ते । क्षत्ता ।

अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ॥१३६॥

अलङ्कृञ्–निराकृञ्–प्रजन–उत्पच–उत्पत–उन्मद–रुच–अपत्रप–वृतु–वृधु–सह–चर–एभ्यो धातुभ्यः पूर्वोक्तेष्वर्थेषु इष्णुच् । अलङ्करिष्णुः । निराकरिष्णुः इत्यादि ।

अलम्पूर्वः √कृञ्, निर्–आङ् पूर्वः √कृञ् इति बोध्यम् । इत्यादि—प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्तिष्णुः । वर्धिष्णुः । सहिष्णुः । चरिष्णुः ।

णेश्छन्दसि ॥१३७॥

ण्यन्ताच्छन्दसि पूर्वोक्तेष्वर्थेषु इष्णुच् । दृषदं धारयिष्णवः ।

√धृङ् (अवस्थाने) + णिच् = धारि + इष्णुच् ।

भुवश्च ॥१३८॥

छन्दसि । भविष्णुः । चकारोऽनुक्तसमुच्चयार्थः ।

'भुवश्च' इत्यत्र चकारात् √भ्राज + इष्णुच्–भ्राजिष्णुः । भ्राजिष्णुना लोहितचन्दनेन ।

ग्लाजिस्थश्च क्स्नुः ॥१३६॥

'छन्दसि' निवृत्तम् । एभ्यो भुवश्च क्स्नुः । ग्लास्नुः । जिष्णुः । स्थास्नुः । भूष्णुः । गिच्चायं प्रत्ययः । क्ङिति चेति गुणनिषेधः ।

एभ्यः–√ग्ला–√जि–√स्था इति धातुभ्यः । 'गिच्चायम्–गित्–च–अयम् । 'क्स्नुः' इत्ययं प्रत्ययो 'ग्स्नुः' इति । गकारस्य चर्त्वेन ककारः । 'क्ङिति' इत्यत्रापि ग्+क्+ङ् तत्र चर्त्वेन गकारोपि प्रश्लिष्ट इति तात्पर्यम् । 'ग्स्नुः' इत्यत्र गकारस्येत् संज्ञा न ककारस्य । तेन 'स्थास्नुः' इत्यत्र 'घुमास्था.....' इतीत्वं न भवति ।

त्रसिगृधिधृषिक्षिपेः क्नुः ॥१४०॥

त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ।

तच्छीलादिष्वर्थेषु √त्रस–√गृध–√धृष–√क्षिप धातुभ्यः क्नुः । 'क्ङिति च' इति न गुणः ।

शमित्यष्टाभ्यो घिनुण् ॥१४१॥

शम् आदिभ्योऽष्टाभ्यो धातुभ्यस्तच्छीलादिषु घिनुण् । शमी । तमी । दमी । श्रमी । भ्रमी । क्षमी । क्लमी । प्रमादी । उन्मादी ।

अष्टाभ्यः–√शमु–√तमु–√दमु–√श्रमु–√भ्रमु–√क्षमू–√क्लमु–√मदी इत्येतेभ्यः दिवादिगणे पठितेभ्यः । शमी, क्लमी इत्येतेषु 'नोदात्तोपदेशस्य.......' इति वृद्धि निषेधः । प्रमादी, उन्मादी–उपधावृद्धिः । 'घिनुण्' इत्यत्र धकारः उत्तरसूत्रे कुत्वार्थः । उकारः उच्चारणार्थः । इत्संज्ञकत्वे तु शमिनौ, शमिनः इत्यत्र 'उगिदचाम्.......' इति नुम् प्रसज्येत ।

सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च ॥१४२॥

सम्पृचादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु घिनुण् । √पृची रुधादिः, अदादिर्न । परिदेवि (√देवृ) भूवादिर्न दिवादिः । √क्षिप दिवादिस्तुदादिश्च । √युज समाधौ दिवादिः, √युजिर् योगे रुधादिरुभयोर्ग्रहणम् । रञ्जेरनुनासिकलोपो निपातनात् । सम्पर्की । अनुरोधी ।

आयामी । आयासी । परिसारी । संसर्गी । परिदेवी । संज्वारी । परिक्षेपी । परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रीडी । विवेकी । त्यागी । रागी । भागी । अतिचारी । अपचारी । आमंषी । अभ्याघाती ।

सम्पर्की–अत्र क्रमशः इमे धातवः सन्ति–सम् √पृची । परि √देवृ । अनु √रुधिर् । आङ् √यम । आङ् √यसु । सम् √सृज् । सम् √ज्वर् । परि √क्षिप् । परि √रट् । परि √वद् । परि √दह् । परि √मुह् । √दुष् । √द्विष् । √द्रुह् । √दुह् । आ √क्रीड् । वि √विजिर् । √त्यज् । √रञ्ज् । भज् । अति √चर् । अप √चर् । आ √मुष । अभि + आङ् √हन् । सम्पर्किन् इत्यादयः अभ्याघातिन् इत्यन्ताः सर्वे नान्ताः । उपधायाः यथायोग्यं गुणवृद्धी । सम्पर्की, संसर्गी, विवेकी, त्यागी, रागी, भागी इत्यत्र चवर्गस्य कुत्वम् । 'अभ्याघाती' इत्यत्र हनः घकारतकारौ ।

वौ कषलसकत्थस्रम्भः ॥१४३॥

√कष हिंसायाम्, √लस् श्लेषणक्रीडनयोः, √कत्थ श्लाघायाम्, √स्रम्भु विश्वासे । विपूर्वेभ्यः । विकाषी । विलासी । विकत्थी । विस्रम्भी ।

वि पूर्वेभ्यः कषादिभ्यो घिनुण् । विकाषिन् इत्यादयो नान्ताः ।

अपे च लषः ॥१४४॥

अपशब्दे, चाद्विशब्दे । अपलाषी । विलाषी ।

अप, वि उपपद पूर्वात् √लष् इत्यस्माद् घिनुण् ।

प्रे लपसृद्रुमथवदवसः ॥१४५॥

प्रे उपपदे √लप-√सृ-√द्रु-√मथ-√वद-√वस इति धातुभ्यो घिनुण् । प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । प्रवासी । √वस् निवासे इत्यस्य ग्रहणम् नाच्छादनार्थस्य, लुग्विकरणत्वात् ।

प्रलापिन् इत्यादयो नान्ताः ।

निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादि-व्याभाषासूयो वुञ् ॥१४६॥

एभ्यो वुञ् । पञ्चम्यर्थे प्रथमा । निन्दकः । हिंसकः । क्लेशकः । खादकः । विनाशकः । परिक्षेपकः । परिराटकः । परिवादकः । व्याभाषकः । असूयकः ।

एभ्यः–√निन्द–√हिंस–√क्लिश–√खाद–वि√नश (णिजन्तः)–परि√क्षिप–परि√रट–परि √वद (णिजन्तः)–वि+आङ् √भाष्–√असूय धातुभ्यः तच्छीलादिषु कर्तृषु 'वुञ्' प्रत्ययो भवति । 'युवोरनाकौ' इति सूत्रेण 'वु' इत्यस्य 'अक' आदेशः । ञित्त्वाद् वृद्धिः । असूयकः–'अतो लोपः' इत्यकारलोपः । प्रथमा–असूयेभ्यः इति वक्तव्ये तदर्थे प्रथमैकवचनम् व्यत्ययेन ।

देविक्रुशोश्चोपसर्गे ॥१४७॥

एतयोरुपसर्गं उपपदे तच्छीलादिषु वुञ् । परिदेवकः । आक्रोशकः ।

अत्र √दिव् णिजन्तो गृह्यते । √देवि–√क्रुश धातुभ्याम् ।

चलनशब्दार्थादकर्मकाद्युच् ॥१४८॥

चलनार्थात् शब्दार्थाच्चाकर्मकाद् युच् । चलनः । शब्दनः । रवणः । अकर्मकात् किम् ? पठिता विद्याम् ।

चलनं देशान्तरं प्राप्तुं क्रिया । शब्दः श्रोत्रग्राह्यो गुणविशेषः चलनं शब्दः इत्येतौ अर्थौ येषां ते धातवस्तेभ्योऽकर्मकेभ्यो 'युच्' तच्छीलादिषु कर्तृषु । √चल् कम्पने चलति तच्छीलः इति चलनः । 'युवोरनाकौ' इति 'यु' इत्यस्य 'अन' आदेशः । शब्दं करोतीति शब्दायति । रौति इति रवणः नकारस्य णत्वम् ।

अनुदात्तेतश्च हलादेः ॥१४९॥

विशेषणद्वयविशिष्टाद् युच् । वर्त्तनः । वर्द्धनः ।

विशेषणद्वयम् अनुदात्तेत्, हलादिश्च । √वृत्, √वृध् धातू अनुदात्तेतौ

हलादी चेत्येताभ्यां युच् । अकर्मकादिति वर्तते, तेनात्र न–वसिता वस्त्रम् ।

जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः ॥१५०॥

जुप्रभृतिभ्यो धातुभ्यस्तच्छीलादिषु युच् । जवनः । चङ्क्रमणः । दन्द्रमणः । सरणः । गर्द्धनः ज्वलनः । शोचनः । लषणः । पतनः । पदनः । चलनार्थानां सकर्मकार्थं ग्रहणं 'ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति' इतिज्ञापनार्थम् च । तेन अलङ्कृञस्तृन्न । अलङ्कर्ता ।

—जु इति सौत्रो धातुः । **चङ्क्रम्य–दन्द्रम्यौ**–क्रमशः √क्रमु–√द्रम धातू यङन्तौ । अन्ये चात्र क्रमशः √सृ–√गृधु–√ज्वल–शुच–√लष–√पत–√पद इति धातवः । एभ्यो युच् । **ज्ञापनार्थम्**–ज्ञापनं च प्रायिकं भवति तेन **गन्ता खेटं विकत्थनः** अत्र 'उकञ्' विषये 'तृन्' तथा 'घिनुण्' विषये 'युच्' प्रत्ययो भवति । **अलङ्कर्त्ता**—साधुर्न भवतीति शेषः ।

क्रुधमण्डार्थेभ्यश्च ॥१५१॥

√क्रुध्-√मडि, एतदर्थेभ्यो धातुभ्यो युच् । क्रोधनः । रोषणः । मण्डनः । भूषणः ।

√क्रुध्–√रुष इति द्वौ क्रोधार्थौ । √मडि–√भूष इति द्वौ मण्डनार्थौ ।

न यः ॥१५२॥

यान्ताद्धातोर्युच् न । अनुदात्तेत् इति प्राप्तो निषिध्यते । क्नूयिता क्षमायिता ।

√क्नूयी (शब्दे), √क्ष्मायी (विधूनने) यकारान्तौ धातू स्तः । अत्र तृन् ।

सूददीपदीक्षश्च ॥१५३॥

एभ्यो युच् न । सूदिता । दीपिता । दीक्षिता । ननु दीपेर्विशेषविहितो 'र' प्रत्ययः 'नमिकम्पि....' इत्यनेन । स एव बाधको भविष्यति किं प्रतिषेधेन । सत्यम्–'वाऽसरूपेण......' युच् प्राप्नोति । ताच्छीलि-

केषु वाऽसरूपविधिर्नास्तीति प्रायिकमिदमित्युक्तम् । तथा च समावेशो दृश्यते । कम्रा, कमना वा युवतिः । कम्प्रा कम्पना वा शाखा ।

सूदेर्युच् प्रतिषिद्धः, कथं मधुसूदनः । अनित्योऽयं प्रतिषेध इति योगविभागाद् विज्ञायते । नन्द्यादित्वाद् वा ।

योगविभागाद्–'न यः', 'सूददीपदीक्षश्च' इति सूत्रयोः स्थाने एकमेव सूत्रं करणीयम् । योगविभागाद् उत्तरस्य सूत्रस्य प्रतिषेधविषये अनित्यत्वरूपं वैशिष्टय' लक्ष्यते । √दीप–√दीक्ष धातुभ्यां तु 'युच्' अनभिधानान्न भवति । आर्षोऽस्तु वा मधुसूदन इति प्रयोगः ।

लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् ॥१५४॥

एभ्य उकञ् । अपलाषुकं वृषलसंगतम् । प्रपातुका गर्भाः । उपपादुकः । स्थायुकः । प्रभावुकम् अन्नम् । वर्षुकः । पर्जन्यः । आघातुकम् । कामुकः । आगामुकः । किंशारुकं तीक्ष्णमाहुः ।

एभ्यः–सोपसर्गेभ्यो निरुपसर्गेभ्यः केवलेभ्यश्च । **अपलाषुकम्**–अप-√लष्+उकञ् ञित्त्वात् उपधावृद्धिः । **स्थायुकः**–√स्था+उकञ् आतो युक् । **शारुकम्**–(√शॄ+उकञ्) इत्युदाहरणम् वृद्धिः आर् ।

जल्पभिक्षकुट्टलुण्टवृङः षाकन् ॥१५५॥

एभ्यः षाकन् । जल्पाकः । भिक्षाकः । कुट्टाकः । लुण्टाकः । वराकः । वराकी ।

षकारस्य 'षः प्रत्ययस्य' इत्यनेनेत्संज्ञा तस्य फलं वराकी । अत्र 'षिद्गौरादिभ्यश्च' इति ङीष् ।

प्रजोरिनिः ॥१५६॥

प्रपूर्वाज्जवतेरिनिः । प्रजवी ।

'जु' इति सौत्रो धातुः गमनार्थकः । प्रजविन् इति नान्तशब्दः । तस्य प्रथमैकवचने प्रजवी ।

जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च ॥१५७॥

इनिः । √क्षि क्षये, √क्षि निवासगत्योः–द्वयोर्ग्रहणम् । जयी । दरी । क्षयी । विश्रयी । अत्ययी । वमी । अव्यथी । अभ्यमी । परिभवी । प्रसवी ।

विश्रयी–वि √श्रिञ् (सेवायाम्) + इनि । अत्ययी–अति √इण् । अव्यथी–नञ् √व्यथ् । अभ्यमी–अभि √अम् (रोगे) । परिभवी–परि √भू । प्रसवी–प्र √षू (प्रेरणे) ।

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ॥१५८॥

√स्पृह ईप्सायाम्, √गृह ग्रहणे, √पत गतौ एतेऽदन्ताश्चुरादौ पठ्यन्ते । √दय दानादिषु ।

नि पूर्वः तत् पूर्वश्च √द्रा कुत्सायां गतौ । तदो नकारान्तता निपात्यते । श्रत् पूर्वः √डुधाञ् एभ्य आलुच् । स्पृहयालुः इत्यादि ।

गृहयालुः । पतयालुः । दयालुः । निद्रालुः । तन्द्रालुः । श्रद्धालुः ।

*(वा०) आलुचि शीङो ग्रहणं कर्त्तव्यम् । शयालुः ।

दाधेट्सिशदसदो रुः ॥१५९॥

दारुः । धारुर्वत्सो मातरम् । 'नलोक....' इति षष्ठीनिषेधः । सेरुः । शद्रुः । सद्रुः ।

'गामादाग्रहणेष्वविशेषः' इति दारूपाणां √डुदाञ् (दाने) √दो (अवखण्डने) √देङ् (रक्षणे) इति त्रयाणां ग्रहणम् । √धेट् (पाने) षिञ् (बन्धने) √शद् (शातने) √सद् (विशरणादिषु) एभ्यो रुः ।

सृघस्यद क्मरच् ॥१६०॥

√सृ, √घस्, √अद् एभ्यः क्मरच् । सृमरः । घस्मरः । अद्मरः ।

अत्र √घस् √अद् इत्यस्यादेशो न, अपि तु धात्वन्तरम् । √घस्लृ (अदने) । सृमरः–कित्त्वान्न गुणः ।

भञ्जभासमिदो घुरच् ॥१६१॥

भङ्गुरः । भासुरः । मेदुरः । भञ्जेः कर्मकर्तरि प्रत्ययः स्वभावात् ।

भङ्गुरः–'चजोः कु घिण्यतोः' इत्यनेन कुत्वम् गकारः, अनुस्वारपरसवर्णाभ्यां ञकारस्य ङकारः । कर्मकर्तरि–भज्यते स्वयमेवेत्यर्थः ।

विदिभिदिच्छिदेः कुरच् ॥१६२॥

ज्ञानार्थकस्य विदेर्ग्रहणम् । विदुरः पण्डितः इत्यादि ।

इत्यादि–भिदुरं काष्ठम् । छिदुरा रज्जुः । स्वभावादिमौ द्वौ कर्मकर्तरि भवतः । स्वयमेव भिद्यते, छिद्यते इत्यर्थौ ।

इण्नश्जिसर्तिभ्यः क्वरप् ॥१६३॥

√इण्–√नश्–√जि–√सृ एभ्यः क्वरप् । इत्वरः, इत्वरी । नश्वरः । जित्वरः । सृत्वरः ।

इत्वरः, जित्वरः, सृत्वरः–अत्र पित्त्वात् 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन तुगागमः । इत्वरी, नश्वरी, जित्वरी, सृत्वरी–'टिड्ढा·······क्वरपः' इत्यादिना ङीप् ।

गत्वरश्च ॥१६४॥

निपात्यते । गमेरनुनासिकलोपः, क्वरप् ।

गत्वरः । स्त्रियां गत्वरी ।

जागरूकः ॥१६५॥

जागर्तेरूकः प्रत्ययः । जागरूकः ।

√जागृ (निद्राक्षये) + ऊकः । ऋकारस्य गुणः ।

यजजपदशां यङः ॥१६६॥

यङन्तानामेषामूकः प्रत्ययो भवति । यायजूकः । जञ्जपूकः । दन्दशूकः ।

यायजूकः–'दीर्घोऽकितः' इत्यभ्यासदीर्घः । जञ्जपूकः, दन्दशूकः–'जपजभ.........' सूत्रेणाभ्यासस्य 'नुक्' । अनुस्वार–परसवर्णौ ।

नमिकम्पिस्म्यजसकमहिंसदीपो रः ॥१६७॥

एभ्यो रः । नम्रः इत्यादि ।

एभ्यः–√नम्–√कम्प–√स्मिङ् (ईषद्धसने)–नञ् पूर्वक √जस् (क्रियासातत्ये)–√कम्—√हिंस—√दीप् धातुभ्यो रः । इत्यादि–कम्प्रा । स्मेरम् । अजस्रम् । कम्रा । हिंस्रम् । दीप्रम् इत्युदाहरणानि ।

सनाशंसभिक्ष उः ॥१६८॥

'सन्' प्रत्ययो गृह्यते न धातुः । सन्नन्तेभ्यः, आशंसेः, भिक्षेश्च 'उ' प्रत्ययः । चिकीर्षुः । आशंसुः । भिक्षुः ।

न धातुः–अनभिधानात् । गर्गादिगणे 'विजिगीषु' शब्दस्य पाठादिदं विज्ञायते । आ √शंस् इच्छार्थको भवति । आङि √शसि इच्छायाम् इत्यस्य ग्रहणमिति भावः ।

विन्दुरिच्छुः ॥१६९॥

विदेर्नुगागमः, इषेश्छत्वम् 'उ' प्रत्ययश्च निपात्यते । वेदनशीलो विन्दुः । एषणशील इच्छुः ।

ज्ञानार्थस्य √विद् धातोः इच्छार्थस्य √इष धातोर्ग्रहणम् । छत्वम्–'छे च' इत्यनेन 'तुक्', तकारस्य चकारः ।

क्याच्छन्दसि ॥१७०॥

क्यच्–क्यष्—क्यङां ग्रहणम् । क्यान्ताच्छन्दसि तच्छीलादिषु 'उ' । मित्रयुः । संस्वेदयुः । सुम्नयुः ।

मित्रयुः–मित्रमिच्छति । 'सुप आत्मनः क्यच्' । संस्वेदयुः–लोहितादिगणे पाठात् संस्वेद + क्यष् । सुम्नयुः–सुम्न इवाचरति 'कर्तुः क्यङ्........' इत्यनेन 'क्यङ्' ।

आदृगमहनजनः किकिनौ लिट् च ॥१७१॥

आकारान्तात्, ऋकारान्ताच्च, √गम-√हन-√जन एभ्यो धातुभ्यः छन्दसि 'कि-किनौ' तच्छीलादिषु, लिड्वच्च तौ भवतः। आदिति तकारो मुखसुखार्थः। न त्वयं तपरः। मा भूत्तादपि परस्तपर इति। पपिः सोमम्। ददिर्गाः। ऋ—मित्रावरुणौ ततुरिः। दूरे ह्यध्वा जगुरिः। जग्मिर्युवा। जघ्निर्वृत्रम्। जज्ञिर्बीजम् वर्षासु पर्जन्यः।

मुखसुखार्थः—न तु 'तपरस्तत्कालस्य' इत्यस्य प्रवृत्त्यर्थः। अन्यथा ॠकारान्तात् √तॄ इत्यस्मान्न स्यात्। आदन्तौ, पपिः—√पा + कि। लिड्वत्—लिटा तुल्यौ द्विर्वचनादि यत्कार्यं तदत्रापि भवतीति भावः। ददिः—√दा + कि। ततुरिः—√तॄ + कि। जगुरिः—गॄ + कि। ॠकारान्तावेतौ। जग्मिः, जघ्निः, जज्ञिः—'गम हन ··· ' इत्युपधालोपः। जज्ञिः इत्यत्र श्चुत्वं ञकारः।

❀(वा०) उत्सर्गश्छन्दसि सदादिभ्योऽपि दर्शनात्। सेदिः। नेमिः। उत्सर्गः—सामान्येन विधानम्।

❀(वा०) भाषायां धाञ् कृसृगमिजनिनमिभ्यः। दधिः। चक्रिः। सस्रिः। जग्मिः। जज्ञिः। नेमिः। 'जनि-गमि' इति क्रमो वृत्तौ।

❀(वा०) सासहिवावहिचाचलिपापतीनां निपातनम्। √सह-√वह-√चल-√पत धातुभ्यो यङन्तेभ्यः किकिनौ। 'किन्' इति प्रत्ययः नित्स्वरार्थः। 'ञ्नित्यादेर्नित्यम्' इत्याद्युदात्तत्वम् भवति।

स्वपितृषोर्नजिङ् ॥१७२॥

'छन्दसि' इति निवृत्तम्। स्वपेस्तृषेश्च नजिङ्। स्वप्नक्, स्वप्नजौ। तृष्णक्, तृष्णजौ।

❀(वा०) धृषेश्चेति वाच्यम्। धृष्णक्।

स्वप्नक्—√स्वप् + नजिङ् चोः कुः इति कुत्वं गकारः पक्षे ककारः। एवं √तृष् + नजिङ्। ङकारः गुणप्रतिषेधार्थं। इकारः उच्चारणार्थः।

शॄवन्द्योरारुः ॥१७३॥

आभ्यामारुः। शरारुः। वन्दारुः।

√शृ (हिंसायाम्) वदि (स्तुतौ) + आरुः, गुणः।

भियः क्रुक्लुकनौ ॥१७४॥

अस्मात् क्रु, क्लुकन् च। भीरुः। भीलुकः।

❀(वा०) क्रुकन्नपि वक्तव्यः। भीरुकः।

भीरुः–√भी + क्रु। कित्वान्न गुणः। एवं भीरुक–भीलुकौ।

स्थेशभासपिसकसो वरच् ॥१७५॥

स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। विकस्वरः।

क्रमशः √स्था–√ईश्–√भास्–√पिस्–वि पूर्वक √कस् धातवः सन्ति। पेस्वरः–'पुगन्तलघूपधस्य च' इति गुणः।

यश्च यङः ॥१७६॥

√या (प्रापणे) यङन्तादस्माद् वरच्। यायावरः।

यायावरः–√यायाय + वरच्। अतो लोपः, 'लोपो व्योर्वलि' इति यकारलोपः।

भ्राजभासधुर्विद्युतोर्जिपजुग्रावस्तुवः क्विप् ॥१७७॥

भ्राजदिभ्यस्तच्छीलादिषु क्विप्। विभ्राट्। भाः। धूः। विद्युत्। ऊर्क्। पूः। जूः, जुवौ। ग्रावस्तुत्।

विभ्राट्–वि √भ्राज (दीप्तौ) + क्विप्। क्विपो लोपः सर्वत्र। 'व्रश्चभ्रस्ज.........' इत्यादिना षत्वम्, तस्य जश्त्वेन डकारः; पक्षे चर्त्वेन टकारः। भाः–√भास् (दीप्तौ) रुत्वविसर्गौ। धूः–√धुर्व् (हिंसायाम्) 'राल्लोपः' इति वकारलोपः 'र्वोरुपधाया.........' इति दीर्घः। विद्युत्–वि √द्युत् (दीप्तौ) पूः–√पॄ (पूरणे पालने च) 'उदोष्ठ्यपूर्वस्य' इत्युत्वम्।

❀(वा०) जवतेर्दीर्घश्च निपात्यते। जूः। ग्रावस्तुत्–'ह्रस्वस्य पिति कृति तुक्' इत्यनेन 'तुक्'।

अन्येभ्योऽपि दृश्यते ॥१७८॥

युक्। भिद्।

*(वा०) क्विब्वचि प्रच्छयायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च । वाक् । शब्दप्राट् । आयतस्तूः । कटप्रूः । जूः । श्रीः ।

*(वा०) द्युतिगमिजुहोतीनां द्वे च । विद्युत् । जगत् ।

*(वा०) जुहोतेर्दीर्घश्च । जुहूः ।

*(वा०) ध्यायतेः सम्प्रसारणं च । धीः ।

अन्येभ्योऽपि धातुभ्यः क्विप् प्रत्ययो दृश्यते प्रयोगेषु । सम्प्रसारणम्–'ग्रहि ज्यावचि……' सूत्रेण प्राप्तं तत्र भवति । दृश्यते दीर्घः, सम्प्रसारणम् क्वचिन्न भवतः इति वार्तिकेषु प्रपञ्चितम् । वाक्, शब्दप्राट्–अत्र दीर्घः, सम्प्रसारणाभावः । विद्युत्–अत्र सम्प्रसारणम् ।

भुवः संज्ञान्तरयोः ॥१७९॥

भवतेः संज्ञायामन्तरे च गम्ये क्विप् । मित्रभूर्नाम कश्चित् । अन्तरे प्रतिभूः । धनिकाधमर्णयोरन्तरस्थः ।

शब्दशक्तेः स्वभावादस्मिन्नर्थे प्रतिभूः शब्दः न तु ग्रामयोः गेहयोर्वा अन्तरे यस्तिष्ठति सः ।

विप्रसंभ्यो ड्वसंज्ञायाम् ॥१८०॥

डुः । विभुः । प्रभुः । सम्भुः ।

*(वा०) 'डु' प्रकरणे मितद्र्वादिभ्य उपसंख्यानम् । मितद्रुः । शम्भुः ।

'भुवः' इत्यनुवर्तते । वि, प्र, सम् पूर्वाद् √भू धातोर्डुः असंज्ञायाम् । संज्ञायां विभूः, प्रभूः इति । शम्भुः–शम् भवति–भावयति (अन्तर्भावितण्यर्थोऽत्र √भूधातुः) अथवा शम् = कल्याणं भवत्यस्मादिति ।

धः कर्मणि ष्ट्रन् ॥१८१॥

धयतेर्दधातेश्च कर्मणि कारके ष्ट्रन् । धात्री स्तनदा, आमलकी चोच्यते ।

धात्री–धयन्ति ताम् इति √धेट् (पाने) + ष्ट्रन् = धात्र + ङीप्

(षित्त्वात्) दधति ताम् भैषज्यार्थम् इति √धा (धारणपोषणयोः) + ष्ट्रन् + ङीष् ।

दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ॥१८२॥

एभ्यः करणे ष्ट्रन् । √दाप् (लवने) दात्रम् । नेत्रम् । √शसु (हिंसायाम्) शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्त्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्त्रम् । दंष्ट्रा । नद्ध्री ।

दंशेरनुनासिकलोपेन निर्देशो ज्ञापनार्थः क्ङितोऽन्यस्मिन्नपि प्रत्यये न लोपो भवतीति तेन ल्युटचपि दशनम् ।

नेत्रम्–√नी प्रापणे) योत्रम्–√यु (मिश्रणे) एवम् √युजिर् (योगे), √स्तु (स्तुतौ) √तुद् (व्यथने) √षिञ् (बन्धने) √सिच् (क्षरणे), √मिह (सेचने) √पत् (गतौ) √दंश (दशने) √नह (बन्धने) इति धातवो ज्ञेयाः । दंष्ट्रा–अजादिगणे पाठात् टाप् । नद्ध्री–नद्ध्र + ङीष् षित्त्वात् ।

दशनम्–√दंश + ल्युट् । अत्र कित्त्वङित्त्वाभावेऽपि 'दश' निर्देशबलादनुनासिकलोपः ।

हलसूकरयोः पुवः ॥१८३॥

पुवतेर्धातोः करणे ष्ट्रन् । तच्चेत्करणं हलसूकरयोरवयवो भवति । हलस्य पोत्रम् । सूकरस्य पोत्रम् । मुखमित्यर्थः ।

पू–√पूङ्–√पूञोः सामान्येन ग्रहणम् । पोत्रम्–पवते पुनीते वाऽनेनेति ।

अर्त्तिलूधूसूखनसहचर इत्रः ॥१८४॥

एभ्यः करणे कारके 'इत्र' प्रत्ययः । अरित्रम् । लवित्रम् । धवित्रम् । √षू प्रेरणे सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् ।

एभ्यः–√ऋ–लू–√धू–√सू–√खन–√सह–√चर इति धातुभ्यः । √षू प्रेरणे–नतु√षूङ् प्राणिप्रसवे निरनुबन्धनिर्देशात् ।

पुवः संज्ञायाम् ॥१८५॥

पूङ्–√पूञोः सामान्येन ग्रहणम् । पुवः करणे 'इत्रः' समुदायेन संज्ञा गम्यते चेत् । दर्भः पवित्रम् । बर्हिः पवित्रम् ।

पवित्रम्–पवते पुनीते वाऽनेन । ऊकारस्य गुणोऽवादेशश्च । **बर्हिः पवित्रम्**-बर्हिषा कृतमिति । प्रदेशिन्या अङ्गुलेर्वेष्ठनमिदमुच्यते ।

कर्त्तरि चर्षिदेवतयोः ॥१८६॥

अस्मात्करणे कर्तरि च 'इत्रः' । ऋषिदेवतयोर्यथाक्रमं सम्बन्धः । पूयतेऽनेन पवित्रोऽयमृषिः । देवतायाम् अग्निः पवित्रं स मा पुनातु ।

यथाक्रमम्–ऋषौ करणे, देवतायां कर्त्तरीति भावः ।

ञीतः क्तः ॥१८७॥

'ञि' इत् यस्य तस्माद् भावे क्तः । मिन्नः । क्ष्विण्णः । धृष्टः ।

क्रमशः √ञिमिदा (स्नेहने) √ञिक्ष्विदा (स्नेहनमोचनयोः) √ञिधृषा (प्रसहने) इति ञिकारेतो धातवः सन्ति । **मिन्नः, क्ष्विण्णः**–'रदाभ्याम् ......' इत्यनेन । धातोर्दकारस्य 'क्त' इत्यस्य तकारस्य च नकारः । **क्ष्विण्णः** इत्यत्र नस्य णत्वम् ।

मतिबुद्धिपूजार्थेभ्यश्च ॥१८८॥

मतिरिच्छा । बुद्धिर्ज्ञानम् । पूजा सत्कारः । एवमर्थेभ्यो वर्त्तमाने क्तः । राज्ञां मतः । इष्टः । बुद्धः । पूजितः । अर्चितः ।

शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि ।
रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि ॥
हृष्टतुष्टौ तथा कान्तस्तथोभौ संयतोद्यतौ ।
कष्टं भविष्यतीत्याहुरमृतः पूर्ववत्स्मृतः ॥

एतौ श्लोकौ भाष्यकर्तुः । तत्र भाष्ये 'अमृताः' इति पाठः । न म्रियन्ते इत्यमृताः ।

कर्मणिदिवापूःसर्वसत्सूबहुलमन्येष्वपिनन्त्रोः
शमिति भंजभासधः कर्मण्यष्टौ ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
तृतीयाध्यायस्य द्वितीयः पादः ।

मतः आदि–क्रमशः √मन्–√इष–√बुध–√पूज–√अर्च धातवो ज्ञेयाः ।

शीलितः आदि–क्रमशः √शील–√रक्ष–√क्षमूष्–आ √क्रुश्–√जुषो–√रुष–अभि वि आ √हृ–√हृष्–√तुष्–√कमु–सम् √यम–उद् √यम–√कष–नञ्√मृङ् एत्येते धातवः सन्ति ।

सूत्रवर्तिना चकारेणैतेषां सङ्ग्रहः । राज्ञां मतः इत्यादिषु 'क्तस्य च वर्त्तमाने' इति षष्ठी ।

तृतीयाध्यायस्यास्मिन् द्वितीये पादे कर्मण्यण्, दिवाविभा……, पूःसर्वयोर्दारिसहोः, सत्सूद्विष……, बहुलमाभीक्ष्ण्ये, अन्येष्वपि दृश्यते, नन्वोर्विभाषा, शमित्यष्टाभ्यो घिनुण्, भञ्जभासमिदो घुरच् इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा धः कर्मणि ष्ट्रन् इत्यत आरभ्य अष्टौ सूत्राणीति संकलनेन अष्टाशीत्यधिकशतं (१८८) सूत्राणि सन्ति ।

इति काशिकावृत्तिसार-सुधायां
तृतीयाध्यायस्य द्वितीयः पादः ।

अथ तृतीयाध्याये तृतीयः पादः

उणादयो बहुलम् ॥१॥

वर्त्तमान इत्येव । वर्त्तमाने धात्वर्थे संज्ञायां विषये उणादयः प्रत्यया बहुलं भवन्ति । केचिदविहिता एव प्रयोगत उन्नीयन्ते ।

'वर्त्तमाने लट्' इति सूत्रात् 'वर्त्तमाने' तथा 'पुवः संज्ञायाम्' इति सूत्रात् 'संज्ञायाम्' इति पदद्वयम् अनुवर्त्तते ।

बहुलम्—बहून् अर्थान् लाति । बहुलस्य भावो **बाहुलकम्** । तेन कुत्रचित् शास्त्रस्य (सूत्रस्य) प्रवृत्तिः, कुत्रचित् अप्रवृत्तिः, कुत्रचित् विकल्पः, कुत्रचित् अन्यत्प्राप्तम् अन्यद्भवति इति चतुर्विधानि शब्दरूपाणि प्रयोगवशाद् ज्ञेयानि । **उन्नीयन्ते–ऊह्यन्ते** = कल्प्यन्ते इति भावः तदयं संग्रहः **श्लोकः—**

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥

अर्थात् ये शिष्टजनप्रयुक्ताः शब्दाः सन्ति संज्ञारूपास्तेषु धातुरूपाणि, प्रत्ययाः, अनुबन्धः उणादिषु एतदेव ऊहात्मकं शास्त्रम् । 'उण्' आदिर्येषां ते उणादयः । कारुः—√कृ + उण् । वायुः—√वा + उण् । साधुः √साध् + उण् इत्यादीन्युदाहरणानि ।

भूतेऽपि दृश्यन्ते ॥२॥

वृत्तं तदिति वर्त्म । चरितं चर्म । दृशिग्रहणं प्रयोगासनुरारार्थम् ।

भूते—भूतकाले उणादयः दृश्यन्ते-प्रयोगानुसारमिति भावः। **वर्त्म**-√वृत् + मनिन्। **चर्म**-√चर् + मनिन्।

भविष्यति गम्यादयः ॥३॥

भविष्यति काले गम्यादयः शब्दाः साधवः। प्रत्ययस्यैव भविष्यत्कालता विधीयते न प्रकृतेः। ग्रामं गमी। आगामी। प्रस्थायी।

※(वा०) अनद्यतन उपसंख्यानम्। श्वो गमी ग्रामम्। **गमी**—√गम् + इनि। **आगामी**—आ √गम् + इनि 'आङि णिच्च' इति णित्वाद् वृद्धिः। **प्रस्थायी**—प्र √स्था + णिनि युगागमश्च।

प्रत्ययस्य......प्रकृतेः—अयम्भावः-अत्र इनि-णिनि इत्येतौ प्रत्ययौ भविष्यत्कालस्य द्योतकौ न भविष्यत्पर्यायाः गम्यादयः। लृट्लकारेण निर्देशकरणात् लुटि न स्यादिति वार्तिकमाह-अनद्यतन इति।

यावत्पुरानिपातयोर्लट् ॥४॥

एतयोर्योगे भविष्यति लट्। यावद्भुङ्क्ते। पुरा भुङ्क्ते।

भुङ्क्ते—'भुजोऽनवने' इत्यात्मनेपदम्। **यावत्-पुरा** इत्येतौ निपातौ निश्चयं द्योतयतः।

विभाषा कदाकर्ह्योः ॥५॥

कदा भुङ्क्ते। कदा भोक्ष्यति। एवं कर्हि।

कदा, कर्हि—इत्येतयोरुपपदयोर्भविष्यति काले वा लृट्। पक्षे लट्। **कर्हि भुङ्क्ते**। **कर्हि भोक्ष्यति**। लुड्विषयेऽपीदं प्रवर्त्तते—**कदा भुङ्क्ते वा भोक्ता**। एवं **कर्हि भुङ्क्ते वा भोक्ता**।

किंवृत्ते लिप्सायाम् ॥६॥

किमो वृत्तं किंवृत्तम्। वृत्तग्रहणेन तद्विभक्त्यन्तं गृह्यते। डतरडतमौ परिसंख्यानं स्मर्यते। लिप्सायां लट्। भवन्तो भोजयन्ति।

भोजयिष्यन्ति । भोजयितारः । कतरो भिक्षां ददाति । दास्यति । दाता । एवं कतमः ।

वर्त्ततेऽस्मिन्निति **वृत्तम्** । किमो वृत्तमिति शेषषष्ठ्या समासः । **डतर-डतमौ**–डतरडतमान्तं 'किम्' अर्थात् कतर-कतमौ । प्रत्ययग्रहणे तदन्तस्यापि-ग्रहणम् भवति, तेन तयोर्ग्रहणम् । **परिसंख्यानम्**—नियमः तेन किंतराम्, किं पुरुषः इत्यादिषु न भवति । **लिप्सा**–लब्धुमिच्छा । **कतरो भिक्षां ददाति**-लब्धुकामो जनः पृच्छति तेन लिप्साऽत्र गम्यते । विभाषाऽनुवर्त्तनात् पक्षे लृट्-लुटौ ।

लिप्स्यमानसिद्धौ च ॥७॥

लिप्स्यमानात् सिद्धिः । तस्यां गम्यायां भविष्यति वा लट् । अकिंवृत्तेऽपि । योऽन्नं ददाति/दास्यति/दाता/स स्वर्गं याति/यास्यति/याता । लिप्स्यमानादन्नात् स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति ।

लिप्स्यमानात् सिद्धिः—पञ्चमीतत्पुरुषः । सिद्धिः स्वार्गादेरितिभावः ।

लोडर्थलक्षणे च ॥८॥

लोडर्थः प्रैषादिः । लक्ष्यते येन स लोडर्थलक्षणो धात्वर्थः । तत्र भविष्यति वा लट् । गुरुश्चेदायाति/आयास्यति/आयाता । अथ त्वं छन्दोऽधीष्व । गुर्वागमनमध्ययनप्रैषस्य लक्षणम् ।

प्रैषः—प्रेषणम् । आदिशब्देन विधिनिमन्त्रणामन्त्रणाधीष्टप्रार्थनाः लक्ष्यन्ते । **अध्ययनप्रैषः**—अध्ययनस्य विषयः प्रैषः उत्तरपदलोपी समासः । **छन्दः-अधीष्व**–'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इति लोट् । छात्रस्य गुरो-रागमनमपेक्ष्याध्ययने प्रैषता ।

लिङ् चोर्ध्वमौहूर्त्तिके ॥९॥

भविष्यति विभाषा लोडर्थं इति चानुवर्त्तते । ऊर्ध्वमौहूर्त्तिके पूर्वस्मिन् निमित्ते लिङ् चात् लट् । ऊर्ध्वं मुहूर्त्ताद्-उपरि मुहूर्त्तस्य

गुरुश्चेदागच्छेत् / आगच्छति / आगमिष्यति / आगन्ता वा । अथ त्वं छन्दोऽधीष्व ।

ऊर्ध्वमौहूर्त्तिकः—ऊर्ध्वं मूहूर्त्ताद्भवः निपातनात्समासः उत्तरपद-वृद्धिश्च । लट्-लृट्-लुट् इत्यपि भवतः । ऊर्ध्वमौहूर्त्तिके-वर्त्तमानसमीपे इत्यर्थः ।

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ॥१०॥

भोक्तुं व्रजति । भोजको व्रजति ।

क्रियार्था—अर्थः=प्रयोजनम् । क्रियार्था क्रिया चेदुपपदे स्यात्तदा धातोर्भविष्यति काले तुमुन्-ण्वुल् प्रत्ययौ भवतः । भोक्तुं व्रजति—अत्र भुजि-क्रियार्था व्रजनक्रियोपपदमस्ति ।

भाववचनाश्च ॥११॥

भविष्यतीत्येव । भाववचना घञ्-आदयो भवन्ति । पाकाय व्रजति ।

'भावे' इत्यस्याधिकारे ये घञादयो विहिता ते भविष्यति काले क्रियायामुपपदे क्रियार्थायां भवन्ति । पाकाय–'तुमर्थाच्च भाववचनात्' इत्य-नेन चतुर्थी । एवम् भूतये व्रजति । अत्र भाववाचकः 'क्तिन्' प्रत्ययः ।

अण् कर्मणि च ॥१२॥

काण्डलावो व्रजति ।

भविष्यति काले कर्मण्युपपदे क्रियायां क्रियार्थायाम् धातोरण् प्रत्ययो भवति । काण्डलावः–काण्डं लवितुमित्यर्थः । अत्र क्रियार्था क्रिया √लूञ् (छेदने) धातुः । अणि 'वृद्धि : आव्-आदेशश्च' लावः । उपपदसमासः । एवम् अश्व-दायो व्रजति ।

लृट् शेषे च ॥१३॥

क्रियार्थोपपदादन्यः शेषः । भविष्यतीत्येव । करिष्यामीति व्रजति । शेषेऽपि करिष्यति । हरिष्यति ।

चकारात् क्रियायां चोपपदे क्रियार्थायाम् । शेषे—शुद्धे इत्यर्थः ।

लृटः सद्वा ॥१४॥

सत्संज्ञौ शतृशानचौ । करिष्यन्तं पश्य । करिष्यमाणम् ।

'तौ सत्' इत्यनेन शतृशानच्प्रत्यययोः सत्संज्ञा । लृटः स्थाने एतौ विकल्पेन भवतः । व्यवस्थितविभाषाश्रयणात् प्रथमासमानाधिकरण एव विकल्पः-करिष्यन् देवदत्तः । करिष्यमाणो वा । पक्षे 'लट्'लकारः करिष्यति, करिष्यते ।

अनद्यतने लुट् ॥१५॥

श्वः कर्त्ता ।

अनद्यतने भविष्यदर्थे वर्त्तमानाद्धातोर्लुट् । अद्य भावो नास्त्यस्मिन्निति अनद्यतनः । तेन मिश्रिते भविष्यत्काले 'लृट्' एव अद्य श्वो वा भविष्यति ।

पदरुजविशस्पृशो घञ् ॥१६॥

त्रिष्वपि कालेष्वेभ्यो घञ् । पद्यते-पादः । रुजति-रोगः । विशति-वेशः । स्पृशति-स्पर्शः ।

पादः—घञो ञित्त्वात् 'अत उपधायाः' इति वृद्धिः । इतरेषु रोगादिषु त्रिषु गुणः ।

सृ स्थिरे ॥१७॥

सर्तेर्धातोः स्थिरे कर्त्तरि घञ् प्रत्ययः । 'स्थिर' इति काला-

न्तरस्थायी पदार्थं उच्यते । सुचिरं तिष्ठन् कालान्तरं स्पृशतीति धात्वर्थस्य कर्त्ता युज्यते । चन्दनसारः ।

※व्याधिमत्स्यबलेष्विति वाच्यम् । अतीसारः । विसारो मत्स्यः । सारो बलम् ।

सुचिरं⋯स्पृशतीति⋯युज्यते—स चिरं⋯सरतीति⋯युज्यते । इति पाठान्तरम् । चन्दनसारः–चन्दनस्य सार इति षष्ठीसमासः । अतीसारः– 'उपसर्गे घञ्यमनुष्ये बहुलम्' इति दीर्घः । सारः–'अचो ञ्णिति' इति वृद्धिः ।

भावे ॥१८॥

घञ् । पाकः । त्यागः ।

भावे—अत्र क्रियासामान्यवाची √भू धातुः । तेन सर्वेभ्यो धातुभ्यः 'घञ्' प्रत्ययो विधीयते । धात्वर्थस्य साध्यरूपस्य यः सिद्धता=निष्पन्नता रूपो धर्मस्तत्र 'घञ्' प्रत्ययो भवति । पाकः, त्यागः–अत्र √पच्, √त्यज् धातू स्तः । क्रमशः चकार-जकारयोः कुत्वेन ककार-गकारौ भवतः ।

अकर्तरि च कारके संज्ञायाम् ॥१९॥

अकर्त्तरि कारके संज्ञायां विषये धातोर्घञ् । प्रास्यन्ति तमिति प्रासः । आहरन्ति तस्माद्रसमित्याहारः ।

अकर्त्तरि—कर्तृवर्जिते । प्रासः–प्र, √असु (क्षेपणे)+घञ् । प्रासः कुन्तास्त्रम् । आहारः–आ √हृ+घञ् । चकारः 'संज्ञायाम्' इत्यनन्तरं योज्यः । तेन क्वचिदसंज्ञायामपि दायः, लाभः इत्यादि ।

परिमाणाख्यायां सर्वेभ्यः ॥२०॥

परिमाणाख्यायां सर्वधातुभ्यो घञ् । एकस्तण्डुलनिश्चायः । द्वौ शूर्पनिष्पावौ ।

निश्चायः—निस् √चि + घञ् । निचाय इत्यपि पाठान्तरम् । निश्चायो निचायो वा राशिः । राशेरेकत्वेन परिमाणं गम्यते । तण्डुलानां निश्चाय इति षष्ठीसमासः । निष्पावः—निष्पूयते शोद्धयते तुषाद्यपनयनेन यः तण्डुलादिः । निस् √पू + घञ् । शूर्पेण निष्पावः अत्र शूर्पेण परिच्छित्तिर्भवति ।

इङश्च ॥२१॥

घञ् । अध्यायः ।

इङो धातोर्घञ् । √इङ् अधिपूर्वक एव प्रयुज्यते । अधीयते इति अध्यायः कर्मणि घञ् । अधि √इङ् + घञ् । इङो 'वृद्धिरायादेशः अधि + आयः 'यण्' सन्धिः । एवम् उपेत्याधीयतेऽस्मादिति उपाध्यायः । स्त्रियाम् उपाध्याया/उपाध्यायी ।

❀√शॄ वायुवर्णनिवृतेषु । शीर्यते अनेनेति शारो वायुः । शीर्यते–चित्रीक्रियते अनेनेति शारो वर्णः । शीर्यते–निव्रियते शरीरमनेनेति शारः निवृतम्–प्रावरणमित्यर्थः । निःशेषेण शीर्यते अनेनेति नीशारः (रजाई इति भाषायाम्) गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः ।

उपसर्गे रुवः ॥२२॥

उपसर्गे उपपदे रौतेर्घञ् । संरावः । विरावः ।

संरावः—ञित्वाद् वृद्धिराव्आदेशश्च । एवं विरावोऽपि ।

समि युद्रुदुवः ॥२३॥

समि उपपदे एभ्यो घञ् । संयावः । संद्रावः । संदावः ।

संयावः इत्यादि—ञित्त्व्आद्वृद्धिराव्आदेशश्च ।

संयावः = अपूपविशेषः । सन्द्रावसन्दावौ पलायनपर्यायौ । अनुस्वारपरसवर्णविधिः ।

श्रिणीभुवोऽनुपसर्गे ॥२४॥

श्रायः । नायः । भावः ।

√श्रि–√णी (नी)–√भू धातुभ्योऽनुपसर्गेभ्यो 'घञ्' । उपसर्गे उपपदे तु प्रश्रयः । प्रणयः । प्रभावश्च ।

वौ क्षुश्रुवः ॥२५॥

'वि' शब्दे आभ्यां घञ् । विक्षावः । विश्रावः ।

विशब्दे—वि-उपसर्गे उपपदे ।

अवोदोर्नियः ॥२६॥

अव, उत् अनयोर्नयतेर्घञ् । अवनायः । उन्नायः ।

उन्नायः—उत्+नायः इति स्थितौ 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रेण तस्य 'नः' ।

प्रे द्रुस्तुस्रुवः ॥२७॥

प्रद्रावः/प्रस्तावः । प्रस्रावः ।

प्रे (उपसर्गे) उपपदे √द्रु–√स्तु–√स्रु एभ्यो घञ् ।

निरभ्योः पूल्वोः ॥२८॥

यथासंख्यमुपसर्गसम्बन्धः । निष्पावः । अभिलावः ।

यथासंख्यम्—नि√पू, अभि √लूञ् इत्यस्मादित्यर्थः √पू–√पूङ्–√पूञ् इत्युभयोर्ग्रहणम् ।

उन्न्योर्ग्रः ॥२९॥

उत्–निएतयोर्गृ इत्यस्याद् घञ् । उद्गारः । निगारो देवदत्तस्य ।

√गॄ—अत्र √गॄ शब्दे तथा √गॄ निगरणे इत्युभयोर्ग्रहणम् उद्गारः-अतिप्रवृद्धः शब्दः । निगारो भक्षणम् ।

कॄ धान्ये ॥३०॥

अस्मादुन्न्योर्घञ् । धान्यविषयश्चेद्धात्वर्थो भवति । उत्कारो धान्यस्य । निकारो धान्यस्य ।

√कॄ—विक्षेपार्थकस्य ग्रहणम् न तु हिंसार्थकस्य । अत्र उत्कारनिकार-शब्दौ विक्षेपार्थकौ ।

यज्ञे समि स्तुवः ॥३१॥

यज्ञविषये प्रयोगे सम्पूर्वात्स्तौतेर्घञ् । संस्तावश्छन्दोगानाम् ।

संस्तावः—अधिकरणे घञ् । समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः स देशः संस्तावः कथ्यते ।

प्रे स्त्रोऽयज्ञे ॥३२॥

प्रे उपपदे √स्तॄ अस्माद् घञ् । न चेद्यज्ञविषयः प्रयोगः । शंखप्रस्तारः । मणिप्रस्तारः । नेह—बर्हिष्प्रस्तरः ।

√स्तॄञ् आच्छादने इत्यस्य ग्रहणम् । बर्हिष्प्रस्तरः-प्रस्तरः मुष्टि-विशेषः । बर्हिषां प्रस्तरः षष्ठी तत्पुरुषः, 'इदुदुपधस्य चाप्रत्ययस्य' इति विसर्गस्य षत्वम् ।

प्रथने वावशब्दे ॥३३॥

प्रथने गम्ये विपूर्वात् स्तृणातेर्घञ् । तच्चेत् शब्दविषयं न । विस्तारः कंबलस्य । अशब्दे किम् ? विस्तरो वचसाम् ।

√स्तॄञ् आच्छादने इति पूर्वसूत्रात् 'स्त्रः' इत्यनुवर्त्तनाल्लभ्यते । प्रथनम्-विस्तीर्णता । विस्तरो वचसाम्—अत्र प्रथनं शब्दविषयम् । वावशब्दे—वौ+अशब्दे ।

छन्दोनाम्नि च ॥३४॥

'वौ, स्त्र' इति वर्त्तते। विपूर्वात् स्तृणातेश्छन्दोनाम्नि घञ्। वृत्तमिह छन्दो गृह्यते। यस्य गायत्र्यादयो विशेषाः, न मन्त्रब्राह्मणम् नामग्रहणात्। विष्टारबृहती छन्दः। विष्टारबृहती, इदं छन्दो-नाम।

विष्टारबृहती—विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ्। केचित् 'वि' इत्युपसर्गं नानुवर्त्तयन्ति तेन प्रस्तारपङ्क्तिः। आस्तारपङ्क्तिः। संस्तारपङ्क्तिः इति रूपाणि भवन्तीत्याहुः।

उदि ग्रहः ॥३५॥

उद्युपपदे ग्रहेर्घञ्। उद्ग्राहः।

उद्ग्राहः—ऊर्ध्वप्रदेशे ग्रहणम्।

❀(वा०) छन्दसि निपूर्वादपीष्यते स्रुगुद्यमननिपातनयोः। येनाग्नावाहुतिर्दीयते तत्पात्रं स्रुक् तस्य उद्यमनम्–ऊर्ध्वनयनम् निपातनम्–अधोनयनम्। उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्। 'हृग्रहोर्भश्छन्दसि' इत्यनेन हकारस्य भकारः।

समि मुष्टौ ॥३६॥

मुष्टिविषयश्चेद्धात्वर्थः। मुष्टिरङ्गुलिसन्निवेशः। अहो मल्लस्य सङ्ग्राहः। दृढमुष्टिताऽऽख्यायते।

सम् इत्युपपदे √ग्रह धातोर्घञ्। सन्निवेशः–रचनाविशेषः।

परिन्योर्नीणोर्द्यूताभ्रेषयोः ॥३७॥

परि, नि–क्रमेण एतयोरुपपदयोः √नी–√इण् आभ्यां यथासंख्यं द्यूताभ्रेषयोरर्थयोर्घञ्। पदार्थानामनपचारो यथाप्राप्तस्य करणमभ्रेषः। द्यूते-परिणायेन शारान् हन्ति। अभ्रेषे-एषोऽत्र न्यायः।

क्रमशः, यथासंख्यम्—द्यूतेऽर्थे परि √नी इत्यस्मात् अभ्रेषेऽर्थे नि √इण् इत्यस्मात् 'घञ्' इति तात्पर्यम् । **परिणायेन**-परिणाय इत्युदाहरणम् । 'उपसर्गाद.....' इति णत्वम् । **परिणायः**=शाराणां परितो नयनम् । **अभ्रेषः-भ्रेषः**=चलनम् (स्वरूपात्) तद्भिन्नः स एवानपचारः । स्पष्टमाह-यथाप्राप्तस्य (युक्तेः, शास्त्रात् लोकप्रसिद्धेर्वा) करणम् ।

परावनुपात्यय इणः ॥३८॥

परावुपपदे इणो घञ् । क्रमप्राप्तस्यानतिपातोऽनुपात्ययः तस्मिन् गम्ये । परिपाटीति यावत् । तव पर्यायः मम वा ।

अनतिपातः—अतिपातः-अतिक्रमः न अतिपातः इति 'नञ्' समासः । **पर्यायः**-क्रमः, आनुपूर्वी च । एकार्थकाः शब्दा अपि पर्यायाः कथ्यन्ते ।

व्युपयोः शेतेः पर्याये ॥३९॥

तव विशायः । मम विशायः । तव राजोपशायः ।

वि—उप इत्येतयोरुपपदयोः √शीङ् इत्यस्माद् धातोर्घञ् पर्याये गम्यमाने । **विशायः**-शयनस्य पर्यायः । **उपशायः**—राज्ञः समीपे शयनस्य पर्यायः ।

हस्तादाने चेरस्तेये ॥४०॥

हस्तादाने गम्ये चिनोतेर्घञ् नो चेत् स्तेयं भवति । आदेयस्य प्रत्यासत्तिः हस्तादानम् । पुष्पप्रचायः । चौर्येण चेत् पुष्पप्रचयः ।

हस्तेन आदानम्-प्रत्यासत्तिः । अनेन वस्तुनः समीपता स्पष्टा भवति । **स्तेये तु प्रचयः** । यष्ट्यादिना ग्राह्ये फलेऽपि प्रचय इत्येव ।

निवासचितिशरीरोपसमाधानेष्वादेश्च कः ॥४१॥

चेरित्येव । निवासे-वल्लिनिकायः । चितौ-आकायमग्निं चिन्वीत । शरीरे-अनित्यः कायः । उपसमाधाने-महान् गोमयनिकायः ।

एष्वर्थेषु √ चि धातो-'घञ्' भवति, आदेः चकारस्य 'क' आदेशोऽपि। राशीकरणमुपसमाधानम्। वल्लिः-लता तस्याः निवासः। चिखल्लिवियाकः इत्यप्युदाहरणम् काशिकावृत्तौ। चिखल्लिः जनपदः इति हरदत्तः। आयाकः- आचीयतेऽस्मिन् अष्टका इत्यधिकरणे घञ्। कायः-शरीरम्। गोमयनिकायः- प्रकीर्णानां गोमयानां राशीकरणम्।

संघे चानौत्तराधर्ये ॥४२॥

संघे वाच्ये चिनोतेर्घञ्, आदेश्च कः। संघः—एकधर्मसमावेशेन, औत्तराधर्येण वा। भिक्षुनिकायः। ब्राह्मणनिकायः। अनौत्तराधर्यं इति किम्? सूकरनिचयः।

एकधर्मसमावेशः-एकधर्मानुगमनम्। निवेश इत्यपि पाठः। औत्तराधर्यम्-उत्तरे चाधरे चोत्तराधराः तेषां भावः औत्तराधर्यम् तन्न भवति इत्यनौत्तराधर्यम्। सूकरनिचयः-स्तनपानाय सूकराः उत्तराधरभावेन शेरते इत्यत्रास्ति औत्तराधर्यम्।

कर्मव्यतिहारे णच् स्त्रियाम् ॥४३॥

व्यावक्रोशी। व्यावलेखी। व्यावहासी।

कर्म-क्रिया। व्यतिहारः-परस्परं करणम्। कर्मव्यतिहारे गम्यमाने धातोर्णच् स्त्रीलिङ्गे वाच्ये। 'णचः स्त्रियाम्' इति स्वार्थेऽञ्, 'टिड्ढाणञ्.....' इति ङीप्।

अभिविधौ भाव इनुण् ॥४४॥

अभिविधिरभिव्याप्तिः। क्रियागुणाभ्यां कार्त्स्न्येन सम्बन्धः, तत्र इनुण्। सांराविणं वर्तते।

अभिविधौ गम्यमाने भावे इनुण्। सांराविणम्-सम् √रु+इनुण् ततः 'अणिनुणः' इति सूत्रात् स्वार्थिकोऽण्। 'इनण्यनपत्ये' इति प्रकृतिभावात् टिलोपो न। एवं सांकूटिनम्। सान्द्राविणम् इत्यपि। यत्राभिविधिर्नास्ति तत्र संराव इत्यादि। सांराविणम्-हट्टस्य सम्यक् शब्दः।

आक्रोशेऽवन्योर्ग्रहः ॥४५॥

दुष्टानुवृत्तिसामर्थ्याद् 'घञ्' अनुवर्त्तते न 'इनुण्' । अव, नि-एतयोर्ग्रहेर्घञ् आक्रोशे गम्ये । अवग्राहः । आक्रोश इति किम् ? अवग्रहः पदस्य । निग्रहः चोरस्य ।

आक्रोशः—शापः अर्थात् अनिष्टाशंसनम् । अवग्राहः-अभिभवः । अवग्राहो हन्त ते वृषल भूयात् । एवं निग्राहः-बाधः । अवग्रहः-पदस्य छेदः । निग्रहः-निरोधः ।

प्रे लिप्सायाम् ॥४६॥

पात्रप्रग्राहेण चरति भिक्षुः पिण्डार्थी ।

प्र-उपपदे √ग्रह धातोर्घञ् प्रत्ययो भवति लिप्सायां गम्यमानायाम् । पात्रप्रग्राहेण-गृहीतपात्र इत्यर्थः । एवं स्रुवग्राहेण चरति द्विजो दक्षिणार्थी । उभयत्र 'लिप्सा' गम्यते ।

परौ यज्ञे ॥४७॥

यज्ञविषयश्चेत् प्रत्ययान्ताभिधेयः । उत्तरपरिग्राहः । अधरपरिग्राहः ।

वेदे स्फ्येन स्वीकरणं परिग्राहः । स्फ्यं खड्गाकारकाष्ठम् ।

नौ वृ धान्ये ॥४८॥

निशब्दे √वृङ्-√वृञ् इति सामान्यगृहीतस्य 'वृ' अस्य घञ् । धान्ये गम्ये । नीवारा व्रीहयः ।

शब्दशक्तिस्वभावात् धान्यविशेषे एव नीवाराः इति प्रयोगः ।

उदि श्रयतियौतिपूद्रुवः ॥४९॥

उदि श्रयत्यादिभ्यो घञ् । उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः । कथं पतनान्ताः समुच्छ्रयाः । वक्ष्यमाणं विभाषाग्रहणं सिंहावलोकन-न्यायादभिसंबध्यते ।

उच्छ्रायः—उत् √श्रि+घञ् । श्चुत्वछत्वसन्धिकार्यम् । समुच्छ्रयाः–महाभारतीयोऽयं प्रयोगः । वक्ष्यमाणम्–'विभाषाऽऽङि·····'सूत्रोक्तम् ।

विभाषाऽऽङि रुप्लुवोः ॥५०॥

आङि उपपदे रौतेः प्लवतेश्च विभाषा घञ् । आरावः/आरवः । आप्लावः/आप्लवः ।

विभाषा—घञभावे अप् ।

अवे ग्रहो वर्षप्रतिबन्धे ॥५१॥

'अव' उपपदे ग्रहेर्वा घञ् वर्षप्रतिबन्धे गम्ये । अवग्राहः/अवग्रहः ।

वर्षप्रतिबन्धः–'सत्त्वकर्मापराधादेरनावृष्टिर्भवेन्नृणाम् ।' इति वचनात् प्राणिनां कर्मापराधादिना निमित्तेन वर्षाभावः । अवग्रहः–घञभावे 'ग्रह वृ·····' इत्यादिना 'अप्' ।

प्रे वणिजाम् ॥५२॥

ग्रहेर्वा घञ् । समुदायो वणिजां सम्बन्धी चेत् । तुला गृह्यते येन सूत्रेण स शब्दार्थः । तुलाप्रग्राहेण चरति, वा तुलाप्रग्रहेण चरति वणिक् अन्यो वा ।

वा घञ्–प्र उपपदे इतिशेषः । तुलासूत्रं प्रायेण वणिजा सहचरम् । अन्यो वा–अयम्भावः, वणिजां सम्बन्धेन तुलासूत्रं लक्ष्यते, वणिजां तत्र प्राधान्यं न भवति । अन्योऽपि तुलाप्रग्राहेण चरति इति भावः । प्रग्राहेण, प्रग्रहेण इति तृतीयैकवचनान्ते उदाहरणे । घञभावे 'अप्' 'ग्रह वृ·····इति' सूत्रेण ।

रश्मौ च ॥५३॥

पूर्ववत्सर्वं रश्मौ वाच्ये । रथादियुक्तानामश्वादीनां संयमनार्था रज्जू रश्मिरिह गृह्यते । प्रग्रहः/प्रग्राहः ।

गृह्यते–प्रत्ययान्तौ प्रग्रहप्रग्राहशब्दौ रज्जुविशेषार्थकौ वर्त्तेते । तदनुरोधादत्र रश्मेः स एवार्थः ।

वृणोतेराच्छादने ॥५४॥

वृणोतेः पूर्ववत् वस्त्रे वाच्ये ।

वाच्ये–प्रत्ययान्तेन चेदाच्छादनविशेष उच्यते । प्रावारः/प्रवरः । वृणोतेः–रुधादिगणे पठितो गृह्यते नतु √वृङ् वरणे इति । आच्छादनार्थादन्यत्र प्रवरा गौः । प्रशस्ता इत्यर्थः ।

परौ भुवोऽवज्ञाने ॥५५॥

परीभावः/परिभवः ।

परीभावः–'उपसर्गस्य दीर्घत्वं क्विप्–घञादौ क्वचिद् भवेत्' इति 'परि' इत्यस्य दीर्घत्वम् । पक्षे परिभावः इत्यपि ।

एरच् ॥५६॥

इवर्णान्ताद् धातोर्भावे अकर्त्तरि च कारके संज्ञायाम् अच् प्रत्ययो भवति । चयः । जयः । नयः । अयः ।

*अज्विधौ भयादीनामुपसंख्यानम् । भयम् । वर्षम् ।

चयः—√चि + अच् । गुणोऽयादेशः । एवमन्यत्रापि । वर्षम् । वृषभो वर्षणात् इति भाष्यप्रयोगाद् वर्षणम् अपि भवति ।

ॠदोरप् ॥५७॥

ॠकारान्तेभ्य उवर्णान्तेभ्यश्च अप् प्रत्ययो भवति । करः । गरः । यवः ।

करः, गरः—क्रमशः √कॄ, √गॄ धातुभ्याम् अप्, गुणश्च । यवः–उकारान्त √यु धातोरप् । 'ॠदोरप्' इत्यत्र 'ॠत्' इति न परिच्छेदः अपि तु 'ॠद्' इति दकारो मुखसुखार्थः–उच्चारण–सौकर्यार्थ इति तात्पर्यम् । तेन प्रभवः इत्यत्रापि भवति । तकारे तु तात्परत्वात् दीर्घादूकारान्तान्न स्यात् ।

ग्रहवृदनिश्चिगमश्च ॥५८॥

एभ्योऽप् । ग्रहः । वरः । दरः । निश्चयः । गमः ।

❀(वा०) वशिरण्योरुपसंख्यानम् । वशः । रणः ।

निश्चयः—निस् √चि + अप् । 'एरच्' इत्यनेनात्र 'अच्' भवेत्तदानीमपि न रूपभेदः परन्तु स्वरे भेदो भवति । अचि अन्तोदात्तत्ता स्यात् अपि तु मध्योदात्तत्वं भवति । वशः, रणः–√वश् कान्तौ, √रण् शब्दे इति धातू ।

उपसर्गेऽदः ॥५९॥

उपसर्गे उपपदे अदेरप् । विघसः । प्रघसः ।

विघसः—'घञपोश्च' इति सूत्रेण अदः घस्लृ (घस्) आदेशः । विघसः–वैश्वदेवावशिष्टम् अन्नम् । प्रघसः–असुरः ।

नौ ण च ॥६०॥

चात् अप् । न्यादः । निघसः ।

न्यादः–नि √अद् + ण उपधावृद्धिः ।

व्यधजपोरनुपसर्गे ॥६१॥

व्यधः । जपः ।

अनुपसर्गयोर्व्यधजपोः (एताभ्यां धातुभ्याम्) अप् ।

स्वनहसोर्वा ॥६२॥

स्वनः/स्वानः । हसः/हासः ।

अनुपसर्गयोः स्वन-हसोर्वा 'अप्' पक्षे घञ् ।

यमः समुपनिविषु च ॥६३।

वा । संयमः/संयामः इत्यादि । अनुपसर्गेऽपि यमः/यामः ।

सम्, उप, नि, वि इत्युपपदेषु √यम् धातो र्वा अप् पक्षे घञ् । उपयमः/उपयामः । नियमः/नियामः । वियमः/वियामः ।

नौ गदनदपठस्वनः ॥६४॥

निगदः/निगादः । निनदः/निनादः ।

'नि' इत्युपपदे √गद, √नद, √पठ, √स्वन धातुभ्यो वा अप् । पक्षे घञ् । निपठः/निपाठः । निस्वनः/निस्वानः ।

क्वणो वीणायां च ॥६५॥

निपूर्वात् क्वणतेरनुपसर्गाच्च वीणायां च वा अप् । निक्वणः/निक्वाणः । क्वणः / क्वाणः । वीणायां खल्वपि-कल्याणप्रक्वणा वीणा/कल्याणप्रक्वाणा ।

वा अप्—पक्षे घञ् । प्रक्वणप्रक्वाणौ वीणाशब्दौ । कल्याणप्रक्वणा–बहुव्रीहिः । कल्याणः प्रक्वणः यस्याः सा ।

नित्यं पणः परिमाणे ॥६६॥

अस्मान्नित्यम् अप् परिमाणे । मूलकपणः । संव्यवहाराय मूलकादीनां परिमितो मुष्टिर्बध्यते तस्येदमभिधानम् ।

संव्यवहाराय.......अभिधानम्—प्रायः विक्रेतारः गुरु-लघुपरिमाणं निरूप्य द्वयोः त्रयाणां चतुर्णाम् वा मूलकानां मुष्टिं बध्नन्ति स परिमाण-विशेषः मूलकपणः इति शब्देनोच्यते । मूलकानां पणः इति षष्ठीसमासः ।

मदोऽनुपसर्गे ॥६७॥

विद्यामदः । धनमदः ।

√मद् इत्यस्मादनुपसर्गादप् । विद्यया मदः इति तृतीयासमासः ।

प्रमदसंमदौ हर्षे ॥६८॥

प्रमदः । संमदः ।

प्रमद-संमदौ इत्युभौ 'अप् प्रत्ययान्तौ' निपात्येते हर्षे वाच्ये ।

समुदोरजः पशुषु ॥६९॥

समुदोरुपपदयो रजेर्धातोः पशुविषये अप् । समजः पशूनाम् । समुदाय इत्यर्थः ।

एवम् उदजः पशूनाम् । प्रेरणमित्यर्थः ।

अक्षेषु ग्लहः ॥७०॥

ग्लह इति अप्सहितो लत्वार्थं निपात्यते । ग्लहः अक्षस्य ।

√ग्रह् धातोः 'अप्' रकारस्य लत्वं च निपात्यते । ग्लहः–अक्षकर्मणि यः पणो भवति स ग्लहः कथ्यते ।

प्रजने सर्त्तेः ॥७१॥

सर्त्तेः प्रजने अप् । गवाम् उपसरः । गोषु वृषभाणां गर्भाधानाय प्रथमम् उपसरणमुच्यते ।

उपसरः—उप √सृ + अप् । प्रजनः–प्रथमगर्भग्रहणम् ।

ह्वः सम्प्रसारणं च न्यभ्युपविषु ॥७२॥

एतेषूपपदेषु ह्वयतेः सम्प्रसारणम् अप् प्रत्ययश्च । निहवः । अभिहवः इत्यादि । घञोऽपवादः ।

निहवः–नि√ह्वे॒ञ् (स्पर्द्धायाम्) + अप् । एवम् उपहवः । विहवः इत्यपि ।

आङि युद्धे ॥७३॥

आहूयतेऽस्मिन्निति आहवः ।

आहवः–आ √ह्वे॒ञ् + अप् सम्प्रसारणञ्च ।

निपानमाहावः ॥७४॥

निपिबन्ति अस्मिन्निति निपानम् आहावः ।

आहावः–आ √ह्वेञ्+अप् । सम्प्रसारणं वृद्धिश्च निपात्यते । निपानम्=उदकाधारस्तत्र पशवो जलं पिबन्ति ।

भावेऽनुपसर्गस्य ॥७५॥

अनुपसर्गस्य ह्वयतेः सम्प्रसारणम् अप् प्रत्ययश्च भावे । हवे॑ हवे सुहवं॒ शूर॒मिन्द्र॑म् ।

हवः–√ह्वेञ्+अप् । आह्वानमित्यर्थः ।

हनश्च वधः ॥७६॥

भावेऽनुपसर्गस्येति वर्तते । हन्तेरप् वधादेशश्च । स चान्तोदात्तः । वधश्चोराणाम् ।

वधः–√हन्+अप् । अन्तोदात्तः–सूत्रे तथैवोच्चारणात् ।

मूर्तौ घनः ॥७७॥

मूर्तिः काठिन्यम् । तस्यां हन्तेरप् घनश्चादेशः । दधिघनः । घनं दधि । धर्मशब्देन धर्मी भण्यते ।

दधिघनः–दध्नः घनः इति षष्ठीतत्पुरुषः । घनं दधि–घनत्वापन्नमिति भावः । यथा शुक्लः पटः इति ।

अन्तर्घनो देशे ॥७८॥

अन्तः पूर्वाद्धन्तेरप् घनश्चादेशः । अन्तर्घनो बाह्लीकेषु देशविशेष उच्यते । अन्ये णान्तं पेठुः ।

अन्तर्हन्यन्ते (हृण्यन्ते) प्राणिनः अत्र इत्यर्थे अन्तर् √हन्+अप्, घनश्चादेशः। णान्तम्–अन्तर्घण इति । अयमपि साधुप्रयोगः आचार्यैस्तथा प्रतिपादितत्वात् । बाह्लीकेषु–वृत्तौ 'बाहीकेषु' इति पाठः ।

अगारैकदेशे प्रघणः प्रघाणश्च ॥७९॥

प्रघणः । प्रघाणः । द्वारकोष्ठको बाह्य उच्यते ।

प्रघणः–प्र √हन्+अप् घनादेशः । पक्षे वृद्धिः प्रघाणः । (प्रविशद्भिर्जनैः पादैः) प्रकर्षेण हन्यते इति ।

उद्घनोऽत्याधानम् ॥८०॥

अत्याधानं चेद्भवति । यस्मिन् काष्ठे स्थापयित्वा अन्यानि काष्ठानि तक्ष्यन्ते तदुच्यते ।

उद्घनः—उत् √हन्–उद्घनः इति निपात्यते अधिकरणे अप् । अत्याधानम्–अतिशब्दः 'उपरि' इत्यर्थकः √धा धातोः स्थापनमर्थः । अधिकरणे ल्युट् ।

अपघनोऽङ्गम् ॥८१॥

एकदेशः शरीरस्य न सर्वः किन्तु पाणिः पादश्च । अपघनः ।

अपघनः—अपहन्यते अनेनेति करणे अप् ।

करणेऽयोविद्रुषु ॥८२॥

अयस्–वि–द्रु, एषूपपदेषु हन्तेरप् घनश्च । अयोघनः । विघनः । द्रुघनः ।

अयोघनः—अयो हन्यते अनेन इति करणे अप् । विघनः–विशेषेण हन्यते अनेन । द्रुघनः–द्रवः–वनस्पतयो हन्यन्ते अनेन । द्रुघणः इति णान्तं केचिदाचार्या उदाहरन्ति ।

स्तम्बे क च ॥८३॥

चादप् । स्तम्बघ्नः स्तम्बघनः ।

स्तम्बघ्नः = स्तम्बः = शस्यचयः हन्यते अनेनेति स्तम्ब √हन् + क। 'गमहन....' इत्युपधालोपः, 'हो हन्तेः' इति कुत्वम् । स्तम्बघनः–स्तम्ब √हन् + अप् घनादेशश्च ।

परौ घः ॥।।८४।।

करणे हन इत्येव । अप् घादेशश्च । परिघः ।

परिघः–परिहन्यते अनेन । पलिघः इत्यपि । 'परेश्च घाङ्कयोः' इति विभाषया लत्वम् ।

उपघ्न आश्रये ।।८५।।

अस्मिन् हन्तेरप् उपधालोपश्च निपात्यते । पर्वतोपघ्नः ।

आश्रयशब्दः सामीप्यमुपलक्षयति । पर्वतोपघ्नः–पर्वतसमीपवर्ती । पर्वतेन उपहन्यते–सामीप्येन गम्यते इति कर्मणि अप् ।

सङ्घोद्घौ गणप्रशंसयोः ।।८६।।

समुदोरुपपदयोर्हन्तेरप् टिलोपो घत्वञ्च निपात्यते यथाक्रमं गणे प्रशंसायाञ्च । सङ्घः पशूनाम् । उद्घो मनुष्यः ।

सङ्घः–संहननम् सम् √हन् + अप् भावे । अनुस्वारपरसवर्णौ । उद्घः–उद् √हन् + अप् कर्मणि । अत्र √हन् ज्ञानार्थकः । वृत्तौ 'उद्घो मनुष्याणाम्' इत्युदाहरणम् ।

निघो निमितम् ।।८७।।

अप् प्रत्ययः टिलोपो घत्वञ्च निपात्यते, निमितं चेदभिधेयम् । समन्तान्मितं निमितम् । निघाः वृक्षाः । निघाः शालयः ।

समन्तान्मितम्–सर्वतः आरोहतः परिणाहतश्च तुल्यमित्यर्थः । निघाः–निर्विशेषं हन्यन्ते–ज्ञायन्ते इति कर्मण्यप् ।

ड्वितः क्त्रिः ।।८८।।

ड्वितो धातोः क्त्रिः । 'क्त्रेर्मम्नित्यम्' इतिवचनात् केवलो न

प्रयुज्यते । √डुपच्–पक्त्रिमम् । √डुवप्–उप्त्रिमम् । √डुकृञ्–कृत्रिमम् ।

डि्वतः–'डु' इति 'इत्' यस्य स तस्माद् धातोः । प्रयुज्यते–तेनावश्यम् मम्प्रत्ययान्ता एव पक्त्रिमादयः प्रयुज्यन्ते । पक्त्रिमम्–पाकेन निर्वृत्तम् उप्त्रिमम्–'वचिस्वपि·····' इत्यादिना सम्प्रसारणम् । एषु त्रिष्वपि 'डु' शब्दः 'आदिर्ञिटुडवः' इत्यनेन 'इत्' ।

ट्वितोऽथुच् ॥८९॥

ट्वितोऽथुच् । √टुवेपृ–वेपथुः । क्षवथुः ।

ट्वितः–'टु' इत् यस्य तस्मात् । अथुच्–भावे इति शेषः । वेपथुः–√टुवेपृ+अथुच् । वेपनमित्यर्थः । क्षवथुः–√टुक्षु (शब्दे) + अथुच् 'छींकना' इति भाषायाम् ।

यजयाचयतविच्छप्रच्छरक्षो नङ् ॥९०॥

'भावे' 'अकर्तरि च कारके' इति वर्तते । यजादिभ्यो नङ् प्रत्ययः । यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । रक्ष्णः ।

यज्ञः–√यज्+नङ् । 'स्तोः श्चुना श्चुः' इति नकारस्य ञकारः । एवं याच्ञा इत्यत्रापि √याच्+नङ् । याच्ञा शब्दः स्त्रियामेव भवति स्वभावात् । यत्नः–√यत्+नङ् । विश्नः–√विच्छ (गतौ)+नङ् । 'च्छ्वोः शूडनुनासिके च' इत्यनेन च्छकारस्य शकारः । एवम् प्रश्नः इत्यत्रापि √प्रच्छ +नङ् । रक्ष्णः–√रक्ष्+नङ् । 'ष्टुनाष्टुः' इत्यनेन नकारस्य णत्वम् ।

स्वपो नन् ॥९१॥

स्वप्नः ।

√स्वप्+नन् भावे इति शेषः ।

उपसर्गे घोः किः ॥९२॥

उपसर्ग उपपदे घुसंज्ञेभ्यः किः । कित्करणमातो लोपार्थम् । प्रदिः । प्रधिः । निधि : ।

√दा–√धा इति धात्वोः 'घु' संज्ञा भवति। **प्रदिः–प्र√दा + कि।** 'आतो लोप इति च' इत्याकारलोपः। **प्रधिः–प्र√धा + कि। एवं निधिः।**

कर्मण्यधिकरणे च ॥६३॥

घोरित्येव। कर्मण्युपपदे घुसंज्ञेभ्योऽधिकरणे कारके किः। जलं धीयतेऽस्मिन्निति जलधिः।

अत्र कर्म उपपदम् अधिकरणं प्रत्ययार्थः इति ज्ञेयम्। **जलधिः–जल √धा + किः।** पूर्ववदाकारलोपः।

स्त्रियां क्तिन् ॥६४॥

स्त्रीलिङ्गे भावादौ धातोः क्तिन्। घञजपामपवादः। कृतिः। चितिः।

❀(वा०) ग्लाम्लाज्याहाभ्यो निः। ग्लानिः इत्यादि।

भावादौ–आदि शब्देन कर्तृभिन्नकारकाणां ग्रहणम्। **कृतिः–√कृ + क्तिन्।** क्तिन्नन्ताः शब्दाः स्त्रियामेव भवन्ति। एवम् **प्राप्तिः। दीप्तिः। लब्धिः। श्रुतिः। स्तुतिः** इयादयो ज्ञेयाः। **ग्लानिः–एवं म्लानिः। ज्यानिः। हानिः।**

❀(वा०) सम्पदादिभ्यः क्विप्, क्तिन्नपीष्यते। उदाहरणानि–**सम्पत् सम्पत्तिः। विपत्/विपत्तिः। प्रतिपत्/प्रतिपत्तिः।**

स्थागापापचो भावे ॥६५॥

स्थादिभ्यो भावे क्तिन्। अङोऽपवादस्य बाधकः।

√स्था–√गा–√पा–√पच् इत्येतेभ्यो धातुभ्यः क्तिन्। **बाधकः–** 'आतश्चोपसर्गे' इत्यनेन √पच् धातोः षिद्भिदादिभ्योऽङ्' इत्यनेन **प्राप्तस्य।** क्रमशः उदाहरणानि–**प्रस्थितिः। उद्गीतिः। संपीतिः। पक्तिः।**

मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ॥६६॥

मन्त्रे गम्ये वृषादिभ्यः क्तिन्। वृष्टिः। इष्टिः। पक्तिः। मतिः। वित्तिः। भूतिः। वीतिः। रातिः। क्तिन् **सर्वत्र सामान्येन**

विहित एव । उदात्तार्थं वचनम् । इषेस्तु इच्छेति निपातनं वक्ष्यति । ततः क्तिन्नपि विधीयते । मन्त्रादन्यत्राद्युदात्तः ।

वृषादिभ्यः–सूत्रे वृष····वीरा इति द्वन्द्वे समासे प्रथमाबहुवचनं पञ्चम्यर्थे इति विभक्तिविपरिणामेन पञ्चम्यर्थो लभ्यते ।

ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च ॥९७॥

ऊत्यादयः शब्दाः निपात्यन्ते । ऊतिः इत्यादि ।

ऊतिः–√अव् + क्तिन् । यूतिः–√यु + क्तिन् । जूतिः–√जु + क्तिन् । उभयत्र दीर्घत्वं निपात्यते । सातिः–√षो + क्तिन् इत्वाभावः । हेतिः–हन् + क्तिन् हकाराकारस्य एत्वम् । कीर्तिः–√कॄत + क्तिन् ।

व्रजयजोर्भावे क्यप् ॥९८॥

व्रज्या । इज्या । पित्करणमुत्तरत्र तुगर्थम् ।

इज्या–'वचिस्वपि····' इत्यनेन सम्प्रसारणम् । उत्तरत्र–वक्ष्यमाणेषूदाहरणेषु ।

संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ॥९९॥

'भाव' इति न स्वर्यते । पूर्व एवात्रार्थाधिकारः । समजादिभ्यो धातुभ्यः संज्ञायां क्यप् स्त्रियाम् । समजन्ति (जनाः) अस्यामिति समज्या । निषद्या । निपत्या । मन्या । विद्या । सुत्या । शय्या । भृत्या । इत्या ।

न स्वर्यते–तेन तस्यानुवृत्तिर्नात्र भवति । 'पूर्व····भावे', 'अकर्तरि च कारके····' इति चाधिक्रियेते । निषद्या–निषीदन्ति अस्यामिति आपणः । निपत्या-पिच्छिला भूमिः । मन्या–गलपार्श्वशिरा । वृत्तौ 'मत्या' इति प्रयोगो लिखितः स च न्याससमर्थितः । मञ्जरीकारेण, भट्टोजिदीक्षितेन च तु 'मन्या' इत्येव स्वीकृतः । तदनुसारं नात्र अनुनासिकलोपतुगागमौ भवतः । भृत्या–जीविका । इत्या–ईयते–गम्यते अनया, शीविका । भृत्या-इत्या इत्येतयोस्तुगागमः ।

कृञः श च ॥१००॥

चात् क्यप्-क्रिया । कृत्या । कृतिः ।

क्रिया–√कृ + श + टाप् । 'सार्वधातुके यक्' इति यक् 'रिङ् शयग्लिङ्क्षु' इति 'रिङ्' आदेशः । कृत्या–क्यपि तुगागमः । कृतिः–√कृ + क्तिन् ।

इच्छा ॥१०१॥

इषेः 'श' प्रत्ययो यगभावश्च निपात्यते । इच्छा ।

❀(वा०) परिचर्यापरिसर्यामृगयाऽटाट्यानामुपसंख्यानम् ।

❀(वा०) जागर्तेरकारो वा । जागरा/जागर्या ।

'श' प्रत्ययः–भावे इति शेषः । इच्छा–√इष् + श + टाप् । 'इषुगमि…' इत्यादिना धातोः षकारस्य छकारः, तुगागमश्च । परिचर्या–पूजा । परिसर्या–इतस्ततो भ्रमणम् । अटाट्या-अतिभ्रमणम् ।

अ प्रत्ययात् ॥१०२॥

प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियाम् अकारप्रत्ययो भवति । चिकीर्षा । जिहीर्षा ।

चिकीर्षा–√कृ + सन् = चिकीर्ष + अ + टाप् स्त्रियाम् । एवं पुत्रीया । पुत्रकाम्या इत्यादि ।

गुरोश्च हलः ॥१०३॥

हलन्तो यो गुरुमान् ततः अः । कुण्डा । हुण्डा । ईहा । ऊहा ।

गुरुशब्देन गुरुमान् धातुर्गृह्यते अभेदोपचारात् । हुण्डा–सङ्घातः ।

षिद्भिदादिभ्योऽङ् ॥१०४॥

षितो भिदादेश्च अङ् । गणपठितेषु भिदादिषु निष्कृष्य प्रकृतयो गृह्यन्ते । √जॄष्–जरा । त्रपा । भिदा छिदा ।

निष्कृष्य-प्रत्ययात् पृथक्कृत्य । अङ्-स्त्रियामिति शेषः ।

चिन्तिपूजिकथिकुम्बिचर्चश्च ॥१०५॥

एभ्यो युचि प्राप्ते अङ् । चिन्ता । पूजा । कथा । चर्चा । चात् 'युच्' अपि चिन्तना ।

अङ्-स्त्रियामिति शेषः । युचि प्राप्ते-'ण्यासश्रन्थो युच्' इति सूत्रेण । कुम्बा-इत्यपि । कुम्बा-यज्ञस्थानस्य पर्याच्छादनम् ।

आतश्चोपसर्गे ॥१०६॥

आकारान्तेभ्यो धातुभ्य उपसर्गं उपपदे स्त्रियामङ् । प्रदा । उपदा ।

प्रदा-प्र√दा + अङ् + टाप् । एवं प्रधा । उपधा ।

ण्यासग्रन्थो युच् ॥१०७॥

ण्यन्तेभ्य आस-श्रन्थाभ्यां च युच् । अकारस्यापवादः । कारणा । आसना । श्रन्थना ।

अकारस्य-'अ प्रत्ययात्', 'गुरोश्च 'हलः' इत्येताभ्यां प्राप्तस्य । कारणा-√कृ + णिच् + युच् 'यु' इत्यस्य 'अन' आदेशः । नकारस्य णत्वम् । स्त्रियां टाप् ।

❀ (वा०) घट्टिवन्दिविदिभ्य उपसंख्यानम्-घट्टना । वन्दना । वेदना ।

❀ (वा०) इषेरनिच्छार्थस्य । अध्येषणा । अन्वेषणा ।

रोगाख्यायां ण्वुल् बहुलम् ॥१०८॥

धातोर्ण्वुल् प्रत्ययो भवति बहुलम् रोगाख्यायां गम्यमानायाम् । प्रच्छर्दिका । प्रवाहिका । विचर्चिका ।

गम्यमानायाम्—यदि प्रत्ययान्तं पदं रोगस्य नाम भवति । प्रच्छर्दिका-क्रमशः प्र√छर्द, प्र √वह, वि√चर्च धातवः सन्ति । 'वु' इत्यस्य 'अक' आदेशः । स्त्रियां टाप्, ककात् पूर्वस्यात इत्वं च । अत्र वार्तिकानि सन्ति-

१–वर्णात्कारः–अकारः । इकारः ।
२–रादिफः–रेफः ।
३–इणजादिभ्यः-आजिः । आतिः । आदिः ।
४–इक् कृष्यादिभ्यः–कृषिः । किरिः ।

संज्ञायाम् ॥१०९॥

संज्ञायां विषये ण्वुल् । उद्दालकपुष्पभञ्जिका । शालभञ्जिका । तालभञ्जिका ।

उद्दालकः–श्लेष्मान्तकः तस्य पुष्पाणि भज्यन्ते यस्यां सा । एवं शालस्य भञ्जनं यस्यां सा । एवम् बरणपुष्पप्रचायिका । अभ्यूषखादिका ।

विभाषाऽऽख्यानपरिप्रश्नयोरिञ् च ॥११०॥

ण्वुल् इत्येव । पूर्वः परिप्रश्नः पश्चादाख्यानम् । सूत्रेऽल्पाच्‌तरस्य पूर्वनिपातः । प्रश्ने, आख्याने च गम्ये धातोरिञ् । चात् ण्वुल् । विभाषाग्रहणादपरोऽपि । कां कारिम्, कारिकाम्, क्रियाम्, कृत्याम्, कृतिम् वा अकार्षीः ? सर्वाम् कारिम्······इत्यादि अकार्षम् ।

कारिम् इत्यादि–क्रमशः इञ्-ण्वुल्–श–क्यप्–क्तिन् प्रत्ययाः बोध्याः ।

पर्यायार्हर्णोत्पत्तिषु ण्वुच् ॥१११॥

पर्यायः–परिपाटीक्रमः । अर्हणम्–अर्हः तस्य योग्यता । ऋणम्-तद् यत्परस्य धार्यते । उत्पत्तिः-जन्म । एष्वर्थेषु ण्वुच् ।

पर्याये–भवत आसिका । भवतः शायिका । भवतोऽग्रेगामिका ।
अर्हे–अर्हति भवान् इक्षुभक्षिकाम् ।
ऋणे–इक्षुभक्षिकां मे धारयति ।
उत्पत्तौ–इक्षुभक्षिका मे उदपादि ।

ण्वुच्–चकारकरणमन्तोदात्तत्वार्थम् । ण्वुलि सति प्रत्ययात् पूर्वम् उदात्तः स्यात् । इक्षुभक्षिका–इक्षुविकारमिश्रितो भोज्यपदार्थः ।

आक्रोशे नञ्यनिः ॥११२॥

नञि उपपदे धातोरनिः आक्रोशे गम्ये । अकरणिस्ते वृषल भूयात् । अप्रवाणिः ।

आक्रोशः–शापः । अकरणिः·····भूयात्–एतत् शापवाक्यम् । अकरणिः–√कृ+अनिः ।

कृत्यल्युटो बहुलम् ॥११३॥

कृत्याः ल्युट् च बहुलमर्थेषु । दानीयो ब्राह्मणः । करणाधिकरण-भावेभ्यो ल्युडन्यत्रापि । राजाच्छादनानि वस्त्राणि ।

दानीयः–दीयते अस्मै इत्यर्थे √दा+अनीयर् । एवं स्नानीयं चूर्णम् । स्नायते अनेनेति √स्ना+अनीयर् । राजाच्छादनानि–राज्ञः आच्छादनानि षष्ठी समासः । आच्छाद्यन्ते इति कर्मणि ल्युट् ।

नपुंसके भावे क्तः ॥११४॥

हसितं छात्रस्य ।

धातोः क्तः भावे । प्रत्ययान्तं पदं नपुंसकं भवति । एवं जल्पितम् । शयितम् । आसितम् आदि ।

ल्युट् च ॥११५॥

धातोर्ल्युट् नपुंसकलिङ्गे भावे । हसनं छात्रस्य । शोभनम् । शयनम् ।

ल्युट्–ल-टौ इतौ । युकारस्य 'अन' आदेशः ।

कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम् ॥११६॥

येन कर्मणा संस्पृश्यमानकर्तुः शरीरस्य सुखमुत्पद्यते तस्मिन् कर्मण्युपपदे धातोर्ल्युट् नपुंसके भावे । पुनर्वचनं नित्यसमासार्थम् । उपपदसमासो हि नित्यः । पयःपानं सुखम् । ओदनभोजनं सुखम् ।

उपपदसमासः–'उपपदमतिङ्' इत्यनेन । पयः पानम्–अत्र पाने पयसः संस्पर्शेन पातुः सुखं भवति ।

करणाधिकरणयोश्च ॥११७॥

अनयोर्वाच्ययोर्धातोर्ल्युट् । इध्मप्रवश्चनः । गोदोहनी ।

इध्मप्रवश्चनः–इध्मानि प्रवृश्च्यन्ते येन इध्म प्र√ओव्रश्चू (छेदने) +ल्युट् । कुठार इत्यर्थः । **गोदोहनी**–गौर्दुह्यते यस्याम् गो √दुह+ल्युट् टित्वात् स्त्रियां ङीप् । स्थालीत्यर्थः । पूर्वत्र करणे उत्तरत्राधिकरणे वाच्ये ल्युट् ।

पुंसि सञ्ज्ञायां घः प्रायेण ॥११८॥

पूर्वोक्तयोरित्येव । पुंल्लिङ्गयोरनयोर्धातोर्घः । समुदायेन चेत् संज्ञा गम्यते । 'प्रायेण' ग्रहणमकात्स्न्यार्थम् । दन्तच्छदः । उरश्छदः । अधिकरणे-एत्य तस्मिन् कुर्वन्तीति आकरः । आलयः ।

पूर्वोक्तयोः–करणाधिकरणयोः । **दन्तच्छदः**–दन्ताः छाद्यन्ते अनेन दन्त √छद्+णिच्+घः । 'छादेर्घेऽद्व्युपसर्गस्य' इति ह्रस्वः । **आकरः**–आ√कृ+घ । **आलयः**–आ√ली+घ ।

गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च ॥११९॥

एते घान्ताः निपात्यन्ते । गावः चरन्ति अस्मिन् देशे इति गोचरो देशः । सञ्चरः ।

सञ्चरः–मार्गः सञ्चरन्त्यनेन इति । **वहः**–स्कन्धः वहन्त्यनेन । **व्रजः**–मार्गः व्रजन्त्यस्मिन् । **व्यजः**–तालवृन्तम् व्यज्यते अनेन । **आपणः**–पण्यस्थानम् । **निगमः**–छन्दः निगच्छन्त्यनेन । चात् निकषः ।

अवे तॄस्त्रोर्घञ् ॥१२०॥

अवे उपपदे तरतेःस्तृणातेश्च पूर्वोक्तयोरर्थयोर्घञ् । अवतारः । अवस्तारः ।

अवतारः–ञित्वाद् वृद्धिः । अवतारः–रूपादिः । **अवस्तारः**–जवनिकादि ।

हलश्च ॥१२१॥

हलन्तात् करणाधिकरणयोर्घञ् । लेखः । वेदः ।

लेखः–लेखनी लिख्यते अनेन । वेदः–विद्येते–ज्ञायेते धर्माधर्मौ अनेन । एवम् अपामार्गः–अपमृज्यते व्याधिरनेन अप √मृज् + घञ् मृजेर्वृद्धिः, 'अप' इत्यन्ताकारस्य 'उपसर्गस्य घञि' इति दीर्घः ।

अध्यायन्यायोद्यावसंहाराधारावायाश्च ॥१२२॥

एते निपात्यन्ते। अधीयतेऽस्मिन्नित्यध्यायः। नीयतेऽनेनेति न्यायः। उद्युवन्ति अनेनेति उद्यावः । संहारः । आवायः । अवहारः ।

वृत्तौ **उद्युवन्ति** अस्मिन्निति विग्रहः । संहारः । एतदग्रे **आधारः** । कौमुद्यां तु संहाराश्च इत्येतावदन्तं सूत्रम् । वार्तिकं च **अवहाराधारा-वायानामुपसंख्यानम्** । इति भेदः ।

उदङ्कोऽनुदके ॥१२३॥

'उदङ्क' इति निपात्यते । अनुदकविषयश्चेद्धात्वर्थो भवति, उत्पूर्वादञ्चतेर्घञ् निपात्यते । तैलोदङ्कः । घृतोदङ्कः ।

तैलोदङ्कः–तैलम् उदच्यते–उद्ध्रियते अस्मिन्निति । कर्मणि षष्ठी, ततः षष्ठीसमासः ।

जालमानायः ॥१२४॥

आनायो निपात्यते जालं चेत् । आनायो मत्स्यानाम् ।

आनीयन्ते मत्स्यादयोऽनेनेति आ √नी + घञ् ।

खनो घ च ॥१२५॥

अस्यानयोरर्थयोर्घः, चाद् घञ् च। आखनः/आखानः ।

❀(वा०) (१) डो वाच्यः । आखः । (२) डरश्च। आखरः । (३) इको वाच्यः । आखनिकः । (४) इकवकश्च । आखनिकवकः ।

आखन्यतेऽनेनेति विग्रहः ।

कौमुद्यां त्वेकमेव वार्तिकम् खनेर्डडरेकेकवका वाच्याः । आखः–डित्वात् टेर्लोपः । आखनादयः खनित्रपर्यायाः ।

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥१२६॥

करणाधिकरणयोरिति निवृत्तम् । एषूपपदेषु कृच्छ्राकृच्छ्रार्थेषु खल् । इषत्करः कटो भवता । दुष्करः । सुकरः ।। ईषद्भोज ओदनो भवता ।

कृच्छ्रम्–दुःखम् । तत् 'दुर्' इत्यस्यार्थे वर्त्तते । अकृच्छ्रम्–सुखम् । तत् 'ईषत्–सु' इत्यनयोर्विशेषणम् । ईषत्करः–अयत्नेन कृत इत्यर्थः । करः–√कृ + खल् । ईषद्भोजः–एवं दुर्भोजः । सुभोज इत्यपि ।

कर्तृकर्मणोश्च भूकृञोः ॥१२७॥

भवतेः करोतेश्च धातोर्यथासंख्यं कर्तरि कर्मणि चोपपदे चकारादीषदादिषु च खल् प्रत्ययः । ईषदाढ्यम्भवं भवता । ईषदाढ्यङ्करो देवदत्तो भवता ।

यथासंख्यम्–√भू धातोः कर्तरि √कृञ् धातोश्च कर्मणि इति भावः । ईषदाढ्यम्भवम्–अनाढ्येन भवता सुखेन आढ्येन भूयते । ईषदाढ्यङ्करः–भवता देवदत्तः अयत्नेनाढ्यः क्रियते । 'अरुर्द्विषदजन्तस्य मुम्' इति 'मुम्' आगमः । अत्रानुस्वारपरसवर्णौ ।

आतो युच् ॥१२८॥

ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु आकारान्तेभ्यो धातुभ्यो युच् । ईषत्पानः सोमो भवता । दुष्पानः । सुपानः ।

ईषत्पानः–अकृच्छ्रेण पीयते सोमो भवता √पा + युच् 'यु' इत्यस्य 'अन' आदेशः ।

छन्दसि गत्यर्थेभ्यः ॥१२९॥

ईषदादिषूपपदेषु गत्यर्थेभ्यो धातुभ्यः छन्दसि युच् । सूपसदनोऽग्निः । सूपसदनमन्तरिक्षम् ।

सुखेन उपसद्यते इति विग्रहः ।

अन्येभ्योऽपि दृश्यते ॥१३०॥

अन्येभ्यो धातुभ्यः अगत्यर्थेभ्यः छन्दसि युच् । सुदोहनामकृणोद् ब्रह्मणे गाम् ।

*(वा०) शासियुधिदृशिधृषिमृषिभ्यो युच् वाच्यः । दुःशासनः ।

सुदोहनाम्–सुखेन दुह्यते या सा ताम् । **दुःशासनः**–**दुर्योधनः** । **दुर्दर्शनः** । **दुर्धर्षणः** । **दुर्मर्षणः** इत्युदाहरणान्तराणि ।

वर्त्तमानसामीप्ये वर्त्तमानवद्वा ॥१३१॥

समीप एव सामीप्यम् । वर्त्तमानसामीप्ये भूते भविष्यति वा काले वर्त्तमानवत्प्रत्ययाः वा स्युः । कदा कृष्ण ! आगतोऽसि ? एष आगच्छामि । आगच्छन्तमेव मां विद्धि । अयमागमम् । एषोऽस्म्यागतः । कदा देवदत्त ! गमिष्यसि ? एष गच्छामि । गच्छन्तमेव मां विद्धि । एष गमिष्यामि । गन्तास्मि ।

वर्त्तमानवत्–लट् लकारः शतृशानचौ चेति प्रत्ययाः भवन्ति ।

आशंसायां भूतवच्च ॥१३२॥

आशंसायाम्–अप्राप्तस्य प्रियस्य प्राप्तुमिच्छायां भविष्यति भूतवत्प्रत्ययाः । चाद्वर्त्तमानवच्च । उपाध्यायश्चेदागमत् / आगच्छति/ आगमिष्यति । एतेऽधीमहे / अध्यगीष्महि / अध्येष्यामहे । सामान्यातिदेशे विशेषानतिदेशाल्लङ्लिटौ न भवतः ।

अध्यगीष्महि, अधीमहे इति क्रमो युक्तः । वृत्तावपि एष एव पाठक्रमः । 'लङ्' अनद्यतने, 'लिट्' च परोक्षे इति भूतविशेषे भवतः ।

क्षिप्रवचने लृट् ॥१३३॥

अस्मिन्नुपपदे आशंसायां गम्यायां लृट् प्रत्ययः । उपाध्यायश्चेत् क्षिप्रमागमिष्यति, एते व्याकरणं क्षिप्रमध्येष्यामहे ।

वचनग्रहणं पर्यायार्थम्, तेन क्षिप्र–शीघ्र–आशु–त्वरितशब्देषूपपदेषु लृट् । लुटोऽपि विषये लृडेव–श्वः क्षिप्रमध्येष्यामहे । एते–वृत्तौ नास्तीदं पदम् ।

आशंसावचने लिङ् ।।१३४।।

आशंसा येनोच्यते तस्मिन्नुपपदे लिङ् । उपाध्यायश्चेदागच्छेत् । आशंसे युक्तोऽधीयीय ।

वचनग्रहणं तु 'अवकल्पये' इत्युपपदेऽपि । अवकल्पये । युक्तोऽधीयीय । क्षिप्रवचनेऽपि पूर्वसूत्रं बाधित्वा लिङ् एव । आशंसे क्षिप्रमधीयीय ।

नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः ।।१३५।।

भूते भाविन्यनद्यतने लङ्लुटौ विहितौ, तयोः प्रतिषेधः । अनद्यतनवत्प्रत्ययविधिर्न क्रियायाः सातत्यानुष्ठाने सामीप्ये च गम्ये । यावज्जीवमन्नमदात् । यावज्जीवं भृशमन्नं दास्यति । सामीप्ये–इयं पौर्णमास्यतिक्रान्ता, एतस्यामुपाध्यायोऽग्नीनाधित ।

क्रियाप्रबन्धः–क्रियायाः सातत्येनानुष्ठानम् । 'यावज्जीवम्, इति कथनेन दानक्रियायाः सततमनुष्ठानं गम्यते । भाविन्यपि–या इयम्–अमावास्याऽऽगामिनी, एतस्यामुपाध्यायोऽग्नीनाधास्यते । सोमेन यक्ष्यते । उभयत्र क्रमशः प्राप्तयोः लङ्लुटोः प्रतिषेधे 'लुङ्-लृट्' च ।

भविष्यति मर्यादावचनेऽवरस्मिन् ।।१३६।।

अक्रियाप्रबन्धाद्यर्थंवचनम् । योऽयमध्वा गन्तव्य आपाटलिपुत्रात्, तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे ।

भविष्यति काले मर्यादावचने सत्यवरस्मिन् प्रविभागे अनद्यतनप्रत्ययविधिर्न । अवरस्मिन्–अर्वाक् । गन्तव्यः–इत्यनेन भविष्यत्कालः सूचितः । अवरमित्यनेन क्रियासातत्याभावः । अत्र 'लुट्' न, 'लृट्' एव ।

कालविभागे चानहोरात्राणाम् ।।१३७।।

कालमर्यादाविभागे सति, अवरस्मिन् प्रविभागे अनद्यतनप्रत्यय-

विधिर्न, न चेदहोरात्रस्य प्रविभागः । योऽयं संवत्सर आगामी तत्र यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे ।

अध्येष्यामहे–लुटः प्रतिषेधे लृट् एव । अहोरात्रविभागे तु योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्यहे, इत्यत्र लुडेव ।

परस्मिन् विभाषा ॥१३८॥

योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे,/अध्येतास्महे वा ।

पूर्वसूत्रं सर्वमनुवर्तते । अवरस्मिन् पूर्वसूत्रेण 'लृट्' एव । परस्मिन् प्रविभागे तु लृट्-लुटौ विकल्पेन भवतः ।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥१३९॥

भविष्यतीत्यनुवर्तते । हेतुहेतुमतोर्लिङ् इत्येवमादिकं लिङ्-निमित्तम् । तत्र लिङ्निमित्ते भविष्यति काले लृङ् कुतश्चिद्वैगुण्यात् क्रियाया अनभिनिर्वृत्तौ । दक्षिणेन चेदायास्यत्, न शकटं प्रर्याभविष्यत ।

क्रियाया अतिपत्तिः–अनभिनिर्वृत्तिः । पर्याभवनम्–भङ्गः ।

भूते च ॥१४०॥

लिङ्निमित्त इत्यादि सर्वमनुवर्त्तते । भूते च काले लृङ् । 'उताप्यो' रित्यारभ्य लिङ्निमित्ते विधानमेतत् । प्राक् ततो विधानं वक्ष्यति । दृष्टो मया भवतः पुत्रोऽन्नार्थी चङ्क्रम्यमाणः, अपरश्च ब्राह्मणार्थी । यदि तेन स दृष्टोऽभविष्यत् उताहोऽभोक्ष्यत । न तु भुक्तवान्, अन्येन पथा स गतः ।

अन्नार्थी चङ्क्रम्यमाणः–क्षुधा व्याकुलः कुटिलं गच्छन् । ब्राह्मणार्थी–कमपि भोक्तारं मार्गयमाणः त्वरया कुटिलं गच्छन् । उताहो–वृत्तौ 'तदा' इति

पाठः । नतु·······गतः । उभावपि कुटिलम् अगच्छताम्, तेन ब्राह्मणार्थिना अन्नार्थी न दृष्टः, तस्मात् स भोजनमप्राप्यैव गतः ।

वोताप्योः ॥१४१॥

'भूते' 'लिङ्निमित्त···' इत्यादि सर्वमनुवर्त्तते ।

वा+आ+उताप्योः=वोताप्योः । 'आङ्' मर्यादायां नाभिविधौ । 'उताप्योः समर्थयोरवधीकृत्य यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र भूते लिङ्निमित्ते क्रियातिपत्तौ वा 'लृङ्' एतदधिकृतम् ।

वा+आ+उताप्योः—'आङ्' इत्यस्य प्रश्लेषः । अन्तरङ्गपरिभाषां बाधित्वा दीर्घस्ततो गुणः । अस्योदाहरणानि वक्ष्यमाणानि सन्ति ।

गर्हायां लडपिजात्वोः ॥१४२॥

अपिजात्वोरुपपदयोर्धातोर्लट् कुत्सायाम् । अपि तत्रभवान् वृषलं याजयति । गर्हामहे । एवं जातु ।

अनेन न केवलं वर्त्तमाने अपि तु कालसामान्ये 'लट्' विधीयते । गर्हा–निन्दा । वृषलयाजनं निन्दितं कर्म । अन्याय्यमेतत् । एवं जातु–तत्रभवान् वृषलं याजयति इति शेषः ।

विभाषा कथमि लिङ् च ॥१४३॥

'कथम्' शब्दे उपपदे लिङ् गर्हायाम् । चाल्लट् । विभाषाग्रहणं यथास्वं कालविशेषविहितानाम् प्रत्ययानामबाधनार्थम् । कथं नाम तत्रभवान् वृषलं याजयेत् । याजयति/याजयिष्यति इत्याद्यपि यथाकालं भवति ।

इत्याद्यपि–आदिपदेन कथं नाम तत्रभवान् वृषलं याजयिता (लुट्)/ अयीयजत् (लुङ्)/अयाजयत् (लङ्)/याजयाञ्चकार (लिट्) इति रूपाणि भूतभविष्यत्-वर्तमानकालानुसारं भवन्ति । लिङ्निमित्ते क्रियातिपत्तौ भूते वा 'लृङ्' भविष्यति तु नित्यं 'लृङ्' अयाजयिष्यत् ।

किंवृत्ते लिङ्लृटौ ॥१४४॥

किंवृत्ते उपपदे धातोर्लिङ्लृटौ गर्हायाम् । को नाम वृषलः यं तत्रभवान् याजयेत् । याजयिष्यति ।

किमो वृत्तम् किंवृत्तम् । यत्र किं शब्दोऽवयवत्वेन वर्तते तत्सर्वं किंवृत्तम् । तेन कतरकतमयोरपि सन्निवेशः । कतरो नाम वृषलो यं तत्रभवान् याजयेत् । एवं कतमोऽपि ।

अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ॥१४५॥

'गर्हायाम्' इति निवृत्तम् । अनवक्लृप्तिरसम्भावना । अमर्षोऽक्षमा । अनयोर्गम्ययोः किंवृत्ते अकिंवृत्ते चोपपदे लिङ्लृटौ । बह्वचः पूर्वनिपातो लक्षणव्यभिचारचिह्नम्, तेन यथासंख्यं न । नावकल्पयामि भवान्नाम वृषलं याजयेत्/याजयिष्यति ।

नावकल्पयामि—न सम्भावयामि । एवममर्षेऽपि—न मर्षयामि तत्र भवान् वृषलं याजयेत्/याजयिष्यति । किंवृत्ते उदाहरणम्—को नाम वृषलो यं तत्र भवान् याजयेत्/याजयिष्यति वा । क्रियातिपत्तौ तु भूते वा 'लृङ्', भविष्यति नित्यम् । नावकल्पयामि तत्रभवान् नाम वृषलमयाजयिष्यत् ।

किंकिलास्त्यर्थेषु लृट् ॥१४६॥

किंकिलास्त्यर्थेषूपपदेषु । किं किल नाम तत्रभवान् वृषलं याजयिष्यति । अस्ति नाम तत्रभवान् वृषलं याजयिष्यति ।

किं-किल इति द्वयोः समुदाय एवोपपदम् न तु प्रत्येकम् । अस्त्यर्थाः—अस्ति-भवति-विद्यते इति । तेन भवति नाम तत्रभवान् वृषलं याजयिष्यति तथा विद्यते नाम तत्रभवान् वृषलं याजयिष्यति इत्यपि भवतः । लिङ्निमित्ताभावात् न 'लृङ्' । न श्रद्दधे—न मर्षयामि इतिशेषः ।

जातुयदोर्लिङ् ॥१४७॥

एतयोरुपपदयोः पूर्वोक्तयोरर्थयोर्धातोर्लिङ् । जातु तत्रभवान् वृषलं याजयेत् । एवं यत् ।

एवं यत्—यन्नाम तत्रभवान् वृषलं याजयेत् । न श्रद्दधे—न मर्षयामि इति शेषः ।

❀ (वा०) जातुयदोर्लिङ्विधाने यदायद्योरुपसंख्यानम् । यदा भवद्विधः क्षत्रियं याजयेत् । यदि भवद्विधः क्षत्रियं याजयेत् ।

यच्चयत्रयोः ॥१४८॥

पूर्वोक्तयोरेव । यच्च तत्रभवान् वृषलं याजयेत् । एवं यत्र ।

एवं यत्र—यत्र तत्र भवान् वृषलं याजयेत् । न श्रद्दधे—न मर्षयामि इति शेषः ।

गर्हायां च ॥१४९॥

पूर्वोक्तौ निवृत्तौ । यच्च-यत्रयोरुपपदयोर्गर्हायां गम्यमानायां धातोर्लिङ् । यच्च तत्रभवान् वृषलं याजयेत् । गर्हामहे । अन्याय्यमेतत् । एवं यत्र ।

पूर्वोक्तौ—अनवक्लृप्त्यमर्षौ । एवं यत्र-यत्र तत्रभवान् वृषलं याजयेद् । श्रद्धो वृद्धः सन् ब्राह्मणः इति विशेषेण गर्हामहे । अन्याय्यमेतत् । गर्हा-निन्दा-कुत्सा इति पर्यायाः । श्राद्धोऽपि व्ययबाहुल्येन वृषलं याजयति । वृद्धोऽपि जातिमात्रेण ब्राह्मणः तथा कुर्यात् । परं यः सद्ब्राह्मणः स वृषल-याजनं कुरुते इति हेतोस्त गर्हामहे—निन्दाम इत्यर्थः ।

चित्रीकरणे च ॥१५०॥

चित्रीकरणमाश्चर्यम् । तत्र लिङ् यच्चयत्रयोः । यच्च तत्रभवान् वृषलं याजयेत् । आश्चर्यमेतत् । एवं यत्र ।

एवं यत्र-यत्र तत्रभवान् वृषलं याजयेत् ।

शेषे लृडयदौ ॥१५१॥

यच्चयत्राभ्यामन्यः शेषः । तस्मिन्नुपपदे धातोर्लृट् चित्रीकरणे । यदि शब्दश्चेन्न प्रयुज्यते । आश्चर्यम्, अन्धो नाम पर्वतमारोक्ष्यति ।

आश्चर्यम्–चित्रम् अन्धो नाम पर्वतमारोक्ष्यति । अद्भुतम्, एवम् बधिरो नाम व्याकरणमध्येष्यते ।

उताप्योः समर्थयोर्लिङ् ॥१५२॥

एतयोः समर्थयोरुपपदयोर्लिङ् । बाढम् इत्येतस्मिन्नर्थे समानार्थत्वमनयोः । उत कुर्यात् । अपि कुर्यात् ।

अत्र सामर्थ्यं समानार्थत्वम्, तच्च 'उत–अपि' इत्यनयोः 'बाढम्' इत्यस्मिन्नर्थे वर्तते । उत कुर्यात् । अपि कुर्यात्–बाढं करिष्यतीत्यर्थः । एवम् उताधीयीत, अप्यधीयीत–बाढमध्येष्यते इत्यर्थः ।

कामप्रवेदनेऽकच्चिति ॥१५३॥

स्वाभिप्रायाविष्करणे गम्ये अकच्चित्युपपदे धातोर्लिङ् । कामो मे भुञ्जीत भवान् ।

कामः–स्वाभिप्रायः, इच्छा, अभिलाषो वा । प्रवेदनम्–आविष्करणम् । एवम् अभिलाषो मे भुञ्जीत भवान् । कच्चित् प्रयोगे लट्–कच्चिज्जीवति ते माता ।

सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे ॥१५४॥

सम्भावनं क्रियासु योग्यता । तच्चेत्सम्भावनं पर्याप्तमवितथं भवति । सिद्धश्चेदलमोऽप्रयोगः । तत्र लिङ् । अपि पर्वतं शिरसा भिन्द्यात् । सिद्धाप्रयोगे इति किम् ? अलं देवदत्तो हस्तिनं हनिष्यति ।

अपि पर्वतं शिरसा भिन्द्यात्—अत्र पर्वतभेदविषयकं पुरुषसामर्थ्यम् भीमसेनादेर्विद्यते एव । 'अलम्' इत्यस्य प्रयोगाभावेऽपि यत्र तस्यार्थो गम्यते तत्र 'लिङ्' । एवम् अपि द्रोणपाकं भुञ्जीत ।

विभाषा धातौ सम्भावनवचनेऽयदि ॥१५५॥

अलमिति चेत्सिद्धाप्रयोग इति सर्वमनुवर्त्तते । सम्भावनमुच्यते

येन स सम्भावनवचनः । सम्भावनवचने धातावुपपदे यच्छब्दवर्जिते विभाषा लिङ् । पुनर्वचनं विकल्पार्थम् । सम्भावयामि–भुञ्जीत भवान् । अवकल्पयामि । श्रद्दधे ।

सम्भावनं भाविवस्तूत्प्रेक्षणम् । भुञ्जीत भवान्–भवान् भोजने शक्तः इत्यहम् उत्प्रेक्षे इत्यर्थः । पक्षे भोक्ष्यते भवान् । अवकल्पयामि–भुञ्जीत / भोक्ष्यते वेति शेषः । एवं श्रद्दधे इत्यस्याग्रे भुञ्जीत/भोक्ष्यते वेति ज्ञेयम् ।

हेतुहेतुमतोर्लिङ् ॥१५६॥

हेतुः कारणम्, हेतुमत्फलम् । धातोर्लिङ् अनयोरर्थयोः । दक्षिणेन चेद्यायात् न शकटं पर्याभवेत् । यदि कमलकमाह्वयेन्न शकटं पर्याभवेत् । दक्षिणेन यानं हेतुः अपर्याभवनं हेतुमत् ।

लिङ्–'विभाषा' इत्यनुवर्तते, तेनेदं विकल्पेन भवति । पक्षे 'लृट्' । दक्षिणेन चेद् यास्यति न शकटं पर्याभविष्यति ।

इच्छार्थेषु लिङ्लोटौ ॥१५७॥

इच्छार्थेषूपपदेषु धातोर्लिङ्लोटौ । इच्छामि भुञ्जीत भवान् / भुङ्क्ताम् ।

इच्छार्थेषु—तेन कामये, प्रार्थये इति योगेऽपि भवति ।

(वा०) कामप्रवेदन इति वक्तव्यम् । यत्र कामस्य-इच्छायाः प्रवेदनम्–प्रकाशनं भवति तत्र लिङ्लोटौ भवतः, तेनात्र न भवति । स इच्छन् करोति । अत्रेच्छायाः प्रकाशनं नास्ति ।

समानकर्तृकेषु तुमुन् ॥१५८॥

समानकर्तृकेषु इच्छार्थकेषु धातुषूपपदेषु धातोस्तुमुन् । तुमुन् प्रकृत्यपेक्षमेव समानपदम्! इच्छति भोक्तुम् ।

इच्छार्थकेषु–कामयते भोक्तुम् । वाञ्छति भोक्तुम् इत्यपि ।

लिङ् च ॥१५६॥

इच्छार्थेषु समानकर्तृकेषु धातुषूपपदेषु धातोर्लिङ्। भुञ्जीयेतीच्छति। योगविभाग उत्तरार्थः।

भुञ्जीय–अहम् इति शेषः इति इच्छति।

इच्छार्थेभ्यो विभाषा वर्तमाने ॥१६०॥

इच्छार्थेभ्यो धातुभ्यो विभाषा वर्तमाने काले लिङ्। इच्छति / इच्छेत्। वष्टि/उश्यात्। कामयते/कामयेत।

लिङ्–पक्षे 'लट्'। उश्यात्–'ग्रहिज्या....' इत्यनेन √वश् धातोर्वकारस्य सम्प्रसारणम्।

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् ॥१६१॥

विधिः प्रेरणम्। निमन्त्रणं नियोगकरणम्। आमन्त्रणं कामचारकरणम्। अधीष्टः सत्कारपूर्वको व्यापारः।

संप्रश्नः सम्प्रधारणम्। प्रार्थनं याच्ञा। एष्वर्थेषु लिङ्। विधिः–कटं भवान् कुर्यात्।

निमन्त्रणम्–इह भुञ्जीत भवान्।

आमन्त्रणम्–इह भवान् आसीत।

अधीष्टः अध्येष्यामो भवन्तं माणवकम्। सम्प्रश्नः–किं नु खलु भो व्याकरणमधीयीय। प्रार्थनम्-भवति मे प्रार्थना व्याकरणमधीयीय। छन्दोऽधीयीय।

प्रेरणम्—आज्ञाप्रदानम्। नियोगकरणम्–अकरणे सति अधर्मोत्पत्तेः निममेन अवश्यमेव करणम्। कामचारः–इच्छया प्रवृत्तिः तस्याकरणेऽपि दोषाभावः। सत्कारपूर्वकः–पूज्यस्य गुर्वादेः व्यापार इत्यर्थः। सम्प्रधारणम्–निश्चयकरणम्। अध्येष्यामः... माणवकम्–'अध्येष्यामः' इति लिपि-त्रुटिः। 'अधीच्छामः' इति साधुः। माणवकम्–इत्यस्याग्रे 'भवान् उपनयेत' इति संयोज्यम्। 'उपनयेत' इत्यत्राचार्यकरणे आत्मनेपदम्।

लोट् च ॥१६२॥

विध्यादिष्वर्थेषु लोट् च । योगविभाग उत्तरार्थः । विधौ-कटं भवान् करोतु । क्रमेण अमुत्र भवान् भुङ्क्ताम् । इह भवानास्ताम् । अध्येषिष्यामो भवन्तं माणवकम् । किं नु खलु भो व्याकरणमध्ययै । भवति प्रार्थना मे व्याकरणमध्ययै ।

क्रमेण–निमन्त्रण–आमन्त्रण–अधीष्ट–सम्प्रश्न–प्रार्थनेष्वर्थेषूदाहरणानि क्रमशो विज्ञेयानि । **अध्येषिष्यामः**–'अधीच्छामः' इति वृत्तौ पाठः । **माणवकम्**-भवानध्यापयतु / भवानुपनयताम् वेति शेषः ।

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥१६३॥

प्रेषणं प्रैषः । कामचाराभ्यनुज्ञानमतिसर्गः । निमित्तभूतस्य कालस्यावसरः प्राप्तकालता । तत्र कृत्याः लोट् च । भवता कटः कर्त्तव्यः / भवान् कटं करोतु । भवान् प्रेषितोऽतिसृष्टः, भवतः प्राप्तकालः कटकरणे ।

कृत्याः–कृत्यसंज्ञकाः प्रत्ययाः तव्य-तव्यत्–अनीयर्–यत्–ण्यत्–क्यप् इति । **कर्त्तव्यः**–करणीयः । कार्यः । कृत्यः इत्यपि ।

लिङ् चोर्ध्वमौहूर्तिके ॥१६४॥

ऊर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद्धातोर्लिङ् प्रैषादिषु । चाद्यथाप्राप्तं च । ऊर्ध्वं मुहूर्त्ताद्, उपरि मुहूर्त्तस्य भवता खलु कटः कर्त्तव्यः / भवान् कटं कुर्यात् / करोतु ।

यथाप्राप्तम्–लोट्, कृत्याश्च ।

स्मे लोट् ॥१६५॥

'स्म' प्रैषादिषूर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद्धातोर्लोट् । लिङ्-कृत्यानामपवादः । ऊर्ध्वं मुहूर्त्ताद्, उपरि मुहूर्त्तस्य भवान् करोतु स्म ।

करोतु स्म—भवान् अधिकृत इत्यर्थः ।

अधीष्टे च ॥१६६॥

'स्म' शब्दे उपपदे अधीष्टे गम्ये लोट् । अङ्ग स्म राजन् ! माणवकमध्यापय ।

अङ्ग शब्दोऽनुनये वर्तते । हे राजन् ! भवान् अभ्यर्हितः, अतएव अध्यापनवृत्ति विनाऽपि अध्यापयेत्यनुनयः ।

कालसमयवेलासु तुमुन् ॥१६७॥

कालादिषूपपदेषु धातोस्तुमुन् । कालो भोक्तुम् । समयो भोक्तुम् । वेला भोक्तुम् ।

कालो भोक्तुम्–भुङ्क्तां भवानिति भावः । अर्थग्रहणात् पर्यायेष्वपीदं प्रवर्तते–अवसरो भोक्तुम् ।

लिङ् यदि ॥१६८॥

यच्छब्द उपपदे कालादिषु धातोर्लिङ् । कालो यद्भुञ्जीत भवान् ।

एवं समयो यद्भुञ्जीत भवान् । वेला यद् भुञ्जीत भवान् ।

अर्हे कृत्यतृचश्च ॥१६९॥

अर्हे कर्तरि गम्ये कृत्यतृचश्च प्रत्ययाः भवन्ति । भवता खलु कन्या वोढव्या/भवान् कन्यां वहेत्/वोढा । लिङा बाधो मा भूत्तदर्थम् अर्हे विधानम् । अन्यथा सामान्येन विहितत्वादर्हेऽपि स्यादेव ।

अर्हतीति अर्हः–योग्य इत्यर्थः । वोढा —√वह्+तृच् ।

आवश्यकाधमर्ण्ययोर्णिनिः ॥१७०॥

आवश्यकविशिष्टे आधमर्ण्यविशिष्टे च कर्तरि धातोर्णिनिः । अवश्यंकारी । शतं दायी ।

कारी—√कृ+णिनि णित्वाद् वृद्धिः। **दायी**—धातोर्युक्। **आधमर्ण्यम्**—ऋणदानम्। **शतम्**—अत्र 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठ्याः प्रतिषेधाद् द्वितीया।

कृत्याश्च ॥१७१॥

पूर्ववत्। भवता खलु अवश्यं कटः कर्त्तव्यः। भवता खलु निष्को दातव्यः।

पूर्ववत्—आवश्यकाधमर्ण्ययोः धातोः कृत्याः प्रत्ययाः भवन्ति। उभयोः क्रमशः उदाहरणे बोध्ये।

शकि लिङ् च ॥१७२॥

शक्नोत्यर्थे वर्तमानाद्धातोर्लिङ्। चात्कृत्याश्च। भवता खलु भारो भर्तव्यः। भवान् खलु कन्यां वहेत्। भवान् शक्तः।

भवान् शक्तः—अर्थनिर्देशोऽयम्, नोदाहरणम्।

आशिषि लिङ्लोटौ ॥१७३॥

अप्राप्तस्य प्राप्त्याशंसनमाशीः। तत्रेमौ। चिरं जीव्यात्। चिरं जीवतु भवान्।

इमौ—लिङ्-लोटौ। आशीर्विशिष्टेऽर्थे वर्तमानाद् धातोर्लिङ्-लोटौ भवतः।

क्तिच्क्तौ च संज्ञायाम् ॥१७४॥

आशिष्ये तौ समुदायेन चेत्संज्ञा गम्यते। तनुतात्-तन्तिः। भवताद्-भूतिः। देवा एनं देयासुः—देवदत्तः।

तन्तिः—√तनु+क्तिच्। 'न क्तिचि दीर्घश्च' इति प्रतिषेधात् लोपदीर्घौ न भवतः। **देवदत्तः**—देव √दा+क्त।

माङि लुङ् ॥१७५॥

माङि उपपदे धातोर्लुङ् । सर्वलकारापवादः । मा कार्षीत् । कथं 'मा भवतु' असाधुरेवायम् । केचिदाहुः–अङिदपरो मा शब्दस्त-स्यायं प्रयोगः ।

मा कार्षीत्—'न माङ् योगे' इति न 'अट्' । 'माङ्' योगे 'लुङ्' भवति 'मा' इत्स्य योगे 'लोट्' अपि ।

स्मोत्तरे लङ् च ॥१७६॥

माङि लुङ् चात् लङ् । मा स्म करोत् । मा स्म कार्षीत् ।

स्मोत्तरे–'स्म' इति शब्दः उत्तरम् अधिकं यस्य तस्मिन् माङि इत्यर्थः । क्रमशः 'लङ्–लुङोः' उदाहरणे ज्ञेये ।

उणादयइङो निवास व्यधापघनोऽङ्गमिच्छाहलश्च वोपताप्योर्विधि षोडश ।

इति श्रीमदाचार्यबलभद्रविरचिते काशिकावृत्तिसारे
तृतीयाध्यायस्य तृतीयः पादः ।

तृतीयाध्यायस्यास्मिन् तृतीये पादे उणादयो बहुलम्, इङश्च, निवास चिति...., व्यधजपोरनुपसर्गे, अपघनोऽङ्गम्, इच्छा, हलश्च, वोपताप्योः, इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा विधिनिमन्त्रणामन्त्रणाधीष्ट....इत्यत आरभ्य षोडश सूत्राणीति संकलनेन षट्सप्तत्यधिकशतं (१७६) सूत्राणि सन्ति ।

इति काशिकावृत्तिसार-सुधायां
तृतीयाध्यायस्य तृतीयः पादः ।

अथ तृतीयाध्याये चतुर्थः पादः

धातुसम्बन्धे प्रत्ययाः ॥१॥

धात्वर्थे धातुशब्दः । तेषां सम्बन्धः धातुसम्बन्धः । तस्मिन्नयथाकालोक्ता अपि प्रत्ययाः साधवः । अग्निष्टोमयाज्यस्य पुत्रो जनिता । अग्निष्टोमयाजीति भूतकालः । जनितेति भविष्यत्कालः । तत्र भूतो भाविना सम्बध्यमानः साधुः ।

अयथाकालोक्ताः–विधायकसूत्रैः यस्मिन् काले विहितास्ततोऽन्यत्रापि प्रयुक्ताः । **भूतकालः**–'भूते' इत्यस्याधिकारे 'करणे यजः' इत्यनेन 'णिनि' प्रत्ययस्य विधानात् । **साधुः**–तथा चायमर्थो भवति–तस्य पुत्रो जनिता योऽग्निष्टोमेन यष्टा । प्रत्ययाधिकारेऽपि पुनःप्रत्ययग्रहणम् अधात्वधिकारविहिता अपि प्रत्ययास्तद्धिताः धातुसम्बन्धे सति कालभेदेऽपि साधवो भवन्तीत्यर्थलाभाय । तेन वर्तमानकाले विहितो 'मतुप्' गोमान् आसीदिति भूते, गोमान् भवितेति भविष्यत्यपि साधुर्भवति ।

क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ॥२॥

पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः । तद्विशिष्ट-क्रियावचनाद्धातोर्लोट् सर्वकालेषु । सर्वलकारापवादः । तस्य लोटो 'ह, स्व' एतावादेशौ भवतः । त-ध्वंभाविनस्तु वा । योगविभागश्चात्र कार्यः । क्रियासमभिहारे लोट् । लोटो हि-स्वौ । लोड्धर्माणौ 'हिस्वौ' इत्यर्थः । तेन परस्मैपदत्मानेपदत्वम् भेदेनावतिष्ठते । तिङ्त्वञ्च भवति । लुनीहि लुनीहीत्येवायं लुनाति । इमौ लुनीतः । इमे लुनन्ति । एवं मध्यमोत्तमयोरपि । लुनीहि लुनीहीत्येवायमलावीत् ।

अलाविष्टाम् । अलाविषुः । एवं मध्यमोत्तमयोरपि । लुनीहि लुनीहीत्येवायं लविष्यति । एवं मध्यमोत्तमयोरपि ।

धातुसम्बन्धे इत्यनुवर्तते । क्रियासमभिहारश्च तद्विशेषणम्, तेनायमर्थो लभ्यते–तद्विशिष्ट...धातोः । हि-स्वौ–हिश्च स्वश्चेति हि-स्वौ । परस्मैपदे मध्यमपुरुषैकवचने लोटः स्थाने 'सिप्' तस्य 'सेह्यपिच्च' इत्यनेन 'हि' आदेशः । आत्मनेपदे च मध्यमपुरुषैकवचने लोटः स्थाने 'थास्' तस्य 'स्व' इति तावेवात्र गृहीतौ ।

तध्वम्भाविनः–तश्च ध्वम् च तध्वमौ तौ भाविनो यस्य लोटः स तध्वम्भावी तस्य । परस्मैपदे मध्यमपुरुषबहुवचने लोट्स्थानिकस्य 'थ' इत्यस्य 'त' आत्मनेपदे च लोटः मध्यमपुरुष-बहुवचने 'ध्वम्' इति भवति ।

लुनीहि लुनीहि–'क्रियासमभिहारे द्वे भवतः' इति द्विर्वचनम्' मध्यमोत्तरयोरपि–लुनीहि लुनीहीत्येव त्वं लुनासि, युवां लुनीथः । यूयं लुनीथ । पक्षे लुनीत लुनीतेत्येव यूयं लुनीथ । अहं लुनामि । आवां लुनीवः । वयं लुनीमः ।

'स्व' इत्यस्योदाहरणान्यात्मनेपदे भवन्ति । यथा अधीष्वाधीष्वेत्येवायम् अधीते । इमावधीयाते । इमेऽधीयते । 'ध्वम्' इत्यत्र विकल्पेन 'स्व' आदेशः । अधीष्वाधीष्वेत्येव यूयमधीध्वे । पक्षे अधीध्वमधीध्वमिति यूयमधीध्वे ।

समुच्चयेऽन्यतरस्याम् ॥३॥

अनेकक्रियासमभिहारः समुच्चयः । समुच्चीयमानक्रियावचनाद्धातोरन्यतरस्यां लोट्, तस्य हि-स्वौ । तध्वम्भाविनस्तु वा । भ्राष्ट्रमट, मठमट, खदूरमट, स्थाल्यपिधानमटेत्येवायमटति । इमावटतः । इमेऽटन्ति । एवं सर्वेषु वचनेषु पुरुषेषु कालेषु च । एवमात्मनेपदिनो धातोः 'स्व' । एतत्परोऽपि प्रयोग उन्नेयः ।

भ्राष्ट्रम्–'भाड़' इति भाषायाम् । खदूरम्–क्षेत्रम् । स्थाल्यपिधानम्–थाली व बटलोई का ढक्कन । पक्षे लट् लकारः भ्राष्टमटति, मठमटति, खदूरमटति, स्थाल्यपिधानमटतीत्येवायमटति रूपमपि भवति । मध्यमपुरुषबहुवचने भ्राष्ट्रमटत......स्थाल्यपिधानमटतेत्येव यूयमटथ इत्यपि पक्षे भवति ।

उन्नेयः—छन्दोऽधीष्व, व्याकरणमधीष्व, निरुक्तमधीष्वेत्येवायमधीते। 'ध्वम्' इत्यस्य विकल्पेन 'स्व' आदेशः, तेन पक्षे छन्दोऽधीध्वम्, व्याकरणमधीध्वम्, निरुक्तमधीध्वमित्येव यूयमधीध्वे।

लोटो विकल्पेन विधानात् पक्षे लडपि—छन्दोऽधीते, व्याकरणमधीते, निरुक्तमधीते। इत्येवायमधीते प्रभृतीनि रूपाणि ज्ञेयानि।

यथाविध्यनुप्रयोगः पूर्वस्मिन् ॥४॥

पूर्वस्मिन् लोड्विधाने यथाविध्नुप्रयोगो भवति। यस्माद्धातोर्लोड् विहितः स एवानुप्रयोक्तव्यः। धातुसम्बन्धे प्रत्ययविधानादनुप्रयोगः सिद्ध एव, यथाविध्यर्थं तु वचनम्। तथा चोदाहृतम्—लुनीहि लुनीहि इत्येवायं लुनाति। 'छिनत्ति' इति नानुप्रयुज्यते।

यथाविधि—मीमांसकप्रसिद्धो यो नियमविधिस्तम् अनतिक्रम्य। तेन 'याहि याहीति गच्छति' इति न भवति। एव मधीष्वाधीष्वेत्येवायमधीते। 'पठति' इति नानुप्रयुज्यते।

समुच्चये सामान्यवचनस्य ॥५॥

द्वितीये लोड्विधाने समुच्चये सामान्यधातोरनुप्रयोगः कार्यः। ओदनं भुङ्क्ष्व, सक्तून् पिब; धानाः खादेत्येवायम् अभ्यवहरति।

सर्वविशेषानुप्रयोगनिवृत्त्यर्थमिदं सूत्रम्। लाघवार्थं तु न, लौकिके शब्दव्यवहारे गुरुलाघवस्यानादरात्। अन्यथा 'तरु' शब्दस्यैव प्रयोगः स्यान्नतु 'वनस्पति' शब्दस्य।

छन्दसि लुङ्लङ्लिटः ॥६॥

छन्दसि सर्वेषु कालेषु लुङ्—लङ्—लिट् प्रत्ययाः भवन्ति। लुङ्—शकलाङ्गुष्ठकोऽकरत्। अहं तेभ्योऽकरन्नमः। लङ्—अग्निमद्य होतारमवृणीतायं यजमानः। लिट्—अद्या ममार। अद्य म्रियते।

शकलाङ्गुष्ठकोऽकरत्......अद्य ममार—सर्वाणि उदाहरणानि वर्तमानकालिकानि सन्ति। 'अन्यतरस्याम्' इत्यनुवर्तनात् अद्य म्रियते इत्यपि। अत्र वर्तमाने लट्।

लिङर्थे लेट् ॥७॥

लिङर्थे–यत्र लिङ् विधीयते विध्यादिः, हेतुहेतुमतोर्लिङ् इत्यादिश्च तत्र छन्दसि विषये वा लेट् । जोषिषत् । तारिषत् । नेता ने षत् ।

जोषिषत्–√जुषी + लेट् व्यत्ययेन परस्मैपदम् । तारिषत्–√तॄ + लेट् बहुलं णिद्वद्भावाद्वृद्धिः । नेषत्–√नी + लेट् ।

उपसंवादाशंकयोश्च ॥८॥

उपसंवादः–परिभाषणम्, कर्त्तव्ये पणबन्ध इत्यर्थः । यदि मे भवानिदं कुर्याद् अहमपि ते इदं दास्यामि । कारणतः कार्यानुसरणं तर्क उत्प्रेक्षा आशङ्का एतयोरर्थयोश्छन्दसि लेट् । उपसंवादे–अहमेव पशूनामीशै । मदंग्रा एव वो ग्रंहा गृह्यान्तै इति । आशङ्कायाम्–नेज्जिह्मायतो नरकं पताम ।

ते……दास्यामि–'भवते' इति युक्तः पाठः । ईशै– √ईश् + लेट् उत्तमपुरुषैकवचने रूपम् । गृह्यान्तै–√ग्रह + लेट् प्रथमपुरुषैकवचने कर्मणि रूपम् । नेज्जिह्मायन्तः–न + इत् + जिह्मायन्तः–जिह्मं कुटिलम् आचरन्तः नामधातुप्रयोगः ।

तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन् कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ॥९॥

छन्दसीत्येव । तुमर्थे बाच्ये धातोः से आदयः प्रत्ययाः स्युः । से– वक्षे रायः । सेन्–ता वामेषे रथानाम् । असे, असेन्–क्रत्वे दक्षाय जीवसे । क्से–प्रेषे, भगाय । कसेन्–श्रियसे । सर्वत्र स्वरे विशेषः इत्यादि ।

तुमर्थो भावः, तस्मिन् वाच्ये । इत्यादि–अध्यै, अध्यैन्–कर्मण्युपाचरध्यै । कध्यै–इन्द्राग्नी आहुवध्यै । कध्यैन्–श्रियध्यै । शध्यै, शध्यैन्–पिबध्यै, सह मादयध्यै । तवै–सोमभिन्द्राय पातवै । तवेङ्–दशमे मासि सूतवे । तवेन्–स्वर्देषु गन्तवे ।

प्रयै रोहिष्यै अव्यथिष्यै ॥१०॥

एते त्रयः पूर्वस्मिन्नर्थे निपात्यन्ते । प्रपूर्वस्य यातेः 'कै' प्रत्ययः । प्रयै देवेभ्यः । रुहेः इष्यै प्रत्ययः । अपामोषधीनां रोहिष्यै । नञ्-पूर्वस्य व्यथेरिष्यै ।

प्रयै—तुमर्थे छन्दस्येव निपातनम् । 'प्रयातुम्' इत्यादयोऽपि भवन्ति ।

दृशे विख्ये च ॥११॥

तुमर्थे । दृशे विश्वाय सूर्यम् । विख्ये त्वा हरामि ।

दृशे—√दृश्+के । विख्ये—वि √चक्षिङ्+के ।

शकि णमुल्कमुलौ ॥१२॥

शक्नोतावुपपदे छन्दसि तुमर्थे धातोर्णमुल्—कमुल् एतौ प्रत्ययौ स्तः । अग्निं वै देवा विभाजं नाशक्नुवन् । विभक्तुमित्यर्थः । अपलुपं नाशक्नुवन् ।

विभाजम्—वि √भज्+णमुल् । णित्त्वाद्वृद्धिः । अपलुपम्—अप √लुप्+कमुल् ।

ईश्वरे तोसुन्कसुनौ ॥१३॥

ईश्वर शब्द उपपदे छन्दसि विषये तुमर्थे धातोस्तोसुन्-कसुन् एतौ स्तः । ईश्वरोऽभिचरितोः । अभिचरितुमित्यर्थः । ईश्वरो विलिखः । बिलेखितुमित्यर्थः ।

अभिचरितोः—अभि √चर् + तोसुन् । विलिखः—वि √लिख्+कसुन् । विलेखितुम्—वृत्तौ विलिखितुम् इति पाठः ।

कृत्यार्थे तवैकेन्केन्यत्वनः ॥१४॥

कृत्यानामर्थो भावकर्मणी । तस्मिन् छन्दसि तवै-केन्-केन्य-त्वन्

एते प्रत्ययाः । अन्वेतवै । अन्वेतव्यम् । परिधातवै । नावगाहे । दिदृक्षेण्यः । कर्त्वं हविः ।

अन्वेतवै–अनु √इण् + तवै । परिधातवै–परि √धा + तवै । नावगाहे–न, अव√गाहू + केन् । दिदृक्षेण्यः— √ दृश् + सन् = √ दिदृक्ष + केन्य । कर्त्वम्– √कृ + त्वन् ।

अवचक्षे च ॥१५॥

कृत्यार्थे छन्दसि । अवपूर्वाच्चक्षिङः एश् । नावचक्षे ।

नावचक्षे—न + अव √चक्षिङ् + एश् ।

भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ॥१६॥

'कृत्यार्थे निवृत्तम् । 'तुमर्थे' इत्यनुवर्तते । भावो लक्ष्यते येन तस्मिन्नर्थे वर्तमानेभ्यः स्थादिभ्यश्छन्दसि तोसुन् । आसंस्थातोर्वेद्यां सीदन्ति । आसमाप्तेरित्यर्थः ।

संस्थातोः–सम् √स्था + तोसुन् । √इण्–पुरा सूर्यस्योदेतोः उद् √इण् + तोसुन् । एवं √कृञ्–अपाकर्तोः अप आ √कृञ् + तोसुन् । √वद्–प्रवदितोः √वद् + तोसुन् । √चर्–प्रचरितोः । √हु–आहोतोः । √तम्–आ तमितोः । √जन्–आ विजनितोः ।

सृपितृदोः कसुन् ॥१७॥

पुरा क्रूरस्य विसृपो विरप्शिन् । पुरा जत्रुभ्य आतृदः ।

भावलक्षणे छन्दसि कसुन् प्रयुक्तः । विसृपः—वि √सृप् + कसुन् । आतृदः–आ √तृद + कसुन् ।

अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ॥१८॥

'छन्दसि, भावलक्षणे' इति निवृत्तम् । अलम्-खलु एतयोः प्रतिषेधवाचिनोरुपपदयोः क्त्वा प्रत्ययो भवति प्राचां मतेन । अलं कृत्वा । खलु कृत्वा । अलं बाले ! रुदित्वा ।

प्राचाम्–आचार्याणामिति शेषः । अलं कृत्वा–न कर्तव्यमित्यर्थः ।

उदीचां माङो व्यतीहारे ॥१६॥

माङो व्यतीहारेऽर्थे वर्तमानाद् धातोः उदीचामाचार्याणां मतेन क्त्वा प्रत्ययः । अपमित्य याचते । अपमित्य आहरति ।

'माङ' इति √मेङ् (प्रणिदाने) इत्यस्य कृतात्वस्य निर्देशः । अनेन सूत्रेणापूर्वकाले 'क्त्वा' विधीयते । अपमित्य–अप √ मेङ् + क्त्वा → ल्यप् । व्यतीहारः–विनिमयः पक्षे याचित्वा अपमयते इत्यपि भवति । आहरति–वृत्तौ 'हरति' इति पाठः । पक्षे हृत्वा अपमयते इत्यपि ।

परावरयोगे च ॥२०॥

परेण पूर्वस्य योगे गम्यमाने, अवरेण परस्य योगे गम्ये धातोः क्त्वा । अप्राप्य नदीं पर्वतः स्थितः । परनदीयोगेन पर्वतो विशिष्यते । अवरयोगे-अतिक्रम्य पर्वतं नदी स्थित । अवर-पर्वतयोगेन नदी विशिष्यते ।

अत्र परावर शब्दौ सम्बन्धिनौ स्तः । अतः परया नद्या पर्वतस्य योगः प्रतीयते तथा अवरपर्वतेन नद्या योगो विज्ञायते ।

समानकर्तृकयोः पूर्वकाले ॥२१॥

एककर्तृकयोर्धात्वोः पूर्वकालेऽर्थे वर्तमानाद्धातोः क्त्वा । शक्तिशक्तिमतोर्भेदस्याविवक्षितत्वात् समानकर्तृकत्वम् । भुक्त्वा व्रजति । बहुष्वपि-स्नात्वा भुक्त्वा पीत्वा व्रजति ।

❀(वा०) व्यादाय स्वपिति सम्मील्य हसत्युपसंख्यानमपूर्वकालत्वात् ।

समानकर्तृकयोः–समानः =एकः कर्ता ययोर्धात्वर्थयोस्तयोः । व्यादाय–मुखमिति शेषः । संमील्य–चक्षुरिति शेषः । अपूर्वकालत्वात्–यदैवाऽयं स्वपिति तदैव मुखं व्याददाति । अथ च यदाऽयं हसति तदा चक्षुः सम्मीलयतीति द्वयोः क्रिययोरेककालता, तेन सूत्रेण 'क्त्वा' न सिद्ध्यतीति वार्तिकारम्भः ।

आभीक्ष्ण्ये णमुल् च ॥२२॥

पूर्वोक्तार्थे । आभीक्ष्ण्येऽर्थे वर्तमानाद्धातोर्णमुल् प्रत्ययः । चात्क्त्वा च । द्विर्वचनसहितौ क्त्वा-णमुलावाभीक्ष्ण्यं द्योतयतः ।

आभीक्ष्ण्यम्—पौनःपुन्यम् । द्योतयतः—'आभीक्ष्ण्ये द्वे भवतः' इत्युपसंख्यानाद् द्विर्वचनम् । उदाहरणम् क्रमशः भोजं भोजं व्रजति/भुक्त्वा भुक्त्वा व्रजति । पायं पायम्—अत्र √पा + णमुल्, 'आतो युक्' इत्यनेन युक् ।

न यद्यनाकांक्षे ॥२३॥

'यत्' शब्द उपपदे एतौ न भवतः, अनाकांक्षे वाच्ये । यत्र ते पूर्वोत्तरे क्रिये स्तः, तच्चेद्वाक्यं नापरं किञ्चिदाकांक्षते । यदयं भुङ्क्ते, ततः पठति ।

एतौ—क्त्वा-णमुलौ । अनाकांक्षे—न विद्यते आकांक्षा यस्य स तस्मिन् । यदयं···पठति—भुक्त्वा पठतीत्यर्थः । वृत्तौ 'पठति' इत्यस्य स्थाने 'पचति' इति पाठो विद्यते ।

विभाषाग्रेप्रथमपूर्वेषु ॥२४॥

अप्राप्तविभाषेयम् । अग्रे-प्रथम-पूर्वं एषूपपदेषु विभाषा क्त्वा-णमुलौ । अग्रे भोजं व्रजति / अग्रे भुक्त्वा व्रजति । पक्षे अग्रे भुङ्क्ते ततो व्रजति ।

अग्रे···व्रजति—प्रथमं भोजं व्रजति/प्रथमं भुक्त्वा व्रजति । पूर्वं भोजं व्रजति/पूर्वं भुक्त्वा व्रजति । पक्षे—विभाषाग्रहणाद्यदा न क्त्वा-णमुलौ ।

कर्मण्याक्रोशे कृञः खमुञ् ॥२५॥

कर्मणि योगे करोतेः 'खमुञ्' आक्रोशे गम्ये । चोरंकारमाक्रोशति । चोरोऽसीत्याक्रोशति । चोरकरणमिहाक्रोशनार्थमेव, न त्वसौ चोरः क्रियते ।

चोरंकारम्-अनुस्वारस्य परसवर्णे 'चोरङ्कारम्' इति भवति । न्यास-टीकायां चौरङ्कारमिति पाठः । अत्र √कृ इत्यस्योच्चारणमर्थः । कारम्-√कृ + खमुञ् 'अरुर्द्विषदजन्तस्य मुम्' इति मुम् आगमः ।

स्वादुमि णमुल् ॥२६॥

स्वाद्वर्थयोगे कृञः पूर्वोक्तेऽर्थे गम्ये णमुल् । स्वादुंकारं भुङ्क्ते । स्वादुमीति मान्तमव्ययमीकाराभावार्थम् । च्व्यन्तस्य च मकारार्थम्' अस्वाद्वीं स्वाद्वीं कृत्वा भुङ्क्ते स्वादुङ्कारं भुङ्क्ते ।

स्वादुंकारम्-अनुस्वारस्य परसवर्णे स्वादुङ्कारम् । अत्र क्त्वाऽपि भवति, तेन स्वादुं कृत्वा भुङ्क्ते इत्यपि ।

अन्यथैवं कथमित्थंसु सिद्धाप्रयोगश्चेत् ॥२७॥

अन्यथादिषु योगे करोतेर्णमुल् सिद्धाप्रयोगश्चेत्करोतिः । निरर्थकत्वान्न प्रयोगमर्हति एवमेव प्रयुज्यते द्वौ द्विजौ इत्यादिवत् । कथंकारं भुङ्क्ते इत्यादि ।

सिद्धाप्रयोगः—सिद्धे अप्रयोगो यस्य सः । कथंकारं भुङ्क्ते—अत्र 'कथं भुङ्क्ते' इत्येतावन्मात्रेणैव सिद्धेऽर्थे 'कारमि' ति निरर्थक एव प्रयोगः । अन्यथाकारं भुङ्क्ते, इत्थङ्कारं भुङ्क्ते इत्यपि प्रयोग-द्वयम् उदाहरण-मस्ति ।

यथातथयोरसूयाप्रतिवचने ॥२८॥

कृञः सिद्धाप्रयोग इत्येव । अनयोर्योगे कृञो णमुल् असूया-प्रतिवचने गम्ये । यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किं तवानेन ।

असूयाप्रतिवचनम्-यद्यसूयन् पुरुषः 'कथं भवान् भोक्ष्यते' इति पृ छति तत्र यो भोक्ता प्रतिवक्ति तदिह तात्पर्यम् ।

कर्मणि दृशिविदोः साकल्ये ॥२९॥

कर्मणि योगे साकल्यविशिष्टे अनयोर्णमुल् प्रत्ययो भवति ।

कन्यादर्शं वरयति । सर्वाः कन्याः वरयतीत्यर्थः । ब्राह्मणवेदं भोजयति । यं यं ब्राह्मणं जानाति, लभते, विचारयति वा तं तं सर्वं भोजयतीत्यर्थः ।

अत्र ज्ञान-लाभ-विचारार्थकानां √ विद् धातूनां ग्रहणमिति मत्वा सर्वेषामुदाहरणं दत्तम् । √विद् सत्तायाम् इत्यस्य तु अकर्मकत्वान्न ग्रहणम् ।

यावति विन्दजीवोः ॥३०॥

यावत्युपपदे विन्दतेर्जीवतेश्च णमुल् । यावद्वेदं भुङ्क्ते । यावल्लभते तावद्भुङ्क्ते इत्यर्थः । यावज्जीवमधीते ।

वेदम्—√विद् + णमुल् । 'विन्द्' इत्यनेन 'विद्लृ' लाभे इत्यस्य ग्रहणम् । **जीवम्**—√जीव् + णमुल् । यावज्जीवति तावदधीते इत्यर्थः ।

चर्मोदरयोः पूरे ॥३१॥

अनयोर्योगे पूरेर्णमुल् । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ।

स्तृणाति—आच्छादयति । चर्म पूरयित्वा इत्यर्थः । **उदरपूरं भुङ्क्ते**—उदरं पूरयन् भुङ्क्ते इति भावः ।

वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ॥३२॥

कर्मण्युपपदे पूरयतेर्णमुल् ऊलोपश्चास्य पूरयतेर्वा । समुदायेन चेद् वर्षस्य प्रमाणं गम्यते । गोष्पदपूरं वृष्टो देवः / गोष्पदप्रं वृष्टो देवः ।

ऊलोपे सति पूर् इत्यस्य 'प्र' इति रूपं भवति । एवं सीतापूरं सीताप्रं वा वृष्टो देवः इत्यपि । गोः पदं पूरयन् सीताम्—हलपद्धतिं वा पूरयन् वृष्टः इति कथनेन समुदायेन गोष्पदपूरेण वर्षायाः प्रमाणं विदितं भवति ।

चेले क्नोपेः ॥३३॥

√क्नूयी शब्दे उन्दने च । ण्यन्तादस्माच्चेलार्थेषूपपदेषु णमुल् वर्षप्रमाणे गम्ये । चेलक्नोपं वृष्टो देवः । वस्त्रक्नोपम् ।

उन्दनम्—आर्द्रीकरणम् (नमी पैदा करना) 'क्नोपेः' इति ण्यन्त-निर्देशः। चेलं वस्त्रम् क्नोपयन्—शब्दाययन् वृष्टः। यथा वर्षणे चेलानि शब्दायन्ते तथा वृष्ट इत्यर्थः।

निमूलसमूलयोः कषः ॥३४॥

अनयोः कर्मणोरुपपदयोः कषेर्णमुल् निमूलकाषं कषति इत्यादि। इतः प्रभृति कषादयः। यावद्वक्ष्यति कषादिषु यथा-विध्यनुप्रयोगः।

इत्यादि—आदिशब्देन समूलकाषं कषति इत्यपि ज्ञेयम्। सह मूलेन कषणं करोतीत्यर्थः।

शुष्कचूर्णरूक्षेषु पिषः ॥३५॥

एषु कर्मसु पिषेर्णमुल् शुष्कपेषं पिनष्टि।

शुष्कपेषं पिनष्टि—शुष्कं पिनष्टीत्यर्थः। एवं चूर्णपेषं पिनष्टि। रूक्षपेषं पिनष्टि।

समूलाकृतजीवेषु हन्कृञ्ग्रहः ॥३६॥

एषु कर्मसु यथाक्रममेभ्यो णमुल्। समूलघातं हन्ति। अकृत-कारं करोति। जीवग्राहं गृह्णाति।

क्रमशः समूलं हन्ति, अकृतं करोति, जीवन्तं गृह्णाति इत्यर्थः। घातम्—√हन् धातोर्हकारस्य 'हो हन्तेर्ञ्णिन्नेषु' इति घकारः नकारस्य च 'हनस्तोऽचिण्णलोः' इति तकारः।

करणे हनः ॥३७॥

पाणिघातं हन्ति। हिंसार्थानां च समान···इति वक्ष्यति। अहिंसार्थोऽयमारम्भः नित्यसमासार्थो वा।

करणे उपपदे हन्तेर्णमुल्। पाणिघातं हन्ति—वेदिम् इति शेषः। हन्ति इत्यस्य 'ताडयति' (थपथपाना) इत्यर्थः। अत्र 'उपपदमतिङ्' इति नित्यं समासः। हिंसार्थे असिघातं हन्ति शरघातं हन्ति इत्युदाहरणे।

स्नेहने पिषः ॥३८॥

करणे इत्येव । स्नह्यत्यनेनेति स्नेहनम् । स्नेहनवाचिनि करणे उपपदे पिषेर्णमुल् । उदपेषं पिनष्टि । तैलपेषं पिनष्टि ।

उदकेन तैलेन वा पिनष्टि इत्यर्थः ।

हस्ते वर्तिग्रहोः ॥३९॥

हस्त इत्यर्थग्रहणम् । वर्तिः ण्यन्तः । हस्तवाचिनि करणे उपपदे वर्तयतेर्ग्रहेश्च णमुल् । हस्तवर्तं वर्तयति । करवर्तम् वर्तयति । हस्तग्राहं गृह्णाति ।

हस्तेन वर्तयति—गुलिकां करोतीत्यर्थः । हस्तग्राहं गृह्णाति—हस्तेन गृह्णाति ।

स्वे पुषः ॥४०॥

'स्व' इत्यर्थग्रहणम् । आत्माऽऽत्मीयज्ञातिधनवाची स्वशब्दः । स्वपोषं पुष्णाति । गोपोषम् । मातृपोषम् । पितृपोषम् । धनपोषम् । रैपोषम् ।

स्व—आत्मार्थः । गो—आत्मीयार्थः । मातृ–पितृ–ज्ञात्यर्थः । धन–रै–धनार्थः स्वशब्दः । स्वेन पुष्णात्यादयः अर्थाः ।

अधिकरणे बन्धः ॥४१॥

अधिकरणवाचिन्युपपदे बध्नातेर्णमुल् चक्रबन्धं बध्नाति । चक्रे बध्नातीत्यर्थः ।

बन्धम्—√बन्ध (बन्धने) + णमुल् ।

संज्ञायाम् ॥४२॥

संज्ञायामस्य णमुल् क्रौञ्चबन्धं बध्नाति । चाण्डालिकाबन्धम् । मयूरिकाबन्धम् । बन्धविशेषाणां नामानि ।

क्रौञ्चबन्धम् — यथा क्रौञ्चस्य बन्धनं भवति तद्वत् । एवमन्यत्रापि ज्ञेयम् ।

कर्त्रोर्जीवपुरुषयोर्नशिवहोः ॥४३॥

जीवपुरुषयोरुपपदयोः कर्तृवाचिनोर्यथासंख्यं नशिवहोर्णमुल् । जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः । पुरुषवाहं वहति ।

पुरुषवाहं वहति—पुरुषो वहतीत्यर्थः ।

ऊर्ध्वे शुषिपूरोः ॥४४॥

'ऊर्ध्व' शब्दे कर्तृवाचिन्युपपदे शुषिपूरोर्णमुल् । ऊर्ध्वशोषं शुष्यति । ऊर्ध्वपूरं पूरयति ।

ऊर्ध्वशोषम्—ऊर्ध्वं शुष्यति । वृक्षोऽयम् ऊर्ध्वस्थित एव शुष्यतीत्यर्थः । पूरयति–अयमपपाठः 'पूर्यते' इति युक्तः । ऊर्ध्वमुख एव घटो वर्षोदकेन पूर्यते इत्यर्थः ।

उपमाने कर्मणि च ॥४५॥

उपमाने कर्मण्युपपदे चात्कर्तरि धातोर्णमुल् । घृतनिधायं निहितः । घृतमिव निहित इत्यर्थः । रजकनाशं नष्टः । रजक इव नष्ट इत्यर्थः ।

निधायम्—नि √ धा + णमुल् । धातोः युक्, कर्मणि प्रत्ययः । **नाशम्**- √ नश् + णमुल् । अत्र कर्तरि प्रत्ययः ।

कषादिषु यथाविध्यनुप्रयोगः ॥४६॥

'निमूलसमूलयोः कषः' इत्यारभ्य कषादयः, तेषु यथाविध्यनुप्रयोगो भवति । यस्माद्धातोर्णमुल् भवति स एवानुप्रयोज्यः ।

धातुसम्बन्धे विधानादनुप्रयोगः सिद्ध एव। यथाविधि नियमार्थं वचनम्।

नियमार्थम्—यस्माद्धातोर्णमुल् विहितस्तस्मादेवेति नियमः।

उपदंशस्तृतीयायाम् ॥४७॥

उपपूर्वाद् दंशतेस्तृतीयान्त उपपदे णमुल्। मूलकोपदंशं भुङ्क्ते। विकल्पेनोपपदसमासः। तृतीयाप्रभृतीन्यन्यतरस्यामिति। वासरूपविधेः क्त्वाऽपि। मूलकेनोपदश्य भुङ्क्ते।

मूलकेन उपदंशं भुङ्क्ते-इत्यत्र √ भुज् धातोः करणत्वात् तृतीया तथा तृतीयान्तं 'मूलकेन' इत्युपपदम्। उपदंशनं प्रति तु मूलकं कर्मैव अतः 'मूलकम् उपदश्य, तेन भुङ्क्ते' इत्यर्थः।

हिंसार्थानां च समानकर्मकाणाम् ॥४८॥

तृतीयायामित्येव। हिंसा = प्राण्युपघातः। तदर्थानां धातूनाम् अनुप्रयोगधातुना समानकर्मकाणां तृतीयान्त उपपदे णमुल्। दण्डोपघातं गाः कालयति। समानकर्मकाणामिति किम्? दण्डेनोपहत्य चोरं गोपो गाः कालयति।

समानकर्मकाणाम्—समानं कर्म येषां हिंसार्थानाम् अनुप्रयुक्तानाञ्च। गाः इति उप √ हन् (हिंसायाम्) √ कल् (विक्षेपे) इत्युभयोरपि कर्म। कालनम्—गणनम्। प्रत्युदाहरणे तु हन्तेः कर्म चोरः, कालनस्य च गावः; इति भेदः।

सप्तम्यां चोपपीडरुधकर्षः ॥४९॥

उपपूर्वेभ्य एभ्यः सप्तम्यन्त उपपदे चात्तृतीयान्त उपपदे णमुल्। पार्श्वोपपीडं शेते। पार्श्वयोरुपपीडम् / पार्श्वाभ्यामुपपीडम्।

'उप'शब्दस्य प्रत्येकं योगः। एभ्यः - √ पीड - √ रुध् - √ कर्ष धातुभ्यः। व्रजोपरोधम् / व्रजे उपरोधम् / व्रजेनोपरोधं वा गाः स्थापयति।

पाण्युपकर्षम् / पाणावुपकर्षम् / पाणिनोपकर्षं वा धानाः सङ्गृह्णाति इत्युदाहरणद्वयम्। अत्र √ कर्ष इति गृह्यते न √ कृष्।

समासत्तौ ॥५०॥

समासत्तिः = सन्निकर्षः। तस्यां तृतीयासप्तम्योरुपपदयोः धातोर्णमुल्। केशग्राहं युध्यन्ते / केशेषु ग्राहम् / केशैर्ग्राहम्। युद्धसंरम्भादत्यन्तं संनिकृष्य युद्धयन्ते इत्यर्थः।

संरम्भः — कोपाधिक्येन मनःक्षोभपूर्वको वाक्कायविकारः। परस्परं केशग्रहणात् प्रत्यासत्तिर्भवत्येव।

प्रमाणे च ॥५१॥

प्रमाणमायामः। तस्मिन् गम्ये पूर्ववत्। द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति / द्व्यङ्गुले उत्कर्षम् / द्व्यङ्गुलेनोत्कर्षम्।

आयामः-दीर्घत्वम्। पूर्ववत्–तृतीयासप्तम्योरुपपदयोः धातोर्णमुल्। समासस्य विकल्पत्वाद्रूपत्रयम्। ह्रस्वाः खण्डाः खण्डिकाः। द्वयोः अङ्गुल्योः समाहारो द्व्यङ्गुलम्।

अपादाने परीप्सायाम् ॥५२॥

अपादाने उपपदे णमुल् परीप्सायाम्। शय्योत्थायं धावति। शय्याया उत्थाय। एवं नाम त्वरते यदवश्यकर्त्तव्यमपि नाद्रियते। शय्योत्थानमात्रमाद्रियते।

उत्थायम्—उत् √ स्था + णमुल् 'उदः स्थास्तम्भोः पूर्वस्य' इति पूर्वसवर्णः। 'आतो युक्' इति युक्। परीप्सा—त्वरा। अवश्यकर्त्तव्यम्—मुखप्रक्षालनादिकम्।

द्वितीयायां च ॥५३॥

द्वितीयान्त उपपदे णमुल् परीप्सायाम्। यष्टिग्राहं युध्यते / यष्टिं ग्राहम्। एवं नाम योद्धुं त्वरते यदायुधग्रहणमपि नाद्रियते।

यष्टिग्राहम्–यष्टिं गृहीत्वा √ ग्रह + णमुल्। नाद्रियते–यत्किमप्यासन्नं तदेव गृह्णातीत्यर्थः।

स्वाङ्गेऽध्रुवे ॥५४॥

अध्रुवे स्वाङ्गवाचिन्युपपदे द्वितीयान्ते णमुल्। अक्षिनिकाणं जल्पति / अक्षि निकाणम् जल्पति।

अध्रुवम्–यस्मिन्नङ्गे छिन्ने प्राणी म्रियते तद् ध्रुवम्। यस्मिन् छिन्ने प्राणी न म्रियते तद् अध्रुवम्। रूपद्वयं समस्तम् असमस्तं च। निकाणः–निमीलनम्। नि √ कण् + घञ्।

परिक्लिश्यमाने च ॥५५॥

परिक्लिश्यमाने स्वाङ्गवाचिनि द्वितीयान्त उपपदे णमुल्। उरः प्रतिपेषं युद्धयन्ते। ध्रुवार्थोऽयमारम्भः।

परिक्लेशः – सर्वतो बाधनम्। उरः प्रतिपेषम् – सम्पूर्णमुरः पीडयन्तः।

विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ॥५६॥

एभ्यो द्वितीयान्त उपपदे णमुल् व्याप्यमाने, आसेव्यमाने च गम्ये। विश्यादिभिः क्रियाभिरनवयवेन पदार्थानां सम्बन्धो व्याप्तिः। आसेवा—द्रव्ये व्याप्तिः। क्रियायामासेवा। गेहानुप्रवेशमास्ते। गेहं गेहमनुप्रवेशमास्ते। गेहमनुप्रवेशमनुप्रवेशमास्ते।

एभ्यः– √ विश्– √ पत्– √ पद्– √ स्कन्द् धातुभ्यः। अनवयवेन–साकल्येन। गेहानुप्रवेशम्–समासेन व्याप्तेरुक्तत्वान्न द्विर्वचनम्। असमासे व्याप्तौ द्रव्यस्य द्वित्वम्। गेहं गेहम्–आसेवायां च क्रियायाः अनुप्रवेशमनुप्रवेशमिति। √ विश् इत्यस्य रूपाण्युक्तानि। √ पत्–गेहानुप्रपातम् / गेहं गेहमनुप्र.... / गेहमनुप्रपातमनुप्रपातमास्ते। √ पद्—गेहानुप्रपादम् / गेहं गेह मनुप्र.... / गेहमनुप्रपादमनुप्रपादमास्ते। √ स्कन्द्—गेहावस्कन्दम् / गेहं गेहमव.... / गेहमवस्कन्दमवस्कन्दमास्ते। इति √ विशवत् त्रीणि त्रीणि रूपाणि ज्ञेयानि।

अस्यतितृषोः क्रियान्तरे कालेषु ।।५७।।

क्रियाव्यवधायकेऽर्थे वर्तमानयोरनयोर्णमुल् । द्व्यहात्यासं गाः पाययति । अद्य पाययित्वा द्व्यहमतिक्रम्य पाययतीत्यर्थः । कालवचिष्वेवोपपदेषु । इह न–योजनमत्यस्य गाः पाययति ।

क्रियान्तरः क्रियाम् अन्तरयति यः स **क्रियाव्यवधायक इत्यर्थः**। अस्यति— √ असु (क्षेपणे) । √ तृष् (पिपासायाम्) । **द्व्यहात्यासम्**–समासाभावे **द्व्यहमत्यासम्** । अद्यपानानन्तरं द्व्यहस्य व्यवधानम् । तृषेरुदाहरणम्–**द्व्यहतर्षं** गाः पाययति । द्व्यहं तर्षं वा ।

नाम्न्यादिशिग्रहोः ।।५८।।

द्वितीयायामित्येव । नाम शब्दे उपपदे आदिशेर्ग्रहेश्च धातोर्णमुल् । नामादेशमाचष्टे / नामग्राहमाह्वयति ।

नाम आदिश्य, नाम गृहीत्वा वेत्यर्थः ।

अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ।।५९।।

अव्यय उपपदे अयथाभिप्रेताख्याने गम्ये करोतेः क्त्वाणमुलौ । ब्राह्मण ! पुत्रस्ते जातः । किं तर्हि, वृषल ! नीचैःकृत्याऽऽचक्षे / नीचैः कृत्वा / नीचैःकारम् । अयथाभिप्रेताख्यान इति किम् ? उच्चैः कृत्वाऽऽचष्टे पुत्रस्ते जातः ।

यद् अभिप्रेतम्–इष्टं तद् यथाभिप्रेतम् न यथाभिप्रेतम् **अयथाभिप्रेतम्** = अप्रियमित्यर्थः । पुत्रजन्मसदृशं वृत्तं गोपनीयमिव कथयति इत्याख्यानप्रकारस्यानभिप्रेतत्वम् । प्रियम् तावदुच्चैराख्यानप्रकारस्यानभिप्रेतत्वम् । प्रियम् तावदुच्चैराख्येयं भवति । **नीचैःकृत्य**—समासे कृते 'क्त्वा' इत्यस्य ल्यप् ।

तिर्यच्यपवर्गे ।।६०।।

तिर्यक्शब्द उपपदे कृञः क्त्वाणमुलौ प्रत्ययौ । अपवर्गः =

फलसमाप्तिः, तस्मिन् गम्ये । तिर्यक्कृत्य गतः / तिर्यक्कृत्वा गतः / तिर्यक्कारं गतः । परिसमाप्य गतः इत्यर्थः ।

तिर्यक्कृत्य—समासे 'क्त्वा' इत्यस्य ल्यप् ।

स्वाङ्गे तस्प्रत्यये कृभ्वोः ॥६१॥

तस्प्रत्ययान्ते स्वाङ्गवाचिन्युपपदे कृभ्वोः धात्वोः क्त्वाणमुलौ । यथासंख्यमत्र नेष्यते । मुखतःकृत्य गतः / मुखतः कृत्वा गतः / मुखतःकारम् गतः ।

तस् 'प्रत्ययो' यस्मात्स्वाङ्गात्तस्वाङ्गे उपपदे इत्यर्थः । भुवः उदाहरणानि—मुखतोभूय तिष्ठति / मुखतो भूत्वा / मुखतोभावम् ।

नाधार्थप्रत्यये च्व्यर्थे ॥६२॥

नार्थो धार्थश्च यस्मात्स एवमुच्यते । तस्मिन् शब्दे च्व्यर्थे उपपदे कृभ्वोः क्त्वाणमुलौ । अनाना नाना कृत्वा नानाकृत्य गतः / नाना कृत्वा / नानाकारम् । विनाकृत्य / विनाकृत्वा / विनाकारम् । एवं √भूः । द्विधाकृत्य / द्विधाकृत्वा / द्विधाकारम् । एवं द्वेधा । एवं भूः ।

नार्थः—'ना' इत्यर्थो यस्य प्रत्ययस्य सः । ना नाञ् इति च । धार्थः-'धा' इत्यर्थो यस्य प्रत्यस्य सः । √ धा, √ धमुञ्, √ एधाच् । नानाकृत्य—समासे 'क्त्वा' इत्यस्य 'ल्यप् । एव भूः—नानाभूय / नाना भूत्वा / नानाभावम् । द्विधाकृत्य—द्वि + धा पूर्ववत् क्त्वो ल्यप् । एवं द्वेधा— द्वेधाकृत्य / द्वेधाकृत्वा / द्वेधाकारम् । एवं भूः-द्विधाभूय / द्विधा-भूत्वा / द्विधाभावम् / धार्थको √ 'धमुञ्' इत्यपि भवति । द्वैधं कृत्य / द्वैधं कृत्वा द्वैधंकारम् । द्वैधंभूय / द्वैधं भूत्वा / द्वैधंभावम् ।

तूष्णीमि भुवः ॥६३॥

तुष्णीमुपपदेऽस्मात् क्त्वाणमुलौ । तूष्णींभूय / तूष्णीं भूत्वा / तूष्णींभावम् । भूग्रहणं कृञो निवृत्त्यर्थम् ।

अस्मात्—√ भू इत्यस्माद्धातोः ।

अन्वच्यानुलोम्ये ॥६४॥

'अन्वक्' शब्द उपपदे √ भू धातोः क्त्वाणमुलौ आनुलोम्ये गम्ये । परचित्तानुविधानमानुलोम्यम् । अन्वग्भूयास्ते / अन्वग्भूत्वा / अन्वग्भावम् ।

आनुलोम्यम्–अनुकूलत्वम् । अन्वग्भूय–अग्रतः, पार्श्वतः, पृष्ठतो वा अनुकूलो भूत्वा आस्ते इत्यर्थः ।

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ॥६५॥

शकादिषूपपदेषु अस्त्यर्थेषु च धातुमात्रात्तुमुन् । अक्रियार्थोपपदार्थोऽयमारम्भः । शक्नोति भोक्तुम् । धृष्णोति भोक्तुम् इत्यादि । अस्त्यर्थे खल्वपि–अस्ति भोक्तुम् । विद्यते भोक्तुम् । भवति भोक्तुम् ।

इत्यादि—जानाति भोक्तुम् । शक्नोति, धृष्णोति, जानाति इति त्रिष्वपि प्रयोगेषु भोजने प्रावीण्यं गम्यते । एवं ग्लायति (असमर्थता) । घटते (योग्यता) । आरभते (प्रारम्भः) । लभते (प्राप्तिः) । क्रमते (चेष्टा) । उत्सहते (उत्साहः) । अर्हति (पात्रता) इत्यर्थाः गम्यन्ते । अस्ति–भवति–विद्यते भोक्तुम्–अत्र सम्भावनामात्रं गम्यते ।

पर्याप्तिवचनेष्वलमर्थेषु ॥६६॥

पर्याप्तिवचनेष्वलमर्थविशिष्टेषु उपदेषु धातोस्तुमुन् । पर्याप्तो भोक्तुम् । अलं भोक्तुम् । पारयति भोक्तुम् ।

पर्याप्तिः–परिपूर्णता । अलमर्थः–सामर्थ्यम् । तेन पर्याप्तो भोक्तुम् इत्यस्यार्थः–भोजने पूर्णसमर्थः ।

कर्त्तरि कृत् ॥६७॥

कृत्संज्ञकाः प्रत्ययाः कर्तरि कारके भवन्ति । कृदुत्पत्तिवाक्यानामयमर्थशेषः । येष्वर्थनिर्देशो नास्ति तत्रेदमुपतिष्ठते, अर्थाकांक्षत्वात् ।

न ल्युन्नादिषु, साक्षादर्थनिर्देशे सति निराकांक्षत्वात् । कारकः । कर्ता । नन्दनः । ग्राही । पचः ।

यत्र विधिसूत्रेषु कश्चनार्थो न निर्दिष्टस्तैः कर्तरि विधीयन्ते । यथा 'ण्वुल्तृचौ' कारकः कर्त्ता । 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' नन्दनः । ग्राही । पचः । अत्र क्रमशः ण्वुल्–तृच्–ल्यु–णिनि–अच् एते प्रत्ययाः कर्तरि भवन्तीति ज्ञेयम् ।

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ॥६८॥

भव्यगेयादयः शब्दाः कर्तरि वा निपात्यन्ते । 'तयोरेव कृत्यक्ते' ति भावकर्मणोः प्राप्तयोः कर्ता वाच्यः पक्षे कथ्यते । भवत्यसौ भव्यः / भव्यमनेनेति वा । गेयो माणवकः साम्नाम् / गेयानि माणकेन सामानीति वा । प्रवचनीयो गुरुः स्वाध्यायस्य / प्रवचनीयः स्वाध्यायो गुरुणा । उपस्थानीयः शिष्यो गुरोः / उपस्थानीयो गुरुः शिष्येण वा । जायतेऽसौ जन्यः / जन्यमनेनेति वा । आप्लवतेऽसावाप्लाव्यः / आप्लव्यमनेनेति वा । आपतत्यसावापात्यः / आपात्यमनेनेति वा ।

गेय–प्रवचनीय–उपस्थानीयेषु क्रमशः √ गै, प्र √ ब्रू, उप √ स्था एते धातवः सकर्मकाः । तेन एषु कर्तरि कर्मणि च प्रत्ययाः । अन्ये √ भू– √ जन– √ प्लव– √ पत इत्येतेऽकर्मकाः, एषु कर्तरि भावे च प्रत्ययाः बोध्याः ।

लः कर्मणि च भावे चाकर्मकेभ्यः ॥६९॥

'ल' इत्युत्सृष्टानुबन्धं सामान्यमेकमेव गृह्यते । लकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि कारके भवन्ति चात्कर्त्तरि । अकर्मकेभ्यो भावे पुनश्चात्कर्त्तरि । गम्यते ग्रामो देवदत्तेन । गच्छति ग्रामं चैत्रः । अकर्मकेभ्यः–आस्यते देवदत्तेन । आस्ते देवदत्तः ।

लः–लट् लिट् आदिषु सामान्यं 'ल्' इति तस्य बहुवचने लः–लकाराः इत्यर्थः ।

तयोरेव कृत्यक्तखलर्थाः ॥७०॥

कृत्याः, क्तश्च, खलर्थाश्च भावकर्मणोरेव स्युः । कृत्याः कर्मणि-कर्त्तव्यः कटो भवता । भावे-आसितव्यं भवता । क्तः कर्मणि-कृतः कटो भवता। भुक्त ओदनो भवता । भावे-शयितं भवता। खलर्थाः-कर्मणि-ईषत्करः कटो भवता । भावे-ईषदाढ्यंभवं भवता इत्यादि ।

भावकर्मणोः-सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यो भावे; प्रत्ययाः भवन्ति । कृत्याः-कृत्यसंज्ञकाः तव्यत्-अनीयर्-यत्-ण्यत् इत्यादयः ।

आदिकर्मणि क्तः कर्तरि च ॥७१॥

आदिकर्मणि यः क्तः स कर्तरि भवति। चाद्यथा प्राप्तं च भावकर्मणोः। आदिभूतः क्रियाक्षण आदिकर्म। तस्मिन्नादिकर्मणि भूतत्वेन विवक्षितो यः क्तो विहितः, तस्यायमर्थनिर्देशः । प्रकृतः कटं देवदत्तः / प्रकृतः कटो देवदत्तेन / प्रकृतं देवदत्तेन ।

आदिकर्म—अत्र कर्मशब्दः क्रियामाह। तस्याः यः आदिः क्षणः, स तु परिनिष्पन्नत्वाद् भूतः। तमादाय कर्तरि, कर्मणि, भावे च 'क्त' प्रत्ययो भवति। प्रकृतः-प्रारब्धवान् इत्यर्थः कर्तरि प्रत्ययः । प्रकृतः-प्रारब्धः कर्मणि प्रत्ययः। प्रकृतम्-प्रारब्धम् अत्र भावे प्रत्ययः । एवम् प्रभुक्त ओदनं देवदत्तः / प्रभुक्त ओदनो देवदत्तेन / प्रभुक्तं देवदत्तेन इत्युदाहरणत्रयमपि ।

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ॥७२॥

गत्यर्थेभ्योऽकर्मकेभ्यो धातुभ्यः श्लिषादिभ्यश्च यः 'क्तः' स कर्त्तरि भवति । चाद्भावकर्मणोः । गतो मैत्रो ग्रामम् / गतो मैत्रेण ग्रामः / गतं मैत्रेण । अकर्मकेभ्यः-ग्लानो भवान् / ग्लानं भवता । उप √ श्लिष्-उपश्लिष्टो भवान् गुरुम् / उपश्लिष्टो गुरुर्भवता /

उपश्लिष्टं भवता। श्लिषादयः सोपसर्गाः सकर्मकाः भवन्ति। उप √ शीङ्–उपशयितो गुरुं भवान् / उपशयितो गुरुर्भवता / उपशयितं भवता। एवं √ स्था - √ आस् - √ वस् - √ जन - √ रुह् - √ जॄ।

उप √ स्था—उपस्थितो गुरुं भवान् / उपस्थितो गुरुर्भवता / उपस्थितं भवता। उप √ आस–उपासितो गुरुं भवान् / उपासितो गुरुर्भवता / उपासितं भवता। अनु √ वस्–अनूषितो गुरुं भवान् / अनूषितो गुरुर्भवता / अनूषितं भवता। अनु √ जन–अनुजातो माणवको माणविकाम् / अनुजाता माणवकेन माणविका / अनुजातं माणवकेन / आ √ रुह–आरूढो वृक्षं भवान् / आरूढो वृक्षो भवता / आरूढं भवता। अनु √ जॄ– अनुजीर्णो वृषलीं देवदत्तः / अनुजीर्णा वृषली देवदत्तेन / अनुजीर्णं देवदत्तेन। अनुप्राप्य जीर्ण इत्यर्थः।

दाशगोघ्नौ सम्प्रदाने ॥७३॥

एतौ सम्प्रदाने कारके निपात्येते। √ दाशृ दाने। दाशन्ति तस्मै दाशः। आगताय तस्मै दातुं गां हन्ति गोघ्नः अतिथिः। निपातनसामर्थ्यादेवार्घार्हं ऋत्विगादिरुच्यते न चाण्डालादिः। असत्यपि गोहनने तस्य योग्यतया गोघ्न इत्यभिधीयते।

दाशः– √ दाशृ + अच्। गोघ्नः–गो √ हन् + अच् उपधालोपश्च, हकारस्य कुत्वं घकारः।

भीमादयोऽपादाने ॥७४॥

एतेऽपादाने निपात्यन्ते। भीमः। भयानकः। प्रस्कन्दनः। समुद्रः इत्यादि।

भीम इत्यादयः उणादिप्रत्ययान्ताः। एषाम् अत्र अपादाने निपातनं भवति। बिभेति अस्मादिति भीमः। प्रस्कन्दनः — वृत्तौ 'संक्रन्दनः' इति पाठः।

ताभ्यामन्यत्रोणादयः ॥७५॥

उणादयः सम्प्रदानापादानाभ्यामन्यत्र स्युः । कृष्यतेऽसौ कृषिः । ततोऽसौ भवति तन्तुः । वृत्तं तदिति वर्त्म । चरितं चर्म ।

कृषिः– √ कृष् + इक् । तन्तुः– √ तन् + तुन् । वर्त्म–√वृत् + मनिन् । चर्म– √चर् + मनिन् ।

क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ॥७६॥

ध्रौव्य-गति-प्रत्यवसानार्थेभ्यो धातुभ्यो यः क्तः सोऽधिकरणे, चाद्यथाप्राप्तं च । तत्र ध्रौव्यार्थेभ्यः कर्तृभावाधिकरणेषु, गत्यर्थेभ्यः कर्तृकर्मभावाधिकरणेषु, प्रत्यवसानार्थेभ्यः कर्मभावाधिकरणेषु । क्रमेणोच्यते—आसितो देवदत्तः / आसितं तेन / आसितमेषाम् । यातः सः / यातो ग्रामस्तेन / यातं तेन / यातमेषाम् । भुक्त ओदनस्तेन / भुक्तं तेन / भुक्तमेषाम् ।

ध्रौव्यार्थाः– अकर्मकाः । ध्रुवस्य भावो ध्रौव्यम् । प्रत्यवसानार्थाः– भोजनार्थाः इत्यर्थो वैयाकरणसमवाये प्रसिद्धः । एषाम्–'अधिकरणवाचिनश्च' इति षष्ठी ।

लस्य ॥७७॥

अधिकारोऽयम् । 'ल' इति दश लकारा उच्यन्ते । यदित ऊर्ध्वमनुक्रमिष्यामः, लस्येत्येवं तत् ज्ञेयम् । षट् टितः । चत्वारो ङितः । अक्षरसमाम्नायवदानुपूर्व्या कथ्यन्ते-लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । 'ल' मात्रस्य ग्रहणं कुतो न—लुनाति, चूडालः । धात्वधिकारात् कर्त्रादयश्च विशेषकाः ।

'ल' इति–अकार उच्चारणार्थः 'ल्' इत्येव स्थानी । 'लट्' इत्यादिषु दशस्वपि अनुबन्धरहितो लकारः सामान्येन गृह्यते । विशेषकाः–धातोर्विहितस्य कर्त्रादिविशिष्टस्यैव लकारस्य ग्रहणं भवतीति भावः ।

तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथां-
ध्वमिड्वहिमहिङ् ॥७८॥

लस्य तिबादय आदेशाः भवन्ति । पः स्वरार्थः । इटष्टकारः 'इटोऽत्' इति विशेषणार्थः । महिङो 'ङ्' 'तिङ्' इति प्रत्याहारार्थः । पचति । पचतः । पचन्ति इत्यादि । एवमन्येष्वपि लकारेषूदाहार्यम् ।

तिबादयः–तिप् – तस् – झि – सिप् – थस् – थ – मिप् – वस् – मस् – त – आताम् – झ – थास् – आथाम् – ध्वम् – इट् – वहि – महिङ् । **विशेषणार्थः**–तेन 'आद्यन्तौ टकितौ' इति न प्रवर्तते । इत्यादि–पचसि । पचथः । पचथ । पचामि । पचावः । पचामः । पचते । पचेते । पचन्ते । पचसे । पचेथे । पचध्वे । पचे । पचावहे । पचामहे ।

टित आत्मनेपदानां टेरे ॥७९॥

टितो लस्यात्मनेपदस्य टेरेत्वम् । इह कस्मान्न भवति पचमानः ? प्रकृतैस्तिबादिभिरात्मनेपदं विशेष्यते ।

उदाहरणानि–पूर्वोक्तानि पचते······पचामहे इति नवसंख्याकानि । **विशेष्यते**–तेन 'तिप्' आदिषु यानि 'त······महिङ्' इति नवात्मनेपदानि तान्येव गृह्यन्ते । पचमानः इत्यत्र शानच् प्रत्ययः । न स तत्र सन्निविष्टो वर्तते ।

थासः से ॥८०॥

टितो लस्य थासः 'से' स्यात् । पचसे । पेचिषे । पक्तासे । पक्ष्यसे ।

पचसे······पक्ष्यसे–क्रमशः लटः, लिटः, लुटः, लृटश्च स्थाने जातस्य 'थास्' इत्यस्य 'से' ।

लिटस्तझयोरेशिरेच् ॥८१॥

लिडादेशयोस्तझयोः क्रमेण एश्, इरेच् एतौ । 'शः' सर्वादेशार्थः, चः स्वरार्थः । पेचे । पेचिरे ।

पेचे – √ पच् + लिट् → त → एश् । पेचिरे – √ पच् + लिट् → झ → इरेच् । सर्वादेशार्थः– 'अनेकाल्शित् सर्वस्य' इत्यनेन ।

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥८२॥

लिटस्तिबादीनां नवानां णलादयो नव यथासंख्यम् । णो वृद्ध्यर्थः । पपाच । पेचतुः । पेचुः । पपक्थ । पेचथुः । पेच । पपाच/पपच । पेचिव । पेचिम ।

यथासंख्यम्–नव स्थानिनः, नव आदेशाः क्रमशो भवन्ति ।
स्थानिनः–तिप् तस् झि सिप् थस् थ मिप् वस् मस् ।
आदेशाः– णल् अतुस् उस् थल् अथुस् अ णल् व म ।
पपाच / पपच–'णलुत्तमो वा' इत्यनेनोत्तम-पुरुषे 'मिप्' इत्यस्यादेशो 'णल्' वा णित् भवति तेन पक्षे वृद्धिर्न ।

विदो लटो वा ॥८३॥

√ विद् ज्ञाने । विदः परेषां लडादेशानां तिबादिनवानां णलादयो नव क्रमात् स्युः । वेद । विदतुः । विदुः इत्यादि । न च भवति वेत्ति । वित्तः । विदन्ति इत्यादि ।

स्युः–विकल्पेनेति शेषः । इत्यादि–वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे वेत्सि । वित्थः । वित्थ । वेद्मि । विद्वः । विद्मः इत्यपि बोध्यानि ।

ब्रुवः पञ्चानामादित आहो ब्रुवः ॥८४॥

ब्रुवः परेषां लडादेशानाम् पञ्चानां वा णलादयो पञ्च क्रमात् स्युः । ब्रुव 'आह' इत्ययमादेशश्च । आह । आहतुः । आहुः । आत्थ । आहथुः । न च भवति ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रवीषि । ब्रूथः ।

पञ्चानाम्—तिप – तस् – झि – सिप् – थस् एषाम् । णलादिसन्नियोगेनैव 'आह' आदेशोऽपि पञ्चस्वेव विभक्तिषु भवति ।

लोटो लङ्वत् ॥८५॥

लोटो लङ्वत् कार्यं स्यात्तामादयः सलोपश्च । पचताम् । पचतम् । पचत । पचाव । पचाम ।

पचताम्— √ पच + तस् → ताम् । पचतम् – √ पच् + थस् → तम् । पचत – √ पच् + थ → त । पचाव– √ पच् + वस् सलोपः । एवम् पचाम । 'लङः शाकटायनस्यैव' इति व्यवस्थितविकल्पाद-डादयो न ।

एरुः ॥८६॥

लोट इकारस्य उः । पचतु । पचन्तु ।

*(वा०) हिन्योरुत्वप्रतिषेधो वाच्यः ।

हिन्योः–हिश्च निश्च हिनी तयोः । लुनीहि, पठानि इति क्रमशः उदाहरणे ।

सेर्ह्यपिच्च ॥८७॥

लोटः सेर्हिः, अपिच्च । स्थानिवत्त्वात् पित्त्वं प्राप्तं प्रति-षिध्यते । लुनीहि । राध्नुहि ।

स्थानिवत्त्वात्.....प्रतिषध्यते—सिपः पित्त्वम् इत्यर्थः । पित्त्वे प्रतिषिद्धे 'सार्वधातुकमपित्' इति ङित्त्वे 'लुनीहि' इत्यत्र 'ई हल्यघोः' इतीत्त्वं भवति ।

वा छन्दसि ॥८८॥

अपित्त्वं विकल्प्यते नादेशः । युयोधि । प्रीणीहि / प्रीणाहि ।

युयोधि—पित्त्वाद् ङित्त्वाभावे 'हि' इत्यस्य 'धिः' । प्रीणीहि–अपित्त्वात् ईत्त्वम् । पित्त्वे सति प्रीणाहि ।

मेर्निः ॥८९॥

लोटो मेर्निः । उत्वलोपयोरपवादः । पचानि ।

पचानि—'एरुः' इति उत्वम्, 'इतश्च' इतीकारलोपो न ।

आमेतः ॥९०॥

लोडेकारस्याम् स्यात् । पचताम् । पचेताम् । पचन्ताम् ।

लोडेकारस्य—'लोट्' सम्बन्धी य एकारस्तस्य 'आम्' ।

सवाभ्यां वामौ ॥९१॥

स-वाभ्यां परस्य लोडेकारस्य क्रमेण 'व, अम्' एतौ स्तः । पचस्व । पचध्वम् ।

लटि पचसे, पचध्वे इति रूपयोः क्रमेण पचस्व, पचध्वम् इति भवतः ।

आडुत्तमस्य पिच्च ॥९२॥

लोडुत्तमस्य 'आट्' आगमः स च पित् । करवाणि । करवाव । करवाम । करवै । करवावहै । करवामहै ।

उत्तमपुरुषे लकारस्य षड् आदेशाः भवन्ति । त्रयः परस्मैपदे, त्रयश्च आत्मनेपदे । √ कृ इत्युभयपदी, तस्य षड् रूपाणि भवन्ति क्रमशः—करोमि । कुर्वः । कुर्मः । कुर्वे । कुर्वहे । कुर्महे । 'आट्' टित्त्वात् प्रत्ययस्यादौ भवति । स च-उत्तमपुरुषः 'पित्' तेन गुणः । एवं लोटि पूर्वोक्तानि रूपाणि भवन्ति ।

एत ऐ ॥९३॥

लोडुत्तमस्य एकारस्य ऐ । आमोऽपवादः । करवै । करवामहै । करवामहै ।

'टित आत्मने पदानां टेरे' इति इकारस्य एत्वे कृते, अनेन ऐकारादेशः ।

लेटोऽडाटौ ॥९४॥

लेटः अट्। आट् एतौ आगमौ पर्यायेण। जोषिषत्। तारिषत्। मन्दिषत्। पताति विद्युत्। उदधिं च्यावयाति।

जोषिषत्— √ जुषी प्रीति-सेवनयोः। तारिषत् — √ तॄ तरणे। मन्दिषत् – √ मदि स्तुति-मोदादिषु। सर्वत्र 'सिब्बहुलं लेटि' इति सूत्रेण 'सिप्' आगमः। एषु त्रिषु प्रयोगेषु 'अट्' इत्यस्यागमः। 'आट्' इत्यस्योदाहरणम् पताति–अत्र न 'सिच्'। णिजन्तस्योदाहरणम् च्यावयाति–अत्रापि 'आट्' न 'सिच्'।

आत ऐ ॥९५॥

लेट 'आ' इत्यस्य ऐकार आदेशः। प्रथम-मध्यमपुरुषात्मनेपदद्विवचनयोः। मन्त्रयैते। मन्त्रयैथे।

मन्त्रयैते— √ मत्रि गुप्तभाषणे चुरादिः लटि प्रथमपुरुष–द्विवचने मन्त्रयते। आटि कृते मन्त्रयाते, तस्य आकारस्य ऐत्वम् मन्त्रयैते। मन्त्रयैथे — मध्यमपुरुष-द्विवचने रूपम् मन्त्रयथे। आटि मन्त्रयाथे, ऐत्वे मन्त्रयैथे।

वैतोऽन्यत्र ॥९६॥

अन्यत्रेति अनन्तरविधिरपेक्ष्यते। 'आत ऐ' इत्येतद्विषयं वर्जयित्वा। अहमेव पशूनामीशै।

पशूनाम् ईशै — √ ईश् (ऐश्वर्ये) + लेट् उत्तम पुरुष-एकवचने ईशे। एकारस्य ऐकारः ईशै।

इतश्च लोपः परस्मैपदेषु ॥९७॥

लेट इकारस्य परस्मैपदस्य लोपः। वेति चानुवृत्तेः पक्षे श्रवणमपि। जोषिषत्। न च पताति।

जोषिषत्—लेट् प्रथमपुरुष एक वचने 'तिप्' इकारस्य लोपः। न च—लोपाभावे इत्यर्थः।

स उत्तमस्य ॥९८॥

लेट उत्तमसकारस्य वा लोपः । करवाव । करवाम । पक्षे करवावः । करवामः ।

करवाव, करवाम—उभयत्र 'लेटोऽडाटौ' इत्यनेन 'आट्' ।

नित्यं ङितः ॥९९॥

ङिल्लकारोत्तमसकारस्य नित्यं लोपः । अपचाव । अपचाम ।

अपचाव, अपचाम — √ पच् + लङ् उ० पु० द्विवचने बहुवचने च रूपे ।

इतश्च ॥१००॥

ङितो लस्य परस्मैपदेष्विकारस्य लोपः । अपचत् । अपाक्षीत् ।

अपचत्— √ पच् + लङ् तिपः इकारस्य लोपः । अपाक्षीत्— √ पच् + लुङ् । अत्रापि तिपः इकारस्य लोपः ।

तस्थस्थमिपां तांतंतामः ॥१०१॥

ङितश्चतुर्णां तसादीनां तामादयः क्रमात्स्युः । अपचताम् । अपचतम् । अपचत । अपचम् ।

अपचताम्— √ पच + लङ् प्र० पुरुष द्वि व० 'तस्', तस्य 'ताम्' आदेशः । अपचतम् – √ पच् + √ लङ् म० प्र० द्वि व० 'थस्' तस्य 'तम्' आदेशः । अपचत— √ पच् + लङ् म० प्र० ब० व० 'थ', तस्य 'त' आदेशः । अपचम् — √ पच् + लङ् उ० पु० ए० व० 'मिप्', तस्य 'अम्' आदेशः ।

लिङः सीयुट् ॥१०२॥

लिङादेशानां सीयुडागमो भवति । पचेत । पचेयाताम् । पचेरन् ।

पचेत— √ पच् + विधिलिङ् आत्मने पदे प्र० पु० ए० व०। एवं प्र० पु० द्विवचने पचेयाताम् बहुवचने पचेरन्।

यासुट् परस्मैपदेषूदात्तो ङिच्च ॥१०३॥

लिङः परस्मैपदानां यासुडागमः। स चोदात्तः ङिच्च भवति। आगमानुदात्तत्वे प्राप्ते ङित्त्वं तु लिङ एव विधीयते तत्र तत्कार्याणां सम्भवात्, नागमस्य। कुर्यात्। कुर्याताम्। कुर्युः।

स्थानिवद्भावादेव लिङादेशस्य ङित्वे सिद्धे यासुटो ङिद्वचनं ज्ञापनार्थं लकाराश्रयं ङित्त्वमादेशानां न भवति। अचिनवम्। असुनवम्।

परस्मैपदानाम्–तेनात्मनेपदानां 'सीयुट्' परस्मैपदानां 'यासुट्' इति स्पष्टम्। उदात्तविधानेन ज्ञाप्यते यत् सर्वे आगमाः अनुदात्ताः भवन्ति। **अचिनवम्** — अत्र अ चि नु + (मिप्) अम् इति स्थिते गुणो भवति। अन्यथा लङो ङित्त्वात् तदादेशस्यापि ङित्त्वमाश्रित्य गुण-प्रतिषेधः स्यात्।

किदाशिषि ॥१०४॥

आशिषि लिङो 'यासुट्' स च 'कित्'। इज्यात्।

इज्यात्–अत्र √ यज् + आशिषि लिङ् प्र० पु० ए० व०। कित्त्वात् 'वचिस्वपियजादीनां किति' इति सम्प्रसारणम्। कित्त्वस्य अन्यानि प्रयोजनानि—**जागर्यात्** - √ जागृ + आशिषि लिङ् (तिप्) अत्र ङित्त्वात् गुणनिषेधः स्यात्, कित्त्वात्तु भवति।

झस्य रन् ॥१०५॥

लिङादेशस्य झस्य 'रन्' पचेरन्।

पचेरन्—√ पच् + विधिलिङ् प्र० पु० ब० व० 'झ' तस्य 'रन्'।

इटोऽत् ॥१०६॥

लिङादेशस्य इटोऽत्। पचेय। यजेय। तकारो मुखसुखार्थः।

पचेय— √ पच + विधिलिङ् उ० पु० ए० व० 'इट्' तस्य 'अत्'। मुखसुखार्थः — उच्चारणसौकर्याय । तेन 'अ' एवादेशो ज्ञेयः । इत्संज्ञा तु न भवति 'न विभक्तौ तुस्माः' इति निषेधात् ।

सुट् तिथोः ॥१०७॥

लिङस्तकारथकारयोः सुडागमः । तकारे इकार उच्चारणार्थः । कृषीष्ट । कृषीष्ठाः ।

कृषीष्ट– √ कृ + विधिलिङ् प्र० पु० ए० व० आत्मनेपदे 'त' 'सीयुट्' आगमः कृ सी त । तदनन्तरं 'सुट्' मूर्धन्यादेशेन ष्टुत्वेन च कृषीष्ट । कृषीष्ठाः– √ कृ + विधिलिङ् म० पु० ए० व० 'थास्'। शेषं पूर्ववत् ।

झेर्जुस् ॥१०८॥

झोऽन्तापवादः । पचेयुः ।

लिङादेशस्य झेर्जुस् । पचेयुः – √ पच् + विधिलिङ्, प्र० पु० ब० व० 'झि' तस्य 'जुस्' । अपवादः – 'झोऽन्तः, इत्यनेन 'झि' इत्यस्य झकारस्य 'अन्त' आदेशो भवति–पचन्ति, तस्यापवादः । लिङि अन्तादेशो न भवतीत्यर्थः ।

सिजभ्यस्तविदिभ्यश्च ॥१०९॥

सिचः परस्याभ्यस्तविदिभ्यां च ङित्सम्बन्धिनो झेर्जुस् । अभ्यस्तविदिग्रहणम् असिजर्थम् । अकार्षुः । अजिह्रयुः । अविदुः ।

अकार्षुः– √ कृ + लुङ् प्र० पु० ब० व० 'झि', अत्र सिचः परस्य झेर्जुस् । अजिह्रयुः – √ ह्री (लज्जायाम्) + लङ् → झि । 'उभे अभ्यस्तम्' इत्यनेन 'अभ्यस्त' संज्ञा । अविदुः – √ विद् + लुङ् → झि तस्य 'जुस्' ।

आतः ॥११०॥

सिच आकारान्ताच्च परस्य झेर्जुस् । अदुः । अधुः । 'सिचः'

इत्यनुवर्तते । आकारान्तो यो धातुः, तस्मात् परस्य लुप्तात् सिचश्च 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति परिभाषया परस्य झेर्जुस् इत्यर्थः ।

अदुः– √ दा + लुङ् सिच आगमस्य 'गातिस्था....' इति सूत्रेण लुक् । लुङादेशस्य झेर्जुस् । 'आतो लोप इटि च' इत्याकारस्य लोपः । अधुः–अत्र √ धा इति धातुरस्ति । शेषं पूर्ववत् ।

लङः शाकटायनस्यैव ॥१११॥

आकारान्तादङ्गादुत्तरस्य लङादेशस्य झेर्जुस् शाकटायनस्य मतेन । अयुः । अवुः । अन्येषां मते अयान् । अवान् ।

शाकटायनः वैयाकरणाचार्यः पाणिनेः पूर्ववर्ती । अयुः – √ या + लङ् → झि, तस्य 'जुस्' पक्षे अयान् । अवुः – √ वा + लङ् । शेषं पूर्ववत् । पक्षे अवान् ।

द्विषश्च ॥११२॥

द्विषः परस्य झेर्जुस् । अद्विषुः / अद्विषन् ।

शाकटायनस्यैव मतेन, तेन द्वे रूपे भवतः ।

तिङ्शित्सार्वधातुकम् ॥११३॥

तिङः, शितश्च प्रत्ययाः सार्वधातुकसंज्ञाः । भवति । नयति । रोदिति । स्वपिति ।

भवति, नयति– √भू + लट् → ति तिङः सार्वधातुकसंज्ञायां कर्तरि 'शप्', 'सार्वधातुकार्धधातुकयोः' इति गुणः । एवं **नयति** अत्र √ नी धातुः । रोदिति, स्वदिति – क्रमशः √ रुद्, √ स्वप् धातू स्तः । अदादिगणे शपो लोपेऽपि तस्य शित्त्वात् सार्वधातुकसंज्ञायां 'रुदादिभ्यः सार्वधातुके' इति 'इट्' ।

आर्धधातुकं शेषः ॥११४॥

तिङः शितश्च वर्जयित्वा योऽन्यो धातुविहितप्रत्ययः स शेषः आर्धधातुकसंज्ञः । लविता । लवितुम् । लवितव्यम् ।

लविता– √ लू + तृच । **लवितुम्** – √ लू + तुमुन् । **लवितव्यम्**– √ लू + तव्यत् । सर्वत्र प्रत्ययानां आर्धधातुकसंज्ञया 'आर्धधातुकस्येड् वलादेः, इति 'इट्' ।

लिट् च ॥११५॥

लिडादेशास्तिङः आर्धधातुकसंज्ञाः । सार्वधातुकसंज्ञापवादः । पेचिथ । शेकिथ । जग्ले । मम्ले ।

पेचिथ– √ पच् + लिट् म० पु० ए० व० 'सिप्', तस्य 'थल्' । आर्धधातुकत्वात् 'ऋतो भारद्वाजस्य' इति 'इट्' । **शेकिथ–** √ शक् + लिट् शेषं पूर्ववत् । **जग्ले**· √ ग्लै + लिट् प्र० पु० ए० व० आर्धधातुकत्वात् 'आतो लोप इटि च' इत्याकारलोपः । **मम्ले** – √ म्लै + लिट् शेषं पूर्ववत् ।

लिङाशिषि ॥११६॥

आशिषि विषये यो लिङ्, तदादेशास्तिङः आर्धधातुकसंज्ञाः । पविषीष्ट । पविषीष्ठाः ।

पविषीष्ट– √ पू + आशिषि लिङ् प्र० पु० ए० व० 'त' आर्धधातु· कत्वेन 'श्ना' इति न भवति 'इट्' च भवति । **पविषीष्ठाः–**पू + आशिषि लिङ् म० पु० ए० व० 'थास्' ।

छन्दस्युभयथा ॥११७॥

छन्दसि विषये उभयथा भवति । सार्वधातुकमार्धधातुकं च । किं लिङेवानन्तरत्वात् सम्बध्यते ? नैतदस्ति । सर्वमेव प्रकरण-मपेक्ष्यैतदुच्यते तिङ्शिदादि सर्वमेव छन्दस्युभयथा भवति । वर्धन्तु त्वा सुष्टुतयः । आर्धधातुकत्वाण्णिलोपः । 'वर्धयन्तु' इति प्राप्ते । शेषं च सार्वधातुकम् । स्वस्तये तार्क्ष्यमिहाहुवेम । क्तिनः सार्वधातु-कत्वादस्तेर्भूभावो न । लिट् सार्वधातुकम्-ससृवांसो विशृण्विरे ।

धातुसम्बन्धसमानाधिकरणे स्वाङ्गेलिटस्तस्थस्थमिपां सप्तदश

इति श्रीमत्कश्यपगोत्रजेन सूरिवर्यधरणीधरशिष्येण समाराधितराम-कृष्णेन

सामवेदित्रिपाठिरामकृष्णात्मजेन सिद्धसारस्वतमन्त्रेण

आचार्यबलभद्रेण विरचिते काशिकावृत्तिसारे

तृतीयाध्यायस्य चतुर्थः पादः ।

णिलोपः–'णेरनिटि' इत्यनेन सूत्रेण । ताक्ष्यंमिहाहुवेम–वृत्तौ तु 'नावमिवारुहेम' इति पाठः । विशृण्विरे–सार्वधातुकत्वात् 'श्नुः', श्रुवः 'शृ' आदेशः ।

तृतीयाध्यायस्यास्मिन् चतुर्थे पादे धातुसम्बन्धे प्रत्ययाः, समानकर्तृकयोः पूर्वकाले, अधिकरणे बन्धः, स्वाङ्गे तस्प्रत्यये कृभ्वोः, लिटस्तझयोरेशिरेच्, इत्येतेभ्य आरभ्य विंशतिः सूत्राणि तथा तस्थस्थमिपां तांतंतामः इत्यत आरभ्य सप्तदश सूत्राणीति संकलनेन सप्तदशोत्तरशतसंख्याकानि (११७) सूत्राणि सन्ति ।

इति सामवेदिविप्रवंशलब्धजन्मना श्रीमत्त्रिपाठिबालकरामात्मजेन

शिवादेवीगर्भजातेनाचार्येण चन्द्रभानुत्रिपाठिना

विरचितायां काशिकावृत्तिसारसुधायां

तृतीयाध्यायस्य चतुर्थः पादः ।

तृतीयाध्यायः समाप्तः ।

अथ चतुर्थाध्याये प्रथमः पादः

ङ्याप्प्रातिपदिकात् ॥१॥

अधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्याम आपञ्चमाध्यायपरिसमाप्तेर्ङ्याप्प्रातिपदिकादित्येवं तद्वेदितव्यम्। स्वादिषु कप्पर्यन्तेषु प्रकृतिरियमधिक्रियते।

ङ्याप्प्रातिपदिकात् – ङी + आप् + प्रातिपदिकात्। ङी – ङीप् – ङीष्–ङीन् इति स्त्रीप्रत्ययानां ग्रहणम्। आप् – टाप् – डाप् – चाप् इत्येतेषां ग्रहणम्। प्रातिपदिकम्—'अर्थवत्.....' 'कृत्तद्धित.....' सूत्राभ्यां येषां 'प्रातिपदिक, संज्ञा तेषां ग्रहणम्। सर्वेषां समाहारेण निर्देशः 'ङ्याप्प्रातिपदिकात्' इति। अधिक्रियते–सर्वे वक्ष्यमाणाः प्रत्ययाः ङी–आप्–प्रातिपदिकेभ्यो भवन्तीत्यर्थः।

स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ॥२॥

ङ्याप्प्रातिपदिकात् स्वादयः प्रत्ययाः भवन्ति। उकारादयोऽनुबन्धा यथायोगमुच्चारणविशेषणार्थाः। संख्याकर्मादयश्च स्वादीनामर्थाः शास्त्रान्तरेण विहिताः तेन सहास्यैकवाक्यता। ङ्यन्तात्– कुमारी। गौरी। शार्ङ्गरवी। ङीप्-ङीष्-ङीनां क्रमेणोदाहरणम्।

कुमारी कुमार्यौ कुमार्यः कुमारीम् कुमार्यौ कुमारीः कुमार्या कुमारीभ्याम् कुमारीभिः कुमार्यै कुमारीभ्याम् कुमारीभ्यः कुमार्याः कुमारीभ्याम् कुमारीभ्यः कुमार्याः कुमार्योः कुमारीणाम्

कुमार्याम् कुमार्योः कुमारीषु । एवं गौरी-शाङ्र्गरवी चोदाहार्ये । आपः-खट्वा खट्वे खट्वाः इत्यादि ज्ञेयम् । एवं बहुराजा-कारीषगन्ध्ये चोदाहार्ये ।

एवं प्रातिपदिकात्—दृषद् दृषदौ दृषदः इत्यादि ज्ञातव्यम् ।

स्वादयः—सु – औ – जस् । अम् – औट् – शस् ।
टा – भ्याम् – भिस् । ङे – भ्याम् – भ्यस् ।
ङसि – भ्याम् – भ्यस् । ङस् – ओस् – आम् ।
ङि – ओस् – सुप् । इति एकविंशतिः प्रत्ययाः ।

कुमारी—अत्र ङीप् । गौरी—अत्र ङीष् । शाङ्गरवी – अत्र ङीन् इति स्त्रियां क्रमशः त्रयः प्रत्ययाः भवन्ति । खट्वा—अत्र स्त्रियां टाप् प्रत्ययो भवति । बहुराजा—बहवः राजानः यस्यां नगर्यां सा बहुराजा नाम नगरी बहुराजन् + डाप् 'अन्' इत्यस्य लोपः । कारीषकन्ध्या—करीषस्येव गन्धः अस्य करीषगन्धिः, तस्य गोत्रापत्यं स्त्री कारीषगन्ध्य + चाप् । दृषद्—अस्य 'अर्थवत्....' इत्यनेन 'प्रातिपदिक' संज्ञा । 'कृत्तद्धित-समासाश्च' इत्यनेन 'प्रातिपदिक' संज्ञा येषां भवति, तेषु कृदन्तस्योदाहरणम् कारकः । तद्धितस्य गार्ग्यः । समासस्य हरित्रातः ।

स्त्रियाम् ॥३॥

यदित ऊर्ध्वमनुक्रमिष्यामः, स्त्रियामित्येवं तद्वेदितव्यम् ।

अस्मिन् व्याकरणशास्त्रे स्त्रीत्वस्य परिभाषा न कृता । लौकिकं स्त्रीत्वं प्रत्यक्षम्—स्तनकेशवती नारी । 'खट्वा' इत्यादिषु लौकिकलिङ्गं न दृश्यते, अतः वैयाकरणैरुक्तम्—ये शब्दाः लिङ्गानुशासने यथा उक्ताः, ते तथा ज्ञेयाः । 'खट्वा' आदयः स्त्रीत्वविशिष्टाः । स्त्रीवाची 'दार' शब्दः पुंल्लिङ्गे । एवं यथोक्तास्तथा व्यवह्रियन्ते । इदम् अधिकारसूत्रम् । स्त्रियां 'टाप्' आदयः प्रत्ययाः भवन्ति ।

अजाद्यतष्टाप् ॥४॥

अजादिभ्यः प्रातिपदिकेभ्योऽकारान्ताच्च टाप् स्यात् । पकारः सामान्यग्रहणार्थः । अजा । एडका । देवदत्ता । अजादिग्रहणं

जात्यादावपि यथा स्यात् । 'शूद्राच्चामहत्पूर्वाज्जातिः' इति पठ्यते । शूद्रा ।

टाप् स्यात् — स्त्रियाम्' इति शेषः । अजादीनां स्त्रीत्वे द्योत्ये इत्यर्थः । **सामान्यग्रहणार्थः**—तेन 'ङ्याप् प्रातिपदिकात्' इत्यत्र टापो ग्रहणं भवति ।

❀(वा०) शूद्राच्चामहत्पूर्वाज्जातिः—वृत्तौ कौमुद्यां च शूद्रा चाम-हत्पूर्वा इति पाठः । शूद्रस्य स्त्री तु शूद्री भवति । एवं महत्पूर्वेऽपि महाशूद्री इति ज्ञेयम् ।

ऋन्नेभ्यो ङीप् ॥५॥

ऋदन्तेभ्यो नान्तेभ्यश्च ङीप् । कर्त्री । हर्त्री । दण्डिनी ।

'कर्तृ, हर्तृ' ऋकारान्तौ । 'दण्डिन्' नान्तः । एभ्यो ङीप् ।

उगितश्च ॥६॥

यथाकथञ्चिदुगितो ङीप् । भवती । पचन्ती ।

❀(वा०) धातोरुगितो न । उखास्रत् ।

❀(वा०) अञ्चतेश्चोपसंख्यानम् । प्राची ।

यथाकथञ्चित्—'उगित्' शब्दस्वरूपम् 'उक्' (उ–ऋ–ऌ–वर्णाः) इत् यत्र शब्दे सम्भवति प्रत्यये प्रातिपदिके वा । प्रत्ययस्योदाहरणे भवती, पचन्ती । अत्र डवतु–शतृ प्रत्ययौ उगितौ । तदन्ते प्रातिपदिके भवत्, पचन्त् इति, ताभ्यां ङीप् । वर्णमात्रस्योगित उदाहरणम्–अर्वती । अत्र 'अर्वन्' शब्दस्य नकारस्य 'तृ' इत्यादेशः उगित् । उखास्रत्–उखेन स्रंसते इति उख √ स्रंसु + क्विप् । 'उख' इत्यस्याकारस्य दीर्घः । अत्र 'स्रंसु' इति धातुः उगित् । प्राची–प्र √ अञ्च + क्विन् प्राच् + ङीप् ।

वनो र च ॥७॥

वन्नन्तात् ङीप् रेफश्चान्तादेशः । धीवरी ।

❀(वा०) वनो न हशः । ङीब्नौ । सहयुध्वा ।

धीवरी— √ धा + क्वनिप् = धीवन् + ङीप् नकारस्य रकारः। एवं शर्वरी— √ शॄ + वनिप्। अत्र 'वनो न हशः' इति वार्तिकेन प्रतिषेधो न, तस्य क्वचित् अप्रवृत्तेः। सहयुध्वा— √ युध् + वनिप्। 'ब्राह्मणी' इति शेषः। अत्र 'ङीप्' रादेशश्च न भवतः।

पादोऽन्यतरस्याम् ॥८॥

पादन्ताद्वा ङीप् / द्विपात् / द्विपदी।

पादः–कृतसमासान्तः 'पाद्' शब्दः। द्विपदी–द्वौ पादौ अस्याः इति बहुव्रीहौ कृते ङीप्, 'पादः पत्' इत्यनेन 'पाद्' इत्यस्य 'पद्' आदेशः। एवं त्रिपात् / त्रिपदी इत्यादि।

टाबृचि ॥९॥

ऋचि वाच्यायां पादन्ताट्टाप्। द्विपदा ऋक्।

अत्र ऋक् शब्दः अर्थपरः। द्विपदा—द्वौ पादौ अस्याम् इति। एवं त्रिपदा, चतुष्पदा इति। पूर्ववत् पादः 'पद्' आदेशः।

न षट्स्वस्रादिभ्यः ॥१०॥

षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च स्त्रीप्रत्ययो न। पञ्च ब्राह्मण्यः। स्वसा।

पञ्च— 'पञ्चन्' शब्दस्य 'ष्णान्ताः षट्' इत्यनेन 'षट्' संज्ञा। स्वसा–स्वसृ–इत्यादयः सप्त परिगणिताः सन्ति। क्रमशः तेषां प्रथमैकवचने रूपाणि–स्वसा। दुहिता। ननान्दा। याता। माता इति पञ्च। द्वौ च त्रि-चतुर् शब्दौ नित्यबहुवचनान्तौ। तयोः क्रमशः 'तिसृ–चतसृ' आदेशौ भवतः। तिस्रः। चतस्रः।

मनः ॥११॥

मन्नन्तान्न ङीप्। दामा। सुसीमानौ।

दामा— √ दा + मनिन् । सुसीमानौ—शोभना सीमा ययोस्तौ (बहुव्रीहिः) देशौ। 'सीमन्' शब्दः प्रातिपदिकः। 'सीमन्' शब्दे अनर्थकोऽपि 'मन्' शब्दः तदन्तविधि प्रयोजयति।

अनो बहुव्रीहेः ॥१२॥

अन्नन्ताद् बहुव्रीहेर्न ङीप् । सुपर्वा । सुपर्वाणौ ।

सुपर्वा–शोभनं पर्व अस्याः। 'सुपर्वन्' शब्दोऽन्नन्तः । एवं सुचर्मा–शोभनं चर्म अस्याः ।

डाबुभाभ्यामन्यतरस्याम् ॥१३॥

मन्नन्ताद्, अन्नन्ताच्च वा डाप् । पामा । पामे । सीमे । पक्षे पूर्वोक्तम् ।

उभाभ्याम् — पूर्ववर्तिनोः सूत्रयोः निर्दिष्टाभ्याम् 'मन्–अन्' एतदन्ताभ्याम् । पामा–पामन् + डाप् 'अन्' इत्यस्य लोपः। सीमे-एकवचने 'सीमा' इति भवति। एवं बहुव्रीहौ बहुराजाः / बहुराजानः नगर्यः इत्युभयं भवति ।

अनुपसर्जनात् ॥१४॥

यदित ऊर्ध्वमनुक्रमिष्यामः, अनुसर्जनादित्येवं तद् वेदितव्यम् ।

अधिकारसूत्रमिदम् । उत्तरसूत्रेषु उपसर्जनप्रतिषेधं करोति। तेन 'चरट्' प्रत्ययान्तात् कुरुचरी। अत्र ङीप् भवति। बहवः कुरुचराः यस्यां सा बहुकुरुचरा अत्र न भवति ।

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रचतयप्ठक्ठञ्कञ्क्वरप्ख्युनाम् ॥१५॥

टिदादिभ्योऽनुपसर्जनेभ्यो ङीप् । क्रमेण—कुरुचरी । पचमाना, अत्र कथं न ? द्वयनुबन्धकत्वाल्लटः। ल्युडादिषु कथम् ? टित्करण-सामर्थ्यात् । इतरत्र तु टेरेत्वं फलम् । ढ—सौपर्णेयी । अण् -कुम्भ-कारी । औपगवी । णेऽपि क्वचित् चौरी । अत्र न दाण्डा । अञ्-औत्सी । द्वयसच्–उरुद्वयसी । दघ्नच्–उरुदघ्नी । मात्रच्–

करमात्री । तयप्—पञ्चतयी । ठक्—आक्षिकी । ठञ्—लावणिकी । ठक्-ठञोर्भेदेन ग्रहणं ठनादिनिवृत्त्यर्थम् । कञ्—यादृशी । क्वरप्—इत्वरी । ख्युन्—आढ्यङ्करणी ।

❀ (वा०) नञ्स्नञीकक्तरुणतलुनानामुपसंख्यानम् । स्त्रैणी इत्यादि ।

सूत्रे ख्युनाम्—कौमुद्यां 'क्वरपः' इत्यन्तः पाठः । वार्तिके 'तरुणात्' प्राक् ख्युन् इति प्रश्लिष्टः । द्व्यनुबन्धकत्वात्—'लट्' इत्यत्र अ–ट् इति वर्णद्वयम् 'इत्' न केवलं टकारः । सौपर्णेयी—सुपर्ण्याः अपत्यं स्त्री इति सुपर्णी + ढक् + ङीप् । कुम्भकारी—कुम्भकारस्य स्त्री कुम्भकार + ङीप् । अत्र 'अण्' कृत्प्रत्ययः । तद्धित 'अण्' इत्यस्योदाहरणम्—औपगवी । उपगोः अपत्यं स्त्री उपगु + अण् + ङीप् । चौरी—'छत्रादिभ्यो णः' इति 'ण' प्रत्ययः । दाण्डा—दण्डः प्रहरणमस्याम् इति 'तदस्यां प्रहरणम्' इत्यनेन णः । स्त्रैणी—स्त्रिया इयम् स्त्री + नञ् + ङीप् । एवं पौस्नी । शाक्तीकी । याष्टीकी । तरुणी । तलुनी इत्युदाहरणानि ।

यञश्च ॥१६॥

यञन्तात् ङीप् । गार्गी ।

❀ (वा०) अपत्यग्रहणं कर्त्तव्यम् । नेह द्वीपे भवा द्वैप्या । पृथग्योगकरणमुत्तरार्थम् ।

गार्गी—गर्गस्य गोत्रापत्यं स्त्री गर्ग + यञ् = गार्ग्य + ङीप् । 'यस्येति च' इत्यकारलोपः, 'हलस्तद्धितस्य च' इति यकारलोपः ।

प्राचां ष्फ तद्धितः ॥१७॥

यञन्तात् प्राचां मते ष्फः । स च तद्धितसंज्ञकः । गार्ग्यायणी ।

ष्फः—षकारस्येत्संज्ञया ङीष् । तद्धितसंज्ञकः—तेन तद्धितान्तस्य 'प्रातिपदिक' संज्ञा भवति । गार्ग्यायणी—गर्गस्य गोत्रापत्यं स्त्री गर्ग + यञ् =गार्ग्यः + ष्फ, फकारस्य 'आयन' आदेशे नकारस्य णत्वे, गार्ग्यायण

+ङीष् । अन्येषाम् आचार्याणां मते गार्गी । एवम् आवट्यायनी । अत्रोत्तरसूत्रात् 'सर्वत्र' इत्यपकृष्यते तेन आवट्यशब्दात् चापं बाधित्वा ष्फ, ङीष् च ।

सर्वत्र लोहितादिकतन्तेभ्यः ॥१८॥

नित्यार्थं वचनम् । सर्वत्र लोहितादिभ्यः कतपर्यन्तेभ्यः यञन्तेभ्यः ष्फः । लौहित्यायनी । सांकृत्यायनी ।

सर्वत्र—सर्वेषाम् आचार्याणां मते । 'गर्गादिभ्यो यञ्' इति सूत्रस्य गर्गादिगणे 'लोहित' इति शब्दात् ऊर्ध्वम् 'कत' शब्दान्ताः ये शब्दाः तेभ्यः गोत्रापत्यार्थे 'यञ्' तदन्तेभ्यः 'ष्फ' भवति । सांकृत्यायनी—वृत्तौ 'शांसित्यायनी' इति उदाहरणम् । गणपाठेऽपि 'शंसित' इत्यस्यैवोल्लेखः । अत्र गणपाठे कतन्तशब्देन 'कपिकत' इति गृह्यते । शकलशब्दोऽपि कत-कण्व शब्दयोर्मध्ये पठितव्यः तेन अत्र 'कण्वादिभ्यो गोत्रे' इत्यत्र च शकल शब्दस्य ग्रहणम् । तदेवाहास्याम् कारिकायाम्—

कण्वात्तु शकलः पूर्वः कतमादुत्तर इष्यते ।
पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम् ॥

कौरव्यमाण्डूकाभ्यां च ॥१६॥

आभ्यां ष्फः । कौरव्यायणी । माण्डूकायनी ।

कौरव्यायणी—कुरु + ण्य = कौरव्य + ष्फ ङीष् । माण्डूकायनी—मण्डूक + अण् = माण्डूक + ष्फ + ङीष् ।

वयसि प्रथमे ॥२०॥

प्रथमे वयसि यत्प्रातिपदिकं ततो ङीप् । कुमारी । किशोरी ।

*(वा०) वयस्यचरम इति वक्तव्यम् । वधूटी । चिरण्टी । कथं कन्या । 'कन्यायाः कनीन च' इति ज्ञापकात् ।

वयसि – कालकृतशरीरावस्था वयः, तस्मिन् । वयस्यचरमे–वयसि + अचरमे–अनन्त्ये इत्यर्थः । वधूटी–वधूट–चिरण्ट शब्दौ यौवनवाचिनौ । अन्त्यं वयः वृद्धत्वम् । यौवनं तु द्वितीयं वयः ।

द्विगोः ॥२१॥

द्विगुसंज्ञकात् प्रातिपदिकात् ङीप् । पञ्चमूली । त्रिफलेत्यजादित्वात् ।

पञ्चमूली–पञ्चानां मूलानां समाहारः । **त्रिफला**–त्रयाणां फलानां समाहरः (द्विगुः) । **अजादित्वात्**-'अजाद्यतष्टाप्' इत्यनेन टाप् ।

अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि ॥२२॥

अपरिमाणान्ताद् बिस्ताद्यन्ताच्च तद्धितलुकि सति ङीप् प्रत्ययो न भवति । बिस्तादीनां परिमाणार्थं ग्रहणम् । अपरिमाणान्तात्तावत् पञ्चभिरश्वैः क्रीता पञ्चाश्वा । अध्यर्द्धेति लुक् । कालः संख्या च न परिमाणम् । द्विवर्षा । बिस्तादिभ्यः–द्विबिस्ता इत्यादि ।

परिमाणम्–सर्वतोमानम् । **पञ्चाश्वा**–पञ्चानाम् अश्वानां समाहारः इति द्विगुं विधाय ततः 'तेन क्रीतम्' इति 'ठक्' तस्य 'अध्यर्द्धपूर्वाद्द्विगोर्लुक्' इति लुक् । ङीपो निषेधे अदन्ताट्टाप् । **द्विवर्षा**—द्वे वर्षे प्रमाणम् अस्याः इति विग्रहे प्रमाणार्थे 'ठक्' प्रत्ययस्य लुक् । संख्याया उदाहरणम्–द्वाभ्यां शताभ्यां क्रीता द्विशता इति । **द्विबिस्ता**–द्वौ बिस्तौ पचति या 'ठक्' प्रत्ययस्य लुक् ततष्टाप् एवं द्वयाचिता । (८० रत्ती के परिमाण को 'बिस्त' तथा ८०००० तोला के परिमाण को आचित' कहते हैं ।) **द्विकम्बल्या**–द्वाभ्यां कम्बल्याभ्यां क्रीता । ऊन की ४ कर्ष (१ पल) लगभग ६० ग्राम × १००=६ किलो की नाप को कम्बल्य कहते है । **कम्बल्यमूर्णापलशतम्** ।

काण्डान्तात् क्षेत्रे ॥२३॥

काण्डान्ताद् द्विगोस्तद्धितलुकि सति ङीप् न क्षेत्रे वाच्ये । द्वे काण्डे प्रमाणम् अस्याः क्षेत्रभक्तेः । प्रमाणे लो द्विगोरिति लुकि द्विकाण्डा क्षेत्रभक्तिः ।

काण्डम्–एक प्रकार की कट्ठा या जरीब कहते हैं । यह नाप खेत को नापने में प्रयुक्त होती है ।

पुरुषात्प्रमाणेऽन्यतरस्याम् ॥२४॥

प्रमाणवाचिपुरुषान्ताद् द्विगोस्तद्धितलुकि वा न ङीप्। द्विपुरुषा परिखा।

द्विपुरुषा-द्वौ पुरुषौ प्रमाणम् अस्याः परिखायाः इति। (कुहनी से छोटी उँगली तक की नाप को अरत्नि कहते हैं तथा पाँच अरत्नियों की नाप को पुरुष कहते हैं। पञ्चारत्निः पुरुषः।) पक्षे द्विपुरुषी।

बहुव्रीहेरूधसो ङीष् ॥२५॥

अधःशब्दान्ताद् बहुव्रीहेः स्त्रियां ङीष्। कुण्डोघ्नी।

कुण्डोघ्नी-कुण्डम् इव ऊधः अस्याः इति कुण्डोधस् शब्दात् 'ऊधसोऽनङ्' इत्यनेन अनङ्, 'अल्लोपोऽनः' इत्यकारस्यलोपः। एवं घटोघ्नी।

संख्याव्ययादेर्ङीप् ॥२६॥

संख्या-अव्ययादेरूधः शब्दान्तात् ङीप्। त्र्यूध्नी। अत्यूध्नी।

बहुव्रीहेरेवेति ज्ञेयम्। त्र्यूध्नी-त्रीणि ऊधांसि अस्या इति। अत्यूध्नी-अतिगतम् ऊधः अस्या इति।

दामहायनान्ताच्च ॥२७॥

संख्यादेर्बहुव्रीहेर्दामान्ताद् हायनान्ताच्च ङीप्। द्विदाम्नी। द्विहायनी।

*(वा०) हायनान्ताद्वयसि। नेह द्विहायना शाला!

द्विहायनी-द्वे दामनी (रेखे) अस्याः 'अल्लोपोऽनः' इत्यकारस्य लोपः। द्विहायनी-द्वौ हायनौ (वर्षौ) अस्याः। एवं त्रिहायणी। अत्र नकारस्य णकारः। णत्वमपि 'वयसि' गम्ये एव भवति। नेह त्रिहायना शाला।

अन उपधालोपिनोऽन्यतरस्याम् ॥२८॥

अन्नन्तो यो बहुव्रीहिरुपधालोपी तस्माद्वा ङीप् । बहुराजा । बहुराज्ञी ।

वा ङीप्-पक्षे डाप्, निषेधश्च भवतः । बहुराजा-डापि कृते टिलोपात्, न कृते च 'सर्वनामस्थाने च' इत्युपधाया दीर्घे तुल्यं रूपम् । द्विवचने च विशेषः डाबन्तस्य 'बहुराजे' निषेधे च 'बहुराजानौ' इति रूपे भवतः । बहुराज्ञी–'अल्लोपोऽनः' इत्यकारलोपः ।

नित्यं संज्ञाछन्दसोः ॥२९॥

अन्नन्ताद् बहुव्रीहेरुपधालोपिनः संज्ञायां विषये छन्दसि च नित्यं ङीप् । सुराज्ञी । अतिराज्ञी नाम ग्रामः ।

सुराज्ञी—सु-शोभनाः राजानः अस्याम् सा नगरी इति शेषः । एवम् अतिराज्ञी–अतिगताः राजानः अस्याम् इति । छन्दसि — एकमूर्ध्नी । बहुमूर्ध्नी इत्युदाहरणे ।

केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ॥३०॥

केवलादिभ्यः संज्ञायां छन्दसि विषये ङीप् । केवली । केवला इति भाषायाम् इत्यादि ।

एवं छन्दसि मामकी । मित्रावरुणयोर्भागधेयी । पापी त्वियम् । उतापरीभ्यो मघवा विजिग्ये । समानी । प्रवाणी । आर्यकृती । सुमङ्गली । भेषजी । भाषायां तु मामका इत्यादि ज्ञेयानि ।

रात्रेश्चाजसौ ॥३१॥

जस्विषयादन्यत्र रात्रिशब्दात् ङीप् । या रात्री सृष्टा । रात्रीभिः । कथं तिमिरपटैरवगुण्ठिता रात्र्यः । ङीष् अयं बह्वादिलक्षणः ।

जसि तु रात्रयः इत्येव भवति। बह्वादिलक्षणः—तत्र कृदिकारादक्तिनः इति वार्तिकम्। रात्रि शब्दे √ रा + त्रिप् इति 'क्तिन्' भिन्नः कृत इकारोऽस्त्येव।

अन्तर्वत्पतिवतोर्नुक् ॥३२॥

प्रकृतिः निपात्यते नुगागमश्च विधीयते। अनयोर्नुक्। ङीप् नान्तत्वादेव सिद्धः। 'अन्तर्वत्' इति 'मतुप्' निपात्यते वत्वं सिद्धम्। 'पतिवत्' इति वत्वं निपात्यते मतुप् सिद्धः। अन्तर्वत्नी गर्भिणी। पतिवत्नी जीवपतिः।

प्रकृतिः—अन्तर्वत्, पतिवत् इति। 'नुक्' कित्त्वात् अन्ते भवति। इदं निपातनं क्रमशः गर्भसंयोगे, पतिसंयोगे च भवति। यस्याः कुक्षौ गर्भो विद्यते सा अन्तर्वत्नी। यस्याश्च भर्ता जीवति संयुक्तश्चास्ति सा पतिवत्नी सैव जीवपतिः। पतिः—भर्ता। जीवति इति जीवः जीवः, पतिर्यस्याः सा।

पत्युर्नो यज्ञसंयोगे ॥३३।

पतिशब्दस्य नान्तादेशः स्त्रियां विधीयते। ङीप् प्रत्ययस्तु नान्तत्वादेव सिद्धः यज्ञेन संयोगे वाच्ये। तत्साधनत्वात् फलग्रहीतृत्वाद्वा यजमानस्य पत्नी वाचं यच्छति। यज्ञसंयोगे किम्? ग्रामस्य पतिरियं ब्राह्मणी। वृषलपत्नीत्युपमानात्।

यज्ञकर्मणि भार्याया अप्यनुमतिरपेक्ष्यते तथा भार्याऽपि फलस्य ग्रहणं कुरुते। यत्र यज्ञसंयोगो नास्ति तत्र पत्नी इति प्रयोगः पत्नी इव पत्नी इत्युपमानाद् भवति। यथा ब्राह्मणस्याग्निसाक्षिकं पाणिग्रहणं तथा शूद्रस्यापीति सादृश्यम्।

विभाषा सपूर्वस्य ॥३४॥

पतिशब्दान्तस्य प्रातिपदिकस्य सपूर्वस्यानुपसर्जनस्य स्त्रियां

वा नान्तादेशः । वृद्धपतिः / वृद्धपत्नी । अप्राप्तविभाषेयम् । अयज्ञसंयोगत्वात् ।

वृद्धपत्नी–नान्तादेशे कृते नान्तात् ङीप् । वृद्धः पतिः अस्याः । नान्तादेशाभावे 'ङीप्' अपि न वृद्धपतिः ।

नित्यं सपत्न्यादिषु ॥३५॥

एषु नित्यं पत्युर्नान्तादेशः । पूर्वेण विकल्पे प्राप्ते वचनम् । नित्यग्रहणं विस्पष्टार्थम् । समानः पतिर्यस्याः इति सपत्नी । एकपत्नी । सभावार्थं वचनम् । समान । एक । वीर । पिण्ड । भ्रातृ । पुत्र ।

❀(वा) दासाच्छन्दसि । दासपत्नीरहिंगोपाः ।

सपत्नी—समानस्य 'स' आदेशः । तदर्थमेव समानपदमनुक्त्वा 'सपत्नी' इत्युक्तम् सूत्रे । भाषायान्तु दासः पतिर्यस्याः सा दासपतिः / दासपत्नी इत्युभयं भवति ।

पूतक्रतोरै च ॥३६॥

पूतक्रतुशब्दस्य स्त्रियामैकारश्चान्तादेशः ङीप् प्रत्ययः । पूतक्रतोः स्त्री पूतक्रतायी । त्रय एते योगाः पुंयोगप्रकरणे द्रष्टव्याः । यया हि पूताः क्रतवः पूतक्रतुः सा भवति ।

त्रयः योगाः—इदं सूत्रम्, इत ऊर्ध्वं च द्वे सूत्रे । पूतक्रतुः–पूताः क्रतवो येन सः तस्य योगात् स्त्री अपि पूतक्रतुः / पूतक्रतायी ।

वृषाकप्यग्निकुसितकुसीदानामुदात्तः ॥३७॥

एषामुदात्त ऐकारादेशो भवति स्त्रियां ङीप् प्रत्ययः । वृषाकपिशब्दो मध्योदात्तः उदात्तत्वं प्रयोजयति । अग्न्यादिषु पुनरन्तोदात्तेषु स्थानिवद्भावादेव सिद्धम् । वृषाकपेः स्त्री वृषाकपायी / अग्नायी । कुसितायी । कुसीदायी ।

वृषाकपायी—वृषाकपि + ङीप्, 'पि' इत्यस्येकारस्य ऐकारः– वृषाकपै + ई ऐकारस्य 'आय्' आदेशः । एवम् अग्नेः स्त्री **अग्नायी** इत्यादि । **कुसित-कुसीद** शब्दौ उत्तमर्णवाचकौ (जो व्याज से जीविका चलाते हैं) । वृत्तौ सिद्धान्तकौमुद्यां च **कुसिद** इति पाठः ।

मनोरौ वा ॥३८॥

मनुशब्दान्ङीप् औकारश्चान्तादेशः, ऐकारश्चोदात्तः । वाग्रहणाद् द्वावपि विकल्पेते । तेन त्रैरूप्यं भवति / मनावी / मनायी / मनुः ।

मनावी–मनोः स्त्री उकारस्य औकारः तस्य, 'आव्' आदेशः । **मनुः**–यदा 'ऐकार–औकारौ' विकल्पात्पक्षे न भवतः, तदा तत्सन्नियोगात् 'ङीप्' अपि न । अत्र मनुः इति 'मनोः स्त्री' इत्यर्थकः ।

वर्णादनुदात्तात्तोपधात्तो नः ॥३९॥

वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात्तकारोपधाद् वा ङीप् प्रत्ययो भवति, तकारस्य च नकारादेशः ।

एता / एनी । श्येता / श्येनी । हरिता / हरिणी । अनुदात्तात् किम् ? श्वेता । अत इत्येव । शितिः ।

❀(वा०) पिशङ्गाच्च । पिशंगी ।

❀(वा०) असितपलितयोः प्रतिषेधः । असिता । पलिता ।

❀(वा०) छन्दसि क्नम् इत्येके । असिक्नी । पलिक्नी ।

❀(वा०) भाषायामपीत्येके ।

एता / एनी । 'एत' शब्दो हरिणवाचकः । यदा 'ङीप्' तदैव तकारस्य नकारः । पक्षे 'टाप्' । एवं सर्वत्र ।

पिशंगी– ङीप्मात्रं विधीयते ।

असिक्नी—भाषायामपि भवति गतो गणस्तूर्णमसिक्निकानाम् । असित + ङीप् तकारस्य क्नम् । असिक्नी = युवतिः न सिताः केशाः यस्याः सा ।

पलिक्नी = वृद्धा स्त्री । पलित + ङीप्. तकारस्य क्नम् ।

अन्यतो ङीष् ॥४०॥

'वा' इति निवृत्तम् । वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात् स्त्रियां ङीष् प्रत्ययो भवति । स्वरे विशेषः । सारङ्गी । कल्माषी । शबली । अनुदात्तादित्येव-कृष्णा । कपिला । वर्णादित्येव—खट्वा । सारंगादयः मध्योदात्तत्वेन अनुदात्तान्ताः । कृष्ण-कपिल शब्दौ तु अन्तोदात्तौ ।

स्वरे विशेषः—'ङीप्' पित्त्वात् अनुदात्तो भवति । 'ङीष्' तु अन्तोदात्त इति विशेषः ।

षिद्गौरादिभ्यश्च ॥४१॥

षिद्भ्यः प्रातिपदिकेभ्यः गौरादिभ्यश्च स्त्रियां ङीष् प्रत्ययो भवति । 'शिल्पिनि ष्वुन्' । नर्तकी । खनकी । रजकी । गौरादिभ्यः—गौरी । मत्सी ।

अनित्यः षितां ङीष् । 'दंष्ट्रा' इत्युपपन्नम् ।

नर्तकी -- √ नृत् + ष्वुन् + ङीष् । मत्सी—मत्स्य + ङीष्. अकारयकारयोर्लोपः ।

❀ (वा०) पिप्पल्यादयश्च-पिप्पली । हरीतकी । शमी पृथिवी । दंष्ट्रा—√ दंश् (दशने) + ष्ट्रन् + टाप् ।

जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनाऽयोविकारमैथुनेच्छाकेशवेशेषु ॥४२॥

जानपदादिभ्य एकादशभ्यः प्रातिपदिकेभ्यः एकादशस्वेव

वृत्त्यादिष्वर्थेषु यथासंख्यं ङीष् जानपदी वृत्तिश्चेत् / जानपदी अन्या। स्वरे भेदः। उत्सादिपाठादञि कृते ङीप्, आद्युदात्तत्वं भवति।

कुण्डी अमत्रं चेत् / कुण्डा अन्या। गोणी आवपनं चेत् / गोणा अन्या। स्थली अकृत्रिमा चेत् / स्थला अन्या। भाजी श्राणा चेत् 'पक्वा' इत्यर्थः / भाजा अन्या। नागी स्थौल्यं चेत् / नागा अन्या। नागशब्दो गुणवचनः स्थौल्ये ङीषम् उत्पादयति, अन्यत्र गुण एव टापम्। अगुणवचनात्तु जातिलक्षणो ङीष् एव। नागी काली भवति वर्णश्चेत् / काला अन्या।

नीली अनाच्छादनं चेत् / नीला अन्या। नहि सर्वस्मिन्ननाच्छादन इष्यते किं तर्हि—

* (वा०) नीलादोषधौ प्राणिनि च। नीली ओषधिः। नीली गौः।

कुशी अयोविकारश्चेत् / कुशा अन्या। कामुकी मैथुनेच्छा चेत् / कामुका अन्या। कबरी केशवेशश्चेत् / कबरा अन्या।

वृत्तिः - जीविका। अमत्रम्–पात्रम्। आवपनम्—भाजनविशेषः। यस्मिन् धान्यादि प्रक्षिप्य अन्यत्र नीयते।

अकृत्रिमा—प्राकृतिकी। अयोविकारः—भाषा में इसे 'फाल' कहते हैं। हल में नीचे लगता है।

कामुका—मैथुनादतिरिक्तेच्छावती।

शोणात् प्राचाम् ॥४३॥

प्राचां मते ङीष्। शोणी / शोणा।

'शोण' शब्दः रक्तवर्णवाची। शोणा—पक्षे टाप्।

वोतो गुणवचनात् ॥४४॥

गुणम् उक्तवान् गुणवचनः । अस्मात् उकारान्तात् स्त्रियां वा ङीष् । पट्वी / पटुः ।

*(वा०) खरुसंयोगोपधान्न । खरुः । पटुः ।

गुणवचनः—'वचन' इत्यत्र भूते कर्तरि ल्युट् तदाह—गुणम् उक्तवान् । **खरुः** = पतिवरा कन्या । अत्र 'गुण' शब्दः एवं परिभाषितः—

सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥

यः **सत्त्वे** = द्रव्ये **निविशते** = द्रव्यम् आश्रयति । **अपैति** = तस्माद् द्रव्यात् अपगच्छति यथा श्यामता आम्रफले पूर्वम् उपैति पक्वे सति ततोऽपैति । **पृथग्जातिषु** = घट-पटादिषु दृश्यते । **आधेयः** = निष्पाद्यः । **अक्रियाजः** = नित्यः । **असत्त्वप्रकृतिः** = द्रव्यस्वभावको यो न भवति सः ।

बह्वादिभ्यश्च ॥४५॥

वा ङीष् । बह्वी / बहुः ।

*(वा०) इतः प्राण्यङ्गात् । अङ्गुलिः / अङ्गुली ।

*(वा०) कृदिकारादक्तिनः ।

*(वा०) सर्वतोऽक्तिन्नर्थादित्येके । कृतः, अकृतो वा इकारात् क्तिनस्तदर्थे वा यो जातस्तद्भिन्नाद्वा ङीष् इत्येके । आजिः / आजी । अवनिः / अवनी ।

कृदिकारादक्तिनः—इत्यस्योदाहरणम्–रात्रिः / रात्री ।

नित्यं छन्दसि ॥४६॥

बह्वादिभ्यश्छन्दसि विषये नित्यं ङीष् । बह्वीषु हित्वा प्रपिबन् ।

बह्वीषु—बह्वी नाम ओषधी भवति ।

भुवश्च ॥४७॥

छन्दसि विषये नित्यं ङीष् । विभ्वी च । प्रभ्वी च । 'उत' इति तपरकरणात् स्वयम्भूः ।

उतः—'वोतो गुणवचनात्' इति सूत्रे वा + उतः । अत्र उतः—ह्रस्वोकारान्तादित्यर्थः । तस्यैवानुवृत्तिर्भवति । स्वयम्भूः-अत्र दीर्घउकारस्तेन न 'ङीष्' ।

पुंयोगादाख्यायाम् ॥४८॥

पुंसा यो योगस्तस्माद्धेतोर्यत्प्रातिपदिकं स्त्रियां वर्तते तस्मान्ङीष् । गणकस्य स्त्री गणकी ।

❀(वा०) गोपालिकादीनां प्रतिषेधः । गोपालकस्य स्त्री गोपालिका ।

❀(वा०) सूर्याद्देवतायां चाप् वाच्यः । सूर्या । सूरी ।

गणकी—'गणक' शब्दः गणयति यः स इत्यर्थकः पुंसि रूढः । तेन योगात्-सम्बन्धात् स्त्रियां 'ङीष्' । सूरी—सूर्यस्य स्त्री ङीषि कृते 'सूर्यतिष्य.....' इत्यनेन यलोपः । सूरी मानुषी कुन्ती ।

इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ॥४९॥

इन्द्रादिभ्यो ङीष् आनुक् आगमश्च । येषामत्र पुंयोग इष्यते, तेषामागममात्रं प्रत्ययस्तु पूर्वेण सिद्धः । अन्येषां तूभयं विधीयते । इन्द्राणी ।

❀(वा०) हिमारण्ययोर्महत्त्वे । महद्धिमं हिमानी । अरण्यानी ।

❀(वा०) यवाद्दोषे । दुष्टो यवो यवानी ।

❀(वा०) यवनाल्लिप्याम् । यवनानी ।

❀(वा०) उपाध्यायमातुलाभ्यां वा । उपाध्यायानी / उपाध्यायी । मातुलानी / मातुली ।

❀(वा०) आचार्यादणत्वं च । आचार्यानी / आचार्या ।

❀(वा०) अर्यक्षत्रियाभ्यां वा । अर्याणी / अर्या । क्षत्रियाणी / क्षत्रिया ।

स्वार्थ एवायं विधिः पुंयोगे तु ङीष् एव । अर्यी । क्षत्रियी !

आनुक्—कित्त्वात् अन्ते भवति । एवं **वरुणानी** । **भवानी** । **शर्वाणी** । **रुद्राणी** । **मृडानी** ।

हिमानी–महान् हिमः । अरण्यानी–महदरण्यम् । यवनानी–यवनानां लिपिः । यवनस्य स्त्री यवनी ।

❀(वा०) मुद्गलाच्छन्दसि लिच्च । रथीरभून्मुद्गलानीगविष्टौ ।

क्रीतात्करणपूर्वात् ॥५०॥

क्रीतान्तात्करणपूर्वात् ङीष् । वस्त्रेण क्रीयते वस्त्रक्रीती । 'सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी ।' इह कस्मान्न भवति ? टाबन्तेन समासः, अत इति चानुवर्तते । 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ।' इति बहुलं तदुच्यते–'कर्तृकरणे कृता बहुलम्' ।

टाबन्तेन–धनेन क्रीता धनक्रीता इति बोध्यम् । बहुलम्–तेनात्र 'टाबन्तेन समासो लभ्यते' इति भावः ।

क्तादल्पाख्यायाम् ॥५१॥

करणपूर्वात् क्तान्तादल्पाख्यायां 'ङीष्' प्रत्ययो भवति । सूपविलिप्ती पात्री । अल्पसूपा इत्यर्थः ।

पात्री–स्थाली सूपेन विलिप्तेत्यर्थः । अत्राल्पता सूपस्य न विलेपनस्य । यत्र बहुलता अस्ति तत्र चन्दनानुलिप्ता ब्राह्मणी इति 'टाप्' एव ।

बहुव्रीहेश्चान्तोदात्तात् ॥५२॥

बहुव्रीहिर्योऽन्तोदात्तः क्तान्तः तस्मात्स्त्रियां ङीष् प्रत्ययो भवति । स्वाङ्गपूर्वपदो बहुव्रीहिरिहोदाहरणम् । अस्वाङ्गपूर्वपदाद् विकल्पं वक्ष्यति । ऊरुभिन्नी—भिन्ने ऊरू यस्याः सा । 'शङ्खभिन्नी' इत्युदाहरणम् भिन्ने शङ्खे यस्याः सा । एवं केशलूनी ।

*(वा०) जातान्तान्न । दन्तजाता । स्तनजाता ।

*(वा०) पाणिगृहीतीत्यादीनामर्थविशेषे । पाणिगृहीती भार्या । यस्या अग्निसाक्षिपूर्वकं पाणिग्रहणं कृतं सा । यस्यास्तु तद्भिन्नप्रकारेण पाणिगृहीतः सा पाणिगृहीता ।

*(वा०) अबहुनञ्सुकालसुखादिपूर्वादिति वक्तव्यम् । तेन बहु-आदि पूर्वेभ्यो न भवति । बहुकृता । अकृता । सुकृता । मासजाता । सुखजाता ।

ऊरुभिन्नी, शंखभिन्नी–ऊरोः, शंखस्य च जातिवाचकत्वात्तयोः पूर्वनिपातः ।

अर्थविशेषे–पाणिगृहीती इत्यस्य सिद्धये यत्र विशेषोऽर्थः अग्नि-साक्षिपूर्वत्वं भवति तत्रेत्यर्थः ।

अस्वाङ्गपूर्वपदाद्वा ॥५३॥

अस्वाङ्गपूर्वपदादन्तोदात्तात् क्तान्ताद्बहुव्रीहेर्वा ङीष् शाङ्गर्जग्धी ।

पक्षे टाप् शाङ्गर्जग्धा । शाङ्गर्ं जग्धम् अनया इति विग्रहः । एवं सुरापीती / सुरापीता ।

❀ (वा०) बहुलं संज्ञाछन्दसोः । प्रवृद्धविलूनी / प्रवृद्धविलूना । प्रवृद्धा चासौ विलूना च ।

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ॥५४॥

बहुव्रीहेः, क्तान्तात्, अन्तोदात्तादिति सर्वं निवृत्तम् । 'वा' ग्रहणं वर्तते । स्वाङ्गं यदुपसर्जनमसंयोगोपधं तदन्तात्प्रातिपदिकात् स्त्रियां वा ङीष् । चन्द्रमुखी / चन्द्रमुखा । अतिक्रान्ता केशान् अतिकेशी / अतिकेशा ।

स्वाङ्गात् किम् ? बहुयवा ।

उपसर्जनात् किम् ? शिखा ।

असंयोगोपधादिति किम् ? सुगुल्फा ।

❀(वा०) अङ्गगात्रकण्ठेभ्य इष्यते । मृद्वङ्गी / मृद्वङ्गा ।

अद्रवं मूर्त्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् ।
अतत्स्थं तत्र दृष्टं चेत्तत्तन चेत्तथायुतम् ॥

अस्यार्थः–अत्र सूत्रे स्वाङ्गमीदृशं गृह्यते–स्वाङ्गम् **प्राणिस्थम्** = प्राणयुक्ते स्थितम् । **अद्रवम्** = द्रव-रहितम् । **मूर्तिमत्** = स्पर्शवदाकार-सहितम् । **अविकारजम्** = यद् वातादिजन्यविकारान्न जायते । **अतत्स्थम्** – तत्र न स्थितमपि तत्र–प्राणिनि दृष्टम् चेत् (तेन दीर्घकेशी रथ्या इति सिद्धयति ।) तेन तथायुत चेत्–तेन = हस्त–पादादिना तथा-युतं चेत्, तेन प्रतिमावयवानामपि स्वाङ्गता । वृत्तौ 'तस्य चेत्तत्तथा, इति पाठः । अर्थः स एव ।

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ॥५५॥

बह्वज्लक्षणे, संयोगोपधलक्षणे च निषेधे वचनम् । एतदन्तात् प्रातिपदिकाद्वा ङीष् । तुङ्गनासिकी इत्यादि ।

❀(वा०) कबरमणिविषशरेभ्यः परात्पुच्छान्नित्यम् । कबरपुच्छी ।

❀(वा०) उपमानात्पक्षात्पुच्छाच्च । उलूकपक्षी । उलूकपुच्छी ।

बह्वच् – 'न क्रोडादिबह्वचः' इत्यनेन । तुङ्गनासिकी — पक्षे तुङ्गनासिका । संयोगोपधस्योदाहरणम् बिम्बोष्ठी / बिम्बोष्ठा इत्यादि ।

कबरपुच्छी–मणिपुच्छी । विषपुच्छी । शरपुच्छी । उलूकपक्षी सेना । उलूकपुच्छी शाला । एतद्भिन्नपूर्वपदात्परात्पुच्छात् 'ङीष्' वा कल्याणपुच्छी / कल्याणपुच्छा वडवा ।

न क्रोडादिबह्वचः ॥५६॥

स्वाङ्गादिति 'ङीष्' प्राप्तः प्रतिषिध्यते । क्रोडाद्यन्ताद् बह्वजन्ताच्च प्रातिपदिकात् 'ङीष्' न भवति । कल्याणक्रोडा । कल्याणखुरा । क्रोडादिराकृतिगणः । बह्वचः—पृथुजघना ।

क्रोडा–वक्षःस्थलम् । कल्याणी क्रोडा अस्याः इति विग्रहः । समासे कृते 'कल्याणी' इत्यस्य पुंवद्भावेन 'कल्याण' इति । 'क्रोडा' इत्यस्यापि 'गोस्त्रियोरुपसर्जनस्य' इत्यनेन ह्रस्वे कृतेऽनेन 'ङीष्' प्रत्ययस्य निषेधे कृते 'टाप्' । आकृतिगणः–तेन सुभगा । सुगला इत्यादि सिद्ध्यति ।

सहनञ्विद्यमानपूर्वाच्च ॥५७॥

सह–नञ्–विद्यमानेत्येवम्पूर्वात् प्रातिपदिकात् ङीष् प्रत्ययो न भवति । सकेशा । अकेशा । विद्यमानकेशा ।

सकेशा–सह केशैर्वर्तते । सहस्य 'स' आदेशः । अकेशा–अविद्यमानाः केशा अस्याः । 'विद्यमान' शब्दस्य लोपः ।

नखमुखात् संज्ञायाम् ॥५८॥

एतदन्तात्संज्ञायां ङीष् न । शूर्पणखा । गौरमुखा । संज्ञायां किम् ? ताम्रनखी कन्या । चन्द्रमुखी ।

शूर्पणखा–'पूर्वपदात्संज्ञायामगः' इति नकारस्य णत्वम् ।

दीर्घजिह्वी चच्छन्दसि ॥५९॥

'दीर्घजिह्वी' इत्येवं छन्दसि निपात्यते । दीर्घजिह्वी वै देवानां हव्यमलेट् । चकारः संज्ञानुकर्षणार्थः । दीर्घजिह्वा अन्या । निपातनं नित्यार्थम् ।

नित्यार्थम्–छन्दसि दीर्घजिह्वी लोके तु दीर्घजिह्वा ।

दिक्पूर्वपदान्ङीप् ॥६०॥

दिक्पूर्वपदात्प्रातिपदिकात् ङीप् प्रत्ययो भवति । स्वरे विशेषः । प्राङ्मुखी / प्राङ्मुखा ।

स्वरे विशेषः–ङीपि अनुदात्तता, ङीषि आद्युदात्ततेति बोध्यम् ।

वाहः ॥६१॥

'ङीष्' एव स्वर्यते न 'ङीप्' । वाहन्तात् ङीष् । प्रष्ठौही ।

प्रष्ठौही–प्रष्ठवाह् + ङीष् वकारस्य सम्प्रसारणम् 'ऊठ्' 'एत्येधत्यूठ्सु' इति वृद्धिः औकारः । एवं दित्यौही ।

सख्यशिश्वीति भाषायाम् ॥६२॥

भाषायां निपात्यौ । सखी ब्राह्मणी । नास्याः शिशुरस्ति अशिश्वी । भाषायां किम् ? सखा सप्तपदी भव । अशिशुरिव मामयं शरारुर्मन्यते ।

निपात्यौ–'ङीषन्तौ' इति शेषः । सखी–सखि + ङीष् । अशिश्वी–अशिशु + ङीष् ।

जातेरस्त्रीविषयादयोपधात् ॥६३॥

जातिवाचि यत्, न च स्त्रियामेव नियतम्, अस्त्रीविषयम्, अयकारोपधं च ततो ङीष् ।

आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥

कुक्कुटी । सूकरी । जातेः किम् ? मुण्डा । अस्त्रीति किम् ? मक्षिका । बलाका । योपधात्तु क्षत्रिया ।

*(वा०) हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः । हयी । मुकयी इत्यादि ।

जातेर्लक्षणमाह — आकृतिग्रहणा = आक्रियते = व्यज्यतेऽनयेति आकृतिः = संस्थानम् गृह्यतेऽनेनेति ग्रहणम् । आकृतिः ग्रहणं यस्याः सा यथा गोत्वम् । सास्ना-पुच्छ-लाङ्गूलादिभिरवयवैः अयं गौः, स्तन-विशिष्टैस्तैः इयं गौः इति बोधो भवति । ब्राह्मणत्वादिसंग्रहार्थं द्वितीयं लक्षणमाह—

लिङ्गानाञ्च न सर्वभाक्, सकृदाख्यातनिर्ग्राह्या ।

या सर्वाणि लिङ्गानि न भजते यथा ब्राह्मणः, ब्राह्मणी इति भवति न तु नपुंसकम् । अत्र सर्वभाक् इत्यस्यायमप्यर्थः–या सर्वाणि लिङ्गानि भजति तथा आकृत्या तस्याग्रहणं भवति साऽपि जातिः यथा तटः । तटी । तटम् । **सकृदाख्यातनिर्ग्राह्या**–सकृत् = एकवारम् आख्याता = उपदिष्टा सती निर्ग्राह्या = निश्चेतुं शक्या । यथा एकस्मिन् श्वेतगोपिण्डे **अयं गौः** इत्युपदिष्टा । तद्भिन्ने पीतगोपिण्डे, कृष्णगोपिण्डे चापि निश्चयेन ग्राह्या भवति । एतदेव नैयायिकाभिमतम्–**नित्यमेकमनेकानुगतं सामान्यम्** । तृतीयं जातिलक्षणमाह–

गोत्रं च चरणैः सह । गोत्रम् – अपत्यम्, तस्यापि जातित्वम् । चरण शब्दः अध्ययनक्रियासम्बन्धात् क्रियाशब्दः । एवं अध्ययनसम्बन्धात् चरणस्यापि जातित्वम् इति भावः ।

प्रथमस्य जातिलक्षणस्योदाहरणे–कुक्कुटी । सूकरी ।

द्वितीयस्योदाहरणे–ब्राह्मणी । वृषली ।

तृतीये गोत्रस्योदाहरणे—नाडायनी । चारायणी ।

चरणस्योदाहरणे–कठी । बह्वृची ।

महाभाष्ये जातेरिदमपि लक्षणं कृतमस्ति—

> प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद् गुणैः ।
> असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः ।
> गोत्रं च चरणानि च ॥

अस्याः सरलार्थः-

या सत्त्वस्य = द्रव्यस्य प्रादुर्भावविनाशाभ्याम् प्रादुर्भवति, नश्यति च । गुणैः = श्वेतत्वादिभिः युगपत् द्रव्येण सम्बद्धयते । या च असर्वलिङ्गा–सर्वाणि लिङ्गानि यस्याः न भवन्ति । तथा बह्वर्था–बह्वीषु व्यक्तिषु वर्तिनी । एवं गोत्रवाचिनी–चरणाध्येतृवाचिनी च जातिर्भवति ।

इत्यादि–आदिना मुकयी । मत्सी । मनुषी इति बोध्यम् ।

पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च ॥६४॥

पाकाद्युत्तरपदाज्जातिवाचिनो ङीष् । स्त्रीविषयत्वादेषां पूर्वेणाप्राप्तो 'ङीष्' विधीयते । ओदनपाकी । शङ्कुकर्णी ।

स्त्रीविषयत्वात्–नियतरूपेण स्त्रियामेव वर्तमानात् । एवं शालपर्णी । शङ्खपुष्पी । दासीफली । दर्भमूली । गोबाली इत्यप्युदाहरणानि ज्ञेयानि । अजादिगणे पाठस्वीकारादेषु टाप्–सत्पुष्पा । प्रान्तपुष्पा । शतपुष्पा । अजिनफला । पिण्डफला । त्रिमूला । अमूला ।

इतो मनुष्यजातेः ॥६५॥

इदन्तान्मनुष्यजातेर्ङीष् । दाक्षी । कुन्ती । पुनर्जातिग्रहणाद् योपधादपि यथा स्यात् । औदमेयी ।

दाक्षी–दक्षस्यापत्यम् दक्ष + इञ् = दाक्षिः स्त्रियां 'ङीष्' । कुन्ती–कुन्तेः अपत्यं स्त्री इत्यर्थेऽपत्यार्थे ञ्यङो लुक् ततो 'ङीष्' । औदमेयी–उदकं मेयम् अस्य इति उदमेयः तस्यापत्यं औदमेयिः ततो 'ङीष्' ।

ऊङुतः ॥६६॥

उदन्तान्मनुष्यजातेः स्त्रियाम् 'ऊङ्' । कुरूः । ब्रह्मबन्धूः । योपधान्न–अध्वर्युर्ब्राह्मणी ।

❀ (वा०) अप्राणिजातेश्चारज्ज्वादीनामिति वाच्यम् । अलाबूः । कर्कन्धूः ।

अप्राणिग्रहणं किम् ? कृकवाकुः ।

अरज्ज्वादीनामिति किम् ? रज्जुः । हनुः ।

कुरूः—कुरोरपत्यं स्त्री पूर्वमपत्यार्थक 'ण्य' प्रत्ययस्य 'लुक्' ततः 'ऊङ' । अत्र गोत्रं जातिः ।

ब्रह्मबन्धूः-वृत्तस्वाध्यायहीना स्त्री ।

अध्वर्युः-अध्वरं याति, इच्छति वा । चरणलक्षणा जातिः ।

अलाबूः, कर्कन्धूः – उभौ शब्दौ दीर्घोकारान्तौ । स्त्रियाम् 'ऊङ्' प्रत्यय विधानस्य फलम् अलाब्वा, कर्कन्ध्वा इति तृतीयैकवचने 'नोङ्धात्वोः' इति विभक्तेरुदात्तत्वप्रतिषेधः ।

बाह्वन्तात् संज्ञायाम् ॥६७॥

बाहुशब्दान्तात् 'ऊङ्' । भद्रबाहूः । जालबाहूः ।

संज्ञायामेव । तेनेह न-वृत्तबाहुः ।

पङ्गोश्च ॥६८॥

पङ्गुशब्दात् 'ऊङ्' । पङ्गूः ।

❀(वा०) श्वशुरस्योकाराकारलोपश्च । श्वश्रूः ।

श्वश्रूः-आशु आप्तव्यः श्वशुरः, तस्य स्त्री । 'शुर' इत्यत्र उकारस्य, अकारस्य च लोपः 'ऊङ्' प्रत्ययश्च भवति ।

ऊरूत्तरपदादौपम्ये ॥६९॥

औपम्ये गम्ये ऊरूत्तरपदादूङ् । रम्भोरूः । औपम्ये किम् ? वृत्तोरुः ।

रम्भोरूः-रम्भा इव ऊरू यस्याः सा । अत्रोपमा विद्यते ।

संहितशफलक्षणवामादेश्च ॥७०॥

इत्येवमादेः प्रातिपदिकादूरूत्तरपदात् स्त्रियामूङ् । अनौपम्यार्थ आरम्भः । संहितोरूः । शफोरूः ।

*(वा०) सहितसहाभ्यां च सहितोरूः । सहोरूः ।

संहितोरूः–संहितौ–श्लिष्टौ ऊरू यस्याः सा ।
लक्षणोरूः । वामोरूः–इत्यपि प्रयोगौ बोध्यौ ।

कद्रुकमण्डल्वोश्छन्दसि॥७१॥

कद्रुशब्दात् कमण्डलुशब्दाच्च छन्दसि स्त्रियाम् 'ऊङ्' । कद्रूश्च वै सुपर्णी च । मा स्म कमण्डलूं शूद्राय दद्यात् ।

*(वा०) गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम् । गुग्गुलूः । मधूः इत्यादि ।

कद्रूः – कद्रुशब्दो वर्णवाची । गुग्गुलुः–गुग्गुलु–प्रभृतीनां व्यत्ययेन स्त्रीत्वम् । जतूः । पतयालूः इत्यप्युदाहरणे ।

संज्ञायाम् ॥७२॥

आभ्यां संज्ञायामूङ् । अच्छन्दोऽर्थं वचनम् । कद्रूः । कमण्डलूः ।

कद्रूः–नागानां माता एतन्नामिका । कमण्डलूः–लघु यतिपात्रम् ।

शार्ङ्गरवाद्यञो ङीन् ॥७३॥

शार्ङ्गरवादिभ्योऽञन्तेभ्यश्च स्त्रियां 'ङीन्' प्रत्ययो भवति । शार्ङ्गरवी । अञन्तेभ्यः–बैदी । और्वी ।

शार्ङ्गरवी – शृङ्गरोरपत्यं शृङ्गरु + अण् = शार्ङ्गरवः, स्त्रियां 'ङीन्' । बैदी–बिद + अञ् = बैदः, स्त्रियां ङीन् । एवम् उर्व + अञ् = और्वः स्त्रियां ङीन् ।

❀ (वा०) नृनरयोर्वृद्धिश्च । आद्यचो वृद्धिः । नृ / नर + ङीन् = नारी ।

यङश्चाप् ॥७४॥

यङन्तात् स्त्रियां 'चाप्' प्रत्ययो भवति । ञ्यङः, ष्यङश्च सामान्यमेतत् । सौवीर्या । कौशल्या । कारीषगन्ध्या ।

कौशल्या–कोशल + ञ्यङ् + चाप् । कौसल्या इति पाठः शुद्धः वृत्तावपि तथैव पठितः । सौवीर्या – सौवीर + ञ्यङ् + चाप् । कारीषगन्ध्या—करीषस्येव गन्धोऽस्य करीषगन्धिः तस्य गोत्रापत्यं स्त्री करीषगन्धि + अण् तस्य 'ष्यङ्' ततोऽनेन 'चाप्' ।

आवट्याच्च ॥७५॥

अवटशब्दो गर्गादिः, तस्माद्यञि कृते ङीप् प्राप्तः । आवट्याच्च स्त्रियां चाप् । आवट्या । प्राचां तु 'ष्फ' एव आवट्यायनी ।

आवट्यायनी-आवट्यायन + ङीष् । अवटः: = ऐन्द्रजालिकः ।

तद्धिताः ॥७६॥

अधिकारोऽयम् आपञ्चमाध्यायपरिसमाप्तेर्यानित ऊर्ध्वमनुक्रमिष्यामस्तद्धितसंज्ञास्ते वेदितव्याः । वक्ष्यति 'यूनस्तिः' युवतिः ।

युवतिः — तद्धितसंज्ञायाः फलं 'कृत्तद्धित……' इत्यनेन प्रातिपदिकसंज्ञा ।

यूनस्तिः ॥७७॥

युवन् शब्दात् स्त्रियां 'ति' प्रत्ययः । युवतिः ।

युवतिः—'ति' प्रत्ययेनैव स्त्रीत्वमुक्तम् तेन नात्र 'ऋन्नेभ्यो ङीप्' इत्यनेन 'ङीप्' ।

अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ।।७८।।

गोत्रे यावणिञौ विहितावनार्षौ, तदन्तयोर्गुरूपोत्तमयोः स्त्रियां 'ष्यङ्' आदेशो भवति । निर्दिश्यमानस्यादेशा भवन्तीत्यणिञोरेव ज्ञायते न समुदायस्य । 'उत्तम' शब्दः स्वभावात्त्रिप्रभृतीनामन्त्यमक्षरमाह । उत्तमस्य समीपम् उपोत्तमम् । गुरुरुपोत्तमं यस्य तद् गुरूपोत्तमं प्रातिपदिकम् । करीषस्येव गन्धोऽस्य करीषगन्धिः । तस्यापत्यमित्यण् । तस्य 'ष्यङ्' आदेशः । कारीषगन्ध्या ।

गुरूपोत्तमयोः किम् ? औपगवी ।

कारीषगन्ध्या–इदम् 'अण्' स्थानीय 'ष्यङ्' प्रत्ययस्योदाहरणम् । 'इञ्' स्थानीयस्य ष्यङः उदाहरणम् – **वाराह्या** – वराहस्यापत्यं वाराहिः वराह + इञ्, । तस्यानेन 'ष्यङ्' ।

गोत्रावयवात् ।।७९।।

गोत्रावयवाः = गोत्राभिमताः कुलाख्याः कुणिकभुणिकमुखरादयः । ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशः । अगुरूपोत्तमार्थ आरम्भः । पौणक्या ।

गोत्रश्च तदवयवश्चेति कर्मधारयः । तेन गोत्रावयवाः याः कुलसंज्ञिकाः पुणिकप्रभृतयः ताभ्यो गोत्रे यौ 'अण्–इञ्' प्रत्ययौ तयोः 'ष्यङ्' । पुणिकस्य गोत्रापत्यं स्त्री पुणिक + इञ् = पौणिकि स्त्रियाम् 'इञ्' मात्रस्य 'ष्यङ्' ततः 'चाप्' । एवं भौणिक्या । मौखर्या ।

क्रौड्यादिभ्यश्च ।।८०।।

क्रौड्या । लाड्या ।

क्रौडिप्रभृतिभ्यः स्त्रियां 'ष्यङ्' । क्रोडस्यापत्यं स्त्री क्रोड + इञ् =क्रौडि + ष्यङ् + चाप् । एवं लडस्यापत्यं स्त्री लाड्या ।

सूत युवत्याम् । सूत्या ।

दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्डेविद्धिभ्योऽन्यतरस्याम् ॥८१॥

एषां वा 'ष्यङ्' । इञन्ता एते । गोत्रग्रहणं च नानुवर्तते । तेनोभयत्र विभाषेयम् । गोत्रे पूर्वेण नित्यं प्राप्तः 'ष्यङ्' आदेशो विकल्प्यते । अगोत्रे त्वनन्तरापत्ये विधीयते । तेन मुक्ते 'इतो मनुष्यजातेः' इति 'ङीष्' एव भवति । दैवयज्ञ्या / दैवयज्ञी । शौचवृक्ष्या / शौचवृक्षी । काण्डेविद्ध्या / काण्डेविद्धी ।

गोत्रे पूर्वेण–'गोत्रवयवात्' इत्यनेन । **दैवयज्ञ्या**–देवा यज्ञाः – यजनीया अस्येति देवयज्ञः तस्यापत्यं स्त्री देवयज्ञ + इञ् = दैवयज्ञि + इञः ष्यङ् + चाप् । **काण्डेविद्धिः** –कौमुद्यामयमेव पाठः । परं काशिकावृत्तौ **'काण्ठेविद्धिः'** इति ।

समर्थानां प्रथमाद्वा ॥८२॥

त्रयमप्यधिक्रियते–समर्थानामिति च, प्रथमादिति च, वेति च । स्वार्थिकप्रत्ययावधिश्चायमधिकारः । प्राग्दिशो विभक्तिरिति यावत् । स्वार्थिकेषु ह्यस्योपयोगो नास्ति । विकल्पोऽपि, तत्रानवस्थितः । केचिन्नित्यमेव भवन्ति । लक्षणवाक्यानि–'तस्यापत्यम्', 'तेन रक्तम्', 'तत्र भवः', इत्येवमादीनि भविष्यन्ति । तेषु सामर्थ्ये सति प्रथमनिर्दिष्टादेव विकल्पेन प्रत्ययो भवतीति वेदितव्यम् । 'समर्थानाम्' इति निर्धारणे षष्ठी । समर्थानां मध्ये प्रथमः प्रत्यय-प्रकृतित्वेन निर्धार्यते । तस्येति सामान्यं विशेषलक्षणार्थम् । तदीयं प्राथम्यं विशेषाणानां ज्ञायते । उपगोरपत्यम् औपगवः ।

प्रथमादिति किम् ? षष्ठ्यन्ताद्यथा स्यात्, प्रथमान्तान्मा भूत् । वाग्रहणाद् वाक्यमपि उपगवपत्यम् ।

उपयोगो **नास्ति**—स्वार्थिकेषु प्रकृतेरर्थाद् भिन्नोऽर्थो न भवति । यस्य प्रत्यायनाय प्रत्ययः प्रयुज्येत, तेन सह सामर्थ्यं स्यात् । **समर्थता** इत्यस्यार्थः सम्बद्धार्थता । स्वार्थिकेषु न सा भवति । **तस्य**........**लक्षणार्थम्**–

'तस्यापत्यम्' इत्यत्र 'तस्य' इति सामान्यवाचकं सर्वनाम प्रथमं निर्दिष्टं तद् उपगोः इत्यादि विशेषोपलणक्षार्थम्। तेन 'उपगोः' इत्यस्मादेव अण् भवति। एवं 'तेन रक्तम्''''', तत्र भवः' इत्यादिष्वपि ज्ञेयम्। उपगवपत्यम्-इति तु समस्तम् पदम् वाक्यं तु 'उपगोरपत्यम्' इति । अत्र तद्धितेन समासवृत्तेर्बाधनं न भवति। वा ग्रहणात्, अन्यतरस्यामित्यस्यानुवृत्तेश्च रूपत्रयं भवति।

प्राग्दीव्यतोऽण् ॥८३॥

'तेन दीव्यति''''' इत्यतः प्राग् यानित ऊर्ध्वमनुक्रमिष्यामस्तत्राण् प्रत्ययो भवतीति वेदितव्यम्। अधिकारः, परिभाषा, विधिश्चेति त्रिष्वपि दर्शनेषु अपवादविषयं परिहृत्य 'अण्' प्रत्ययः प्रवर्तते । वक्ष्यति–'तस्यापत्यम्' औपगवः ।

अधिकार सूत्रं मन्यते चेत्तदाऽस्य प्रतिसूत्रमुपस्थानादपवादविषये 'अत इञ्' इत्यादावपि विषये 'अण्' स्यात्। परिभाषा सूत्रं मतं चेत्तदापि सामान्येनाण् सर्वत्र स्यात्। विधि पक्षे तु स्यादेव–अतो निर्धार्यते–अपवादविषयं परिहृत्य। तेनापवादसूत्रातिरिक्तविषये एवाण् भवति।

अश्वपत्यादिभ्यश्च ॥८४॥

एभ्यः प्राग्दीव्यतीयेष्वर्थेषु अण्। आश्वपतम्।

आश्वपतम्-अश्वपतेः इदम् इति अश्वपति + अण्। वक्ष्यमाण 'ण्य' प्रत्ययस्यापवादः।

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥८५॥

प्राग्दीव्यतीयेष्वर्थेषु एभ्यो ण्यः । दैत्यः । आदित्यः । प्राजापत्यम्।

❀ (वा०) यमाच्च। याम्यम्।

❀ (वा०) पृथिव्या ञाञौ। पार्थिवा / पार्थिवी।

❀ (वा०) देवस्य यञञौ। दैव्यम् / दैवम्।

❀ (वा०) बहिषष्टिलोपश्च । बाह्यः ।

❀ (वा०) ईकक्च । बाहीकः ।

❀ (वा०) स्थाम्नोऽकारः । अश्वत्थामः ।

❀ (वा०) लोम्नोऽपत्ये बहुषु । उडुलोमाः । बहुष्विति किम् ? औडुलोमिः ।

❀ (वा०) सर्वत्र गोरजादि प्रत्यय प्रसंगे यत् । गोः सर्वं गव्यम् ।

एभ्यः—दिति – अदिति – आदित्य–इत्येभ्यः, पतिः उत्तरपदम् यस्य तस्माच्च ।

दैत्यः–दितेरपत्यं पुमान् इति दिति + ण्य आदेरचो वृद्धिः । आदित्यस्येदम् आदित्यम् व्रतम् । 'यस्येति च' इत्यकारलोपे 'हलो यमां यमि' इत्यनेन पूर्वयकारस्य लोपः ।

पार्थिवा / पार्थिवी–'ञ' प्रत्यये कृते टाप्, अणि प्रत्यये ङीप् इति विशेषः ।

अश्वत्थामः–अश्वत्थाम्नोऽपत्यम् अश्वत्थामन् + अ ।

उडुलोमाः – उडूनि-नक्षत्राणीव लोमान्यस्य उडुलोमा तस्यापत्यानि उडुलोमन् + अ । **औडुलोमिः**–उडुलोमन् + इञ् ।

उत्सादिभ्योऽञ् ॥८६॥

एभ्यः प्राग्दीव्यतीयेष्वर्थेषु अञ् । अणस्तदपवादानां च बाधकः । औत्सः । औदपानः ।

तदपवादानाम् — इञ् प्रभृतीनाम् । **औदपानः** — उदपाने भवः उदपान + अञ् ।

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥८७॥

'धान्यानां भवने…' इत्यतः प्राक् यदितोऽर्थवृन्दं तस्मिन् स्त्री-शब्दात् पुंशब्दाद् यथाक्रमं नञ्-स्नञौ प्रत्ययौ भवतः । स्त्रीषु भवं स्त्रैणम् । पौंस्नम् । एवं समूहादिषु ।

पौंस्नम्—पुंसु भवम् पुंस् + स्नञ् । 'संयोगान्तस्य लोपः' इत्यनेन 'पुंस्' इत्यस्य सकारस्य लोपः ।

द्विगोर्लुगनपत्ये ॥८८॥

द्विगोर्यः सम्बन्धी निमित्तत्वेन तद्धितः प्राग्दीव्यतीयोऽपत्यं वर्जयित्वा तस्य लुक्। पञ्चसु कपालेषु संस्कृतः पञ्चकपालः । द्वौ वेदावधीते द्विवेदः।

पञ्चकपालः — पूर्वं द्विगुसमासः ततः 'संस्कृतम् भक्षाः' इत्यण् तस्य लुक् । अपत्यार्थे तु द्वयोः देवदत्तयोरपत्यम् द्विदेवदत्त + इञ् = द्वैदेवदत्तिः।

गोत्रेऽलुगचि ॥८९॥

'यस्कादिभ्यो गोत्रे' इति प्रकरणेन येषां गोत्रप्रत्ययानां लुगुक्तस्तेषामजादौ प्राग्दीव्यतीये विषयभूते प्रतिषिध्यते । गर्गाणां छात्राः गार्गीयाः । वात्सीयाः ।

प्रकरणेन—सूत्रसमूहेन। **गार्गीयाः**—गर्गस्यापत्यानि बहूनि गर्ग + यञ् गार्ग्याः ततः गर्गाणां छात्राः इत्यर्थविवक्षायां 'यञिञोश्च' इत्यनेन प्राप्तस्य लुकोऽनेन प्रतिषेधे 'वृद्धाच्छः' इत्यनेन 'छ' प्रत्यये तस्य 'ईय' आदेशे अकारयकारयोर्लोपे रूपसिद्धिः। एवं वात्सीयाः।

यूनि लुक् ॥९०॥

प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षिते बुद्धिस्थेऽनुत्पन्न एव युवप्रत्ययस्य लुक् । तस्मिन्निवृत्ते इञन्तं प्रकृतिरूपं सम्पन्नम् । तस्मादिञश्चेत्यण् फाण्टाहृताः इत्यादि ।

फाण्टाहृताः — फाण्टाहृतस्यापत्यं पुमान् इति फाण्टाहृत + इञ् फाण्टाहृतिः फाण्टाहृतेरपत्यं युवा इति फाण्टाहृति + ण = फाण्टाहृतः फाण्टाहृतस्य छात्राः इत्यर्थे बुद्धिस्थे सत्येव युव-प्रत्ययस्य 'ण' इत्यस्य लुकि पुनः इञ्प्रत्ययान्तं रूपं जातं फाण्टाहृतिः इति तस्मात् 'इञश्च' इत्यनेन 'अण्' फाण्टाहृताः 'अन्यथा' वृद्धाच्छः इत्यस्य प्रवृत्ति स्यात्। एवं 'भागवित्ताः' इत्यत्र ठक्' इत्यस्य लुक् । 'ग्लौचुकायनाः' इत्यत्र 'अण्' प्रत्ययस्य लुक्।

फक्फिञोरन्यतरस्याम् ॥९१॥

फक्—फिञोर्युवप्रत्यययोः प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षिते लुक् । यञि कृते 'यञिञोश्च' इति 'फक्' गार्ग्यायणः । तस्य छात्राः गार्गीया / गार्ग्यायणीयाः ।

यस्कस्यापत्यं 'शिवादी' त्यण् यास्काः । तस्यापत्यं युवा 'अणो द्व्यचः' इति फिञ् यास्कायनिः । तस्य छात्राः यास्कीयाः / यास्कायनीयाः ।

गार्ग्यायणः—गर्गस्य गोत्रापत्यं गर्ग + यञ् = गार्ग्यः तस्य युवापत्यं गार्ग्य + फक् । गार्गीयाः / गार्ग्यायणीयाः — गार्ग्यायणस्य छात्राः इत्यर्थे गार्ग्यायण + छ 'फक्' इत्यस्य लोपे, न लोपे च रूपद्वयम् ।

तस्यापत्यम् ॥९२॥

तस्येति यथाविहितं प्रत्ययः अपत्येऽर्थे । औपगवः । दैत्यः । औत्सः ।

तस्येति षष्ठीसमर्थात् । औपगवः–उपगोरपत्यम् इत्यर्थे उपगु + अण् । दैत्यः — दितेरपत्यम् दिति + ण्य । औत्सः — उत्सस्यापत्यम् उत्स + अञ् ।

एको गोत्रे ॥९३॥

अपत्यं पौत्रप्रभृतिगोत्रम् । तस्मिन् गोत्रे एक एव प्रत्ययः । गर्गस्यापत्यं गार्गिः, गार्गेरपत्यं गार्ग्यः । तस्मिन् व्यवहितजनितेऽपि गोत्रापत्ये 'गर्ग' शब्दाद् 'अञ्' एव भवति ।

अपत्यं....गोत्रम्—पारिभाषिकं गोत्रमत्र गृह्यते इत्यर्थः । गोत्रे... प्रत्ययः–गोत्राभिधाने समर्थानां मध्ये एकः एव प्रत्ययो भवति । यञ् एव–यद्यपि गर्गस्यापत्यं गार्गिः, गार्गेरपत्यं गार्ग्यः । परं व्यवहितोऽपि 'यञ्'

प्रत्ययः अपत्यार्थक एव । तथा च 'गर्ग' शब्दाद् 'गर्गादिभ्यो यञ्' इत्यनेन 'यञ्' एव ।

गोत्राद् यून्यस्त्रियाम् ॥९४॥

यून्यपत्ये गोत्रादेव प्रत्ययः । न मूलप्रकृत्यन्तरयुवभ्यः । गार्ग्यस्यापत्यं युवा गार्ग्यायणः । यूनि यदुक्तं तत् स्त्रियां न भवति ।

अयमपि 'एको गोत्रे' इतिवत् नियमः । न भवति-स्त्रियां युव-संज्ञायाः प्रतिषेधात्सा न भवति । तेन गोत्र संज्ञैव पूर्ववत् स्थिता । उदाहरणं **दाक्षी**-दक्षस्य गोत्रापत्यं स्त्री दाक्षि + ङीष् ।

अत इञ् ॥९५॥

अकारान्तादपत्ये इञ् । दाक्षिः ।

अकारान्तात् — ह्रस्वाकारान्तादिति ज्ञेयम् । **दाक्षिः**—दक्षस्यापत्यं पुमान् दक्ष + इञ् । ञित्त्वात् पूर्वस्याकारस्य वृद्धिः । **प्रदीयतां दाशरथाय मैथिली** । अत्र **दाशरथ** इति प्रयोगः दशरथस्यायम् इति 'दशरथ + अण्' बोध्यम् । अपत्यार्थविवक्षायां तु दाशरथिः इति भवति ।

बाह्वादिभ्यश्च ॥९६॥

'बाहु' इत्येवमादिभ्य इञ् । अनकारार्थं आरम्भः । बाहविः इत्यादि ।

बाहविः—बाहुर्नाम ऋषिः तस्यापत्यम् इति बाहु + इञ् 'ओर्गुणः' इत्यनेनोकारस्य गुणः तस्य 'अव्' आदेशः । एवं सुमित्रायाः अपत्यं **सौमित्रिः** ।

सुधातुरकङ् च ॥९७॥

इञ् । तत्संयोगे च तस्य अकङ् आदेशः । सौधातकिः ।

❀(वा०) व्यासवरुडनिषादचण्डालविश्वानां चेष्टः । वारुडकिः । वैश्वकिः ।

सौधातकिः–सुधातुरपत्यं सुधातृ + इञ् ऋकारस्य 'अकङ्' । व्यासस्यापत्यं वैयासकिः व्यास + इञ् अन्त्यस्याकारस्य 'अकङ्' यकारात्पूर्वम् 'ऐच्' इत्यस्यागमः ।

वैश्वकिः–भाष्ये, वृत्तौ, कौमुद्यां च 'विश्वानां' चेति स्थाने 'बिम्बाना'-मिति पाठः बैम्बकिः इत्युदाहरणञ्चोक्तम् ।

गोत्रे कुञ्जादिभ्यश्च्फञ् ॥९८॥

गोत्रापत्ये एभ्यः च्फञ् । कौञ्जायन्यः ।

कौञ्जायन्यः–कुञ्जस्य गोत्रापत्यं कुञ्ज + च्फञ् । चकार-ञकारावित्संज्ञकौ । फकारस्य 'आयन' आदेशः कौञ्जायनः । ततः 'व्रातच्फञोरस्त्रियाम्' इत्यनेन स्वार्थे 'ञ्यः' बहुवचने 'ञ्य' इत्यस्य 'लुक्' कौञ्जायनाः ।

नडादिभ्यः फक् ॥९९॥

गोत्रे । नाडायनः । अन्यत्र नाडिः ।

नडस्य गोत्रापत्यं नाडायनः । अन्यत्र–अपत्यार्थे नाडिः–नड + इञ् ।
❀(वा०) शलङ्कु शलङ्कं च । 'शलङ्कु' इत्यस्मात् 'फक्' तस्य 'शलङ्क' इत्यादेशश्च । शालङ्कायनः । एवम् रण–राणायनः । उदुम्बर–औदुम्बरायणः । अमुष्य (षष्ठचन्तस्य 'अदस्' शब्दस्य) आमुष्यायणः ।

हरितादिभ्योऽञः ॥१००॥

एभ्योऽञन्तेभ्यः फक् । हरितस्यापत्यं हारितायनः । इह तु गोत्राधिकारेऽपि सामर्थ्याद् यूनि प्रत्ययो विज्ञायते ।

हारितायनः — हरितस्य गोत्रापत्यं हरित + अञ् 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' = हारितः । तस्य युवापत्यं हारित + फक् ।

यञिञोश्च ॥१०१॥

यञन्तादिञन्ताच्च फक् । गार्ग्यायणः । दाक्षायणः ।

गार्ग्यायणः — गर्गस्य गोत्रापत्यं गर्ग + यञ् = गार्ग्यः, गार्ग्यस्य युवापत्यं गार्ग्य + फक् ।

दाक्षायणः — दक्षस्य गोत्रापत्यं दक्ष + इञ् = दाक्षिः । दाक्षेः युवापत्यं दाक्षि + फक् ।

शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु ॥१०२॥

एभ्यो गोत्रे 'फक्' क्रमेण एष्वपत्येषु । शारद्वतायनो भार्गवश्चेत् ।

एभ्यः—शरद्वत् – शुनक – दर्भेभ्यः । एष्वपत्येषु—क्रमशः भृगोरपत्ये भार्गवे, वत्सस्यापत्ये वात्स्ये तथा दार्भायणः आग्रायणेऽर्थे । शारद्वतायनः— शरद्वतः गोत्रापत्यं शरद्वत् + फक् भार्गवश्चेत् अन्यः शारद्वतः । एवं शौनकायनो वात्स्यश्चेत् अन्यः शौनकः ! दार्भायणः आग्रायणश्चेद् अन्यः दार्भिः ।

द्रोणपर्वतजीवन्तादन्यतरस्याम् ॥१०३॥

एभ्यो गोत्रे वा फक् । इञोऽपवादः । द्रौणायनः / द्रौणिः । पार्वतायनः / पार्वतिः । जैवन्तायनः / जैवन्तिः । कथं तर्हि भारते द्रौणायनोऽश्वत्थामा ? अनादिरयं द्रोणः ।

फगभावे 'इञ्' तेन द्रौणिः इत्येवमादयः प्रयोगाः सिद्धयन्ति । कथं ···द्रौणायनः—अश्वत्थाम्नः पितुरपि प्राचीनतरोऽयं द्रोणः । उभयोरपि द्रोणयोः श्रुतिः समानैव । तेनानादेर्द्रोणस्यापत्यस्य गोत्रत्वस्यात्र महाभारतीय-द्रोणापत्येऽश्वत्थाम्नि अध्यारोपः क्रियते तेन तस्मिन्नपि 'द्रौणायन' इति प्रयोगो भवति ।

अनृष्यानन्तर्ये बिदादिभ्योऽञ् ॥१०४॥

एभ्यो गोत्रापत्येऽञ् । बैदः । और्वः । येऽत्राऽनृषिशब्दाः

पुत्रादयस्तेभ्योऽनन्तरापत्य एव। अनृष्यानन्तर्यं इत्यस्यायमर्थः-अनृषिभ्यः अनन्तरे भवतीति।

बैदः—बिदस्य गोत्रापत्यम् बिद + अञ्। और्वः—उर्वस्य गोत्रापत्यम्। अनन्तरापत्ये–पुत्रार्थे स एवानन्तरो भवति। अर्थादत्र अपत्यस्य सामान्यमर्थः। आनन्तर्यम् — अव्यवधानम्। अनृषिभ्यः — बिदादिगणे उभयविधाः शब्दाः पठिताः ऋषिवाचकाः, तद्भिन्नाश्च। एवम् ऋषिभिन्नेभ्यः पुत्रादिभ्य इत्यर्थः। अनन्तरे – अपत्यसामान्ये। पुत्रस्यापत्यं पुत्र + अञ् = पौत्रः। दुहितुरपत्यं दौहित्रः। ननान्दुरपत्यं नानान्द्रः।

परस्त्री परशुं च। परस्त्रीशब्दादञ् तस्य 'परशु' इत्यादेशोऽपि भवति। परस्त्रिया अपत्यम्–परस्त्री + अञ् = परशु + अञ् आदेरचो वृद्धिः उकारस्य गुणेऽवादेशे पारशवः।

गर्गादिभ्यो यञ् ॥१०५॥

गोत्रे। गार्ग्यः। वात्स्यः। कथमनन्तरो जामदग्न्यः। पाराशर्यः। गोत्ररूपाध्यारोपेण भविष्यति। अनन्तरापत्यविवक्षायान्तु ऋष्यणैव भवितव्यम्। जामदग्नः। पाराशरः। गर्ग। वत्स। वाजासे। संकृति इत्यादि।

गार्ग्यः–गर्गस्य गोत्रापत्यम् गर्ग + यञ्। ऋष्यणैव–'ऋष्यन्धक....' सूत्रेण 'अण्'। अर्थात् जमदग्नेः अपत्यम् इत्यर्थे गोत्रत्वमध्यारोप्य 'यञ्' जामदग्न्यः। अन्यथा 'अण्' जामदग्नः। वाजासे—इदं गणसूत्रमस्ति। वाजशब्दाद् 'यञ्' असे = असमासे। वाजस्य गोत्रापत्यं वाज्यः। समासे तु वाजिः।

मधुबभ्र्वोर्ब्राह्मणकौशिकयोः ॥१०६॥

आभ्यामनयोर्गोत्रे 'यञ्' यथासंख्यं ब्राह्मणे कौशिके च वाच्ये। माधव्यो ब्राह्मणश्चेद् / माधवोऽन्यः। बाभ्रव्यः कौशिकश्चेद् / बाभ्रवोऽन्यः।

आभ्याम्–मधु – बभ्रुभ्याम् । माधवः — यञोऽभावे 'ऋष्यन्धक.....' इत्यनेन 'अण्' एवं बाभ्रवोऽपि ।

कपिबोधादाङ्गिरसे ॥१०७॥

कपिबोधाभ्यामाङ्गिरसेऽपत्यविशेषे गोत्रे यञ् । काप्यः । बौध्यः ।

काप्यः–कपेः गोत्रापत्यं कपि + यञ् । आङ्गिरसः–बृहस्पतिस्तदर्थे । कापेयः – कपेः तज्जातेरपत्यं कपि + ढक् । बौधिः — बोधस्यापत्यं बोध + इञ् ।

वतण्डाच्च ॥१०८॥

वतण्डशब्दादाङ्गिरसेऽपत्यविशेषे गोत्रे यञ् । वातण्ड्यः ।

वातण्ड्यः – वतण्डस्य गोत्रापत्यम् (आङ्गिरसः) वतण्ड + यञ् । यत्राङ्गिरसोऽपत्यविशेषो नास्ति तत्र वातण्डः । अथ गर्गादिगणे पाठात् वातण्ड्योऽपि । आङ्गिरसार्थे वातण्ड्य एव अनाङ्गिरसे तूभयं रूपमिति विशेषः ।

लुक् स्त्रियाम् ॥१०९॥

वतण्डशब्दादाङ्गिरस्यां स्त्रियां यञ् । अस्य च लुग्भवति । लुकि कृते शाङ्गरवादिपाठात् ङीन् वतण्डी । आङ्गिरस इत्येव वातण्ड्यायनी । शिवाद्यणि वातण्डी ।

वातण्ड्यायनी–वतण्ड + यञ् + ष्फ + ङीष् । वतण्डी–वतण्ड + ङीन् । वातण्डी–वतण्ड + अण् + ङीप् ।

अश्वादिभ्यः फञ् ॥११०॥

गोत्रे । आश्वायनः । ये त्वत्र गोत्रप्रत्ययान्ताः पठ्यन्ते, तेभ्यः सामर्थ्याद्यूनि प्रत्ययो विज्ञायते । आनडुह्यायनः इत्यादि ।

आश्वायनः — अश्वस्य गोत्रापत्यम् अश्व + फञ् । **विज्ञायते**– 'गोत्राद्यूयस्त्रियाम्' इत्यनेन । **आनडुह्यायनः**–'आनडुह्य' शब्दो गर्गादिगणे पठिताद् 'अनडुह्' शब्दाद्यञि कृते निष्पन्नस्तस्मात्पुनर्गोत्रे न प्रत्ययो भवितुमर्हति अतो यूनि फञ् आनडुह्यायनो युवा । आत्त्रेयो भारद्वाजे । **आत्त्रेयायणो** भारद्वाजः । भारद्वाज आत्रेये । **भारद्वाजायन** आत्त्रेयः । यदा अत्रिगोत्रजो भारद्वाजगोत्रजेनाथवा तद्विपर्ययेण एकगोत्रजोऽन्यगोत्रजेन पुत्रत्वेन स्वीकृतस्तदा 'फञ्' भवति ।

भर्गात्त्रैगर्ते॥१११॥

अपत्यविशेषे त्रैगर्तगोत्रे फञ् । भार्गायणो भवति त्रैगर्त्तश्चेद् ।

यत्र त्रैगर्त – गोत्रं नास्ति तत्र 'अत इञ्' इत्यनेन इञ् प्रत्यये भार्गिः ।

शिवादिभ्योऽण् ॥११२॥

'गोत्रे' इति निवृत्तम् । अतः परं सामान्येनापत्यमात्रे प्रत्यया विज्ञायन्ते । यथायथमिञादीनामपवादः । शैवः ।

शैवः–शिवस्यापत्यं शिव + अण् । **गाङ्गः**–गङ्गाया अपत्यं गङ्गा + अण् । गङ्गाशब्दस्य तिकादिगणे पाठात् 'फिञ्' गाङ्गायनिः । शुभ्रादिगणे पाठाद् 'ढक्' गाङ्गेयः ।

अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ॥११३॥

वृद्धिर्यस्याचामादिस्तद् वृद्धम् । अवृद्धानि यानि नदी-मानुषीणां नामधेयानि तेभ्योऽपत्येऽण् । यमुनाया अपत्यं यामुनः । चिन्तिताया अपत्यं चैन्तितः । शैक्षितः । अवृद्धाभ्य इति किम् ? चन्द्रभागाया अपत्यं चान्द्रभागेयः ।

वृद्धम्—व्याकरणे शास्त्रे तद्धिते वृद्धं तद्भवति यस्याचां मध्ये आदिरच् वृद्धिसंज्ञकमस्ति । **यामुनः**–एवं इरावत्या अपत्यम् ऐरावतः ।